# भोजव्याकरणे हृदयहारिणीव्याख्यानस्य वैशिष्ट्यम्

**(BHOJAVYĀKARAṆE HṚDAYAHĀRIṆĪVYĀKHYĀNASYA VAIŚIṢṬYAM)**

*Thesis submitted to University of Calicut*
*for the Degree of*
***Doctor of Philosophy in Sanskrit***

***By***


**ANUPAMA K.**

**DEPARTMENT OF SANSKRIT**
**UNIVERSITY OF CALICUT**


**2023**

**Dr. P. Narayanan Namboodiri**
Professor (Rtd.)
Dept. of Sanskrit
University of Calicut

# CERTIFICATE

This is to certify that this thesis **भोजव्याकरणे हृदयहारिणीव्याख्यानस्य वैशिष्ट्यम्** (**BHOJAVYĀKARAṆE HṚDAYAHĀRIṆĪVYĀKHYĀNASYA VAIŚIṢṬYAM**) submitted for the Degree of Doctor of Philosophy in Sanskrit in the Faculty of Language and Literature in the University of Calicut, is a record of bonafide research carried out by Anupama K. under my guidance. It is also certified that this thesis has not previously formed the basis for the award of any Degree, Diploma or Fellowship or other similar title or recognition in this University.

**Dr. P. Narayanan Namboodiri**
(Supervising Teacher)

C.U. Campus,

21.03.2023

# DECLARATION

I, Anupama K. hereby declare that this thesis, **भोजव्याकरणे हृदयहारिणीव्याख्यानस्य वैशिष्ट्यम्** (**BHOJAVYĀKARAṆE HṚDAYAHĀRIṆĪVYĀKHYĀNASYA VAIŚIṢṬYAM**) submitted for the degree of Doctor of Philosophy in Sanskrit in the Faculty of Language and Literature in the University of Calicut, has not previously formed the basis for the award of any Degree, Diploma or Fellowship or other similar title or recognition in any University.

C.U. Campus, **Anupama K.**

21.03.2023

# उपोद्घातः

वेदार्थज्ञानसाधनानि भवन्ति वेदाङ्गानि। तेषु एकं भवति व्याकरणम्। पाणिनीयशिक्षायां वेदस्य मूर्तिमत्वं प्रकल्प्य वेदस्य मुखं व्याकरणमिति उक्तम्। तस्मादेव तस्य वेदाङ्गस्य कियत् प्राधान्यमस्ति इति अवगन्तुं शक्नोति। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्। शब्दशास्त्रमिति अस्य नामान्तरमस्ति। तस्य प्रारम्भविकासः प्रातिशाख्येषु वर्तते। संस्कृते बहवः व्याकरणसम्प्रदायाः आसन्। प्रकृतिप्रत्ययविभागेन पदानां साधुत्वं व्याकरणेन कर्तुं शक्यते। लोकेषु पाणिनीयव्याकरणस्य अत्यधिकं प्राधान्यं वर्तते। पाणिनेः कालः चतुर्थशतकमित्यनुमीयते। पाणिनिना विरचिता अष्टाध्यायी एव व्याकरणस्य आधारग्रन्थः। आचार्यः अष्टसु अध्यायेषु द्वात्रिंशत्पादेषु व्याकरणनियमान् सूत्ररूपेण प्रतिपादयति। पाणिनेः पूर्ववर्त्तिनां मतानि तेषामाचार्याणां नामस्मरणापूर्वकं पाणिनीये प्रतिपादितानि। कात्यायनः क्रिस्तोः पूर्वं तृतीयशतकीयः भवति। पाणिनिना उक्तानामनुक्तानां दुरुक्तानां च चिन्तनं भवति कात्यायनकृतं वार्त्तिकम्। अष्टाध्यायीसूत्राणां तथा कात्यायनकृतवार्तिकानाञ्च व्याख्यानं भवति पतञ्जलिप्रणीतं महाभाष्यम्। एवं मुनीत्रयस्य चिन्तया प्रवर्तितमिदं व्याकरणं त्रिमुनिव्याकरणमिति प्रसिद्धम्। पाणिनेः पूर्वमेव व्याकरणं व्यवस्थितमिति व्याकरण-महाभाष्यस्य पस्पशाह्निके उक्तम्। 'संस्कृतव्याकरणशास्त्र का इतिहास' इति ग्रन्थे

युधिष्ठिरमीमांसकेन शिव(महेश्वर)-बृहस्पति-इन्द्र-वायु-भरद्वाज-भागुरि-पौष्करसादि-चारायण-काशकृत्स्न-शन्तनु-वैयाघ्रपद्य-माध्यन्दिनि-रौढि-शौनकि-गौतम-व्याडीत्येतेषां षोडशाचार्याणां नामानि प्रतिपादितानि[1]। एवं बोपदेवेन कविकल्पद्रुम इति ग्रन्थारम्भे अष्टवैयाकरणानां नामानि प्रतिपादितानि। यथा-

*"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।*
*पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः।। "* इति।

एवं रामायणस्य उत्तरखण्डे नवव्याकरणस्य उल्लेखनं कृतम्। यथा-

*'ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।*
*सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ।।[2]'*इति।

पाणिनिना अष्टाध्याय्यां सूत्रप्रतिपादनसन्दर्भे केषाञ्चन वैय्याकरणानां नामानि उक्तानि। यथा 'सम्बुद्धौ शाकल्यस्येतावनार्षे'[3], 'लोपः शाकल्यस्य'[4], 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'[5], 'वा सुप्यापिशलेः'[6], 'तृषिमृषिकृशेः काश्यपस्य[7]', 'ओतो गार्ग्यस्य'[8], 'तृतीयादिषु भाषितपुंस्कं

---

1 संस्कृतव्याकरणशास्त्र का इतिहास पु.सं.part 1-६६-६८

2 रामायणम् उत्तरकाण्डः (३६/४७)

3 पा.सू.१/१/१६

4 पा.सू.८/३/१९

5 पा.सू.६/१/१२७

6 पा.सू.६/१/९२

7 पा.सू.१/२/२५

8 पा.सू.८/३/२०

पुंवद्गालवस्य'[9], 'ऋतो भरद्वाजस्य'[10], 'लङः शाकटायनस्यैव'[11], 'गिरेश्च सेनकस्य'[12], 'ई३चाक्रवर्मणस्य'[13], 'अवङ्स्फोटायनस्य'[14] इत्यादिभिः सूत्रैः शाकल्य-आपिशल-काश्यप-गार्ग्य-गालव-भरद्वाज-शाकटायन-सेनक-चाक्रवर्मण-स्फोटायनादीनां आचार्याणां स्मरणं कृतम्। तस्मात् एते आचार्याः पाणिनेः पूर्ववर्तिनः इति वक्तुम् शक्यन्ते।

पाणिनेः कालानन्तरमागतानां षोडशवैय्याकरणानां नाम युधिष्ठिरमीमांसकः तस्य व्याकरणशास्त्र का इतिहास इति ग्रन्थे प्रतिपादयति। ते कातन्त्रकारः, चन्द्रगोमी, क्षपणकः, देवनन्दी, वामनः, पाल्यकीर्तिः, शिवस्वामी, भोजदेवः, बुद्धिसागरः, भद्रेश्वरसूरी, वर्धमानः, हेमचन्द्रः, मलयगिरिः, क्रमदीश्वरः, सारस्वतव्याकरणकारः, रामाश्रम सिद्धान्तचन्द्रिकाकारः, वोपदेवः, पद्मनाभः, विनयसागर इति भवन्ति।[15] कातन्त्रजैनेन्द्रसारस्वतादिव्याकरणग्रन्थेषु पाणिनेः प्रभावः दृश्यते च।

पाणिनेः अनन्तरमागतेषु व्याकरणग्रन्थेषु भोजव्याकरणं महनीयं स्थानमलङ्करोति। भोजदेवेन पाणिनीयस्याधारेणैव सूत्राणि प्रयुक्तानि। तथापि पाणिनिप्रयुक्ताः सर्वाः संज्ञाः, तथा

---

9 पा.सू.७/१/७४

10 पा.सू.७/२/६३

11 पा.सू.३/४/१११

12 पा.सू.५/४/११२

13 पा.सू.६/१/१३०

14 पा.सू.६/१/१२३

15 व्याकरणशास्त्र का इतिहास पुटसंख्या.६०८

गणपाठादयः भोजदेवेन नाङ्गीक्रियन्ते। भोजदेवस्य व्याकरणग्रन्थो भवति सरस्वतीकण्ठाभरणम्। भोजदेवेन सरस्वतीकण्ठाभरणम् इति नामकः अलङ्कारग्रन्थोऽपि विरचितः। सरस्वतीकण्ठाभरणमिति व्याकरणशास्त्रग्रन्थस्य उपलभ्यमानं व्याख्यानं भवति हृदयहारिणी। तत्तु दण्डनाथनारायणभट्टेन विरचितम्। सरस्वत्याः कण्ठे विद्यमानं तदाभरणं सहृदयानां हृदयं हर्तुं समर्थं भवतीत्यनेन हृदयहारिणी इति नाम सार्थकमभवत्। हृदयहारिणी इति इयं व्याख्या षष्ठाध्यायपर्यन्तमेव चतुर्षु भागेषु प्रसिद्धीकृता। प्रथमभागः द्वितीयभागः तृतीयभागश्च के.साम्बशिवशास्त्रिणः सम्पादनेन अनन्तशयने महोन्नतमहामहिमश्रीचित्रावतार-महाराजशासनेन राजकीयमुद्रणयन्त्रालये तदध्यक्षेण मुद्रयित्वा १९३५, १९३७, १९३८ वर्षेषु प्रकाशिताः। प्रथमभागे प्रथमाध्यायः, द्वितीयभागे द्वितीयाध्यायश्च अन्तर्भवति। तृतीयभागे तृतीयचतुर्थावध्यायौ स्तः। १९४८ तमे ट्रिवेन्ड्रं सर्वकारीयमुद्रणालयात् वि.ए.रामस्वामिशास्त्रिणः सम्पादनेन प्रकाशिते चतुर्थभागे पञ्चमषष्ठाध्यायौ स्तः। हृदयहारिणीव्याख्यायाः सप्तमाध्यायोऽप्रकाशितः भवति। तस्य हस्तलेखः अडयार्ग्रन्थशालायाः प्राप्तः। तत्र २४२ पुटानि सन्ति। कुत्रचित् स्पष्टता नास्ति च। हृदयहारिण्याः सप्तमाध्याययुक्ता पर्णलेखा अनन्तपुर्याः मानुस्क्रिप्ट् ग्रन्थशालायाः प्राप्ता। तत्र सप्तमाध्यायप्रतिपादकानि ४४ पर्णानि सन्ति। सा पर्णलेखा अनन्तपुर्याः राजभवनात् ग्रन्थशालां प्राप्ता। तस्याः पर्णलेखायाः आधारेणैव षष्ठाध्यायपर्यन्तम् अनन्तपुर्याः के. साम्बशिवशास्त्रिणः तथा वि.ए.रामस्वमिशास्त्रिणः सम्पादनेन प्रसिद्धीकृतम्। सप्तमाध्यायस्य मुद्रणाय श्रमः कृत इति पर्णलेखायाः पठनेन स्पष्टं ज्ञायते। तत्र केषुचन पर्णेषु 'end of the first /second /third forum' इति दृश्यते। मुद्रितस्य

पर्णस्यैव शोधनार्थम् एवं लिखतीति तत्रत्य कार्यकर्तृणां वाक्यैः ज्ञायते। षष्ठाध्यायस्य मुद्रणं १९४८ तमे वर्षे आसीत्। तत्समीपे एव कदाचित् षष्ठाध्यायस्य सम्पादकेनैव सप्तमाध्यायस्य मुद्रणाय प्रयत्नः कृतः स्यात्। परन्तु तस्य प्रसिद्धीकरणं येनकेनापि कारणेन नाभवत्। अष्टामाध्यायस्य हृदयहारिणीव्याख्या न प्राप्ता च।

'भोजव्याकरणे हृदयहारिणीव्याख्यानस्य वैशिष्ट्यम्' इत्यस्मिन् गवेषणप्रबन्धे पञ्चाध्यायाः सन्ति। 'भोजचरितं योगदानञ्च' इति प्रथमे अध्याये भोजराजस्य कालः, चरितं, संस्कृतभाषाभिरुचिः, रचनादयश्च प्रतिपाद्यन्ते। अष्टाध्याय्याः सरस्वतीकण्ठाभरणस्य कांश्चन भेदान् प्रदर्श्य सरस्वतीकण्ठाभरणस्य परिचयः द्वितीये अध्याये कृतः। 'सरस्वतीकण्ठाभरणस्य व्याख्याकाराः' इति भवति तृतीयोऽध्यायः। भोजव्याकरणस्य बह्व्यः व्याख्याः सन्ति चेदपि संस्कृते हृदयहारिणीव्याख्या एव उपलब्धा। तत्र भोजव्याकरणास्य व्याख्याकाराणां हृदयहारिणीव्याख्यायाः तथा ग्रन्थकारस्य दण्डनाथनारायणस्य लघुविवरणं दत्तम्। 'हृदयहारिणीव्याख्यानस्य अध्यायानां विवेकः' इति चतुर्थे अध्याये हृदयहारिण्याः प्रत्यध्यायं प्रतिपादं किमुक्तमिति विवरणं दत्तम्। सरस्वतीकण्ठाभरणात् हृदयहारिण्यां बहवः भेदाः सन्ति। भोजदेवेनानुक्तानि नूतनानि सूत्राणि दण्डनाथेन प्रयुक्तानि। इमे विषयाः चतुर्थे अध्याये प्रतिपादिताः।

'हस्तलिखितपाठस्याध्ययनम्' इति पञ्चमे अध्याये भोजव्याकरणस्य सप्तमाध्यायस्य हृदयहारिणीव्याख्यानमेव स्वीकृतम्। पाणिनीयसूत्राणामध्ययनाय बहूनि व्याख्यानानि द्रष्टुं

शक्यते। किन्तु भोजव्याकरणाध्ययने आश्रयणाय संस्कृते हृदयहारिणी एव उपलब्धा। तत्तु षष्ठाध्यायपर्यन्तमेव प्रकाशितम्। तस्मात् अप्रकाशितस्य सप्तमाध्यायस्य चयनं कृतम्। तत्र अष्टाध्याय्याः कस्य सूत्रस्याधारेण एकैकं सूत्रं प्रतिपादितं, एकैकस्य सूत्रस्य प्रतिपाद्यविषयः कः, कौमुद्यां हृदयहारिण्यां सूत्रवृत्तिः कथमुक्तम्, हृदयहारिणीकारेण सूत्रव्याख्यानावसरे कः विशेषप्रयोगः कृतः इत्येतानि कार्याणि चर्चितानि।

अस्य प्रबन्धसमर्पणाय बहुभिः अध्यापकैः सुहृद्भिः च साहाय्यं कृतम्। मम मार्गनिर्देशकस्य डॉ. पि. नारायणन् नम्पूतिरिमहाशयस्य निर्देशोपदेशैः तथा सर्वकलाशालायाः संस्कृतविभागाध्यक्षः डॉ. के.के. अब्दुल्मजीद्, प्रो. एन्. के सुन्दरेश्वरन्, प्रो. के.के. गीताकुमारी इत्येतेषाम् अध्यापकानामनुग्रहैः प्रबन्धोऽयं समर्पितः। तथा कालिक्कट्ट् सर्वकलाशालायाः मानुस्क्रिप्ट् ग्रन्थशालायाः कार्यकर्तारः, तिरुवनन्तपुरं मानुस्क्रिप्ट् ग्रन्थशालायाः अध्यक्षा डॉ. आर्. बी. श्रीकला तत्रत्य कार्यकर्तारः विशिष्य षाजिमहोदयः, चेन्नै अटयार् ग्रन्थशालायाः कार्यकर्तारः, मम सुहृदः विशिष्य डॉ. पि. शारिका, डॉ. पि.एम्. वृन्दा इत्येतेभ्यः सर्वेभ्यः धन्यवादं समर्पयामि। भोजव्याकरणस्य हृदयहारिणीव्याख्यानस्य सप्तमाध्यायः सर्वैः प्रप्तव्यः इति धिया तस्य अध्ययनस्य पठनं मया कृतम्। प्राप्तेभ्यः हस्त-पर्णलेखेभ्यः लब्धं व्याख्यानं अस्य प्रबन्धस्यान्तिमे योजितं वर्तते।

## संक्षेपसूची।

| | | |
|---|---|---|
| अ. | - | अष्टाध्यायी |
| अ.को. | - | अमरकोशः |
| पा.सू. | - | पाणिनूयसूत्रम् |
| पु.सं. | - | पुटसंख्या |
| भो.प्र. | - | भोजप्रबन्धः |
| म.भा. | - | महाभाष्यम् |
| का.प्र. | - | काव्यप्रकाशः |
| वा. | - | वार्तिकम् |
| स.क. | - | सरस्वतीकण्ठाभरणम् |
| स.क.(अलङ्कारः) | - | सरस्वतीकण्ठाभरणम्(अलङ्कारः) |
| श्लो.सं. | - | श्लोकसंख्या |
| हृ.हा. | - | हृदयहारिणी |

# विषयानुक्रमणिका।


**उपोद्घातः।..................................................................i – vi**

**संकेतसूची।.................................................................. vii**

**प्रथमोऽध्यायः- भोजचरितं योगदानञ्च।............................................ 1 – 22**

भोजदेवस्य कालः। ...............................................................1

जीवनचरितम्। ................................................................. 2

रचनाः। ....................................................................... 5

**द्वितीयोऽध्यायः- भोजव्याकरणस्य परिचयः।................................ 23 – 30**

सरस्वतीकण्ठाभरणस्य प्रतिपाद्यविषयाः। ..........................................26

**तृतीयोऽध्यायः- सरस्वतीकण्ठाभरणस्य व्याख्याकाराः। ......................31 – 37**

स्वोपज्ञाव्याख्या। ............................................................... 31

पुरुषकारः। ......................................................................32

रत्नदर्पणः। .....................................................................33

प्रक्रियाग्रन्थः। ..................................................................33

डॉ.नारायणकासारामहाभागस्य व्याख्या। ..............................................34

हृदयहारिणीव्याख्या। ...........................................................34

दण्डनाथनारायणभट्टस्य परिचयः। ...................................................36

**चतुर्थोऽध्यायः - हृदयहारिणीव्याख्यानस्य अध्यायानां विवेकः।...................38 – 81**

प्रथमोध्यायः ...................................................................38

द्वितीयोऽध्यायः ................................................................46

तृतीयोऽध्यायः...................................................................54

चतुर्थोऽध्यायः .................................................................. 60

पञ्चमोऽध्यायः ..................................................................65

षष्ठोऽध्यायः ....................................................................69
सप्तमोऽध्यायः ..................................................................73
**पञ्चमोऽध्यायः- हस्तलिखितपाठस्याध्ययनम्।.................................. 82 – 326**
सप्तमोऽध्यायः-प्रथमपादः। ..........................................................83
सप्तमोऽध्यायः- द्वितीयपादः। ..................................................... 136
सप्तमोऽध्यायः- तृतीयपादः। ...................................................... 196
सप्तमोऽध्यायः- चतुर्थपादः। ......................................................258
**षष्ठोऽध्यायः- उपसंहारः उपनिर्देशाश्च। .......................................327 – 333**
(CONCLUSION AND RECOMMENDATION)
**सहायकग्रन्थाः। (BIBLIOGRAPHY) ..................................334 – 339**
APPENDIX
ORIGINAL TEXT (TRANSCRIPT AND MANUSCRIPT)

# प्रथमोऽध्यायः।

# **भोजचरितं योगदानञ्च।**

प्रकृतिप्रत्ययविभागेन पदानां साधुत्वबोधकं शास्त्रं भवति व्याकरणम्। संस्कृते बहवः व्याकरणसम्प्रदायाः आसन्। तेषु पाणिनीयव्याकरणस्यैव लोके सर्वत्र प्रचारः जातः। तस्मादेव पाणिनेः प्राक्, पाणिनेः पश्चात् इति गणना आरब्धा। पाणिनेः कालानन्तरं तत्पूर्वमपि अनेके वैयाकरणाः आसन्नस्माकं पुण्यभूमौ। पाणिनेः प्राक् वर्तितानां वैयाकरणानां नामानि पाणिनिः स्वग्रन्थेषु स्मरति। पाणिनेः पश्चात् लिखितेषु व्याकरणशास्त्रग्रन्थेषु पाणिनेः प्रभावः दृश्यते च।

पाणिनेः अनन्तरमागतेषु व्याकरणसम्प्रदायेषु 'भोजव्याकरणं' गणनीयं स्थान-मलङ्करोति। भोजदेवः न केवलं वैयाकरणः अपि तु साहित्यज्योतिषादिषु शास्त्रेषु निपुणः आसीत्। एवं भूतस्य अस्य महाभागस्य जीवनचरितस्य तथा रचनानां च परिचयात्मको भवत्ययम् अध्यायः।

**भोजदेवस्य कालः।**

साहित्यशास्त्रे तथा व्याकरणशास्त्रे च युगपद् प्रथितयशस्वी भोजदेवः मालवादेशस्य धारानगर्याः राजा आसीत्। अस्य कालः एकादशशतकमिति प्रायेण स्वीक्रियते। तथापि अस्य कालमधिकृत्य विदुषां मतानि अत्र प्रस्तूयन्ते। यथा अस्य कालः १०७५-७६ संवत्सरः इति

किञ्चित्प्राप्तं ताम्रपत्रं सूचयति। अतः तस्य कालः एकादशशतकस्य पूर्वार्द्धः स्यात् इति अनुमीयते।[1] आचार्यः हेमचन्द्रः स्वकीये काव्यानुशासने भोजदेवम् उल्लिखितवान्। हेमचन्द्रस्य जन्म वि.सं.११५४ आसीत्। अतः भोजराजस्य कालः ई एकादशशतकस्य पूर्वार्धं स्यादित्यनुमीयते। [2] युधिष्ठिरमीमांसकः भोजस्य राज्यशासनकालः १०१५ ई तः १०५४ ई पर्यन्तं मन्यते।[3] आचार्यः मम्मटः स्वकीये 'काव्यप्रकाशे' भोजम् अनुस्मरति भोजनृपतेस्तत् त्यागलीलायितम् इति।[4] मम्मटस्य कालः एकादशशतकस्य उत्तरार्धं भवति। अतः भोजस्य कालः एकादशशतकस्य पूर्वार्ध इति निश्चेतुं शक्यते।

**जीवनचरितम्।**

'सरस्वतीकण्ठाभरण और सिद्धान्तकौमुदी का साङ्गोपाङ्गविवेचन' इति नामके ग्रन्थे भोजस्य चरितं एवं प्रतिपाद्यते यत् भोजदेवस्य पूर्वजानां मालवायाः परमारवंशस्य सम्बद्धो वर्तते। मध्यकालीनभारतीय इतिहासे एकैव परमारवंशो आसीत्, तेन साहित्यस्य सारस्वतसाधनायां महत्त्वपूर्णयोगदानं कृतम्। परमारवंशस्य उद्भवेन सह सम्बन्धः विविधकिंवदन्त्यः प्रचलिताश्चेदपि एतत् कार्यं सर्वैः अङ्गीकृतं वर्तते यत् मालवादेशस्य धारानगर्याः उपेन्द्रनामकेन (कृष्णराज/गजराज) राज्ञा परमारवंशस्य स्थापना कृता इति।

---

1 सरस्वतीकण्ठाभरण का समीक्षात्मक अध्ययन, डा.विश्वनाथशास्त्री-पु.सं३४

2 हेमचन्द्र और उनका शब्दानुशासन, नेमिचन्द्रशास्त्री पु.सं. ११

3 संस्कृतव्याकरणशास्त्र का इतिहास-युधिष्ठिरमीमांसकाः,पु.सं.७०५

4 काव्यप्रकाशः १०/५०५

उपेन्द्रस्य वंशपरम्परायाः उत्तराधिकारिणः विविधराजवंशीयैः सह युद्धं कृतवन्तः। एवं प्रकारेण वैरसिंहस्य उत्तराधिकारिरूपेण सीयकदेवस्य (द्वितीय) उद्भवः अभवत्। सीयकदेवः अत्यन्तं पराक्रमी तथा बलवान् चासीत्। तस्य शासनकालः ९४९ ई तः ९७२ ई पर्यन्तमासीत् इति पण्डितानां मतम्। सोऽयं सीयकदेवः भोजस्य पितामहः आसीत्। तेन मालवा इति स्वतन्त्रराज्यस्य स्थापना कृता। सीयकदेवस्य उत्तरकाले जैनमुनितः दीक्षां प्राप्य प्रायः ९७४ ई वर्षे मुञ्जः (वाक्पतिराजः) राजपदवीं स्वीकृतवान्। मुञ्जः विलक्षणप्रतापी एवं विद्वान् च राजा आसीत्। सः प्रायः ९९५ वर्षे चालूक्यनरेशेन तैलपद्वितीयेन मारितः। तदनन्तरं कनिष्ठेन ९९६-१००९ ई कालयोः सिन्धुलराजेन परमारवंशस्य राजपदवी आरूढा। सिन्धुलः अद्भुतविक्रमशाली राजा आसीत्। सः कोशल, कोंकण तथा चालूक्यराजं च पराजितवान्। परन्तु अन्ते सोलंकी चामुण्डराजेन सिन्धुलः पराजितोऽभूत्। अस्य सिन्धुलराजस्य वृद्धत्वे जातः पुत्रो भवति भोजदेवः। भोजराजः धाराधीशेति प्रथितः परमारवंशे जातः महाराजस्य सिन्धुलस्य पुत्रः माता चास्य सावित्री देवी चासीत् इति भोजप्रबन्धात् ज्ञायते। सिन्धुराजस्य उत्तराधिकारिरूपेण भोजदेवः आगतः। अस्य शासनकालः ८५०AD तः २०० AD भवति। धारानरेशः सोऽयं भोजदेवः कविषु अग्रगण्यः आसीत्। बहवः कवयः तस्य उत्तममित्राणि आसन्। सः विदुषाम् आदरं कृतवान्। अस्य साहित्यक्षेत्रे तथा कलाक्षेत्रे च विशेषाभिरुचिः अवर्तत। अयं लुप्तप्रायं संस्कृतं पुनरुद्धृतवान् इति उच्यते।

*विप्रोऽपि यो भवेन्मूर्खः स पुराद् बहिरस्तु मे।*
*कुम्भकारोऽपि यो विद्वान्स तिष्ठतु पुरे मम।।*[5]

यः कुम्भकारः भवति सः विद्वानपि मम पुर्यां सर्वदा स्वागतार्हः भवति। यदि विप्रोऽपि मूर्खः चेत्  तेन पुरात् बहिर्गन्तव्यः इति प्रतीयमानेन अनेन श्लोकेन संस्कृतस्य तथा ज्ञानस्य आर्जने तस्य प्रोत्साहनं द्रष्टुं शक्यते। एतस्य समये काष्ठवाहकाः तन्तुवायाः अपि संस्कृतभाषया भाषन्ते स्म। एतद्विषये भोजप्रबन्धे वल्लालेन एवमुच्यते यथा एकदा धारानगर्यां देशान्तरात् कश्चन विद्वान् आगतः। तदा तत्र नगर्याम् एकमपि गृहं रिक्तं नासीत्। तस्य आगतस्य अतिथेः पूजा करणीया। अतः राजपुरुषः कञ्चित् तन्तुवायं तस्य गृहं रिक्तं कृत्वा आगतस्य विदुषः वासव्यवस्था कल्पनीया इति उक्तवान्। सः तन्तुवायः तु राज्ञः राजसदनं गत्वा स्वदुःखम् इत्थं निवेदितवान्।

*काव्यं करोमि न हि चारुतरं करोमि यत्नात् करोमि यदि चारुतरं करोमि।*
*भूपालमौलिमणिमण्डितपादपीडा हे साहसाङ्क कवयामि वयामि यामि।।*[6] *इति।*

एवमेकदा कश्चन वृद्धः काष्ठवाहकः भेजराजेन पृष्टः यत् *"भूरि भारभराक्रान्तो बाधति स्कन्ध एष ते"* इति। भवतः स्कन्धः अधिकभारेण बाधते खलु इति अस्याशयः। तस्य समाधानं वृद्धेनैवमुक्तम् यथा - *"न तथा बाधते राजन् यथा बाधति बाधते"* इति। बाधते इति आत्मनेपदप्रयोगो भवति। राज्ञः 'बाधति' इति प्रयोगः काष्ठभारात् अधिकं मां 'बाधते' इति वृद्धस्य कथनस्यार्थः। विक्रमादित्यस्य कालानन्तरं भोजराजेन कृतेन प्रयत्नेन संस्कृतभाषा

---

5 भो. प्र ७४

6 भो.प्र. ९४

तत्कालिकजनानां लौकिकव्यवहारभाषा अभूत्।

**रचनाः।**

भारतीयेतिहासे भोजसदृशराजाः विरलाः एव आसन्। यतः तस्य कलानैपुण्यं साहित्यगरिमा च अन्यादृशे आस्ताम्। तदुच्यते

*कविषु वादिषु भोगिषु देहिषु द्रविणवत्सु सतामुपकारिषु।*
*धनिषु धन्विषु धर्मधनेष्वपि क्षितितले नहि भोजसमो नृपः।।*[7]

भोजदेवेन संस्कृतस्य विविधक्षेत्रेषु स्वीयं योगदानं कृतं वर्तते। 'सरस्वतीकण्ठाभरणं' नामक ग्रन्थद्वयं, 'शृङ्गारप्रकाशः', 'समराङ्कणसूत्रधारः', 'चारुचर्या', 'युक्तिकल्पतरुः', 'तत्त्वप्रकाश' इत्यादयः ग्रन्थाः तेषु केचन एव। भोजेन स्वकीये 'योगसूत्रवृत्तौ' उक्तेन अनेन श्लोकेन तैः कृतानां केषाञ्चनग्रन्थानां परिचयः दीयते। यथा

*शब्दानामनुशासनं विदधता पातञ्जले कुर्वता वृत्तिं*
*राजमृगाङ्कसंज्ञकमपि व्यातन्वता वैद्यके।*
*वाक्चेतो वपुषां मलः फणिभृतां भर्तेव येनोद्धृताः*
*तस्य श्रीरणरङ्गमल्लनृपतेर्वयो जयन्त्युज्ज्वलाः।।*

अनेन श्लोकेन अयं भोजराजः 'सरस्वतीकण्ठाभरणं', 'योगसूत्रवृत्तिः', 'राजमृगाङ्कः' इति ज्योतिश्शास्त्रग्रन्थादीनां कर्ता इति ज्ञायते। एवमेव जैनभिक्षुणा चन्द्रप्रभासूरिणा स्वकीये ग्रन्थे 'प्रभावकचरिते' भोजकृतीनां परिचयः विहितः।

---

7 भो.प्र.१६३

*भोजव्याकरणं ह्येतत् शब्दशास्त्रं प्रवर्तते।*
*असौ हि मालवाधीशो विद्वच्चक्रशिरोमणिः।।*
*शब्दालङ्कारायुर्वेदतर्कशास्त्राणि निर्ममे।*
*चिकित्सा राजसिद्धान्ततरुवास्तूदयानि च।।*
*अङ्कशाकुनकाध्यात्मस्वप्नसामुद्रिकाण्यपि ।*
*ग्रन्थाभिमतव्याख्यानप्रश्नचूडामणीमिह।।* [8]

एतैः श्लोकैः अनेके शास्त्रप्रतिपादकाः ग्रन्थाः भोजेन रचिताः इति ज्ञायन्ते। 'चम्पूरामायणं' इति प्रसिद्धं चम्पूकाव्यं तेषु एकमेव। सः ज्योतिषमधिकृत्य 'आदित्यप्रतापसिद्धान्तराजमार्तण्डराजमृगाङ्कविद्वज्जनवल्लभेति' ग्रन्थचतुष्टयं विरचितवान्। शैवधर्ममधिकृत्य 'तत्त्वप्रकाशशिवतत्त्वरत्नकलिका सिद्धान्तसङ्ग्रहाः' चेति ग्रन्थत्रयं, धर्मशास्त्रमधिकृत्य 'चारुचर्या' 'व्यवहारसमुच्चयः' इति ग्रन्थद्वयं, आयुर्वेदमधिकृत्य 'आयुर्वेदसर्वस्वं' 'विश्रान्तविद्याविनोद' इति ग्रन्थद्वयञ्च विरचितवान्। शिल्पशस्त्रविषये तेन कृतः ग्रन्थः भवति 'समराङ्गणसूत्रधारः'। पुनश्च अश्वचिकित्साविषयको ग्रन्थो भवति 'शालीहोत्र' इति। वास्तुविद्याप्रतिपादकः 'युक्तिकल्पतरु' इति ग्रन्थः तेन रचितः। शब्दकोशविषयकः 'नाममालिका' इति ग्रन्थोऽपि तस्य रचनायां अन्यतमो वर्तते। योगदर्शनमधिकृत्य 'राजमार्ताण्डटीकाग्रन्थः' राजनीतिविषयमधिकृत्य 'चाणक्यनीतिग्रन्थश्च' तेन विरचितौ भवतः। काव्यविषये 'चम्पूरामायणं' 'विद्याविनोदः' चेति ग्रन्थद्वयं तेन प्रणीतं वर्तते। तेन सुभाषितविषयेऽपि 'सुभाषितप्रबन्धः' इति कश्चन ग्रन्थः लिखितः। अलङ्कारशास्त्रे प्रसिद्धं

---

8 प्रभावकचरितं पु.सं.३०० श्लोकः-७५-७७

ग्रन्थद्वयं 'सरस्वतीकण्ठाभरणं' 'शृङ्गारप्रकाश'श्चेति भोजरचनावैभवं प्रकाशयति। भोजदेवेन सामान्यतः चतुरशीत्यधिकाः ग्रन्थाः विरचिताः तेषु केचन प्रकाशिताः केचन अप्रकाशिताः च भवन्ति। तेषु अप्रकाशितेषु केचन 'अनन्तपुर्यां', 'चेन्नैनगर्यां', 'मैसूर्नगरे', 'पूनायाम्', 'उज्जयिन्यां' च ग्रन्थालयेषु हस्तलेखरूपेण संरक्षिताः सन्ति। Catalogus catalogorum part I इत्यस्मात् भोजेन ३८ पुस्तकानि विरचितानि इति ज्ञायते। तानि 'सुभाषितप्रबन्धः', धर्मशास्त्रे - 'भूपालपद्धतिः', 'भूपालसमुच्चयः', 'चाणक्यनीतिः' (दण्डनीतिः), 'चारुचर्या', 'राजनीतिः', 'राजमृगाङ्कः', 'व्यवहारसमुच्चयः', 'युक्तिकल्पतरु', व्याकरणे 'सरस्वतीकण्ठाभरणं', 'अमरव्याख्या', 'नाममालिका', 'संगीतप्रकाशिका', तत्त्वचिन्तादर्शनेषु 'पतञ्जलिकृतयोग-सूत्रव्याख्यानं', 'राजमार्ताण्डः', 'सिद्धान्तसंग्रहः', 'सिद्धान्तसारः', 'तत्त्वप्रकाशः' (शिवतत्त्व-प्रकाशः) गद्यविभागे 'महाकालविजयविद्याविनोदः' इत्यादयः।

भोजराजस्य समकालिकः परान्तकः स्वकीये 'श्यामलादण्डक'नाम्नि ग्रन्थे भोजमधिकृत्य तस्य ग्रन्थान् चाधिकृत्य प्रतिपादयति।

*धाराधीशो धाराधीशो धारायां धनदोपमः।*
*बभार राज्यं भोजाख्यो दानमानैश्च पण्डितान् ।।*
*म्लेच्छेनम्लोचयद्वीवरो द्वारिकायां विराजितः*
*शङ्कराचार्यगुरूणां स्वयं मोषिणो मतदूषिणः*
*लोकाक्षिरससंख्याक(९२३) शकाब्दे पूर्णिमातिथौ*
*श्रावणे मासि विप्रेभ्यः कविभ्यो व्यतरन् मुदा*
*ग्रामान्सोमोद्भवातीरे शतं यो गिरिशः प्रियः*
*सरस्वतीकण्ठभूषां सरसालंकृतिद्युतम्(द्युतिम्)।*

*प्राणयत कीर्तिकायस्य प्रायच्छत्  स्वस्य नित्यताम्*
*जीयतां तद्यशोनित्यमाचन्द्रार्कं द्युभूषणम्।*
*महादेवद्विजश्चैव महाकालस्य पूजकः*
*पुरान्तकस्तस्य पुत्रः पुरारेः कृपयाभवत्।*
*श्यामलायाः प्रसादाद्य श्यामलादण्डकं व्यधात्*
*वाग्देवी तस्य वश्याभूत् वाचो वाचस्पतेरिव*
*तस्मै ग्रामान् शतमदात् शिवप्रसारसेविनः।।* [9]

मेरुतुङ्गाचार्यः स्वकीये 'प्रबन्धचिन्तामणौ' भोजः ५५ वर्षाणि सप्तमासान् दिनत्रयञ्च राज्यशासनं कृतवान् इति वदति।

*पञ्चाशत् पञ्चवर्षाणि सप्तमासादिनत्रयं*
*भोजराजेन भोक्तव्यः सगौडो दक्षिणा पथः।।* इति।

भोजराजे दिवंगते सर्वे पण्डिताः अनाथाः अभवन् इति सूच्यते अनेन श्लोकेन-

*अद्य धारा निराधारा निरालम्बा सरस्वती।*
*पण्डिताः खण्डिताः सर्वे भोजराजे दिवंगते।।* [10] इति।

ततः जनानां प्रार्थनया देवैः यदा भोजराजः पुनरुज्जीवितः तदा श्लोकोऽयं एवं परिवर्तितः।

*अद्य धारा सदाधारा सदालम्बा सरस्वती*
*पण्डिताः मण्डिताः सर्वे भोजराजे भुवंगते।।* [11] इति।

भोजराजस्य पुनरुज्जीवनम् इत्यनेन तं प्रति जनमनसि सर्वदा वर्तमाना स्मृतिः तस्य

9 सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन पु.सं.१७

10 भो.प्र.पु.सं.१६३

11 भो.प्र.पु.सं.१७२

औन्नत्यं महत्त्वं च अस्माभिरवगम्यते।

**शालिकथा ।**

भोजदेवस्य काव्यसाहित्येषु एकं भवति 'शालिकथा'। अस्य ग्रन्थस्य प्रतिपाद्यं किमिति स्पष्टतया प्रतिपादनमशक्यम्। 'राजा भोज का रचना विश्व' नामके ग्रन्थे ग्रन्थकर्ता भगवतिलाल राजपुरोहितः अस्य ग्रन्थस्य स्वरूपस्य विषयवस्तुनः वा अनुपलब्धेः प्रतिपादनं नाममात्रेणैव अकरोत्। तद्विषयकज्ञानाभावात् नाधिकं प्रस्तोतुं शक्येत इति प्रतिपादितम् एवात्र अद्यावधि प्राप्तं प्रमाणम्।

**शृङ्गारमञ्जरीकथा ।**

भोजदेवस्य गद्यकृतिषु अन्यतमा भवति 'शृङ्गारमञ्जरीकथा'। कथानायिकायै शृङ्गारमञ्जर्यै दत्तं वेश्योपदेशं आधारीकृत्य रचिता। अस्यां कथायां त्रयोदश कथानिकाः सन्ति। ताः क्रमशः 'रविदत्तकथानिका', 'विक्रमसिंहकथानिका', 'माधवकथानिका', 'सूरधर्म-कथानिका', 'देवदत्तकथानिका', 'लावण्यसुन्दरीकथानिका', 'कुट्टनीवञ्चनकथानिका', 'स्त्र्यनुरागकथानिका', 'उभयानुरागकथानिका', 'सर्पकथानिका', 'मलयसुन्दरीकथानिका', 'पद्मरागकथानिका' तथा 'मूलदेवकथानिका' इति भवन्ति। अस्याः कथायाः द्वादशस्य पद्मरागकथानिकायाः अन्तिमे इयं कृतिः भोजदेवेन कृता इत्यस्य प्रमाणं द्रष्टुं शक्यते। यथा 'इति श्रीमहाराजाधिराजपरमेश्वरश्रीभोजदेवविरचितायां शृङ्गारमञ्जरीकथायां पद्मरागकथानिका-

द्वादशीसमाप्ता' इति।[12] भोजदेवः शृङ्गारमञ्जरीकथायाः आदौ अस्याः सृष्टेः प्रेरणाविषये कथयति। यत् धारानगर्यां भोजराजस्य शासनकाले शृङ्गारमञ्जरी नामिका काचित् कलानिपुणा नारी आसीत्। तस्यै तस्याः मात्रा विषमशीलया दत्तः वेश्योपदेश एव अस्याः कथायाः प्रतिपाद्यम्। वेश्यया आगतस्य एकैकस्य मानवस्य इङ्गितं ज्ञात्वा व्यवहर्तुं प्रधानतया रागस्य आवश्यकतां प्रतिपाद्य 'द्वादशरागानां' 'रीति', 'लाक्षा', आदीनां निमित्तम् उदाहरणरूपेण त्रयोदशकथाः श्रावयति। ताश्च कथानिका नाम्नि प्रतिपाद्यन्ते। एवं 'मालिनी', 'शिखरिणी', 'अनुष्टुप्' इत्येतैः वृत्तैः कांश्चन श्लोकान् च प्रतिपाद्य भोजः स्वकीयं शृङ्गारमञ्जरीकथां समापयति।

**विश्रान्तविद्याविनोदः**।

भोजदेवस्य काव्यसाहित्यसम्बन्धा इयं कृतिः 'विद्याविनोद' इत्यपि आख्यायते। शालीकथावत् इयमपि अप्राप्ता भवति। तस्मादेव अत्रत्य प्रतिपाद्यः विषयः कः इति स्पष्टतया वक्तुं न शक्यते। 'राजा भोज का रचना विश्व ' इति ग्रन्थे ग्रन्थकारः बुल्लर् महोदयस्योल्लेखनेन अस्मिन् ग्रन्थे ६६ पत्राणि तथा प्रत्येके पत्रे १९ पंक्तयः सन्तीति ज्ञायते। [13]इत्थं लभ्यमानेन प्रमाणेन इयमपि भोजकृतिरेव इति अनुमीयते।

---

12 सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन पु.सं..४०

13 राजा भोज का रचना विश्व पु.सं.२१

**भुजबलनिबन्धः ।**

भोजदेवस्य इयं कृतिः ज्योतिश्शास्त्रसम्बन्धीनी भवति। विष्णुस्तुतिपरः मङ्गलश्लोक उच्यते भोजदेवेन अस्य ग्रन्थस्यारम्भे। अस्मिन् ग्रन्थे १८ प्रकरणानि सन्ति। तान्यथा 'रिष्टाध्यायः', 'स्त्रीजातकलक्षणम्', 'योगाध्यायः', 'निन्दितयोगाध्यायः', 'अष्टोत्तरशत-वर्षदशाविधि', 'कर्णादिवेधनम्', 'व्रतप्रकरणं', 'विवाहमेलकदशकं', 'विवाहः' 'प्रथमरजोनिरूपणम्', 'गृहकर्मप्रवेशकरणम्', 'सद्योवृष्टिलक्षणम्', 'कालशुद्धिनिर्णयः', 'योगयात्रा', 'ग्रहयोगोत्पातलक्षणसंक्षेपः', 'संक्रान्तिस्नानविधिः', 'चन्द्रसूर्यग्रहणविधिः', 'द्वादशमासकृत्यम्' इति। इयं कृतिः भोजदेवस्य भवतीत्यस्य प्रमाणं तु अन्तिमे द्वादशमासकृत्यमिति प्रकरणस्यान्त्ये भोजेन कृता उक्तिरेव। तद्यथा- 'इति श्री भोजदेवकृतौ भुजबलनिबन्धे ज्योतिश्शास्त्रे द्वादशमासकृत्यं समाप्तम्' इति। अस्य ग्रन्थस्य कर्तृत्वेन सोऽयं भोजदेवः ज्योतिश्शास्त्रेऽपि निष्णातः भवतीति ज्ञातुं शक्यते।

**राजमृगाङ्कः।**

ग्रन्थोऽयं भोजदेवस्य ज्योतिश्शास्त्रप्रतिपादको भवति। 'सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन्' इति ग्रन्थे डा विश्वनाथ गो. शास्त्रिणा राजमृगाङ्कस्य २८ पुटानि प्राप्तानि इति प्रतिपाद्यन्ते। ग्रन्थेऽस्मिन् चन्द्रसूर्यपूर्वाधिकारादयः वर्ण्यविषयाः। तत्र 'मध्यमाधिकारः'

'स्पष्टाधिकारः' इत्यादयः अधिकाराः उच्यन्ते। [14]प्रथमे पत्रद्वये अहर्गणस्य तथा सर्वेषां ग्रहाणां बीजानयस्य उदयानन्तरस्य च विधीनां उदाहरणानि दत्तानि। अस्याः कृतेः अन्तिमश्लोके 'व्युत्पत्तिसारमिह राजमृगाङ्कसंज्ञमेतद्व्यधाच्चकरणं रणरंगमल्लः' इत्युक्तम्। अत्र भोजस्य नाम न दृश्यते चेदपि 'रणरंगमल्लः' इति नाम भोजस्य प्रसिद्धम् अभिधानं भवतीत्यनेन इयं भोजकृतिरेव इत्यनुमीयते।[15]

**राजमार्ताण्डः।**

ज्योतिश्शास्त्रसम्बन्धा भवतीयं कृतिः। अस्यां १४२१ श्लोकाः सन्ति। अस्मिन् ग्रन्थे 'जन्मनः आरभ्य मृत्युपर्यन्तं जायमानानां सर्वासां घटनानां मुहूर्तः' प्रतिपाद्यते। अस्य 'रतिविधि फलं' नामके प्रकरणे यवनाधिपति-भागुरि-गण्डगिरिप्रभृतीनां तथा वराहमिहिरादीनां मतानि प्रस्तूयन्ते। एवं अस्याः कृतेः 'इति श्री महाराजाधिराजश्रीभोजविरचितं राजमार्ताण्डाभिधानं ज्योतिःशास्त्रं समाप्तम्' इति अन्तिमोल्लेखनेन भोजदेव एव अस्य कर्ता इति वक्तुं शक्यते।

**विद्वज्जनवल्लभम्।**

भोजदेवेन विरचितः ज्योतिश्शास्त्रग्रन्थोऽयम्। अस्मिन् ग्रन्थे शुभाशुभाध्यायाः, बन्धमोक्षाध्यायाः, शत्रुसमागमाध्यायाः, रोगाध्यायाः इत्यादयाः १७ अध्यायाः सन्ति। भोजदेवः तस्य अन्यकृतिवत् अत्रापि अन्तचरणरूपेण 'इति विद्वज्जनवल्लभारब्ध-

---

14 सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन पु.सं.२३

15 सरस्वतीकण्ठाभरण और सिद्धान्तकौमुदी का साङ्गोपाङ्ग विवेचन पु.सं.११

मकरोच्छ्रीभोजदेवो नृपः' इत्युक्तम्। अनेन इयमपि भोजदेवस्य कृतिरित्यवगम्यते।

**चाणक्यनीतिशास्त्रम्**।

भोजदेवस्य चाणक्यनीतिशास्त्रम् अष्टसु अध्यायेषु विभक्तं वर्तते। अस्मिन् ग्रन्थे राजनीतिं प्रतिपाद्यमानाः ५१२ श्लोकाः सन्ति।

*एकदन्तं त्रिनयनं ज्वालानलसमाश्रयम्।*
*गणाध्यक्षं गजमुखं प्रणमामि विनायकम्।।*

इति गणेशवन्दनापरकमङ्गलश्लोकेन ग्रन्थोऽयमारभ्यते। चाणक्यराजनीतिशास्त्रमनुसृत्य यः जीवति तस्य कृते अस्यां पृथ्व्याम् अप्राप्यरूपेण किमपि न स्यादिति प्रमाणीकरोति अयं श्लोकः। यथा

*चाणक्यमाणिक्यमिदं कण्ठे बिभ्रति ये बुधाः ।*
*प्रहितं भोजराजेन भुवि किं प्राप्यते न तैः ।।*[16]*इति।*

राजनीतिमवलम्ब्य भोजदेवस्य महान् दृष्टिकोणः आसीदिति अस्मात् ग्रन्थात् ज्ञायते।

**चारुचर्या**।

ग्रन्थस्य नाम्ना सूच्यमानवत् चारुचर्या एव अनेन प्रतिपाद्यते। अर्थात् भोजदेवस्य नित्यकर्मसम्बन्धी दृष्टिकोणः अत्रत्य प्रतिपाद्यविषयः। ग्रन्थारम्भे एव भोजदेवः स्वकीयपरिचयः

---

16 सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन पु.सं.३१

एवं क्रियते यत्

*सुनीतिशास्त्रसद्वैद्यधर्मशास्त्रानुसारतः।*
*विरच्यते चारुचर्या भोजभूपेन धीमता।।*[17]*इति।*

'शौचविधिः' 'दन्तधावनम्', 'उत्थानविधिः' इत्यादीनां नित्यविधीनां परामर्शः अस्मिन् ग्रन्थे क्रियते। भोजदेवः अस्य ग्रन्थान्ते 'गुरुस्त्रीणां शुश्रूषणं' 'विद्यायाः सेवनं' 'दीनानाम्', 'अन्धानां', 'कृपणानां', 'भ्रातृणां' च पोषणम् इत्यादीनि कार्याणि करणीयानि इत्युक्त्वा 'हिताय राजपुत्राणां रचिता भोजभूभृता' इति वचनेन ग्रन्थं समापयति।

**युक्तिकल्पतरुः।**

भोजदेवस्य शिल्पशास्त्रप्रतिपादकोऽयं ग्रन्थः। अस्मिन् ग्रन्थे आहत्य २०१६ श्लोकाः वर्तन्ते। अत्र 'अमात्य' 'बल' 'यान' 'यात्रा' 'विग्रह' 'आसनयुक्ति' 'उपकरणयुक्ति' 'हारिकापरीक्षा' इत्यादीनां शताधिकानां विषयाणां चर्चा दृश्यते। परमेश्वरस्तुतिपरक-मङ्गलश्लोकेन ग्रन्थोऽयमारभते।

*नानामुनिनिबन्धानां सारमाकृष्य यत्नतः।।*
*तनुते भोजनृपतिर्युक्तिकल्पतरुं मुदे।।*[18] *इति।*

भोजोक्तिरेव अस्य ग्रन्थकर्ता भोज एव इत्यस्य प्रमाणम्। अनेन श्लोकेन भोजदेवः अनेकेषां

---

17 सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन पु.सं.३१

18 सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन पु.सं.३७

मुनीनां ग्रन्थेभ्यः आशयस्वीकारेण महता प्रयासेन 'युक्तिकल्पतरु' इति ग्रन्थं व्यरचयत् इति स्पष्टीक्रियते।

**सरस्वतीकण्ठाभरणम् (अलङ्कारः)।**

भोजदेवेन 'सरस्वतीकण्ठाभरणम्' इति नाम्नि ग्रन्थद्वयं विरचितम्। एकः व्याकरण-शास्त्रप्रतिपादको अपरस्तु अलङ्कारशास्त्रप्रतिपादको भवति। अलङ्कारशास्त्रप्रतिपादकोऽयं ग्रन्थः पञ्चपरिच्छेदेषु विभक्तः। तस्मिन् ८३१६ श्लोकाः सन्ति। सरस्वतीकण्ठाभरणे भोजदेवेन काव्यशास्त्रस्य सामान्यविषयविवेचनानन्तरं क्रमशः शब्दानां तथा वाक्यार्थानां षोडशदोषाणां ततः चतुर्विंशतिगुणानां प्रतिपादनं कृतम्।

*ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।*
*यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ।।*

इति मङ्गलश्लोकेन ग्रन्थोऽयम् आरभते। सरस्वतीकण्ठाभरणस्य प्रथमपरिच्छेदे वाक्यस्य गुणदोषविवेचनं कृतं वर्तते। द्वितीये तृतीये च परिच्छेदे शब्दार्थालङ्कारयोः निरूपणं वर्तते। चतुर्थे परिच्छेदे 'रस' 'भाव' 'नायक' 'नायिका' 'पञ्चसन्धि' तथा चतुर्वृत्तीनां च प्रतिपादनं कृतं वर्तते। पञ्चमे परिच्छेदे शब्दवाक्यार्थानां गुणदोषविवेचनं कृतं वर्तते। ग्रन्थस्यास्य वैशिष्ट्यं तु प्रत्येकं विषये उदाहरणं दत्तं वर्तते इति भवति। सरस्वतीकण्ठाभरणस्य रामदेवसिंहेन 'रत्नदर्पणः' इति व्याख्यानं रचितं वर्तते। जगद्धरेणापि 'सरस्वतीकण्ठाभरणविवरणम्' इति नाम्नि अस्य व्याख्यानं कृतम्। विनाभट्टनृसिंहेनापि अस्य व्याख्यानं लिखितमिति हस्तलेखेभ्यः विज्ञायते।

*निर्दोषं गुणवत् काव्यालङ्कारैरलंकृतम् ।*
*रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ।।* [19]

इति श्लोकेन इदं सरस्वतीकण्ठाभरणम् उत्तमकाव्यलक्षणयुक्तं इति भोजः प्रदर्शयति। साहित्यरूपिण्याः सरस्वत्याः अलङ्कारयुक्तमिदं सरस्वतीकण्ठाभरणं भोजदेवस्य यशः नितरां वर्धयति।

**श्रृङ्गारप्रकाशः।**

भोजदेवस्य प्रतिभापूर्णः ग्रन्थोऽयं काव्यशास्त्रस्य तथा नाट्यशास्त्रस्य विषयान् परामृशति। अस्मिन् ग्रन्थे ३६ अध्यायाः सन्ति। ते अध्यायाः 'प्रकाशाः' इति आख्यायन्ते। श्रृङ्गारप्रकाशस्य 'साहित्यप्रकाशः' इति अपरनाम वर्तते। अस्य रचनाकालः १००५-१०६२AD इति गण्यते। [20]

ग्रन्थेऽस्मिन् रसभावालङ्कारादीनां प्रतिपादनं कृतं वर्तते। तत्र अष्टभिः स्थायीभावैः त्रयत्रिंशत् व्यभिचारीभावैः अष्टभिः सात्विकभावैः एकोनपञ्चाशत् भावैः च युक्तः श्रृङ्गार एव चतुर्वर्गफलप्राप्तये कारणं भवति। तस्मात् श्रृङ्गाररसः मोक्षसाधनो भवतीति भोजेन उद्घुष्यते। श्रृङ्गारप्रकाशस्य अध्यायेषु आद्येषु षड्त्सु शब्दार्थाः प्रतिपाद्यन्ते। सप्तमाध्यायादारभ्य एकादशाध्यायपर्यन्तं 'अभिधा', 'विवक्षा', 'तात्पर्यं' 'प्रविभाग' इत्यादीनि साहित्यकार्याणि चर्चितानि। द्वादशतः चतुर्दशपर्यन्तेषु अध्यायेषु 'नाटकसम्बन्धिनां सन्ध्यङ्गानां' 'भावादीनां' च

---

19 स.क.(अलङ्कार)१/२

20 राजा भोज का रचना विश्व पु.सं.२५

प्रतिपादनं वर्तते। पञ्चदशादध्यायादारभ्य सप्तदशाध्यायपर्यन्तं 'रतिभावान्' वर्णयति। ततश्च चतुर्षु अध्यायेषु धर्मार्थकाममोक्षाख्यैः शृङ्गारैः पुरुषार्थप्राप्तिः सूच्यते। शिष्टेषु अध्यायेषु शृङ्गारस्य तथा तस्य भेदानां विप्रलम्भसंभोगादीनां सविस्तरविवरणं कृतं वर्तते। शृङ्गारप्रकाशस्य एतेषु षड्त्रिंशदध्यायेषु प्रयुक्तानि विषयवस्तूनि अष्टादशसु उपविभागेषु भोजेन कृतं वर्तते। अयं शृङ्गाररस एव काव्यजीवनभूताङ्गत्वेन भोजेन गण्यते इति अयं श्लोकः प्रमाणयति।

*यथेन्दुना निशा भाति निशाभिश्च (यथा) (शशी)।*
*(अङ्गनाभिश्च शृङ्गारः) शृङ्गारेण तथाङ्गना।।* [21]
*तदेतत् काम सर्वस्वं तदेतत् काम्यजीवितम् ।*
*य एष द्विप्रकारोऽपि रसः शृङ्गारसंज्ञकः।।* [22]

सामान्यतः बहुभिः विद्वद्भिः नवैव रसः अङ्गीक्रियते। किन्तु भोजः वात्सल्यस्य योजनेन दशरसाः इति कथयन्ति। तद्यथा- '*शृङ्गारवीरकरुणाद्भुतरौद्रहास्यबीभत्सवत्सलभयानकशान्तनाम्नः*'। [23] शृङ्गारप्रकाशे शृङ्गारशब्दस्यार्थः 'रस' इति भवति। तस्मात् अस्य ग्रन्थस्य 'रसप्रकाश' इति नामान्तरं वर्तते इति 'संस्कृतकाव्यशास्त्र का आलोचनात्मक इतिहास' इति स्वकीये ग्रन्थे आचार्य रेवाप्रसादद्विवेदी कथयति। वस्तुतस्तु भोजः शृङ्गारपदेन सामान्यशृङ्गारमात्रं नोद्दिशति। तस्मिन् शृङ्गारे चतुर्णां पुरुषार्थानामपि समायोजनं कृतं वर्तते। एवमत्र मुख्यरूपेण शृङ्गाररस एव वर्णितः इत्यस्मात् शृङ्गारप्रकाश इति नाम अन्वर्थं भवति।

---

21 ऋङ्गारप्रकाशः/डॉ वि.राघवन्.पु.सं.६६

22 तत्रैव

23 तत्रैव पु.सं. ४४७

**विविधविद्याविचारचतुरा।**

अस्मिन् ग्रन्थे भोजेन होमसम्बन्धीनि कार्याणि उक्तानि। विविधप्रकारपवित्रभावनानां तथा कामानां प्राप्त्यये प्रयोजनपराणां होमानां तथा शान्तिहोमानां विवरणम् अत्र वर्तते। ग्रन्थारम्भे भोजेन 'शान्तिक' तथा 'पौष्टिक' कर्मणां तथा नवग्रहहोमानाम् उल्लेखः कृतः।

**सिद्धान्तसारपद्धतिः।**

इदं गद्यपद्यात्मकं भवति। अस्मिन् १३८४ श्लोकाः सन्ति। 'यमासाद्य निवर्तन्ते विकल्पः सुखदुःखयोः' इति श्लोकेन आस्य काव्यस्यारम्भः। कर्मकाण्डसम्बन्धाः विविधविधयः अत्र उल्लिखिताः। यथा 'सूर्यपूजाविधिः', 'नित्यकर्मविधिः', 'मुद्रालक्षणविधिः', 'प्रायश्चित्त-विधिः', 'लिङ्गप्रतिष्ठाविधिः', 'द्वारप्रतिष्ठाविधिः', 'ध्वजप्रतिष्ठाविधिः', 'हृत्प्रतिष्ठाविधिः', 'जीर्णोद्धारपद्धतिः' इत्यादयाः भवन्ति।

**चम्पूरामायणम् अथवा भोजचम्पूः।**

भोजदेवेन लिखितेषु ग्रन्थेषु 'चम्पूरामायणम्' अतीव प्राधान्यमर्हति। भोजेन कृतम् इत्यनेन अस्य नामधेयं 'भोजचम्पू' इति कामेश्वरसूरिकृते चम्पूरामायणस्य व्याख्याने दृश्यते। वाल्मीकिरामायणस्य कथा संक्षिप्तरूपेण भोजेन अत्र उक्ता। तस्मात् 'रामायणचम्पू' अथवा 'चम्पूरामायणम्' इत्यपि अस्य नामान्तरं वर्तते। अस्मिन् चम्पूकाव्ये सुन्दरकाण्डपर्यन्तमेव भोजेन कृतम् इति श्रूयते। अस्य प्रमाणं तु सुन्दरकाण्डस्य समाप्तौ भोजेन कृता इयमुक्तिः भवति यत् 'इति श्री विदर्भाराजविरचिते चम्पूरामायणे सुन्दरकाण्डः' इति। भारते आहत्य अस्य

त्रिशताधिकाः हस्तलेखाः उपलभ्यन्ते। तदनन्तरं युद्धकाण्डादीन् भोजोत्तरवर्तिनः लक्ष्मणसूरिप्रभृतयः कृतवन्तः। युद्धकाण्डारम्भे लक्ष्मणसूरिणः उक्तिः तत्र प्रमाणम्। तद्यथा-

*भोजेन तेन रचितामपि पूरयिष्यन्नल्पीयसापि वचसा कृतिमत्युदाराम्।*
*न व्रीडितोऽहमधुना नवरत्नहारसंगेन किन्तु हृदि धार्यत एव तन्तुः।। इति।* [24]

एतावता अस्य चम्पूकाव्यस्य सप्ताधिकानि व्याख्यानानि सन्ति। रामचन्द्र बुधेन्द्रस्य 'साहित्यमञ्जूषा', राजचूडामणिदीक्षितस्य 'काव्यदर्पण', 'करुणाकृतं' चम्पूव्याख्यानं, कामेश्वरसूरेः 'विद्वत्कौतूहलं', नारायणकृतं व्याख्यानं, मानवदेवकृतं व्याख्यानं इत्येतानि तेषु प्रमुखानि भवन्ति। तत्र कामेश्वरकवेः व्याख्यानं भोजचम्प्वाः युद्धकाण्डपर्यन्तं वर्तते। मानवदेवकृतं व्याख्यानं तु चम्पूरामायणस्य उत्तरकाण्डपर्यन्तं वर्तते। 'व्याख्यानाधिक्यं कृतिवैभवम्' इत्यस्मात् एतैः व्याख्यानैः भोजदेवकृतचम्पूरामायणस्य महत्त्वम् उद्घोष्यते। भोजचम्प्वाः व्याख्यानकर्तुः करुणाकरस्य वचनमनुसृत्य इदं चम्पूकाव्यं सरस्वतीकण्ठा-भरणद्वारा निर्णीतानां शब्दानां उदाहरणतया साधुत्वबोधकं भवति।[25]

**कूर्मशतकम्।**

इदं काव्यं भोजेन प्राकृतभाषया रचितं वर्तते। अस्मिन् गाथाग्रन्थे शतकद्वयं वर्तते। प्रत्येकं शतके १०९ 'गाथाः' सन्ति। प्रथमशतकस्य १०७ संख्यकगाथायाम् अस्य ग्रन्थस्य नाम कूर्मशतकम् इति उक्तं वर्तते।

---

24 चम्पुरामायणम् युद्धकाण्डः श्लो.सं.२

25 राजा भोज का रचनाविश्व पु.सं.२५

**राजमार्तण्ड नाम योगसारसंग्रहः।**

राजमार्तण्ड इति नाम्नि एकः योगशास्त्रग्रन्थः भोजेन लिखितः इति पूर्वम् उक्तम्। तस्मिन् एव नाम्नि रचिते वैद्यशास्त्रसम्बद्धः अस्मिन् ग्रन्थे भोजेन विविधानां तैलानाम् औषधीनां वर्णनं कृतं वर्तते। अत्र ४६० श्लोकाः सन्ति। महादेवस्तुत्या भोजेन ग्रन्थारम्भः कृतः। ग्रन्थस्य अन्तिमे 'महाराज श्री भोजराजविरचितो राजमार्तण्डनामयोगसार संग्रहः समाप्तः' इति वचनमस्ति। तस्मात् स्पष्टं ज्ञायते यत् भोजदेवः एव अस्य ग्रन्थस्य कर्ता इति।

**समराङ्गणसूत्रधारः।**

शिल्पकलासम्बद्धोऽयं ग्रन्थः। अस्मिन् ८३ अध्यायाः ७००० श्लोकाश्च सन्ति। भोजदेवेन ग्रन्थस्यारम्भे भुवनत्रयस्य स्रष्टा भगवान् शंकरः इत्युच्यते। अस्मिन् बृहद्ग्रन्थे संसारस्य विविधविषयाणां प्रमाणिकसाधनानि उपलब्धानि। अस्य प्रकाशनं १९२४ तमे गायकवाड ओरियन्टल् सीरीज़् बडौदायां कृतं वर्तते।

**द्रव्यानुयोगतर्कणाटीका।**

इदं भोजेन विरचितं जैनानां श्वेताम्बरसम्प्रदायस्य द्रव्यानुयोगतर्कणा नाम ग्रन्थस्य व्याख्यानं भवति। जिनेश्वरं प्रणम्य भोजः एवं लिखति यत्

*तेषां विनयलेशेन भोजेन रचितोक्तिभिः।*
*परस्वात्मप्रबोधार्थं द्रव्यानुयोगतर्कणा।।*[26]*इति।*

---

26 .सरस्वतीकण्ठाभरण और सिद्धान्तकौमुदी का साङ्गोपाङ्ग विवेचन पु.सं.१५

**तत्त्वप्रकाशः।**

'शैवदर्शनं' तथा 'पशुपतिपाशनिरूपणं' भवति अस्य ग्रन्थस्य प्रतिपाद्यविषयः। अस्मिन् १५ श्लोकाः उपलब्धाः।

*चिद् घन एको व्यापी नित्यः सततोदितः प्रभुः शान्तः*
*जयति जगदेकबीजं सर्वानुग्राहकः शम्भुः।।*

इति शिवस्तुत्या ग्रन्थस्यास्य आरम्भः कृतः।

**सिद्धान्तसंग्रहविवृत्तिः।**

'शैवधर्मसम्बद्धः सिद्धान्तसंग्रह' इति सोमेश्वरकृतग्रन्थस्य व्याख्यानं भवत्ययं ग्रन्थः। अस्मिन् ९२२ श्लोकाः सन्ति।

*सोमं सोमेश्वरं नत्वा सोमसोमार्द्धधारिणम्।*
*सोमेश्वरेण विवृतो भोजसिद्धान्तसंग्रहः।।*

इति ग्रन्थारम्भे शिवभगवन्तं नमस्करोति।

**भोजदेवसंग्रहः।**

गद्यपद्यात्मके अस्मिन् काव्ये ६०० परं श्लोकाः सन्ति।

*सर्वज्ञमद्वयमनादिमनन्तमीशं मूर्धाभिवन्द्य वचनैर्विविधैर्मुनीनाम्।*
*शब्दप्रबोधमुदयज्ञमुदानिधानं दामोदरो व्यरचयद् गुणिनः क्षमध्वम्।।*

इति ईश्वरनमस्कारेण ग्रन्थारम्भः कृतः।

**हनुमन्नाटकम्।**

पवनपुत्रेण हनुमता निर्मितम् इदं नाटकं पठित्वा वाल्मीकिना रामायणस्य प्राधान्यं न्यूनीकरोति इति धिया हनुमतः अनुमत्या समुद्रे निक्षिपति। अनन्तरं भोजेन प्राप्तमिदं नाटकं तेन सम्पूर्य हनुमन्नाटकमिति नाम दत्तम् इति कथा वर्तते। अत्र श्रीरामचन्द्रस्य चरित्रं वर्णितम्।

भोजदेवेन अमून् ग्रन्थान् विना 'नाममालिका', 'शालिहोत्रम्', 'भोजराजाङ्कः', 'शब्दसाम्राज्यम्', अभिज्ञानशाकुन्तलस्य व्याख्या 'गिरिराजीयटीका', 'स्मृतिरत्नम्', 'अभिनवरामाभ्युदयम्', 'पञ्चकल्याणचम्पूः', 'कन्दर्पचूडामणिः', 'साहित्यचिन्तामणिः', 'सङ्गीतरत्नाकर', 'संङ्गीतसमयसार', 'भेषजकल्पसारसंग्रह', 'जाम्बवतीपरिणयम्', 'नटेशविजयः', 'रम्भामञ्जरी', 'योगसूत्रवृत्तिः', 'आदित्यप्रतापसिद्धान्तः', 'शिवतत्वरत्नावलिः', 'व्यवहारसमुच्चयः', 'सुभाषितप्रबन्धः', 'दण्डभारमञ्जरी', 'अवनीतशतकम्', 'प्राकृतकाव्यं', 'पारिजातमञ्जरीनाटिका', 'गोविन्दविलासकाव्यं', 'कोदण्डकाव्यम्' इत्यादीनि बहूनि काव्यानि कृतानि।

# द्वितीयोऽध्यायः।

## भोजव्याकरणस्य परिचयः।

भोजदेवेन सरस्वतीकण्ठाभरणम् इति नाम्नि ग्रन्थद्वयं रचितम्। तयोरेकः व्याकरणपरः अन्यो अलङ्कारपरश्च। भोजदेवेन सरस्वतीकण्ठाभरणम् इति स्वस्य व्याकरणग्रन्थे अष्टाध्यायीवत् अष्टसु अध्यायेषु तस्य व्याकरणसूत्राणि क्रोडीकृतानि। भोजदेवः पाणिनीयव्याकरणस्याधारेणैव सूत्राणि अलिखत्। अतः बहुत्र पाणिनीयसूत्राण्येव अङ्गीकृतानि। तथापि कुत्रचित् भेदाः दृश्यन्ते। यथा 'आदेः परस्य'[1] -'परस्यादेः'[2] 'बहुगणवतुडतिसंख्या'[3] 'बहुगणवतुडतयश्च संख्या'[4] इत्यादयः। पाणिनिवत् भोजदेवेन गणपाठः न स्वीकृतः। तस्मात् पाणिनिना गणं कृत्वा गणस्याद्यशब्दमुच्चार्य यानि कार्याणि उक्तानि तानि भोजदेवेन गणस्थानां सर्वेषां शब्दानामुच्चारणेन प्रतिपादितानि। यथा 'अश्वपत्यादिभ्यश्च'[5] इति पाणिनीयसूत्रं भोजदेवेन अश्वपत्यादिगणस्थान् सम्पूर्णान् शब्दान् उच्चार्य 'अश्वशतधनगणराष्ट्रकूलगृहपशु-धान्यधर्मधन्वन्सभाप्राणसेनाक्षेत्रादिपूर्वादण्'[6] इति कृतम्। पाणिनिना एकेन सूत्रेण उक्तं कार्यं

---

1 पा.सू.१/१/५४

2 स.क.१/२/३३

3 पा.सू.१/१/२५

4 स.क.१/१/१७

5 पा.सू.४/१/८४

6 स.क.४/१/४

साधयितुं भोजदेवेन कुत्रचित् सप्ताधिकानि सूत्राणि प्रयुक्तानि। यथा पाणिनिना गणपाठस्वीकारेण कृते सूत्रप्रतिपादने गणस्थानां शब्दानां ज्ञानार्थं गणपाठः आश्रयणीयः। किन्तु भोजव्याकरणे गणे विद्यमानानां सर्वेषां शब्दानामुच्चारणेन तेषां परिचयः प्राप्यते। एवं पाणिनिना प्रतिपादितानां कार्याणां स्पष्टतायै एवं कृतं चेदपि भोजसूत्राणि दीर्घरूपाणि तथा उच्चारणार्थं कण्ठस्थीकरणार्थं च क्लिष्टकराणि अभवन्। पाणिनीये कात्यायनेन योजितानि वार्त्तिकाण्यपि भोजव्याकरणे सूत्रत्वेन दृश्यन्ते। एवं गणपाठस्य उणादिपाठस्य परिभाषापाठस्य वार्त्तिकसूत्राणां फिट्सूत्राणां च सन्निवेशनेन सरस्वतीकण्ठाभरणं विस्तृतं जातम्।

अष्टाध्याय्याः केरलीयव्याख्याकारः नारायणभट्टः स्वकीये प्रक्रियासर्वस्वे बहुत्र भोजं अनुस्मरति। नारायणभट्टः भोजदेवस्य मतमवलम्ब्य सरस्वतीकण्ठाभरणात् बहून् अंशान् स्वीकरोति। भोजदेवः पाणिनिप्रयुक्तेषु सूत्रेषु अधिकांशानपि परिवर्तितवान्। भट्टपादेन पाणिनीयसूत्रेषु परिवर्तनं न कृतं चेदपि व्याख्यानसन्दर्भे पाणिनिना अनुक्तानां भोजव्याकरणस्य सूत्राणामुल्लेखनं कृतम्। इदं भोजव्याकरणस्य प्रामाणिकतां दृढीकरोति। किन्तु यदा भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याः लेखनं कृतं तदा आरभ्य कण्ठाभरणस्य प्रचारे तावती गतिः नासीत्।

पाणिनिना अष्टाध्याय्यां यत्र यत्र संज्ञाः प्रतिपादिताः ताः भोजदेवेन सरस्वतीकण्ठाभरणे प्रथमाध्याये एव सन्निवेशिताः। तथापि पाणिनीये संज्ञात्वेन अनुक्तानां कारकतद्धितादीनां संज्ञात्वेन प्रतिपादनं भोजव्याकरणस्य प्रथमाध्याये द्रष्टुं शक्यते। भोजस्य सरस्वतीकण्ठाभरणे अष्टाध्यायीवत् अष्टौ अध्यायाः सन्तीति पूर्वमेव उक्तं वर्तते। तत्र प्रत्यध्यायं अष्टाध्यायी इव

चत्वारः पादाः अपि सन्ति। एवं भोजव्याकरणे आहत्य ३२ पादेषु ६४३१ सूत्राणि वर्तन्ते। तत्र अष्टाध्याय्याः सूत्रसंख्यापेक्षया २००० सूत्राणि अधिकानि उपलभ्यन्ते। अस्य ग्रन्थस्य आदौ सप्तसु अध्यायेषु लौकिकशब्दाः अन्तर्भाविताः। अन्तिमे अष्टमे स्वरप्रकरणं तथा वैदिकप्रकरणं प्रतिपादयति।

*प्रणम्यैकात्मतां यातौ प्रकृतिप्रत्ययाविव।*
*श्रेयः पदमुमेशानौ पदलक्ष्म प्रचक्ष्महे।।*

इति गौरीमहेश्वरयोः स्तुतिपरकेण मङ्गलश्लोकेन भोजव्याकरणमारभ्यते। मङ्गलाचरणानन्तरं भोजदेवः अक्षरसमाम्नायमुपदिशति।

भोजदेवकृतसरस्वतीकण्ठाभरणस्य प्रथमं सूत्रं भवति 'सिद्धिः क्रियादेः लोकात्' इति। इदं सूत्रं पाणिनीये कुत्रापि न दृश्यते। किन्तु 'सिद्धे शब्दार्थसम्बन्धे'[7] इति कात्यायनकृतं वार्त्तिकमस्ति। 'सिद्धिरनेकान्तात्' इति जैनेन्द्रव्याकरणस्य प्रथमं सूत्रमस्ति। अतः भोजेन इदं वार्त्तिकं सूत्रं च मनसि निधाय अस्य सूत्रस्य प्रतिपादनं कृतं स्यात्। भोजदेवेन प्रथमाध्यायस्य आद्यपादे 'धातु', 'प्रातिपदिक', 'प्रकृतिप्रत्यय', 'विकरण', 'कृत्', 'कृत्य', 'सत्', 'निष्ठा', 'तद्धित', 'घ' इत्यादीनां संज्ञानाम् उल्लेखनं कृतं वर्तते। भोजदेवेन प्रथमाध्यायस्य प्रथमपादे संज्ञाप्रकरणमुक्तम्। पाणिनिना कर्मकरणसम्प्रदायादिबह्व्यः संज्ञाः तत्तत् प्रकरणे एव उक्ताः। किन्तु भोजदेवेन संज्ञाप्रकरणे एव सर्वासां संज्ञानां प्रतिपादनं कृतम्। तासां संज्ञानामध्ययनेन

---

7 म.भा पस्पशाह्निकम् पु.सं.५९

अस्माभिः ज्ञायते यत् पाणिनीयप्रयुक्तानां 'सर्वनामस्थान', 'अपृक्त', 'नदी', 'घि' 'आम्रेडितम्' इत्यादीनां संज्ञानाम् उल्लेखनं भोजेन न कृतं वर्तते इति। एतासां संज्ञानामभावेन पाणिनीयप्रयुक्तकार्याणि भोजेन सूत्रेणैव साधितम् ।

पाणिनिना 'भूवादयो धातवः'[8] इति सूत्रं उक्तम्। अस्य सूत्रस्य व्याख्यानावसरे भाष्ये 'क्रियावचनो धातुः' तथा 'भाववचनो धातुः'[9] इति पतञ्जलिना उक्तं वर्तते। तस्य समाहारेण भोजदेवेन इदं सूत्रं 'भूवादिः क्रियावचनो धातुः'[10]इति क्रियते।

**सरस्वतीकण्ठाभरणस्य प्रतिपाद्यविषयाः।**

**प्रथमोऽध्यायः।**

प्रथमाध्ययस्य प्रथमपादे २१२ सूत्रैः संज्ञानां विवरणं कृत्वा द्वितीयपादे परिभाषाणां संग्रहः भोजेन कृतः। तत्र १३५ सूत्राणि सन्ति। प्रथमाध्यायस्य तृतीयपादे अष्टाध्याय्याः तृतीयाध्यायस्य प्रथमपादस्य विषयवस्तूनां सन्निवेशनं कृतं वर्तते। अस्मिन् पादे वर्तमानेषु २३१ सूत्रेषु मुख्यतः 'सनादिः', 'विकरण', 'कृत्' प्रत्ययानां विधानमस्ति। प्रथमाध्ययस्य चतुर्थे पादे २७७ सूत्रैः पाणिनीयस्य तृतीयाध्यायस्य द्वितीयपादस्य विषयवस्तूनां संग्रहः कृतः। अत्र 'अण्', 'क', 'अच्', 'ट' इत्यादीनां प्रायः ७० प्रत्ययानां प्रतिपादनं कृतम्।

---

8 पा.सू.१/३/१

9 म.भा.१/३/१

10 स.क.१/१/२

**द्वितीयोऽध्यायः ।**

सरस्वतीकण्ठाभरणे द्वितीयाध्यायस्य प्रथमपादादारभ्य तृतीयपादपर्यन्तम् उणादिप्रत्ययाः प्रतिपादिताः । प्रथमपादे ३४८ सूत्राणि द्वितीयपादे २५५ सूत्राणि तथा तृतीयपादे १९१ सूत्राणि च सन्ति। भोजस्य उणादिसूत्राणि पाणिनीयस्य उणादिसूत्राणि आधारितानि चेदपि तत्र तत्र क्रमभेदाः दृश्यन्ते। द्वितीयाध्याये चतुर्थपादे २८३ सूत्रैः अष्टाध्याय्याः तृतीयाध्यायस्य तृतीयपादस्य तथा चतुर्थपादस्य विषयवस्तूनां समावेशः कृतः ।

**तृतीयोऽध्यायः ।**

सरस्वतीकण्ठाभरणस्य तृतीयाध्यायस्य प्रथमपादे ३०४ सूत्राणि सन्ति। तैः तिङन्तप्रक्रियासम्बन्धिनां विविधादेशानां तथा आगमानां प्रतिपादनं कृतम् । प्रायः अष्टाध्याय्याः द्वितीयाध्यायस्य तृतीयपादे प्रतिपादितानां कार्याणां समावेशः अत्र कृतः । तृतीयाध्यायस्य १६१ सूत्रयुक्तः द्वितीयपादः समासप्रकरणेन आरभ्यते। प्रायः पाणिनीयस्य प्रथमद्वितीयपादयोः विषयवस्तूनां समावेशः अत्र कृतः। भोजव्याकरणे तृतीयाध्यायस्य तृतीयपादे आहत्य १४८ सूत्राणि सन्ति। अष्टाध्याय्याः द्वितीयाध्यायस्य द्वितीयचतुर्थपादयोः सूत्राणां प्रतिपादनमत्र क्रियते। तृतीयाध्यायस्य चतुर्थपादे १३५ सूत्राणि सन्ति। पादोऽयं स्त्रीप्रत्ययविधानपरको भवति। स्त्रियामित्यधिकारेणास्य पादस्यारम्भः भोजेन कृतः ।

**चतुर्थोऽध्यायः ।**

चतुर्थाध्ययस्य प्रथमपादे २१२ सूत्राणि सन्ति। पादोऽयं तद्धितप्रकरणेनारभ्यते। अस्मात् पादादारभ्य पञ्चमाध्यायस्य समाप्तिपर्यन्तं तद्धितप्रकरणं भोजदेवेन सविस्तरं

प्रतिपादितम्। अत्र अष्टाध्याय्याः चतुर्थाध्यायस्य प्रथमपादे तद्धितप्रकरणविषयाणां समावेशः कृतः। द्वितीये पादे १४७ सूत्राणि वर्तन्ते। तैः सूत्रैः 'ठक्', 'अन्', 'कन्', 'अञ्' इत्यादयः तद्धितप्रत्ययाः विधीयन्ते। तृतीयपादे विद्यमानैः २६९ सूत्रैः 'घ', 'ख', 'य', 'खञ्' इत्यादयः ३८ शेषार्थकप्रत्ययानां प्रतिपादनं कृतं वर्तते। चतुर्थपादे २०७ सूत्राणि सन्ति। अस्मिन् पादे अष्टाध्याय्याः चतुर्थाध्यायस्य तृतीयपादस्य विकारार्थकप्रकरणस्य चतुर्थपादस्य तथा पञ्चमाध्यायस्य आद्य १७ सूत्राणां समावेशः कृतः। 'तस्य विकारः' इति सूत्रेण पादोऽयं प्रारभ्यते।

**पञ्चमोऽध्यायः।**

पञ्चमाध्ययस्य प्रथमपादे १८० सूत्राणि सन्ति। अस्य पादस्यारम्भः 'प्राग्वहतेष्ठञ्' इति सूत्रेण भवति। द्वितीयपादे २२४ सूत्रैः 'खञ्', 'ढक्', 'यत्' इत्यादीनां प्रत्ययानां विवरणं कृतम्। तृतीयपादे १५६ सूत्राणि सन्ति। अस्य पादस्य प्रथमषड्सूत्राणि पञ्चमाध्यायस्य चतुर्थपादात् तथा शिष्टानि तृतीयपादात् च स्वीकृतानि। चतुर्थे पादे १८९ सूत्राणि सन्ति। अस्मिन् पादे 'शस्', 'वुन्', 'कृत्वसुच्' इत्यादयः प्रत्ययाः उच्यन्ते।

**षष्ठोऽध्यायः।**

षष्ठाध्यायस्य प्रथमपादे आहत्य १७५ सूत्राणि सन्ति। अत्र पाणिनेः अष्टाध्याय्याः षष्ठाध्यायस्य प्रथमपादस्य स्वरप्रकरणमतिरिच्य अन्ये सर्वे विषयाः समाविश्यन्ते। द्वितीयपादे १८० सूत्राणि सन्ति। अष्टाध्याय्याः षष्ठाध्यायस्य तृतीयपादस्य विषयवस्तूनि अत्र उच्यन्ते। तथा

तृतीयपादे १८३ सूत्राणि वर्तन्ते। अष्टध्याय्याः षष्ठाध्यायस्य चतुर्थपादस्य विषयवस्तूनां प्रतिपादनम् अत्र कृतम्। चतुर्थपादे आहत्य १९२ सूत्राणि सन्ति। अत्र अष्टाध्याय्याः द्वितीयाध्यायस्य चतुर्थपादस्य तथा सप्तमाध्यायस्य प्रथमद्वितीयपादयोः विद्यमानानि विषयवस्तूनि प्रतिपाद्यन्ते।

**सप्तमोऽध्यायः।**

सप्तमाध्यायस्य प्रथमपादे १४० सूत्राणि सन्ति। अत्र अष्टाध्याय्याः सप्तमाध्यायस्य द्वितीयस्य, तृतीयस्य एवं चतुर्थस्य च पादस्य विषयवस्तूनां प्रतिपादनं कृतं वर्तते। द्वितीयपादे आहत्य १५१ सूत्राणि सन्ति। अस्मिन् पादे प्रायः अष्टाध्याय्याः प्रथमाध्यायस्य द्वितीयपादस्य तथा सप्तमाध्यायस्य तृतीय चतुर्थपादयोः विषयवस्तूनां समावेशनम् कृतं वर्तते। अस्याध्यायस्य तृतीयपादे १५० सूत्राणि तथा चतुर्थपादे १७८ सूत्राणि च वर्तन्ते। तृतीयपादे अष्टाध्याय्याः अष्टमाध्यायस्य प्रथमद्वितीयपादयोः तथा चतुर्थपादे अष्टमाध्यायस्य तृतीयचतुर्थपादयोः विषयवस्तूनां समावेशनं भोजेन कृतं वर्तते।

**अष्टमोऽध्यायः।**

भोजव्याकरणस्य अष्टमाध्याये वैदिकव्याकरण-स्वरविषयकवस्तूनां प्रतिपादनं वर्तते। प्रथमपादे १७४ सूत्राणि सन्ति। द्वितीयपादे १४९ सूत्राणि च वर्तन्ते। प्रथमद्वितीयपादयोः वैदिकव्याकरणनियमाः अनुशास्यन्ते। तृतीयपादे २६३ सूत्राणि तथा चतुर्थपादे २३२ सूत्राणि च सन्ति। तृतीयपादे अष्टाध्याय्याः षष्ठाष्टमाध्याययोः स्वरविधायकसूत्राणां तथा

शन्तनुप्रणीतफिट्सूत्रपाठस्य स्वरसूत्राणां तथा चतुर्थपादे षष्ठाध्यायस्य प्रथमपादस्य स्वरितादिविधायकसूत्राणां च प्रतिपादनं वर्तते। एवं भवति सरस्वतीकण्ठाभरणस्य अध्यायानां वर्गीकरणम्।

# तृतीयोऽध्यायः ।

## सरस्वतीकण्ठाभरणस्य व्याख्याकाराः ।

सरस्वतीकण्ठाभरणस्य बह्व्यः व्याख्याः आसन्। 'स्वोपज्ञा व्याख्या', दण्डनाथनारायणेन कृता 'हृदयहारिणीव्याख्या', कृण्णलीलाशुकमुनिना कृता 'पुरुषकार' इति व्याख्या 'पदसिन्धुसेतु' इति व्याख्या 'डा. नारायण म. कंसारा' इति महाभागेन विरचिता सरस्वतीकण्ठाभरणस्य अष्टमाध्यायस्य व्याख्या रामसिंहदेवेन विरचितः 'रत्नदर्पण' इति व्याख्या च तेषु प्रमुखानि भवन्ति।

**स्वोपज्ञाव्याख्या।**

सरस्वतीकण्ठाभरणस्य व्याख्यानेषु प्रसिद्धा 'स्वोपज्ञा' व्याख्या नोपलब्धा। परन्तु विविधेषु ग्रन्थेषु भोजदेवन इयं व्याख्या कृता इत्यस्य प्रमाणमस्ति। 'गणरत्नमहोदधि' इति ग्रन्थे वर्धमानेन उच्यते यत् ''भोजस्तु सुखादयो दश क्यज्विधौ निरूपिता इत्युक्तवान्''[1] इति। वर्धमानेन इदं वाक्यं 'जातिकालसुखादिभ्यश्च'[2] इति सूत्रवृत्तेः स्वीकृतम् इति च तत्रोक्तम्। क्षीरस्वामिणा अमरकोशस्य व्याख्याने[3] ''इल्वालास्तारकाः इल्वलोऽसुर इति उणादौ

---

1 संस्कृतव्याकरणशास्त्र का इतिहास प्रथमः भागः पु.सं.६८८

2 स.क.३/३/१०१

3 अ. १/२/२४

श्रीभोजदेवो व्याकरोत्"[4] इति 'तुल्वलेल्वलास्तारकाः'[5] इति उणादिसूत्रवृत्तेः उद्धृतं वाक्यमुक्तम्। दण्डनाथनारायणविरचितायाः हृदयहारिणीव्याख्यानस्य प्रथमतृतीयपादयोः अन्ते एवमुच्यते यत् "इति श्री दण्डनाथनारायणभट्टसमुद्धृतायां सरस्वतीकण्ठाभरणस्य लघुवृत्तौ हृदयहारिण्यां ....समाप्तः" इति। तदधिकृत्य व्याकरणशास्त्र का इतिहास इति ग्रन्थे युधिष्ठिरमीमांसकेन एवं प्रतिपाद्यते यत् 'अस्मिन् वाक्ये समुद्धृतायां तथा लघुवृत्तौ इति पदद्वयस्य विशेषमहत्वमस्ति इति। तेन पदद्वयेन नारायणभट्टेन कस्याश्चन विशेषव्याख्यायाः संक्षेपमात्रमत्र कृतमिति सूच्यते। अन्यथा तत्र समुद्धृतायामिति पदस्थाने विरचितायां इति लिखितं स्यादिति। तस्मात् सरस्वतीकण्ठाभरणस्य कश्चन बृहद्वृत्तिरस्तीति अनेन स्पष्टीक्रियते।'[6] किन्तु हृदयहारिणीव्याख्यायाः द्वितीयचतुर्थपादयोः अन्तिमे 'दण्डनाथनारायणभट्टविरचितायां' इत्येव दृश्यते।

**पुरुषकारः।**

'संस्कृतव्याकरणशास्त्र का इतिहास' इति ग्रन्थे सरस्वतीकण्ठाभरणस्य कृष्णलीलाशुकमुनिप्रणीतः 'पुरुषकार' इति व्याख्या अस्तीत्युच्यते। तस्य हस्तलेखा त्रिविक्रमस्य हस्तलेखसंग्रहे विद्यते। युधिष्ठिरमीमांसकस्य अभिप्राये अस्यां व्याख्यायां

---

4 संस्कृतव्याकरणशास्त्र का इतिहास प्रथमः भागः पु.सं.६८८

5 स.क.२/३/१२२

6 संस्कृतव्याकरणशास्त्र का इतिहास प्रथमः भागः पु.सं.६८९

पाणिनिप्रणीतस्य जाम्बवतीविजयस्य अनेकानां श्लोकानां उद्धरणं कृतम्। कृष्णमाचार्येण 'हिस्ट्रि ओफ् क्लासिक्कल् लिटरेचर्' इति ग्रन्थे अपि 'पुरुषकारः' इति व्याख्यानस्य उल्लेखनं कृतम्।[7] कृष्णलीलाशुकमुनिना 'पुरुषकारः' इति नाम्नि एव देवकृतस्य दैवं इति ग्रन्थस्य व्याख्यानमपि कृतम्।

**रत्नदर्पणः।**

'संस्कृतव्याकरणशास्त्र का इतिहास' इति ग्रन्थे सरस्वतीकण्ठाभरणस्य 'रत्नदर्पण' इति व्याख्या अस्तीति युधिष्ठिरमीमांसकेन उक्तम्। ग्रन्थकारस्य देशकालमधिकृत्य यत्किमपि न ज्ञायते।[8] सरस्वतीकण्ठाभरणस्य अलङ्कारशास्त्रप्रतिपादितस्य ग्रन्थस्य रत्नेश्वरमिश्रविरचिता रत्नदर्पण इति व्याख्या, तथा रामसिंहेन विरचिता व्याख्या च अधुना उपलभ्यते। सरस्वतीकण्ठाभरणस्य 'रत्नदर्पण' इति व्याख्या अस्तीत्येव युधिष्ठिरमीमांसकेन उक्तम्। यावत्तदप्राप्तं तावत्तत् व्याकरणशास्त्रग्रन्थस्य भवतीति स्पष्टं वक्तुं न शक्यते।

**प्रक्रियाग्रन्थः।**

प्रक्रियाकौमुद्याः 'प्रसाद' इति व्याख्याने 'तथा च सरस्वतीकण्ठाभरणप्रक्रियायां पदसिन्धुसेतावित्युक्तम्'। तस्मात् सरस्वतीकण्ठाभरणस्य 'पदसिन्धुसेतु' इति व्याख्यानमस्ति

---

7 संस्कृतव्याकरणशास्त्र का इतिहास प्रथमः भागः पु.सं.६८८

8 संस्कृतव्याकरणशास्त्र का इतिहास,प्रथमो भागः पु.सं.६९१

इति ज्ञायते। ग्रन्थकारस्य देशकालमधिकृत्य न ज्ञायते।[9] अधुना तद्व्याख्यानमपि नोपलभ्यते।

**डाँ नारायण म. कसारा महाभागस्य व्याख्या।**

डाँ नारायण म. कसारा इत्यनेन हृदयहारिण्याः अष्टमाध्यायस्य व्याख्यानम् कृतम्। इयं व्याख्या १९९२ तमे वर्षे अहम्मदाबाद राष्ट्रियवेदविद्याप्रतिष्ठानात् प्रसिद्धीकृतम्। व्याख्यानमिदं गुजरातीभाषायां वर्तते अधुना उपलभ्यते च।

**हृयहारिणीव्याख्या।**

सरस्वतीकण्ठाभरणस्य व्याख्यानेषु दण्डनाथनारायणेन विरचिता भवति हृयहारिणीव्याख्या। इयं व्याख्या षष्ठाध्यायपर्यन्तमेव चतुर्षु भागेषु प्रसिद्धीकृतम्। प्रथमभागः द्वितीयभागः तृतीयभागश्च के.साम्बशिवशास्त्रिणः सम्पादनेन अनन्तशयने महोन्नतमहामहिम-श्रीचित्रावतारमहाराजशासनेन राजकीयमुद्रणयन्त्रालये तदध्यक्षेण मुद्रयित्वा १९३५, १९३७, १९३८ वर्षयोः प्रकाशितम्। प्रथमभागे प्रथमाध्यायः, द्वितीयभागे द्वितीयाध्यायश्च अन्तर्भवति। तृतीयभागे तृतीयचतुर्थावध्यायौ स्तः। १९४८ तमे ट्रिवेन्ड्रम् सरवकारीयमुद्रणालयात् वि.ए.रामस्वामिशास्त्रिणः सम्पादनेन प्रकाशिते चतुर्थभागे पञ्चमषष्ठाध्यायौ स्तः।

*लोकैककल्पवृक्षाय बालेन्दुकुसुमश्रिये।*
*श्रेयः फलनिमित्तायं पार्वतीपतये नमः।। १।।*
*यः सालभञ्जिकाभङ्गिमङ्गे धारयति श्रियम्।*
*तस्मै जगत्रयाधारस्तम्भाय स्वभुवे नमः।। २।।*

---

9 संस्कृतव्याकरणशास्त्र का इतिहास,प्रथमो भागः पु.सं.६९१

*विद्वज्जनमनोम्भोजप्रतिबोधविधायिनम् ।*
*विघ्नान्धतमसादित्यं नित्यं स्तौमि गणाधिपम् ।। ३ ।।*
*पदलक्ष्मप्रबोधाय मया हृदयहारिणी ।*
*वृत्तिः सरस्वतीकण्ठाभरणस्य विधास्यते ।। ४ ।।*

इति मङ्गलश्लोकेन हृदयहारिणीव्यख्यानस्यारम्भः । तदनन्तरं सरस्वतीकण्ठाभरणस्य

*"प्रणम्यैकात्मतां यातौ प्रकृतिप्रत्ययाविव ।*
*श्रेयः पदमुमेशानौ पदलक्ष्म प्रचक्ष्महे ।। "*

इति मङ्गलश्लोकस्य व्याख्यानमुच्यते ।

हृदयहारिणीव्याख्यायाः सप्तमाध्यायोऽप्रकाशितः भवति । तस्य हस्तलेखा अडयार्ग्रन्थशालायाः प्राप्तः । तत्र २४२ पुटानि सन्ति । कुत्रचित् स्पष्टता नास्ति च । हदयहारिण्याः सप्तमाध्याययुक्ता पर्णलेखा अनन्तपुर्याः मानुस्क्रिप्ट् ग्रन्थशालायाः प्राप्ता । तत्र सप्तमाध्यायप्रतिपादकानि ४४ पर्णानि सन्ति । सा पर्णलेखा अनन्तपुर्याः राजभवनात् ग्रन्थशालां प्राप्ता । तस्याः पर्णलेखायाः आधारेणैव षष्ठाध्यायपर्यन्तम् अनन्तपुर्याः के. साम्बशिवशास्त्रिणः तथा वि.ए.रामस्वमिशास्त्रिणः सम्पादनेन प्रसिद्धीकृतम् । सप्तमाध्यायस्य मुद्रणाय श्रम कृत इति पर्णलेखायाः पठनेन स्पष्टं ज्ञायते । तत्र केषुचन पर्णेषु 'end of the first /second /third forum' इति दृश्यते । मुद्रितस्य पर्णस्यैव शोधनार्थं एवं लिखतीति कार्यकर्तृणां वाक्यात् ज्ञायते । षष्ठाध्यायस्य मुद्रणं १९४८ तमे वर्षे आसीत् । तत्समीपे एव कदाचित् षष्ठाध्यायस्य सम्पादकेनैव सप्तमाध्यायस्य मुद्रणाय प्रयत्नः कृतः स्यात् । परन्तु तस्य प्रसिद्धीकरणं येनकेनापि कारणेन नाभवत् ।

**दण्डनाथनारायणभट्टस्य परिचयः।**

दण्डनाथेन स्वकीये ग्रन्थे कुत्रापि तस्य जन्म देश स्थितिसम्बन्धं विवरणं न कृतम्। तस्मात् तस्य जीवनसम्बद्धं प्रामाणिकेतिवृत्तं ज्ञातुं न शक्यते। तथापि दण्डनाथस्य नामनिर्देशपूर्वको प्राचीनोल्लेखः देवराज यज्वा महाभागानां निघण्डुव्याख्याने उपलब्धः। तस्मात् देवराजस्य अर्वाचीनोऽयम्। एवं सायणाचार्येण 'माधवीयधातुवृत्तौ' ''विष्णुविशेष इति दण्डनाथः''[10] इत्युक्त्वा दण्डनाथस्य स्मरणं कृतम्। हृदयहारिणीव्याख्यायाः प्रथमभागस्य उपोद्घाते सम्पादकेन साम्बशिवशास्त्रिणा एवमुक्तम् यत्-'' वृत्तिकारस्तु श्रीदण्डनाथनारायणः क इति किं देशीय इति किं समय जीवीति च विनिर्णेतुं न कश्चिदपि मार्गो दृश्यते विवृतः, येन गच्छतां किमपि किमपि वा स्फुरेत्। अभ्यूहमात्रशरणानां तु तदिदमेकं चर्चार्हं शक्यमुपहर्तुं, यद् - दण्डनाथशब्दश्रवणान्मूलकारश्रीभोजदेवस्य सेनाधिपतिर्वा न्यायाधिपतिर्वा कश्चिदयं स्यात् सम्भवेद् यदुपजीविनो हि तदीयाशयविवरणं समग्रं सफलं च। यद्ययमभ्यूहो भविता बलीयानन्याभिरुपपत्तिभिः, भवत्ययं च मूलकारसमसमयजीवी क्रिस्त्वब्दीयैकादशशताब्द्या भुवमिमामभूषयत् धारानगरीं च लब्धजीविनः। भोजदेवीया च काचिदसावप्रसिद्धा कृतिरस्मदधिकरणसम्पादिताधस्तान्निर्दिश्यते'' इति विद्वज्जनवल्लभ इति ज्योतिषग्रन्थे १२ तमे अध्याये परामृष्टम् इति उक्तम्।[11] हृदयहारिणीव्याख्यायां चतुर्थभागस्य भूमिकायां

---

10 माधवीयधातुवृत्तिः भ्वा, २७७,पु.सं.१५२

11 स.कह.हा.सं.साम्बशिवशास्त्रि. उपोद्घातः।

महादेवशास्त्रिणा बोपदेवस्य मुग्धबोधात् हृदयहारिण्याः तुलनं कृत्वा निष्कर्षः कृतः यत् दण्डनाथः बोपदेवात् अर्वाचीनः इति। तस्याभिप्रायेण दण्डनाथस्य कालः १३५०-१४५० ई वर्षयोः मध्ये भवति इत्यस्ति। केचन पण्डिताः दण्डनाथस्य कालः प्रायः देवराजात् प्राचीनः इत्यतः १३०० ई वर्षे भवति इत्यङ्गीकुर्वन्ति। केषाञ्चन पण्डितानामभिप्रायेण भोजदेव एव दण्डनाथः इत्यस्ति। सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन इति ग्रन्थे मेल्पत्तूर् नारायणभट्टस्य तथा तेषां ग्रन्थानां परिचयात्मकप्रसङ्गे अनेन हृदयहारिणीव्याख्या कृता इति प्रतिपादितम्।[12] मेल्पत्तूर् नारायणभट्टपादः स्वकीये प्रक्रियासर्वस्वे तथा अपाणिनीय-प्रमाणसाधने भोजदेवं अनुस्मरति। केरलस्य तिरुवनन्तपुरराजकीयमुद्रणालयात् हृदयहारिण्याः षष्ठाध्यायपर्यन्तं भागचतुष्टयं प्रसिद्धीकृतम्। तत्रैव मानुस्क्रिप्ट् ग्रन्थशालायां कैरलीलिप्यां हृदयहारिण्याः सप्तमाध्यायपर्यन्ता हस्तलेखा वर्तते। इमानिकार्याणि मेल्पत्तूर् नारायणभट्ट एव दण्डनाथ इति वादस्य गौरवमायाति।

12 सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन् प्रकरणं ३, पु.सं.१६७

# चतुर्थोऽध्यायः।

## हृदयहारिणीव्याख्यानस्य अध्यायानां विवेकः।

अद्य उपलभ्यमानेषु व्याख्यानेषु हृदयहारिणी एव प्रधानभूता भवति। हृदयहारिणीव्याख्यानं सरस्वतीकण्ठाभरणस्य षष्ठाध्यायपर्यन्तमेव प्रकाशितम्। सप्तमाध्यायस्य व्याख्यायाः हस्तलेखा 'अडयार्' ग्रन्थशालायाः तथा पत्रलेखा 'तिरुवनन्तपुरं मानुस्क्रिप्ट्' ग्रन्थशालायाः च उपलब्धः। किन्तु अष्टमाध्यायस्य व्याख्या कुत्रापि न प्राप्ता। सरस्वतीकण्ठाभरणे भोजेन स्वीकृतः सूत्रक्रमः हृदयहारिणीव्याख्याने दण्डनाथेन सर्वत्र न स्वीकृतः। सूत्रेष्वपि कुत्रचित् भेदाः दृश्यन्ते। प्रत्यध्यायं तेषां कानिचन उदाहरणानि पश्यामः।

**प्रथमाध्यायः-प्रथमपादः।**

भोजदेवः पाणिनीयमतमनुसृत्य 'चतुर्दशसमाम्नायः' अङ्गीकृतः। किन्तु हृदयहारिण्यां दण्डनाथेन 'हयवरट्' 'लण्' इति द्वयोः सूत्रयोः मेलनं कृत्वा 'हयवरलण्' इति सूत्रस्य व्याख्यानं दत्तम्। तस्मात् दण्डनाथस्य मते त्रयोदश 'वर्णसमाम्नाय' एव वर्तते।

'चुलुम्पादिश्च'[1] इति भोजसूत्रं हृदयहारिण्यां 'जुचुलुम्पादिश्च' इति दृश्यते। ज्वादीनामपि धातुसंज्ञाप्राप्त्यर्थं दण्डनाथेन सूत्रे 'जु' इति योजितम् भवेत्। भोजव्याकरणे 'प्राङ्ण्वुलः

---

1 स.क.१/१/१३

कृत्याः'.[2] प्रतिपादितं सूत्रं हृदयहारिण्यां 'कृत्याः प्राङ् ण्वुलः' इत्यस्ति। 'ण्वुलः' प्राग् ये तव्यादयः तेषां 'कृत्यसंज्ञा' अनेन विधीयते। भोजेन सूत्रे अन्ते संज्ञा प्रयुक्ता तत्तु हृदयहारिण्याम् आदौ दृश्यते।

भोजव्याकरणे प्रतिपादितं सूत्रं भवति 'ननीखाद्यदिहाशब्दाय क्रन्दाम्'[3] इति । किन्तु हृदयहारिण्यामिदं सूत्रं 'ननीखाद्यादिह्वायशब्दायक्रन्दाम्' इत्यस्ति। तत्र 'हा' इत्यस्य स्थाने 'ह्वाय' इत्यस्ति। 'नयतेर्गत्यर्थस्यादिखाद्योरभ्यवहारार्थयोर्ह्वायिशब्दायक्रन्दां शब्दक्रियाणां ण्यन्तानामणि कर्तुः कर्मसंज्ञा गतिज्ञानादिसूत्रेण प्राप्ता न भवति' इति दण्डनाथेन अस्य सूत्रार्थः उच्यते। 'गतिज्ञानप्रत्यवसानार्थशब्दक्रियाकर्मकश्रुदृशीनामणिकर्ता णौ'[4] इति सूत्रेण 'गत्यर्थाज्ञानार्थभोजनार्थानां शब्दक्रियाणामकर्मकाणां श्रुदृशोरप्यणौ यः कर्ता णौ स कर्मसंज्ञो भवति'। ननीखाद्यादिसूत्रेण एतेषां धातूनां ण्यन्तानामणिकर्तुः कर्मसंज्ञा निषेधः उच्यते। 'ह्वाययति देवदत्तं यज्ञदत्तेन' इति रूपं साधितुं दण्डनाथेन हृदयहारिण्यां सूत्रे 'ह' इत्यस्य स्थाने 'ह्वाय' इति योजितम्।

भोजेन 'अण्मात्रिको ह्रस्वः'[5] इत्युक्तं सूत्रं हृदयहारिण्याम् 'अञ् मात्रिको ह्रस्वः' इत्यस्ति। 'णकारस्य' 'ञकारः' हृदयहारिण्यां दृश्यते। 'ह्रस्वसंज्ञा' अनेन विधीयते।

2 स.क.१/१/१२

3 स.क.१/१/४५

4 स.क.१/१/४२

5 स.क.१/१/९०

'मात्राप्रमाणोच्चारणकालोऽज् ह्रस्वसंज्ञो भवतीति' सूत्रार्थः दण्डनाथेन उक्तः। 'अञ्'[6] इति भोजसूत्रं हृदयहारिण्याम् 'उञ्' इत्यस्ति। उञिति निपात इतिशब्दे परे प्रगृह्यो वा भवति इति सूत्रार्थः दण्डनाथेन उक्तं वर्तते। उ इति विति इति व्याख्यानमपि दत्तं वर्तते।

'वावत्वावत्वैतुवैन्वैनुवैश्रौषड्वौषड्वषट्बट्बाङ्विद्वाट्प्याद्कद्धंबडधात्स्वधास्वाहालञ्चनहयः'[7] इति सरस्वतीकण्ठाभरणस्थं सूत्रं हृदयहारिण्यां 'वावत्वावत्वैतुवैन्वैनुवैरैवैश्रौषड्वौषड्वषट्बट्बा-ङ्विद्वाट्प्याद्कद्धंबडधात्स्वधास्वाहालञ्चनहयः' इत्यस्ति। अत्र 'रैवै' इति पदमधिकतया दृश्यते। तत्र व्याख्याने 'वावादयः पञ्चविंशतिरसत्वे निपातसंज्ञाः भवन्ति'। तत्र 'रै' इत्यनादरे 'वै' इति पादपूरणे विशेषेऽपि इति व्याख्यानमपि दत्तम्। भोजेन त्रयोविंशत्यसत्वानाम् परामर्श एव सूत्रे कृतम्।

भोजेन 'अच्प्रतिरूपाश्चादयश्च'[8] इति सूत्रमुक्तम्। तत्तु व्याख्याने चकारं विना 'अप्रतिरूपादयश्च' इत्यस्ति। 'अप्रतिरूपादयोऽसत्वे निपातसंज्ञा भवन्ति' इत्यर्थः। एते च सम्बोधनभर्त्सनपूरणतन्त्रप्रतिषेधादिषु यथासम्भवं भवन्ति। 'अ अपेहि'। 'आ एवं नु मन्यसे'। 'इ इन्द्रं पश्य'। 'ई ईदृशः संसारः'। 'उ उत्तिष्ठ'। अचाम् इत्याद्युदाहरणानि दत्वा आदिग्रहणात् 'कुं' 'खुं' 'गुं' 'घुम्' इत्यादयोऽन्येऽपि भवन्तीति व्याख्यानमपि दत्तम्।

---

6 स.क.१/१/११०

7 स.क.१/१/११९

8 स.क.१/१/१२६

भोजव्याकरणे सूत्रं 'ऊर्युरर्युरी चाङ्गीकारे'[9] इति अस्ति। किन्तु हृदयहारिण्यां 'ऊर्युरर्युरुरी चाङ्गीकारे' इत्यस्ति। 'ऊरी उररी उरुरी चेत्येते गतिसंज्ञा भवन्ति' इति सूत्रार्थः दण्डनाथेनोच्यते। भोजव्याकरणस्थं 'साक्षान्मिथ्याचिन्ताभद्रारोचनामास्थाद्धाप्राजर्याप्राजरुहाबीजर्याबीवजरुहा-संसर्या च्व्यर्थे'[10] इति सूत्रं हृदयहारिण्यां 'साक्षान्मिथ्याचिन्ताभद्रारोचनामास्थादन्धाप्राजर्या-प्राजरुहाबीजरुहासंसर्या च्व्यर्थे' इत्यस्ति। 'साक्षादादयोऽभूततद्भावविषयाः क्रियायोगे वा गतिसंज्ञा भवन्ति' इत्यर्थः। 'साक्षात्कृत्य', 'मिथ्याकृत्य' इत्यादिषु दत्तोदाहरणेषु 'बीजरुहाकृत्य' इति च दण्डनाथेन दत्तम्।

भोजेन 'निपातोऽव्ययम्[11]' इति सूत्रं हृदयहारिण्यां 'तेऽव्ययम् ' इत्येव दृश्यते। 'ये पूर्वं प्रागी(ग्री)श्वरान्निपाता उक्तास्तेऽव्ययसंज्ञा भवन्तीति' सूत्रार्थमपि दण्डनाथेन दत्तम्। 'निपात' इति पदं पूर्वस्मात् सूत्रात् अधिक्रियते इति स्यात्। 'भोजेन दृ भये'[12] इति उक्तं सूत्रं हृदयहारिण्यां 'भये' इत्येव अस्ति। पुनश्च सूत्रार्थे ' दृधातुर्भयेऽर्थे मित्संज्ञो भवति' इत्यस्ति। भोजेन प्रथमपादस्यान्तिमे 'सल्लिटौ च'[13] 'लिङाशिषि'[14] इति सूत्रद्वयमुक्तम्। किन्तु हृदयहारिण्यां 'वर्ज्यं नीभ्यां सन्लिटौ च लिङाशिषि' इति सूत्रे द्वयोः भोजसूत्रयोः मेलनं दृश्यते।

---

9 स.क.१/१/१३३

10 स.क.१/१/१५२

11 स.क.१/१/१७५

12 स.क.१/१/१९४

13 स.क.१/१/२११

14 स.क.१/१/२१२

एवं सूत्राणां मेलनेन भोजव्याकरणस्य २१२ सूत्राणां स्थाने हृदयहारिण्यां २११ सूत्राण्येव सन्ति।

**प्रथमाध्यायः - द्वितीयपादः।**

भोजेन उक्तं 'किमिटोरतः'[15] इति सूत्रं हृदयहारिण्यां 'किमिटोऽत्' इत्यस्ति। 'किमिटोः सम्बन्धी योऽत् तस्यान्त्यं हलिद् भवति' इति सूत्रार्थोऽपि तत्र दृश्यते। एवं भोजेन 'उपेक्षातोऽधिकारः'[16] इत्युक्तं सूत्रं दण्डनाथेन 'अपेक्षातोऽधिकारः' इत्येवोक्तम्।

भोजेन 'अनन्तरस्यविधिः प्रतिषेधो वा भवति'[17] इति सूत्रे प्रयुक्तं 'भवति' इति पदं त्यक्त्वा हृदयहारिण्यां 'अनन्तरस्यविधिः प्रतिषेधो वा' इत्येव सूत्रं वर्तते।

भोजव्याकरणे 'पुनः प्रसङ्गविज्ञानात्सिद्धम्[18]' इति सूत्रं हृदयहारिणायां 'पुनः प्रसङ्गविज्ञानात्सिद्धम् भवति' इति दृश्यते। एवं 'यावत्संभवस्तावद्विधिः'[19], 'अकृतकारी खल्वपि शास्त्रम्'[20] इति सूत्रद्वयेण सह 'क्वचित् भवति' इति योजयित्वा हृदयहारिण्यां 'यावत्संभवस्तावद्विधिः क्वचित् भवति', 'अकृतकारी खल्वपि शास्त्रम् क्वचित् भवति' इति

15 स.क.१/२/९

16 स.क.१/२/६५

17 स.क.१/२/७०

18 स.क.१/२/१२२

19 स.क.१/२/१२६

20 स.क.१/२/१२८

दृश्यते। एवमेव भोजव्याकरणे 'यथोद्देशं संज्ञापरिभाषं प्रवर्तते'[21] इति सूत्रं 'प्रवर्तते' इति पदं विहाय 'यथोद्देशं संज्ञापरिभाषम् ' इत्येव दृश्यते हृदयहारिण्याम्।

भोजव्याकरणे प्रतिपादितम् 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः'[22] इति सूत्रं हृदयहारिण्यां न दृश्यते। तस्मात् भोजव्याकरणस्थानां १३५ सूत्राणां स्थाने हृदयहारिणीस्थसूत्राणां संख्या १३४ एव भवति।

**प्रथमाध्यायः - तृतीयपादः**

'च्व्यर्थे भृशोत्सुकशीघ्रचपलपण्डिताण्डरकण्डरमेधाशुचिनीलहरितफेनमन्द्रेभ्यः'[23] इति सूत्रं किञ्चिद्भेदेन 'च्व्यर्थे भृशोत्सुकशीघ्रचपलपण्डिताण्डरकण्डरमेधाशुचिनील-हरितफेनमन्दमन्द्र(थ? भ)द्रे भ्यः' इति दृश्यते। 'मन्द इति' शब्दः अत्र दण्डनाथेन योजितः। किन्तु व्याख्यानं न दत्तम्। एवं भोजव्याकरणे 'इरिजृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुभ्यो वा'[24] इति सूत्रं हृदयहारिण्यां 'शिव' इत्यपि योजयित्वा 'इरिज्जृश्विस्तन्भुम्रुचुम्लुचुग्रुचुग्लु-चुग्लुञ्चुभ्यो' इत्यस्ति। 'अश्वत्', 'अश्वर्यात् ' 'अशिश्वियत् ' इति रूपसिद्ध्यर्थं दण्डनाथेन सूत्रे 'श्वि' इति

---

21 स.क.१/२/१३०

22 स.क.१/२/६६

23 स.क.१/३/१५

24 स.क.१/३/९२

योजितं भवेत्। 'सामि वा'[25], 'कर्तरि ण्वल्तृजचश्च'[26], 'अर्हणे तृच्'[27] इति भोजसूत्राणि ईषद्भेदेन हृदयहारिण्यां 'समि वा', 'कर्तरि ण्वल्तृजचः', 'अर्हतौ तृच्' इति दृश्यन्ते।

भोजव्याकरणस्य षष्ठसूत्रादारभ्य 'अर्थात् शानदानोर्वा'[28] इत्यारभ्य 'उदभिदुस्सुभ्यो मनसः'[29]इति सूत्रपर्यन्तं त्रयोदशसूत्राणां व्याख्या हृदयहारिण्यां नास्ति। केवलं सूत्राण्येव तत्र प्रतिपादितम्। तत्रैव 'कर्तुर्विप्'[30], 'गल्भक्लीबहोडेभ्यो ङित्'[31] इति द्वयोः सूत्रयोः मेलनं दृश्यते। तस्मात् परेषां सूत्राणां संख्या भोजव्याकरणात् परिवर्तिता। एवं भोजव्याकरणे प्रथमाध्यायस्य तृतीयपादे २३१ सूत्राणि सन्ति। तत्तु हृदयहारिण्यां २३० सूत्राण्येव भवन्ति।

**प्रथमाध्यायः- चतुर्थःपादः।**

भोजेन 'आतोऽनुपसर्गे कः'[32] इति सूत्रं हृदयहारिण्याम् आतोऽनुपसर्गात् कः इत्यस्ति। भोजव्याकरणे अनुपसर्गस्य अधिकरणत्वं हृदयहारिण्यां अपादानत्वं दृश्यते। 'आकारान्तात् अनुपसर्गात् धातोः कर्मण्युपपदे कर्तरि कप्रत्ययो भवति इति' सूत्रार्थश्च दण्डनाथेनोच्यते।

25 स.क.१/३/१५७

26 स.क.१/३/१८७

27 स.क.१/३/१८९

28 स.क.१/३/६

29 स.क.१/३/१८

30 स.क.१/३/१३

31 स.क.१/३/१४

32 स.क.१/४/४

'आत्मोदरकुक्षिषु भृञः कित्'[33] इति भोजसूत्रं हृदयहारिण्याम् 'आत्मोदरकुक्षिषु भृञः खिन् ' इति दृश्यते। भोजेन 'कित्' प्रत्ययविधानं सूत्रं दण्डनाथेन ' खिन् ' प्रत्ययविधानं कृतम्। तत्र दण्डनाथेन 'आत्मादिषु कर्मसूपपदेषु भृञो धातोः कर्तरि खिन्प्रत्ययो भवतीति' सूत्रार्थोऽपि दत्तः।

भोजव्याकरणे 'कूलाभ्रकरीरेषु च कषः सर्वे'[34] इति सूत्रं दण्डनाथेन 'सर्वकूलाभ्रकरीरेषु च कषः' इति कृतं वर्तते। तत्र 'सर्वशब्दः' आदौ प्रयुक्तः। सर्वकूलादिषु कर्मसूपपदेषु कषतेः कर्तरि खश्प्रत्ययो भवतीति सूत्रार्थः दण्डनाथेन दत्तः। 'सुतमितजनपूर्वहृदयतुरभुजप्लवेषु'[35] इति भोजसूत्रे 'प्रव' इति पदस्य योजनेन 'सुतमितजनपूर्वहृदयतुरभुजप्रवप्लवेषु' इति कृतं दणडनाथेन। सुतादिषु सुबन्तेषूपपदेषु गमेर्यथासम्भवं संज्ञायामसंज्ञायां च खप्रत्ययो भवति इति सूत्रार्थः तत्र दृश्यते। प्रवं गच्छतीति प्रवङ्गमः कपिः इति सिध्यर्थं प्रवयोः योजनं कृतं स्यात्।

भोजव्याकरणे 'अन्यत्रान्यतोऽपि चान्योऽपि दृश्यते'[36] इति सूत्रं हृदयहारिण्यां 'चकारयोजनेन अन्यत्रान्यतोऽपि चान्योऽपि  च दृश्यते इत्यस्ति'। एवं 'पुरि लङ् चास्मे'[37] इति भोजसूत्रं हृदयहारिण्यां 'पुरि लुङ् चास्मे' इति दृश्यते। दण्डनाथेन 'लङः' स्थाने 'लुङ्'

---

33 स.क.१/४/३७

34 स.क.१/४/५५

35 स.क.१/४/६१

36 स.क.१/४/१२१

37 स.क.१/४/१६३

प्रयुक्तम्। मण्डूकप्लुत्या 'अनद्यतन' इति वर्तते। 'भूतानद्यतनविशिष्टेऽर्थे वर्तमानाद् धातोः पुराशब्दे स्मशब्दवर्जिते उपपदे लुङ् लट् च प्रत्ययो वा भवतीति' सूत्रार्थः दण्डनाथेन दत्तः।

भोजव्याकरणस्य 'इङ्घारिभ्यां शतृशानचौ'[38] इति सूत्रं दण्डनाथेन 'इङ्घारिभ्यां शतृ शक्तौ' इत्युक्तम्। एवं 'जयतेश्च क्स्नुः'[39] इति सूत्रं दण्डनाथेन 'जेश्च क्स्नुः' इत्युक्त्वा सूत्रार्थे 'जयतेर्भवतेश्च तच्छीलादौ कर्तरी क्स्नुप्रत्ययो भवतीत्युक्तम्। हृदयहारिण्यां दण्डनाथेन 'निसो देशे'[40] इति नूतनं सूत्रं प्रतिपादितम्। निसः परात् गमेर्देशेऽधिकरणे डप्रत्ययो भवति इति तत्र सूत्रार्थश्च दृश्यते। अस्य सूत्रस्य योजनेन हृदयहारिणीस्थानां सूत्रसंख्या भोजव्याकरणात् परिवर्तिता। तस्मात् भोजव्याकरणस्य २७७ सूत्राणां स्थाने हृदयहारिण्यां २७८ सूत्राणि सन्ति।

**द्वितीयोऽध्यायः-प्रथमपादः**

भोजव्याकरणे द्वितायाध्यायस्य प्रथमं सूत्रं भवति 'कृवापाजिमिस्वदिसाध्यशूभ्य उण् ' इति। किन्तु 'कृवापाजिमिस्वदिसाध्यशूभ्य उण् बहुलं कर्तरि वर्तमाने संज्ञायाम् ' इति सूत्रमेव हृदयहारिण्यां दृश्यते। कृञादिभ्यो वर्तमानार्थवृत्तिभ्यः संज्ञायां कर्तरि बहुलमुण् प्रत्ययो भवति इति सूत्रार्थोऽपि दण्डनाथेन उच्यते। 'कारुः शिल्पी'। 'वायुर्नभस्वान्'। 'पायुरपानम्'। 'जायुरौषधम्'। 'मायुः पित्तं शब्दश्च'। 'गोमायुः सृगालः'। 'स्वादुः रसः'। 'साधुः श्रेयान्' 'आशुः शीघ्रः' इत्याद्युदाहरणानि तत्र उक्तानि। भोजव्याकरणस्य सूत्रं भवति 'पाज्यार्तिभ्यो

38 स.क.१/४/१८१

39 स.क.१/४/१९४

40 हृ.हा.१/४/६९

ङित्'[41] इति। तत्तु हृदयहारिण्यां 'पाञ्चार्तिभ्यः कित् ' इत्यस्ति। 'पिषत्यादिभ्यस्तुन्प्रत्ययः किद् भवतीति' सूत्रार्थो उच्यते। 'पीतुः' 'सूर्यः' 'अक्तुः' 'रात्रिः' 'ऋतुर्वसन्तादिः' इत्युदाहरणानि तत्र दत्तानि। भोजेन 'ङकारस्य' 'इत्' विधिते दण्डनाथेन 'ककारः' 'इत्' इति सूत्रे उच्यते। भोजव्याकरणस्य 'के शीङो रट् चास्य'[42] इति सूत्रं हृदयहारिण्यां 'के शीङ एरट् चास्य' इत्यस्ति। अस्मिन् पादे सरस्वतीकण्ठाभरणस्य तथा हृदयहारिण्याः सूत्रसंख्या समाना एव।

**द्वितीयोऽध्याये द्वितीयः पादः।**

भोजव्याकरणस्य सूत्रं भवति 'मुहेः खर्मूर्च'[43] इति। इदं सूत्रं हृदयहारिण्यां 'ख' इति त्यक्त्वा 'मुहेर्मूर्च' इत्येव अस्ति। 'खप्रत्ययः' 'मूर्चादेशश्च' अनेन विधीयते। 'मुहेः खप्रत्ययो मूर्चादेशो भवतीति' सूत्रार्थः दण्डनाथेन उक्तः। पूर्वसूत्रात् अर्थात् 'शमिमनिभ्यां खः[44]' इति सूत्रात् तत्र 'ख' इति अनुवर्तते इत्यस्मात् सूत्रे 'ख' इति त्यक्तं स्यात्।

'श्यतेरिच्चास्य वा[45]' इति भोजसूत्रात् अस्य इति पदं त्यक्त्वा 'श्यतेरिच्च वा' इत्यस्ति हृदयहारिण्याम्। तत्रापि पूर्वस्मात् 'महतेरुच्चास्य व[46]' इति सूत्रात् 'अस्य' इत्यस्य अनुवर्तनमस्ति इत्यस्मात् दण्डनाथेन परित्यजेत्। 'श्यतेः खप्रत्ययः कित् इकारश्चान्तादेशो वा

41 स.क.२/१/६३

42 स.क.२/१/११९

43 स.क.२/२/४५

44 स.क.२/२/४४

45 स.क.२/२/४८

46 स.क.२/२/४७

भवतीति' सूत्रार्थः।

भोजेन 'अञ्चच्[47]' इति उक्तं सूत्रं दण्डनाथेन 'डञ्चच् ' इत्युक्तम्। 'चिम्योर्डञ्चच्प्रत्ययो भवति' इति सूत्रार्थः। 'चञ्चा तृणमयः पुरुषः'। 'मञ्चः पर्यङ्कः अट्टश्च'। इत्युदाहरणानि तत्र दत्तानि। डित्करणप्रयोजनार्थं दण्डनाथेन 'डकारः' योजितः स्यात्।

भोजव्याकरणस्य 'कुटजोटजबल्बजादयः[48]' इति सूत्रं हृदयहारिण्यां 'कुटजोटजवल-जबल्बजादयः' इति अस्ति। 'वलजशब्दः' तत्र अधिकतया दृश्यते। 'कुटजादयः शब्दाः अजक्प्रत्ययान्ता निपात्यन्ते, वलेर्वुक् च वा'। 'वलजा सबुसो धान्यपुञ्जः' इति रूपसिद्ध्यर्थं 'वलजशब्दः' दण्डनाथेन योजितं भवेत्।

भोजव्याकरणस्य सूत्रमस्ति 'चरेरिटच् भश्च'[49] इति। तत्तु हृदयहारिण्यां 'चिरेरिटच् भुक् च' इत्यस्ति। 'चिरिणेतेरिटच्प्रत्ययो भुक् चागमो भवतीति' सूत्रार्थः। 'चिर्भिटी' 'वालुकी' इत्युदाहरणम्। 'तातव्रातालातसुतपुतपित्तनिमित्तमुस्तपुस्ततूस्तवितस्तादयः'[50] इति भोजसूत्रं हृदयहारिण्यां 'तातव्रातालातसुतपुतपित्तनिमित्तमुस्तपुस्ततूस्तविस्तवितस्तादयः' इत्यस्ति। 'विस्त' शब्दः तत्र अधिकः दृश्यते। 'तातादयः शब्दाः क्तप्रत्ययान्ता निपात्यन्ते'। 'विस्तं मानम्'

---

47 स.क.२/२/८२

48 स.क.२/२/९२

49 स.क.२/२/१०१

50 स.क.२/२/१३४

इति रूपसिद्ध्यर्थं दण्डनाथेन विस्तशब्दोऽपि योजितः भवेत्।

भोजव्याकरणस्य 'कुवोऽन्धच्[51]' इति सूत्रं दण्डनाथव्याख्याने 'कुडोऽन्धच् ' इत्युक्तम्। 'कवतेरन्धच्प्रत्ययो भवतीति' सूत्रार्थः तत्रोक्तः। 'कवन्धः धिन्नमूर्धा देहः'। भोजव्याकरणस्थं 'ग्रीष्मघर्मकूर्मसूर्मसुह्मजाल्मादयः'[52] इति सूत्रं दण्डनाथेन 'जिह्व' इति शब्दोऽपि संयोज्य 'ग्रीष्मघर्मकूर्मसूर्मसुह्मजिह्मजाल्मादयः' इत्युक्तम्। 'ग्रीष्मादयाः शब्दा मक्प्रत्ययान्ता निपात्यन्ते' इति सूत्रार्थः। 'जहातेर्जिह च' 'जिह्मः जडः'इति रूपं निष्पादयितुं दण्डनाथेन 'जिह्म' शब्दस्य योजनं कृतं स्यात्। अस्मिन्पादे भोजव्याकरणे हृदयहारिण्यां च सूत्रसंख्या समानरूपेण दृश्यते।

**द्वितीयोऽध्याये तृतीयः पादः।**

भोजव्याकरणे 'माच्छासाशलिकलिवलिससिसविकनिमनिबन्धिभ्यो यः'[53] इति सूत्रं हृदयहारिण्यां 'सविक' इति पदस्य सूकादेशेन 'माच्छासाशलिकलिपलिससिसूकनिमनि-बन्धिभ्यो यः' इति दृश्यते। एवं भोजव्याकरणस्य 'जनिजापुणिकृतिभ्यः क्यप् [54]' इति सूत्रं 'जा' इति विहाय 'जनिपुणिकृतिभ्यः क्यप् ' इति हृदयहारिण्यां वर्तते। 'एभ्यः क्यप् प्रत्ययो भवतीति' सूत्रार्थः। 'जन्यं सङ्ग्रामः', 'जाया पत्नी', 'पुण्यं सत्कर्म', 'कृन्ततीति कृत्या दुर्गा' इत्युदाहरणानि दत्तानि। 'जाया' इति पदनिष्पत्यर्थं भोजेन 'जा' शब्दः योजितः भवेत्। 'जा' शब्दस्य अभावेऽपि 'जाया' शब्दं निष्पादयितुं सामर्थ्यं सूत्रे वर्तेत इत्यस्मात् 'जा' शब्दः

51 स.क.२/२/१७४

52 स.क.२/२/२४७

53 स.क.२/३/१

54 स.क.२/३/३

दण्डनाथेन त्यक्तः भवेत्।

भोजेन 'शुसिचिमिभ्यो दीर्घश्च[55]' इत्युक्तं सूत्रं दण्डनाथेन 'शुसिचिम्यां दीर्घश्च' इत्युक्तम्। भोजव्याकरणे 'सपूर्वाच्चित् '[56] 'ऋषितनिकृध्किभ्यः कित् '[57] इति द्वयोः सूत्रयोः मध्ये 'इडावत्सरः'[58] इति सूत्रमस्ति। किन्तु हृदयहारिण्यां 'इडावत्सरः' इति सूत्रं नोच्यते। 'सपूर्वाच्चित् ' इति सूत्रव्याख्याने 'सपूर्वात् वसेः सरन् प्रत्ययश्चित् भवतीति' सूत्रार्थमुक्त्वा 'संवत्सरः', 'परिवत्सरः', 'इदावत्सरः', 'इद्वत्सरः' इति च प्रतिपादितम्। अत्र 'वसेश्च' [59]इति पूर्वसूत्रात् 'वसेः' इत्यनुवर्तते। 'इडावत्सरः' इति सूत्राभावात् हृदयहारिण्यां तस्मात् परमागतानां सूत्राणां संख्या परिवर्तिता। भोजव्याकरणे प्रतिपादितानां १९१ सूत्राणां स्थाने हृदयहारिण्यां १९० सूत्राणि एव सन्ति।

**द्वितीयोऽध्याये- चतुर्थःपादः।**

'भावे तुमुन् '[60] इति भोजव्याकरणस्थं सूत्रं हृदयहारिण्यां 'तुमुन् भावे' इति दृश्यते। 'भावे तुमुन्प्रत्ययो' अनेन विधीयते। एवं 'भुज्याच्छाद्यवस्रुसिच्यादिभ्यः कर्मणि'[61] इति भोजसूत्रं

---

55 स.क.२/३/३२

56 स.क.२/३/७०

57 स.क.२/३/७२

58 स.क.२/३/७१

59 स.क.२/३/६९

60 स.क.२/४/१९

61 स.क.२/४/१७०

हृदयहारिण्यां 'भुज्याच्छाद्यवस्रावावसिच्यादिभ्यः कर्मणि' इत्यस्ति। 'किं किलास्त्यर्थेषु'[62] इति भोजसूत्रं हृदयहारिण्यां 'किं किलास्त्यर्थेषु लृट् ' इति दृश्यते। एवं 'लोट् '[63] इति भोजसूत्रं हृदयहारिण्यां 'लोट् च' इत्यपि दृश्यते। तथा 'हिंसादेककर्मकात् '[64] इति भोजसूत्रं दण्डनाथेन 'हिंसार्थादेककर्मकात् ' इति च प्रतिपादितम्।

'वा प्रे वणिजाम् '[65] इति भोजसूत्रं हृदयहारिण्यां 'वा वणिणाम् ' इत्येव अस्ति। विकल्पेन 'घञ्' प्रत्ययो अनेन विधीयते। 'ग्रहेः प्र उपपदे वणिक्सम्बन्धिन्यभिधेये भावेऽकर्तरि च कारके घञ् प्रत्ययो भवतीति' सूत्रार्थः। 'तुलाप्रग्राहेण चरति', 'तुलाप्रग्रहेण चरति' इत्युदाहरणम्। 'प्रे लिप्सायाम् '[66] इति पूर्वसूत्रात् 'प्र' इति अनुवर्तते इत्यस्मात् दण्डनाथेन सूत्रे 'प्र' इति अनुक्तं स्यात्।

'भावेऽनुपसर्गस्य'[67], 'हनो वा वध च'[68] इति भोजसूत्रयोः प्रतिपादनं न कृतम्। तत्र 'समि च द्यूते'[69] इति सूत्रस्य व्याख्याने 'ह्वयतेराङि समि चोपपदे द्यूतेऽभिधेयेऽप्प्रत्ययः सम्प्रसारणमयच्चागमो भवति' इति सूत्रार्थमुक्त्वा 'समाह्वयः प्राणिद्यूतम्' इत्युदाहरणं दत्वा

---

62 स.क.२/४/२०३

63 स.क.२/४/२१६

64 स.क.२/४/२६३

65 स.क.२/४/६७

66 स.क.२/४/६६

67 स.क.२/४/९८

68 स.क.२/४/९९

69 स.क.२/४/९७

'भावे अनुपसर्गस्येति किम् -सङ्घातः' इति च दृश्यते। दण्डनाथेन 'भावे अनुपसर्गस्य' इति सूत्रस्य प्रवृत्तिः तत्पूर्वसूत्रेणैव साधितम्। किन्तु 'हनो वो वध च' इति सूत्रस्य परामर्शः पूर्वे परे वा सूत्रे न दृश्यते।

'व्रजियज्वासदीण्भ्यः कित् [70]' इति भोजसूत्रं हृदयहारिण्यां 'व्रजियज्यास्यदीण्भ्यः क्यप्' इति दृश्यते। भोजेनोक्तकित्प्रत्ययस्थाने दण्डनाथेन क्यप्प्रत्ययः प्रयुक्तः। 'व्रजादिभ्यः स्त्रियां भावादावर्थे संज्ञायां क्यप्प्रत्ययो भवति' इति सूत्रार्थः तत्र दण्डनाथेनोक्तः। 'व्रज्या', 'इज्या', 'आस्या', 'अद्या', 'इत्या' इत्युदाहरणानि उक्त्वा 'पकार उत्तरत्र पुगर्थः' इति च प्रतिपादितम्।

'संभावनायामनिष्पन्ने निष्पन्नवच्च'[71] इति भोजसूत्रं हृदयहारिण्यां 'निष्पन्नवच्च सम्भावनायाम्' इत्येव दण्डनाथेन प्रतिपादितम्। 'अनिष्पन्ने निष्पन्नवच्च हेतोः शक्तिश्रद्धानं सम्भावना' इति सूत्रार्थः। अस्य सूत्रस्यानन्तरं दणडनाथेन एकं नूतनं सूत्रमपि योजितम्। यथा- 'विद्यमानकर्तृकेभ्योऽस्त्यर्थेभ्यो भवन्त्यर्थे सर्वा विभक्तयः'[72] इति। 'विद्यमानकर्तृकेभ्योऽस्त्यर्थेभ्यो धातुभ्यः लडर्थे सर्वे लकारा भवन्ति'। 'मार्गे कूपोऽभूत्', 'कूप आसीत्', 'कूपो बभूव', 'कूपो भविष्यति', 'कूपो भविता', 'कूपोऽस्तीति' उदाहरणानि।

---

70 स.क.२/४/१२६

71 स.क.२/४/१९१

72 हृ.हा.२/४/१९२

हृदयहारिण्यां 'सर्वधातुभ्यो मनिन् '[73] इति  नूतनं सूत्रं दृश्यते। 'भसितं तत् भस्म', 'अद्भ्यः सरन्ति स्म अप्सरसः' एवमन्येऽपि प्रयोगतोऽवगन्तव्याः। इति तत्र व्याख्यानमपि दृश्यते। एवं 'राशौ वा'[74]  इति नूतनं सूत्रं दण्डनाथेनोच्यते। 'घञ्' प्रत्ययो अनेन विधीयते। 'राशस्ति...वसस्तस्मिन्नर्थे चिनोतेर्घञ्प्रत्ययो भवतीति' सूत्रार्थः। ककारश्चादेरादेशो वा भवति। 'कायः', 'काष्ठनिचयः'। 'म्लाम्लाज्याहाभ्यः'[75] इति सूत्रमपि नूतनतया दण्डनाथेन उक्तम्। 'म्लादिभ्यः स्त्रियां भावे अनिप्रत्ययो भवतीति' अस्य सूत्रस्य अर्थः। 'ग्लानिः', 'म्लानिः', 'ज्यानिः', 'हानिः' इत्युदाहरणानि। दण्डनाथेन 'तध्वम्भाविनो वा'[76]  इति  नूतनं सूत्रं प्रतिपादितम्। तस्य क्रियासमभिहारे विहितस्य लोटस्तध्वम्भाविनो हिस्ववद्वा हिस्वावादेशौ भवतः' इति सूत्रार्थः तत्र उक्तः। 'लुनीत लुनीतेत्येव यूयं लुनीथ', 'लुनीहि लुनीहीत्येव यूयं लुनीथ', 'अधीध्वमधीध्वमित्येव यूयमधीध्वे', 'अधीष्वाधीष्वेत्येव यूयमधीष्वे' इति उदाहरणानि दत्तानि।

अस्मिन् पादे नूतनानि पञ्चसूत्राणि दण्डनाथेन योजितानि। सूत्रद्वयस्य व्याख्यानं न दत्तम् च। तस्मात् अस्मिन् पादे सरस्वतीकण्ठाभरणे २८३ सूत्राणि तथा हृदयहारिण्यां २८५ सूत्राणि च भवन्ति।

---

73 हृ.हा.२/४/२

74 हृ.हा.२/४/६१

75 हृ.हा.२/४/१५६

76 हृ.हा.२/४/२२६

**तृतीयोऽध्यायः-प्रथमःपादः।**

भोजव्याकरणे प्रतिपादितानां षड्विंशतितः चत्वारिंशत्तमसूत्रपर्यन्तम् एवं २२० तः २७५ पर्यन्तं सूत्राणां व्याख्यानं विना केवल परामर्श एव हृदयहारिण्यां दृश्यते। तथा भोजेनोक्तं 'प्रतिपदषष्ठयाः पूर्णो विधः'[77] इति सूत्रं हृदयहारिण्यां न दृश्यते च। एवं भोजव्याकरणस्य 'भतिः'[78] इति सूत्रस्थाने हृदयहारिण्यां 'ङितः' इति दृश्यते। क्यङाद्यन्ता धातवो ङितः। तेभ्यः कर्तर्यात्मनेपदानि भवन्ति। 'श्येनायते', 'पापच्यते' इति व्याख्यानमपि तत्र दृश्यते।

'अपस्करः'[79] इति भोजसूत्रं हृदयहारिण्यां 'अपिस्करः' इत्यस्ति। अपपूर्वात् किरतेः ससुट्कात् कर्तर्यात्मनेपदानि भवन्ति। 'अपस्किरते वृषभो हृष्टः', 'अपस्किरते कुक्कुटो भक्षार्थी', 'अपस्किरते श्वा निवासार्थी' अपपूर्वस्य किरतेर्हर्षजीविकाकुलायकरणविषयस्य सुट् स्मर्यते। ससुट्कनिर्देशः किम् । आ(पा /प)किरति इति व्याख्यानमपि तत्र दृश्यते। तत्रैव 'सिजभ्यस्ताभ्यां लङः'[80] इति सूत्रस्थाने 'विदभ्यस्ताभ्यां लिङः' इत्यस्ति।

भोजव्याकरणे 'लिङिरेच् तस्यैश्[81]' इति सूत्रं हृदयहारिणीव्याख्याने विभज्य प्रतिपादितम्। तत्र 'लिट इरेच् ' इति सूत्रस्य व्याख्यानं कृत्वा ततः 'तस्यैश् ' इति सूत्रं पृथक्

---

[77] स.क.३/१/१९०

[78] स.क.३/१/४४

[79] स.क.३/१/५८

[80] स.क.३/१/३९

[81] स.क.३/१/८

व्यख्याति। 'लिङः' स्थाने भोजेन 'लिटः' प्रयोगः कृतश्च। 'लिट इरेच् ' इत्यस्य लिङादेशस्यात्मनेपदझकारस्येरेजादेशो भवतीति सूत्रार्थमुक्त्वा पेचिरे लेभिरे इत्युदाहरणं दत्तम्। लिट्यनादेशादेरेकहल्मध्येऽत इत्येत्वम्। चकारः स्वरार्थः। इति व्याख्यानमपि तत्र दत्तं वर्तते। एवं तस्यैश् इत्यस्य लिडादेशस्यात्मनेपदसम्बन्धिनस्तशब्दस्य एशादेशो भवति इति सूत्रार्थमुक्त्वा 'पेचे', 'लेभे' इत्युदाहरणद्वयं दत्तम्। शकारः सर्वादेशार्थाः इति च तत्र प्रतिपादितम्। एवं 'न स्त्रियामनुपलब्धादिभ्यः'[82] इति भोजसूत्रस्यापि विभागः हृदयहारिण्यां दृश्यते। हृदयहारिण्याम् 'अनुपसर्गाज्झः'[83] तथा 'क्वचिद् द्विवचनं च'[84] इति नूतनसूत्रद्वयं दण्डनाथेन प्रतिपादितम्। एवं सूत्राणां विभागेन तथा आगमेन भोजव्याकरणस्थानां ३०४ सूत्राणां स्थाने हृदयहारिण्यां ३०७ सूत्राणि वर्तते। अस्मिन् पादे 'अकर्मकात्[85]' इति सूत्रस्य आवृत्तिं विना 'अकर्मकाच्च'[86], 'अकर्मकाद्वा'[87] इति सूत्राण्यपि दृश्यते।

**तृतीयोऽध्यायः-द्वितीयः पादः।**

भोजव्याकरणस्थं 'सर्वचर्माद्यश्वोदशैकादशमाशब्दोर्ध्वमुहूर्तोर्ध्वदेहोर्ध्वन्दमकृतपूर्वा-

---

82 स.क.३/१/२२७

83 स.क.३/१/१२५

84 स.क.३/१/१५३

85 स.क.३/१/६९,८०

86 स.क.३/१/९०

87 स.क.३/१/१३४

दयः'[88] इति सूत्रं हृदयहारिण्यां तद्धिते इत्यपि योजयित्वा 'सर्वचर्माद्यश्वोदशैकादशमाशब्दोर्ध्व-मुहूर्तोर्ध्वदेहोर्ध्वन्दमकृतपूर्वादयस्तद्धिते' इत्यस्ति। सर्वचर्मादयः सामान्यसमासास्तद्धितविषये साधवो भवन्तीति सूत्रार्थोऽपि भोजेन उक्तः। अत्र तद्धितविषये एव तेषां शब्दानां साधुत्वं दण्डनाथेन कृतम्। भोजव्याकरणस्थं 'यथा न सादृश्ये'[89] इति सूत्रं हृदयहारिण्यां 'यथासादृश्ये' इत्युच्यते। 'नकारस्य लोपे' कृते असादृश्ये इति तत्र उक्तम्। यथेत्येतदव्ययम् असादृश्ये वर्तमानं सुपा सहैकार्थीभावे समस्यते इति सूत्रार्थात् असादृश्ये इति स्पष्टम्।

'पर्यपाङ्बहिरञ्चवः पञ्चम्या वा'[90] इति भोजसूत्रं वा इत्यभावेन पर्यपाङ्बहिरञ्चवः पञ्चम्या इत्येव हृदयहारिण्यां दृश्यते। तत्र व्याख्यापि न दृश्यते। तथापि एतत् स्पष्टं भवति यत् भोजेन विकल्पार्थे उक्तं कार्यं दण्डनाथेन तदपेक्षया उच्यते।

भोजव्याकरणस्थं 'भक्ष्यान्नपानपात्रैर्मिश्रीकरणव्यञ्जनयुग्यपूरणानि'[91] इति सूत्रं दण्डनाथेन भक्ष्यान्नपानपात्रैर्मिश्रीकरणव्यञ्जनयुग्यपूरणानि मिश्रोपसिक्तयुक्तपूर्णाद्यप्रयोगे इत्युक्तम्। मिश्रीकरणादिवाचिनी तृतीयान्तानि भक्ष्यादिसुबन्तैः सहैकार्थीभावे अव्यतिरिक्तकल्पान्तर्गतप्रतीयमानमिश्रणोपसिक्तयुक्तपूर्णादिक्रियापदाप्रयोगे समस्यन्ते इति सूत्रार्थः तत्रोक्तः। अत्र भोजापेक्षया मिश्रणोपसिक्तयुक्तपूर्णादिक्रियायाः प्रयोगाभावे एव

---

88 स.क.३/२/१

89 स.क.३/२/१५

90 स.क.३/२/१९

91 स.क.३/२/४६

समस्यन्ते इति दण्डनाथेनोच्यते। एवं भोजव्याकरणस्थं अपेतापोढनिर्गतमुक्तपतितत्रस्तैरसर्वा सा[92]', 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन'[93] इति सूत्रद्वयं 'सा' इत्यभावेन तथा 'अल्प' इत्योजनेन 'अपेतापोढनिर्गतमुक्तपतितत्रस्तैरसर्वा', 'स्तोकाल्पान्तिकदूरार्थकृच्छ्राणि क्तेन' इति दृश्येते हृदयहारिण्याम्।

भोजव्याकरणस्थं 'कालाः परिणामिना'[94] इति सूत्रं दण्डनाथेन 'कालाः परिमाणिना'[95] इत्युक्तम्। कालविशेषवाचिनः सुबन्ताः सामर्थ्यात् परिमाणवचनाः परिमाणिवाचिना सुपा सह समस्यन्ते इति सूत्रार्थोऽपि दण्डनाथेन उक्तः।

'यावादियत्वे'[96] 'लक्षणेनाभिप्रती आभिमुख्ये'[97], 'न मत्वर्थे'[98], 'दुः निन्दा-कृच्छ्रार्थयोः'[99] इति भोजसूत्राण्यतिरिच्य त्रशीतितमसूत्रादारभ्य चतुर्दशाधिकैकशत-सूत्रपर्यन्तं ३२ सूत्राणां व्याख्यां विना केवलसूत्रपरामर्श एव हृदयहारिण्यां दृश्यते। तत्रैव 'कुत्सितानि स्वार्थवचनैः खसूचीखेटदुर्दुरूटचेलब्रुवहतकजाल्मापशदकाण्डस्पृष्टधृष्ट-धूर्तकितवादिभिः'[100],

---

92 स.क.३/२/५३

93 स.क.३/२/५४

94 स.क.३/२/१२४

95 स.क.हृ.हा ३/२/१२७

96 स.क.३/२/१६

97 स.क.३/२/२०

98 स.क.३/२/८०

99 स.क.३/२/१४६

100 स.क.३/२/८३

'प्रशंसावचनैः[101] मातल्लिकामचर्चिकाप्रकाण्डोद्धतल्लजकपाद-मिश्रपाशहस्तभित्तिस्थल-पाल्यादिभिः' इति सूत्रद्वयस्य विभागः कृतः हृदयहारिण्याम्। एवमेव 'युवाखलतिपलित-वलिनजरद्भिः'[102] इति नूतनं सूत्रमपि तत्र योजयति। एवं सूत्राणां विभागैः तथा नूतनसूत्र-स्यागमेन च भोजसूत्रात् हृदयहारिण्यां सूत्रसंख्या परिवर्तिता। भोजव्याकरणे अस्मिन् पादे १६१ सूत्राण्येव सन्ति। तत्तु हृदयहारिण्यां १६४ भवन्ति।

**तृतीयोऽध्यायः-तृतीयः पादः।**

भोजव्याकरणस्थं 'बहुव्रीहिः सुजर्थे'[103] इति सूत्रं हृदयहारिण्यां 'सङ्ख्या' इत्यस्ति। सङ्ख्यावाचि सुबन्तं सुजर्थे वर्तमानं सङ्ख्येये या सङ्ख्या तद्वाचिना सुपा सह समस्यते इति सूत्रार्थः तत्र उच्यते। 'पूर्वपदातिशय आतिशायिकात् बहुव्रीहिः सूक्ष्मतरवस्त्राद्यर्थः'[104] इति भोजसूत्रं हृदयहारिण्यां 'पूर्वपदातिशय आतिशायिकात् बहुव्रीहिः सूक्ष्मतरवस्त्रतराद्यर्थः' इति दृश्यते।

भोजव्याकरणस्थानि १०२ तमसूत्रादारभ्य ११३ तमसूत्रपर्यन्ततमानि सूत्राणि व्याख्यानं विना हृदयहारिण्यां दृश्यते। तत्रैव 'त्यदादीनि सर्वैर्नित्यम्'[105] इति सूत्रं हृदयहारिण्यां सर्वैस्त्यदादीनि इति च दृश्यते।

---

101 स.क.३/२/८८

102 हृ.हा.३/२/९२

103 स.क.३/३/३

104 स.क.३/३/५६

105 स.क.३/३/११३

'वाबन्तः'[106], 'अनो नलोपश्च'[107], इति नूतनं सूत्रद्वयं हृदयहारिण्यां दृश्यते। तेन तत्रत्य सूत्रसंख्या भोजव्याकरणात् परिवर्तिता। भोजेन १४८ सूत्राणां प्रतिपादने कृते सति दण्डनाथेन १५० सूत्राणि प्रतिपादितानि।

**तृतीयोऽध्यायः-चतुर्थः पादः।**

'लोहितादिभ्यश्शकलपर्यन्तेभ्यो नित्यम्'[108] इति भोजसूत्रं व्याख्याने 'पर्यन्तशब्दाभावे लोहितादिभ्यश्शकलान्तेभ्यो नित्यम् ' इति दृश्यते। भोजेन प्रयुक्तपर्यन्तशब्दापेक्षया दण्डनाथेन अन्तशब्दः प्रयुक्तः।

सरस्वतीकण्ठाभरणस्थं 'सहनञ्विद्यमानादेः'[109] इति सूत्रं सहनञ्विद्यमानयोः इत्यस्ति हृदयहारिण्याम्। तथा 'पाककर्णपुष्पफलमूलवालान्ताच्च'[110] इति भोजसूत्रं व्याख्याने पर्णशब्दमपि योजयित्वा 'पाककर्णपर्णपुष्पफलमूलवालान्ताच्च; इति च अस्ति। तद्वत् 'अशमरथाद्यञः'[111] इति भोजसूत्रं 'अशमरथाद्यञः' इति व्याख्याने दृश्यते। अश्मरथात् परो यो यञ् तदन्तात् प्रातिपदिकात् स्त्रियां ङीन्प्रत्ययो भवतीति सूत्रार्थोऽपि तत्र दृश्यते।

---

106 हृ.हा.३/३/१२२

107 हृ.हा.३/३/१२३

108 स.क.३/३/३५

109 स.क.३/३/१०३

110 स.क.३/३/१०७

111 स.क.३/३/१२१

'क्रौडिलाडिव्याड्यापक्षित्यापिशलिसौधातकिंभौरिकिभौलिकिशाल्मलिपिष्ठलिदैवदत्त्यादीनाम्'[112] इति भोजसूत्रं शालास्थलीका इति योजयित्वा क्रौडिलाडिव्याड्यापक्षित्या-पिशलिसौधातकिंभौरिकिभौलिकिशाल्मलिशालास्थलीकापिष्ठलिदैवदत्त्यादीनाम् इति व्याख्याने दृश्यते। अस्मिन् पादे सूत्राणां भेदाः न्यूना एव दृश्यते। सूत्राणां विभागागमापेक्षया सरस्वतीकण्ठाभरणे तथा हृदयहारिण्यां सूत्रसंख्या तुल्या भवति।

**चतुर्थोऽध्यायः -प्रथमः पादः।**

'अञ्'[113], 'उत्सोदपानविकरविनदतरुणतलुनधेनुपीलुकुणसवर्णवृषधंशेभ्यः'[114] इति द्वयोः भोजसूत्रयोः मेलनं कृत्वा दण्डनाथेन 'अञुत्सोदपानविकरविनदतरुणतलुनधेनुपीलुकुण-सवर्णवृषधंशेभ्यः' इत्युक्तं हृदयहारिण्याम्। सरस्वतीकण्ठाभरणे 'अञ्' इति सूत्रमग्रिमसूत्रे अनुवर्तते। किन्तु हृदयहारिण्याम् 'अञ्' इति सूत्रं पृथक् अनुक्त्वा सूत्रानुवृत्तेः अवसरः न दीयते। उत्सादिभ्यः प्राग्दितीयेष्वर्थेष्वञ्प्रत्ययो भवतीति सूत्रार्थः तत्र दण्डनाथेनोच्यते। अणः तदपवादानां च बाधकः। 'तेन औत्सः', 'औदपानः', 'वैकरः' इत्यादीनि रूपाणि सिद्ध्यन्ति।

अस्मिन् पादे एव 'अञ् '[115]इति द्वितीयं भोजसूत्रं दृश्यते। तस्य व्याख्यानं दण्डनाथेन पृथगेव प्रतिपादितम्। तत्र 'जातौ यत् षुक् च'[116] इति सूत्रात् 'षुक् च' इत्यनुवर्तते। तेन

---

112 स.क.३/३/१३१

113 स.क.४/१/८

114 स.क.४/१/९

115 स.क.४/१/१६९

116 स.क.४/१/१६८

मनुशब्दात् जात्यर्थे 'अञ्' प्रत्यये कृते 'मानुषः' इति शब्दः निष्पद्यते।

हृदयहारिण्यां 'लोहितशंशितबभ्रुवल्गुमण्डुमङ्क्षुशङ्कुलिगुजिगीषुगुहलुमन्तुतन्तुभ्यः'[117] इति नूतनं सूत्रं दण्डनाथेन प्रतिपादितम्। यञ् प्रत्ययः अनेनोच्यते। लोहितादिभ्यो गोत्रादिभूतेभ्यः पौत्रादौ अपत्ये यञ् प्रत्ययो भवति। 'लोहितस्यापत्यं पौत्रादिलौहित्यः' 'शांशित्यः' इत्यादीनि उदाहरणानि। स्त्रियां तु 'लौहित्यायनी', 'शांशित्यायनी' इति लोहितादिभ्यः शकलान्तेभ्यो नित्यम् इति ङीष्प्रत्ययः इत्यपि तत्र उच्यते।

हृदयहारिण्यां 'वा भ्रष्टकपिष्टलाभ्याम् '[118] इति नूतनं सूत्रं दण्डनाथेनोच्यते। अस्य सूत्रस्य व्याख्या पूर्णरूपेण न प्राप्ता। तथापि अनेन सूत्रेण 'भ्राष्टकयश्च कापिष्टलयश्च भ्रष्टककपिष्टलाः' इति रूपं सिध्यति।

**चतुर्थाध्यायः - द्वितीयः पादः।**

अस्मिन् पादे दण्डनाथेन त्रीणि नूतनसूत्राणि उक्तानि। तत्र प्रथमं भवति 'नोक्थान्यसानि'[119] इति। अस्य व्याख्यानं न दत्तम्। द्वितीयं भवति 'उक्थसोकायतन्यायन्यास-पुनरुक्तयज्ञचर्चाक्रमेतरश्लक्ष्णसंहितसङ्घाटपदक्रमेभ्यः'[120] इति। अनेन सूत्रेण दण्डनाथः

117 हृ.हा.४/१/४७

118 हृ.हा.४/१/१९७

119 हृ.हा.४/२/४६

120 हृ.हा.४/२/४७

'लौकायतिकः', 'नैयायिकः', 'पौनरुक्तिकः', 'याज्ञिकः' इत्यादीनि रूपाणि निष्पादयन्ति। दण्डनाथेन प्रतिपादितेषु सूत्रेषु तृतीयं भवति 'न बहुवचनविषयात् '[121] इति। अस्य सूत्रस्यापि व्याख्यानं न दत्तम्। एवं सूत्रत्रययोजनेन भोजव्याकरणस्य सूत्रेभ्यः हृदयहारिण्याः सूत्राणि त्रीण्यधिकानि भवन्ति। तथा हृदयहारिणीस्थसूत्रसंख्या १४९, हृदयहारिणीस्थासङ्ख्या १५२ च भवन्ति।

**चतुर्थाध्यायः - तृतीयः पादः।**

'नदीमहीसेतिकीश्रावस्तीवाराणसीकौशम्बीकाशफरीखादिरीपाठामायासल्वादौर्वापूर्वनगरीपूर्वनगरेभ्यो ढक्'[122] इति ढक्प्रत्ययविधायकं भोजसूत्रं 'नवकौशम्बी' इति पदं योजयित्वा 'नदीमहीसेतिकीश्रावस्तीवाराणसीकौशम्बीनवकौशम्बीकाशफरीखादिरीपाठामायासल्वादौर्वापूर्वनगरीपूर्वनगरेभ्यो ढक्' इत्यस्ति हृदयहारिण्याम्। कौशाम्बेयः इति पदेन साकं नवकौशाम्बेयः इत्यपि निष्पादयितुं दण्डनाथेन सूत्रे अस्य पदस्य प्रयोगः कृतः स्यात्। एवं 'अध्यात्माधिदेवाधिभूतेहलोकपरलोकोर्ध्वन्दमादिभ्यश्च'[123] इति ठञ् प्रत्ययविधायकं सूत्रं 'ऊर्ध्वदेह' इत्यपि योजयित्वा हृदयहारिण्याम् 'अध्यात्माधिदेवाधिभूतेहलोकपरलोकोर्ध्वदेहोर्ध्वन्दमादिभ्यश्च' इत्युक्तम्। 'और्ध्वन्दमिकम् ' इति रूपेण सह 'और्ध्वदेहिकम् ' इति रूपनिष्पादनार्थं

---

121 स.क.४/२/८८

122 स.क.४/३/९

123 स.क.४/३/१६७

दण्डनाथेन 'ऊर्ध्वदेह' इति पदस्य योजनं कृतं स्यात्।

भोजेन 'युष्मदस्मदोर्वा खञ् युष्माकास्माकौ वा'[124] इति सूत्रं हृदयहारिण्यां 'वा' इति विहाय 'युष्मदस्मदोर्वा खञ् युष्माकास्माकौ' इत्येव प्रतिपादितम्। युष्मदस्मभ्यां शेषेऽर्थे 'खञ्' प्रत्ययो अनेन विधीयते। युष्माकमयं युवयोर्वा यौष्माकीणः। अस्माकमावयोर्वा अस्माकीनः इत्युदाहरणे। शेषार्थाभावे त्यदादित्वाच्छप्रत्यये कृते 'युष्मदीयः', 'अस्मदीयः' इति। अस्य पूर्वसूत्रेण अर्थात् 'वेणुकवेत्रकप्रस्थकमध्यमकोत्तरपदकादिभ्यश्छण्'[125] इति सूत्रेण छण् प्रत्ययः उक्तः। यदि सूत्रे 'च' इति योजयेत् तर्हि पूर्वसूत्रात् छण् इत्यनुवृत्या 'युष्मदीयः', 'अस्मदीयः' इति रूपद्वयं न सिध्येत् इति विचिन्त्य दण्डनाथेन सूत्रात् च इति निष्कासितं स्यात्।

भोजव्याकरणे प्रतिपादितं 'जनपदेभ्यः'[126], 'तदविधभ्यश्च'[127] इति सूत्रद्वयं मिलित्वा 'जनपदेभ्यस्तदविधभ्यश्च' इत्युक्तं हृदयहारिण्याम्। 'द्वन्द्वाददेवासुररक्षोसुरगौणमुख्यातेः'[128], इति सूत्रं हृदयहारिण्यां दृश्यते। तस्य व्याख्या 'न भवति' इत्येव प्राप्तम्। तस्मात् पूर्वेण 'शिशुक्रन्दयमसभेन्द्रजननप्रद्युम्नागमनसीतान्वेषणादिभ्यश्छः'[129] इति सूत्रेण विधीयमानः 'छप्रत्ययः' अत्र न भवतीति 'न भवतीति' व्याख्यानात् ज्ञायते। छप्रत्ययनिषेधार्थं दण्डनाथेन

124 स.क.४/३/९४

125 स.क.४/३/९२

126 स.क.४/३/५५

127 स.क.४/३/५६

128 हृ.हा.४/३/२०५

129 स.क.४/३/२०४

इदं सूत्रमुक्तं स्यात्। दण्डनाथेन प्रतिपादितानि त्रीणि सूत्राण्यपि व्याख्यां विना अस्मात् पादात् प्राप्तं वर्तते। तानि 'छण्णिथित्सुशौनकादिभ्यः'[130] 'मधुरादिभ्योऽण्'[131], 'प्राक्कल्पात्तेभ्यः'[132], इति भवन्ति। द्वयोः सूत्रयोः मेलनेन तथा चतुर्णां नूतनसूत्राणां योजनेन भोजव्याकरणे २६९ संख्यकानां सूत्राणां स्थाने हृदयहारिण्यां २७२ सूत्राणि वर्तन्ते।

**चतुर्थाध्यायः - चतुर्थः पादः।**

'सपूर्वायाश्च'[133] इति नूतनं सूत्रमुच्यते दण्डनाथेन हृदयहारिण्याम्। 'सीतया समिते'[134] इति पूर्वसूत्रेण सीताशब्दात् तृतीयान्तात् समितमित्यस्मिन्नर्थे यत्प्रत्ययः विहितः। तेन विहितः यत् प्रत्ययः अत्र अनुवर्तेत। 'द्विसीत्यम्', 'परमसीत्यम्' इत्युदाहरणद्वयं तत्र दत्तम्। 'न प्रातिपदिकेनेति तदन्तविधिप्रतिषेधाद्वचनम् ' इत्यपि अस्य व्याख्याने दृश्यते।

'अजाविभ्यां श्यन्'[135] इति भोजसूत्रेण श्यन्प्रत्ययः विधीयते। किन्तु हृदयहारिण्यां 'अजाविभ्यां थ्यन्' इति सूत्रं दृश्यते। 'आभ्यां तस्मै हितमित्यर्थे थ्यन् प्रत्ययो भवतीति' सूत्रार्थोऽपि तत्र उक्तः। 'अजाभ्यो हिता अजथ्या यूतिः अविथ्या' इत्यपि व्याख्याने द्रष्टुं शक्यते।

130 हृ.हा.४/३/२२४

131 हृ.हा.४/३/२२५

132 हृ.हा.४/३/२२६

133 स.क.४/४/१५५

134 स.क.४/४/१५४

135 स.क.४/४/१९३

अस्मिन् पादे एकस्य सूत्रस्याधिक्येन भोजव्याकरणस्य सूत्राणां संख्या २०७ तथा हृदयहारिण्याः सूत्राणां संख्या २०८ च भवति।

**पञ्चमोऽध्यायः - प्रथमः पादः।**

भोजेन प्रतिपादितं 'वतोरिङ् च वा'[136] इति सूत्रं हृदयहारिण्यां 'वतोरिट् च वा' इति प्रतिपादितम्। कन् प्रत्ययः,विकल्पेन इङागमश्च अनेन विधीयते इति हृदयहारिण्यां स्पष्टम्। 'यावतिकः', 'यावत्कः', 'तावतिकः', 'तावत्कः' इत्येते उदाहरणे। एवं 'यजाद्धस्तत्कर्म च'[137] इति भोजसूत्रं हृदयहारिण्यां 'यज्ञाद्धस्तत्कर्म च' इत्यस्ति। यज्ञशब्दाद् यज्ञं यज्ञकर्म चार्हतीत्यर्थे 'घ'प्रत्ययो भवति। 'यज्ञमर्हति यज्ञियः- यजमानः' इत्युदाहरणम्। तथैव 'व्याजुपेभ्यो-रावयात्'[138] इति भोजसूत्रं हृदयहारिण्यां 'व्याङुपेभ्यो रावयात्' इति च दृश्यते।

भोजव्याकरणापेक्षया हृदयहारिण्यां 'चित्तवति नित्यम्'[139] 'सोऽस्य ब्रह्मचर्ये'[140] इति सूत्रद्वयं नूतनतया दृश्यते। तत्र प्रथमं 'लुग्विधायकं' भवति। 'प्राणिन्यभिधेये नित्यं लुग् भवतीति' अस्य सूत्रार्थः। 'द्विवर्षो दारकः' इत्युदाहरणम्। चित्तवतीति किम् । द्विव(र्ष /र्षी)णः सरघः इति च तत्र व्याख्याने उक्तम्। तत्र द्वितीयं सूत्रं ठञ्प्रत्ययविधायकं च भवति। 'स इति

---

136 स.क.५/१/१२

137 स.क.५/१/६२

138 स.क.५/१/१४७

139 हृ.हा.५/१/८९

140 हृ.हा.५/१/९३

प्रथमान्तात् कालवाचिनः शब्दात् अस्येति षष्ठ्यर्थे ब्रह्मचर्ये अभिधेये ठञ्प्रत्ययो भवति' इति सूत्रार्थः दण्डनाथेनोच्यते। 'मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम्', 'आर्धमासिकम्', 'सांवत्सरिकम् ' इति च व्याख्याने दत्तम्। एतयोः द्वयोः सूत्रयोः योजनेन भोजव्याकरणे १८० सूत्राणि तथा हृदयहारिण्यां १८२ सूत्राणि च सन्ति।

**पञ्चमोऽध्यायः - द्वितीयः पादः।**

भोजेन 'वतोः स्वार्थे मात्रड्द्वयसटौ'[141] इति सूत्रं हृदयहारिण्यां 'मात्रड्द्वयसटौ वा' इति प्रयुक्तम्। अत्र विकल्पेन 'मात्रट्', 'द्वयसट्' प्रत्ययौ विधीयते। 'वत्वन्तात् प्रातिपदिकात् स्वार्थे मात्रड्द्वयसटौ प्रत्ययौ वा भवतः' इति सूत्रार्थः दण्डनाथेनोक्तः। 'यावदेव यावन्मात्रम्', 'यावद्वयसम्' 'तावन्मात्रं', 'तावद्वयसम्', 'एतावन्मात्रम्', 'एतावद्वयसं', 'कियन्मात्रं', 'कियद्वयसम्' इत्येतानि उदाहरणानि तत्र दत्तानि। भोजेन विकल्पाभावेनोक्तं सूत्रं दण्डनाथेन विकल्पं कृतम्। एवम् 'अंशे संख्यायास्तयप्'[142] इति भोजसूत्रं हृदयहारिण्याम् 'अंशे संख्यायास्तयट्' इति दृश्यते। भोजेन तयप्प्रत्यये विहिते दण्डनाथेन तयट्प्रत्ययः विहितः।

भोजव्याकरणे प्रतिपादितं 'अंशमवश्यं हारी'[143] इति कन्प्रत्ययविधायकं सूत्रं हृदयहारिण्यां 'अंशं हारी' इत्येव दृश्यते। 'अंशशब्दान्निर्देशादेव द्वितीयासमर्थादवश्यं हारिण्यर्थे

---

141 स.क.५/२/६८

142 स.क.५/२/७०

143 स.क.५/२/९७

कन्प्रत्ययो भवतीति' सूत्रार्थः तत्र दण्डनाथेनोक्तः। 'अंशमवश्यं हरति अंशको दायादः' इति उदाहरणमपि तत्रोक्तम्। एवं 'साक्षाद्द्रष्टरि संज्ञायाम्'[144] इति भोजसूत्रं हृदयहारिण्यां 'साक्षाद्द्रष्टरि' इत्येव वर्तते। 'साक्षाच्छब्दाद् द्रष्टेत्यस्मिन्नर्थे संज्ञायां विषये इनिप्रत्ययो भवतीति' सूत्रार्थः तत्र दृश्यते। 'साक्षाद्द्रष्टा साक्षी' इत्युदाहरणम्। 'संज्ञायाम्' इति पदं दण्डनाथेन सूत्रात् निष्कासितम्। किन्तु सूत्रार्थे दृश्यते च। अस्य सूत्रस्य सूत्रद्वयपूर्वं 'प्रायोऽन्नमस्मिन् संज्ञायाम्'[145] इति सूत्रमस्ति। तस्मात् सूत्रात् संज्ञायाम् इत्यस्य अनुवृत्तिः अत्रास्ति इत्यनेन स्यात् दण्डनाथेन 'संज्ञायाम्' इत्यनुक्तम्।

सरस्वतीकण्ठाभरणस्य 'विंशत्यादिभ्यस्तमड् वा'[146] इति सूत्रादारभ्य 'धनहिरण्याभ्यां कामे'[147] इति सूत्रपर्यन्तं हृदयहारिण्यां व्याख्यानं न दृश्यते। सूत्रमात्रप्रतिपादनं तत्र दृश्यते। तत्रैव 'नोमट्षट्कतिपयेभ्यस्थट्[148]' , 'चतुरं यच्छौ च लोपश्चाद्वे द्वितीयः'[149], 'तेन ग्रन्थं गृह्णातीति पूरणाल्लुक् चास्य वा'[150] इत्येतानां सूत्राणां विभागैः हृदयहारिण्यां 'नोमट्' 'षट्कतिपयेभ्यस्थट्', 'चतुरो यच्छौ चलोपश्च' 'द्वेस्तीयः', 'तेन ग्रन्थं गृह्णातीति' 'पूरणाल्लुक्

144 स.क.५/२/११४

145 स.क.५/२/१११

146 स.क.५/२/७३

147 स.क.५/२/९३

148 स.क.५/२/७९

149 स.क.५/२/८०

150 स.क.५/२/८७

चास्य वा' इत्येतानि सूत्राणि प्रतिपादितानि।

एवं नूतनसूत्राणां योजनेन तथा भोजसूत्राणां विभागेन सरस्वतीकण्ठाभरणस्य २२४ सूत्राणां स्थाने हृदयहारिण्यां २२७ सूत्राणि सन्ति।

**पञ्चमोऽध्यायः - तृतीयः पादः।**

भोजव्याकरणे 'एकाद्ध्यमुञ्'[151] इति सूत्रस्य अनन्तरम् 'एधाच्च'[152] इति सूत्रमस्ति। किन्तु हृदयहारिण्याम् अनयोः द्वयोः सूत्रयोः मध्ये धमुञ्प्रत्ययविधायकं 'द्वित्रिभ्यां धमुञ्'[153] इति सूत्रं वर्तते। 'द्वित्रिशब्दाभ्यां प्रकारे अधिकरणविचाले च धमुञ्प्रत्ययो वा भवति' इति सूत्रार्थः। 'द्वाभ्यां प्रकाराभ्यां द्वैधं', द्विधा', 'त्रैधं', 'त्रिधा करोति' इत्युदाहरणानि। अस्य सूत्रस्यागमेन सरस्वतीकण्ठाभरणात् हृदयहारिण्यां सूत्रसंख्या एका अधिका जाता। सरस्वतीकण्ठाभरणे अस्मिन्पादे १५६ सूत्राणि तथा हृदयहारिण्यां १५७ सूत्राणि च वर्तन्ते।

**पञ्चमोऽध्यायः - चतुर्थः पादः।**

भोजव्याकरणस्थं 'संख्यानदीगोदावरीभ्यां च'[154] इति सूत्रं हृदयहारिण्यां 'संख्याया नदीगोदावरीभ्यां च' इति दृश्यते। एवं 'प्रोह्यपदिनिष्कुच्यवकीर्णी च'[155] इति भोजसूत्रं

---

151 स.क.५/३/४१

152 स.क.५/३/४२

153 हृ.हा.५/३/४२

154 स.क.५/४/१०३

155 स.क.५/४/१५७

हृदयहारिण्यां 'प्रोह्यपदिनिष्कुच्यकर्णि च' इत्यपि दृश्यते। तद्वत् 'धनुषो नञ्' इति भोजसूत्रं 'धनुषोऽनङ्' इति दण्डनाथेनोच्यते। अस्मात् सूत्रादारभ्य 'संख्यादेः'[156] इति सूत्रपर्यन्तानि सप्तसूत्राणि व्याख्यां तत्र प्रतिपादितानि। सूत्राणामागमविभागाभावात् अस्मिन् पादे सरस्वतीकण्ठाभरणे हृदयहारिण्यां समानसंख्यकानि १८९ सूत्राणि सन्ति।

**षष्ठोऽध्यायः - प्रथमः पादः।**

'अयिरः पुनः'[157], 'ह्वः दित्वे'[158], 'ल्यपि ज्यः'[159] इति भोजसूत्राणि विभज्य दण्डनाथेन 'अयि रः', 'पुनः', 'ह्वः', 'दित्वे', 'ल्यपि', 'ज्यः' इत्येतानि सूत्राणि प्रतिपादितानि। भोजेन प्रतिपादितं 'कण्ड्वादीनां तृतीयः'[160] इति सूत्रं दण्डनाथेन 'कण्ड्वादीनां तृतीयात् ' इत्युक्तम्। एभ्यस्तृतीयादारभ्य एकाजवयवो द्विरुच्यते। न प्रथमद्वितीयादिः इति सूत्रार्थः। 'कण्डूयियिथिषति' इत्युदाहरणम्। तृतीयोत्तरस्य एकाजवयवो द्विरुच्यते इत्यर्थप्राप्त्यर्थं दण्डनाथेन अपादानप्रयोगः कृतः स्यात्। एवं भोजव्याकरणस्थं 'चरिचलिपतिवदीनामभ्यासस्य'[161] इति सूत्रं हृदयहारिण्यां 'चरिचलिपतिवदीनां वाक् चाभ्यासस्य' इति दृश्यते। 'इणो धोः'[162] इति भोजसूत्रं दण्डनाथेन

---

156 स.क.५/२/१६७

157 स.क.६/१/६

158 स.क.६/१/४५

159 स.क.६/१/५०

160 स.क.६/१/१०

161 स.क.६/१/१४

162 स.क.६/१/९९

'इणेधोः' इति च प्रतिपादितम्।

'कृसेरचि दीर्घश्च'[163] इति भोजसूत्रं हृदयहारिण्यां न दृश्यते। एवं 'सृपिसृजिसृस्तृस्तृस्त्यासेकृवर्जमज्दन्त्यपरसादिस्मिस्विदिस्वदिस्वञ्जिस्वपयः षोपदेशाः'[164] इति भोजसूत्रं हृदयहारिण्यां सूत्रत्वेन नोक्तम्। 'अष्ठिवुष्वष्केरादेः षः सः'[165] इति सूत्रस्य व्याख्याने इदं सूत्रं प्रतिपाद्य उदाहरणान्यपि सविस्तरं दत्तं वर्तते। एवं सूत्राणां विभागेन अभावेन द्वयोः सूत्रसंख्या समाना एव। द्वयोः ग्रन्थयोः १७५ सूत्राणि वर्तन्ते।

**षष्ठोऽध्यायः - द्वितीयः पादः।**

'यत्यतदर्थार्हीये'[166], 'दुरो दाशनाशदनध्येपूच्च'[167], 'षषो दशसु'[168] , 'मह्यं रौति मयूरः'[169] इति सरस्वतीकण्ठाभरणे अदृष्टानि चत्वारि सूत्राणि दण्डनाथेन हृदयहारिण्यामुच्यते। तत्र अन्तिमानां त्रयाणां व्याख्यानं न दृश्यते च। 'सायंलोहतरयोः'[170] इति सूत्रादारभ्य

163 स.क.६/१/१३

164 स.क.६/१/७०

165 स.क.६/१/७१

166 हृ.हा.६/२/७५

167 हृ.हा.६/२/१५३

168 हृ.हा.६/२/१५४

169 हृ.हा.६/२/१५५

170 स.क.६/२/१६०

'सहिबहोरोदवर्णस्य'[171] इति सूत्रपर्यन्तं भोजव्याकरणस्थानां त्रयोदशसूत्राणां व्याख्यानं विना सूत्रमात्रप्रतिपादनं दृश्यते हृदयहारिण्याम्। 'मतौबह्वचोनजिरखदिरखपुरस्थविरस्थलिनमल्य-कारण्डवचक्रवाकादीशुचिकुशधूमाहिकविहनुमन्यादीनां च' इति भोजसूत्रं विभज्य 'मतौबह्व-चोऽनजिरखदिरखपुरस्थविरपुलिनमलयकारण्डवचकवाकादीनाम्'[172] 'शरवंशशुचिकुशधूमा-हिकविहनुमुन्यादीनां च'[173] इति सूत्रद्वयं दण्डनाथेनोच्यते। एवं सूत्राणामागमविभागेन सरस्वतीकण्ठाभरणस्थानां १८० सूत्राणां स्थाने हृदयहारिण्यां १८५ सूत्राणि वर्तन्ते।

**षष्ठोऽध्यायः - तृतीयः पादः।**

'नूर्वा'[174] इति सूत्रं हृदयहारिण्यामेव दृश्यते। तस्य व्याख्यानं तत्र न दृश्यते च। 'आप्तृस्वसृनप्तृनेष्टृक्षतृहोतृपोतृप्रशस्तृप्रस्तोत्रुन्नेत्रुद्रातृप्रतिहर्तृप्रतिप्रस्थातृणाम्'[175] इति भोजसूत्रे दण्डनाथेन त्वष्टृ इत्यपि योजयित्वा आप्तृस्वसृनप्तृनेष्टृत्वष्टृक्षतृहोतृपोतृप्रशस्तृप्रस्तोत्रुन्नेत्रुद्रातृ-प्रतिहर्तृप्रतिप्रस्थातृणाम् इत्युक्तम्। भोजव्याकरणस्थानि 'रञ्जेष्युन्'[176], 'धिनुण्'[177],

[171] स.क.६/२/१७१

[172] हृ.हा.६/२/१७१

[173] हृ.हा.६/२/१७२

[174] हृ.हा.६/३/४

[175] स.क.६/३/७

[176] स.क.६/३/२५

[177] स.क.६/३/२६

'ल्युडसुन्नविष्ट च'[178] इति सूत्रत्रयं सम्मिल्य 'रञ्जेः ष्वुन्धिनुण्ल्युडसुन्ननिषु' च इति सूत्रं दण्डनाथेनोक्तम्। अस्य व्याख्या तत्र न दृश्यते च। एवं 'अन्तिकस्य तमेतादेः'[179] इति सूत्रादारभ्य 'टेरिमेष्ठेयस्सु' इति सूत्रपर्यन्तं चतुर्दशभोजसूत्राणां व्याख्यां विना केवलसूत्रपरामर्श एव तत्र दृश्यते। तत्रैव 'ङ्याः'[180], 'मत्स्यस्य यः'[181], इति द्वयोः भोजसूत्रयोः मेलनेन 'ङ्यां मत्स्यस्य यः' इति सूत्रं हृदयहारिण्यां दण्डनाथेन प्रतिपादितम्।

एवं एकसूत्रस्यागमनेन पञ्चसूत्राणां मेलनेन सूत्रद्वयप्रतिपादितेन हृदयहारिण्यां सरस्वतीकण्ठाभरणापेक्षया सूत्रद्वयं न्यूनं जातम्। भोजेन १८३ सूत्राणां प्रतिपादने हृदयहारिण्यां १८१ सूत्राणि वर्तन्ते।

**षष्ठोऽध्यायः - तृतीयः पादः।**

'इदितो नुम् धातोः'[182] इति भोजसूत्रं 'धातोः' इति परित्यज्य 'इदितो नुम्' इत्येव दण्डनाथेन प्रतिपादितम्। 'इदितो धातोर्नुमागमो भवतीति' सूत्रार्थः। तत् पूर्वस्य 'ऋत इद्धातोः'[183] इति सूत्रात् धातोः इत्यनुवर्तनम् अत्रास्तीत्यनेन दण्डनाथेन सूत्रात् 'धातोः' इति

---

178 स.क.६/३/२७

179 स.क.६/३/१५१

180 स.क.६/३/१५६

181 स.क.६/३/१५७

182 स.क.६/४/१०

183 स.क.६/४/७

पदं त्यक्तं स्यात्। एवं 'क्तेरपाच्चायश्चिश्च'[184] इति भोजसूत्रं हृदयहारिण्यां 'अपाच्चायश्चिश्च' इत्युक्तम्। 'क्तेः' इति पदं दण्डनाथेन सूत्रे नोक्तम्।

भोजेन 'शि सुट्येः'[185] इत्युक्तं सूत्रं हृदयहारिण्यां 'शिसुट्येरत् ' इति दृश्यते। तदनन्तरसूत्रादारभ्य अर्थात् 'थोऽन्थः'[186] इति सूत्रादारभ्य 'असंबुद्धौ'[187] इति सूत्रपर्यन्तं व्याख्यां विना सूत्रमात्रप्रतिपादनं दृश्यते। तत्रैव 'ठाटाजादौ वा स्त्रियाम् [188]' इति भोजसूत्रं विभज्य 'ठाटाजादौ वा'[189], 'स्त्रियाम् [190]' इति सूत्रद्वयं प्रतिपादितम्। एवं 'चतुरश्च'[191], 'शि सुटि'[192] इति भोजसूत्रद्वयं सम्मिल्य 'चतुरश्च शि सुटि'[193] इति च प्रतिपादितम्। एवं सूत्राणां विभागसंयोगेन द्वयोः ग्रन्थयोः सूत्रसंख्या तुल्या जाता। द्वयोः १९२ सूत्राणि सन्ति।

**सप्तमोऽध्यायः - प्रथमः पादः।**

सप्तमाध्यायस्य हृदयहारिणीव्याख्यानस्य प्रतिकृतिरेव प्राप्तं वर्तते। भोजव्याकरणे सप्तमाध्यायस्य प्रथमपादे १४० सूत्राणि सन्ति । किन्तु हृदयहाररिण्यां प्रथमपादे १३८ सूत्राणि

---

184 स.क.६/४/१७३

185 स.क.६/४/३८

186 स.क.६/४/३९

187 स.क.६/४/५२

188 स.क.६/४/४८

189 हृ.हा.६/४/४८

190 हृ.हा.६/४/४९

191 स.क.६/४/५०

192 स.क.६/४/५१

193 हृ.हा.६/४/५१

एव दृश्यते। 'उपवाभ्यां सृजोऽपि'[194], 'व्यतिसङ्ग्यनुसङ्ग्योश्च'[195] इति सूत्रद्वयं हृदयहारिण्यां न दृश्यते इत्यस्मात् तत्र भोजव्याकरणात् सूत्रद्वयं न्यूनं वर्तते। प्रथमपादे अष्टाध्याय्याः सप्तमाध्यायस्य द्वितीयतृतीयचतुर्थपादानां प्रकरणानुकूलसूत्राणां विषयाः अत्र प्रतिपादिताः। 'मृजेर्वृद्धिः' इति सूत्रेण पादस्यास्य आरम्भः। 'मृजेर्वृद्धि' इति सूत्रादारभ्य 'यथातथयथापुरयोः पर्यायेण'[196] इति सूत्रपर्यन्तं 'सिच्' 'ञित्' 'णित्' प्रत्ययानां परत्वात् वृद्धिविधानं, पूर्वोत्तरपदयोः विद्धिविधानं निषेधः इत्यादीनि कार्याणि चर्चितानि। तदनन्तरं 'हन्' इत्यस्य 'तादेशः', 'अकारान्तस्य' 'युगागमः', 'सेद्वान्त' इत्येतयोः 'वृद्धिनिषेधः', 'विश्रम'शब्दस्य विकल्पेन 'वृद्धि', 'णि' परे 'पुक्', 'युक्', 'जुक', 'नुक्', 'लुक्', 'षुक्' इत्यागमानि तथा मितसंज्ञकानां ह्रस्वविधायकानि कार्याणि 'हलादेः हृत् क्तिन्निष्ठयोः'[197] इति सूत्रपर्यन्तं चर्चितानि। 'चजोः कुघिण्ण्यतोः'[198] इति सूत्रादारभ्य 'रुहेः विन्यग्भ्याम् क्विबचोर्धः'[199] इति सूत्रपर्यन्तं कुत्वविधानसम्बन्धानि कार्याणि प्रतिपादितानि । 'अतो लोपः श्यनि'[200] इति सूत्रादारभ्य अस्य पादस्य समाप्तिपर्यन्तं 'ओत्' लोपः, 'दीर्घत्व', 'छत्व', 'पाघ्राद्यादेश,' 'ज्ञाजनयोः जा', 'ष्वादेः ह्रस्वः', 'मिदः एत्', 'सृजिदृशोः' 'अम्' तथा स्पृशादीनां वैकल्पिक 'अम्' इत्येतेषां विधानं

---

194 स.क.७/१/१०१

195 स.क.७/१/१०२

196 स.क.७/१/५०

197 स.क. ७/१/८३

198 स.क.७/१/९८

199 स.क.७/१/१२६

200 स.क.७/१/१२७

कृतम् ।

भोजदेवेन अष्टाध्याय्यां 'न कर्मव्यतिहारे'[201] इति सूत्रस्थाने 'न णच:'[202] इति सूत्रं प्रयुक्तम्। 'नोदात्तोपदेशस्य मान्तस्यानाचमे:'[203] इति सूत्रं 'अनाचर्मिकविवमीनमिति वक्तव्यम्'[204] इति वार्तिकाधारेण 'न मस्सेटो वृद्धिरवम्यमिकस्याचम:'[205] इति सूत्रत्वेन भोजेनोक्तम्। 'जिघ्रतेर्वा'[206] 'तिष्ठतेरित्'[207] 'लिपः पिबतेरीच्चाभ्यासस्य'[208] इति सूत्राणि क्रमशः 'घ्र इत्'[209], 'स्था'[210], 'पीप्य: साभ्यासस्य'[211] इति क्रमेण प्रतिपादितम्। 'मिदेर्गुण:'[212] इति सूत्रं 'मिदेरेत्'[213] इति भोजेन सारल्येनोक्तं वर्तते। 'सृजिशोर्झल्यमकिति'[214] इति सूत्रं 'सृषिशिर्झल्यं गुणवृद्धिप्रसङ्गे'[215] इति चोक्तम्। अष्टाध्याय्याः मृजेर्वृद्धिः इति सूत्रं

201 अ.७/३/६

202 स.क.७/१/१८

203 अ.७/३/३४

204 वा.४५१८

205 स.क.७/१/५३

206 अ.७/४/६

207 अ.७/४/५

208 अ.७/४/४

209 स.क.७/१/७९

210 स.क.७/१/८०

211 स.क.७/१/८१

212 अ.७/३/८२

213 स.क.७/१/१३८

214 अ.६/१/५७

215 स.क.७/१/१३९

तथैव अस्य पादस्य प्रथमसूत्रत्वेन उक्तं चेदपि हृदयहारिण्यां वृत्तिभेदः दृश्यते।

**सप्तमोऽध्यायः - द्वितीयः पादः।**

सप्तमाध्यायस्य द्वितीयपादे भोजव्याकरणे १५१ सूत्राणि विद्यन्ते। 'क्षीरादिभ्यो लालासायामसुक् च'[216], 'क्यङि वा'[217], 'ओजोऽप्सरसो:'[218] इति त्रीणि सूत्राणि हृदयहारिण्यां न दृश्यते। तस्मात् तत्र सूत्राणां संख्या १४८ भवन्ति। अस्मिन् पादे अष्टाध्याय्या: प्रथमाध्यायस्य द्वितीयपादस्य तथा सप्तमाध्यायस्य तृतीयचतुर्थपादयोः सूत्राणि प्रतिपादितानि। द्वितीयपादस्य प्रथमं सूत्रं भवति 'सार्वधातुकार्धधातुकयोर्गुण:'[219] इति। अनेन गुणविधानस्य अथवा निषेधस्य प्रकरणस्यारम्भः। अस्य अधिकारः 'नैकाली'[220] इति सूत्रपर्यन्तमस्ति। अष्टाध्याय्यां सार्वधातुकार्धधातुकयोः इति भवतीदं सूत्रम्। तत्रापि गुणः तेन प्रतिपादितः। किन्तु अत्र सूत्रे एव गुणशब्द: प्रतिपादितः। अस्मिन् प्रकरणे भोजेन अष्टाध्याय्याः प्रथमाध्यायस्य द्वितीयपादस्य 'गाकुटादिभ्योऽञ्णिन्ङित्'[221] इति सूत्रेण सम्पूर्णं 'कित्' 'ङित्' अतिदेशविधायकसूत्राणां प्रतिपादनं क्रियते। भोजेन पाणिनिवत् 'अतिदेश:' न कृतः।

*''संज्ञा च परिभाषा च विधिर्नियम एव च।*
*अधिकारोऽदिदेशश्च सूत्राणि षड्विधं मतम्''*

---

216 स.क.७/२/९०

217 स.क.७/२/१०५

218 स.क.७/२/१०६

219 स.क.७/२/१

220 स.क.७/२/२९

221 अ.१/२/१

इति षड्विधसूत्राणि उक्तानि । तत्र अतिदेशो नाम *''अन्यधर्मस्यान्यत्रारोपणम्''*[222] । तथापि नामग्रहणात्पूर्वंतत्तत्प्रत्ययानां परे विद्यमानगुणस्य वृद्धेः वा विधिः अथवा निषेधः कृतः । यथा पाणिनीये 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति सूत्रद्वारा 'जित्' 'णिभिन्नप्रत्ययाः कुटादेः परे ङित्त्वद्' प्रवर्तते। ङित्वदित्यस्य प्रयोजनं तु 'क्ङिति च'[223] इति सूत्रेण विहितायाः 'गुणवृद्धेः' निषेधः भवति। भोजेन अत्र 'कुटादीनामञ्णिति'[224] इत्येव सूत्रमुच्यते । तेन सूत्रेणैव 'जित्' 'णित्' भिन्नप्रत्ययानां परे 'कुटादीनां' 'गुणनिषेधः' अथवा 'वृद्धिनिषेधः' च विधीयते। एवं प्रकारेण भोजदेवः पाणिनिवत् अतिदेशप्रकरणस्य प्रतिपादनं न कृतं वर्तते।

अत्र 'आद्यञि'[225] इति सूत्रादारभ्य 'टेऽस्त्रियां न'[226] इति सूत्रपर्यन्तं 'दीर्घादेश', 'आट्', 'याट्', 'स्याट्' इत्यादीनामागमानां विधानमुच्यते तदनन्तरं पादस्यास्य समाप्तिप्पर्यन्तं विविधागम, 'रीङादेश', 'रिङादेश', 'हन् ' इत्यस्य 'घ्नीभाव', 'दद्भाव', 'इसादेश', 'अभ्यासस्य हल्लोप', 'नुडागम', 'सन्वद्भाव' इत्यादीनां विधानं क्रियते। भोजस्य सप्तमाध्यायस्य द्वितीयपादः काचिद्दृष्ट्या महत्वपूर्ण वर्तते। नदी तथा घि संज्ञायाः प्रतिपादनं भोजव्याकरणे न दृश्यते। तस्मात् तत्सम्बन्धीनां कार्याणां निष्पादनं 'अम्बार्थानामडलेकानां ह्रस्वः'[227] इति सूत्रादारभ्य

---

222 शब्दकल्पद्रुमः१/२६

223 अ.१/१/५

224 स.क.७/२/११

225 स.क.७/२/३६

226 स.क.७/२/६०

227 स.क.७/२/४२

'टोऽस्त्रियां ना'[228] इति सूत्रपर्यन्तं विद्यमानैः सूत्रैः अस्मिन् प्रकरणे विचार्यते । अष्टाध्याय्याः 'अस्यतेस्थुक्'[229], 'पत पुम्'[230], 'वच उम्'[231] इति सूत्राणां मेलनं कृत्वा भोजदेवेन 'असुपतवचां थुक्पुमुमः[232]' इति सूत्रमुच्यते। 'द्युतिस्वाप्योः सम्प्रसारणम्'[233] इति पाणिनीयसूत्रं भोजेन 'द्युतिस्वाप्योः सम्प्रसारणमभ्यासनिमित्तानन्तर्ये'[234] इति प्रतिपादितं वर्तते। अत्र भोजेन सूक्ष्मेक्षिकायाः परिचायनं कृतम्। 'नुगतोऽनुनासिकान्तस्य'[235] इति सूत्रस्थाने 'नुगतञमन्तस्य'[236] इति सूत्रं प्रयुक्तम्।

**सप्तमोऽध्यायः - तृतीयः पादः।**

अस्य पादस्य आरम्भः 'वीप्सायांद्वे' इति सूत्रेण भवति । अस्मात् सूत्रादारभ्य 'वाक्यस्यापि सम्भ्रमे'[237] इति सूत्रपर्यन्तं द्वित्वविधेः अनुशासनं करोति । तदनन्तरं 'युष्मदस्मद्' स्थाने 'वस्', 'मस्', 'ते', 'नौ', 'त्वा', 'मा' इत्याद्यादेशानां विधानं करोति । पाणिनिना 'षष्ठी

---

228 स.क.७/२/६०

229 अ.७/४/१७

230 अ.७/४/१९

231 अ.७/४/२०

232 स.क.७/२/६७

233 अ.७/४/६७

234 स.क.७/२/१२४

235 अ.७/४/८५

236 स.क.७/२/१३९

237 स.क.७/३/२५

चतुर्थी द्वितीयास्थानेषु'[238] भोजेन 'मुग्विभक्ति'[239] शब्दस्य प्रयोगः क्रियते । पूर्वत्रासिद्धमिति सूत्रेण भोजेन असिद्धप्रकरणस्यनिर्देशः कृतः। अस्मिन् प्रकरणे भोजेन 'नलोपस्य असिद्धि' 'सिज् लोपसिद्धि' एवं प्रकरणान्तर्गत 'श्चुत्व' 'म' इत्यस्य 'व' आदेश 'र' इत्यस्य 'लादेश', 'च' इत्यस्य 'क', 'ह' इत्यस्य 'ढ', 'छ', 'श' इत्येतयोः 'ष', 'निष्ठातकारस्य नकारादेशः' 'रु' आदेशः, 'दकारादेशः', 'सकारलोपः' इति विभिन्नकार्याणि चर्चितानि। तदनन्तरं 'वाक्यस्य टे प्लुत'[240] इति सूत्रादारभ्य अस्य पादस्य समाप्तिपर्यन्तं प्लुतविधानसूत्राणां निर्देशः कृतः। एवं प्रकारेण भोजदेवेन पाणिनीयस्य अष्टमाध्यायस्य प्रथमद्वितीयपादयोः सूत्राणां प्रतिपादनं क्रियते। सप्तमाध्यायस्य हृदयहारिणीव्याख्याने तृतीयपादे भोजव्याकरणात् सूत्रे वा सूत्रसंख्यायां वा भेदः न दृश्यते इत्यस्मात् द्वयोः ग्रन्थयोः समानरूपेण १५० सूत्राणि सन्ति।

**सप्तमोऽध्यायः - चतुर्थः पादः।**

सप्तमाध्यायस्य चतुर्थपादे भोजव्याकरणे १७८ सूत्राणि तथा हृदयहारिण्यां १६६ सूत्राणि च सन्ति। अस्मिन् पादे पाणिनीयस्य अष्टाध्याय्याः तृतीयपादस्य सूत्राणां परामर्शः क्रियते। 'एकाहलवसानयोरदीर्घात्'[241], 'यणो मयः'[242], 'शरः खयः'[243], 'न पुत्रस्यदि'[244],

---

238 अ.८/१/२०

239 स.क.७/३/२७

240 स.क.७/३/१३१

241 स.क.७/४/१५८

242 स.क.७/४/१५९

243 स.क.७/४/१६०

244 स.क.७/४/१६१

'पुत्रादिनोराक्रोशे'[245], 'शचोऽचिरात्'[246], 'झलां जश् झशि'[247], 'चर्खरि'[248], 'वा विरामे'[249], 'अणोऽप्रगृह्यस्यानुनासिकः'[250], 'अनुस्वारस्य ययि यम्'[251] इत्येतेतानि एकादशसूत्राणि हृदयहारिण्यां न दृश्यते । अत्र पाणिनेः अष्टमाध्यायस्य तृतीयचतुर्थपादयोः सूत्राणां प्रतिपादनं क्रियते। प्रमुखतः विसर्जनीयादेशस्य षत्वणत्वानां च प्रकरणं भवतीदम्। समः सुटि सः इति सूत्रेण पादस्यारम्भः। अनेन सकारादेशस्य विधानं क्रियते। पाणिनिना 'समः सुटि' इत्येव सूत्रमुच्यते। किन्तु भोजेन 'सः' इत्यपि योजयित्वा 'समः सुटि सः' इत्युक्तम्। पाणिनीये इदं सूत्रं 'पदस्य' 'पूर्वत्रासिद्धं' 'संहितायाम्', 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यधिकारे अष्टमाध्याये तृतीयपादे पञ्चमसूत्रत्वेन प्रतिपादितम्। 'रु' इत्यादेशो कौमुद्यामनेनोच्यते। किन्तु हृदयहारिणीकारः सकारान्तादेशो उच्यते। तदनन्तरमनुस्वारादेश नकारमकारयोः अनुस्वारादेशः 'कुक्' 'टुक्' 'धुट्' इत्याद्यागमानां विधानं करोति। 'विरामे विसर्जनीयः' इति सूत्रेण विसर्जनीयादेशप्रकरणमारभते। अस्याधिकारः 'जोः'[252] इति सूत्रपर्यन्तं वर्तते। सकारस्य षकारादेशस्य प्रकरणं 'तोष्विणः षः'[253] इति सूत्रादारभ्य 'झरो वा' इति सूत्रपर्यन्तं वर्तते।

245 स.क.७/४/१६२

246 स.क.७/४/१६३

247 स.क.७/४/१६४

248 स.क.७/४/१६५

249 स.क.७/४/१६६

250 स.क.७/४/१६७

251 स.क.७/४/१६८

252 स.क.७/४/३५

253 स.क.७/४/३६

'रषृभ्यो व्यवहितस्यापि'[254] इति सूत्रादारभ्य 'नृत्तनत'[255] इति सूत्रपर्यन्तं णत्वप्रकरणं प्रतिपादितं वर्तते। तदनन्तरम् 'अचो रहाभ्यां द्वे'[256] इति सूत्रेण दित्वविषयकानि सूत्राणि निर्दिष्टानि। एवं 'ष्टुत्व', 'श्चुत्व', 'रेफ', 'हकारात्परं दित्वं परसवर्णम्' इत्यादीनि कार्याणि प्रतिपाद्य चतुर्थपादः तथा सप्तमाध्यायश्च समाप्यते।

'स्फुरस्फुलोर्निर्निविभ्यः'[257], इति भोजसूत्रस्य सूत्रमात्रप्रतिपादनं दृश्यते हृदयहारिण्याम्। तत्र व्याख्या न दृश्यते। तदनन्तरसूत्रस्य 'वेः स्कभ्नोतेर्नित्यम् '[258] इति सूत्रस्य प्रतिपादनमपि न दृश्यते हृदयहारिण्याम्। एवं 'हलो यमां यमि वा'[259] इति सूत्रमपि हृदयहारिण्यां व्यख्यां विना एव दृश्यते। 'नक्षत्रादितो वा'[260], 'उत्तरस्य प्रक्षुयथापूर्वमुपदेशदर्शनादिष्टसिद्धिः'[261] इति भोजसूत्रद्वयं सूत्रत्वेन हृदयहारिण्यां न दृश्यते। तत्पूर्वयोः सूत्रयोः व्याख्याने एतयोः सूत्रयोः प्रतिपादनं कृतं वर्तते। अस्मिन्नध्याये सरस्वतीकण्ठाभरणे १७८ सूत्राणि तथा हृदयहारिण्यां १६६ सूत्राणि च दृश्यन्ते।

**सरस्वतीकण्ठाभरणस्य अष्टमाध्यायस्य हृदयहारिणीव्याख्या न प्राप्ता।**

---

254 स.क.७/४/७

255 स.क.७/४/१५०

256 स.क.७/४/१५७

257 स.क.७/४/६६

258 स.क.७/४/६७

259 स.क.७/४/१७३

260 स.क.७/४/९१

261 स.क.७/४/१७८

## पञ्चमोऽध्यायः ।

# हस्तलिखितपाठस्याध्ययनम् ।

भोजेनकृतं व्याकरणं भोजव्याकरणम् । तत्तु सरस्वतीकण्ठाभरणम् । हृदयं हर्तुं शीलम् अस्याः इति हृदयहारिणी केषामिति चेत् सर्वेषाम् अत्र हृदयशब्दः बुद्ध्युपलक्षणरूपेण प्रयुक्तः । विशिष्टस्य भावः वैशिष्टम् । विशिष्टधीनियामक इत्यर्थः । सरस्वत्याः कण्ठे विद्यमानं तदाभरणं सहृदयानां हृदयं हर्तुं समर्थं भवति इति 'हृदयहारिणी' इति शीर्षकेन समान्यतया वक्तुं शक्यते । एवमनेन सर्वेषां हृदयहरणसमर्थायाः हृदयहारिण्या विशेषप्रयोगः प्रतिपाद्यते । अत्र मया सप्तमाध्यायस्योदाहरणानि एवात्र स्वीकृतानि । तानि पाणिनीयस्य कौमुदीव्याख्याने कथं प्रतिपादितं तथा सरस्वतीकण्ठाभरणस्य हृदयहारिण्यां कथमिति च अत्र परामृश्यते । अद्य अस्माभिः पाणिनीयव्याकरणमेव अधिकतया आश्रियते इत्यस्मात् प्रसिद्धात् पाणिनीयव्याकरणात् अप्रसिद्धं भोजव्याकरणं प्रति गन्तुमाकांक्षा अनया प्रतिपाद्यते । पाणिनीयव्याकरणस्य प्रसिद्धं व्याख्यानं भवति भट्टोजिदीक्षितेन विरचिता वैयाकरणसिद्धान्तकौमुदी । अष्टाध्यायीक्रमं परित्यज्य प्रक्रियालाघवार्थं भट्टोजिदीक्षितेन प्रयत्नः कृतः । सरस्वतीकण्ठाभरणस्य हृदयहारिणीव्याख्यानं अष्टाध्याय्याः वैयाकरणसिद्धान्तकौमुदीव्याख्यानं च द्वयोरपि व्यख्यानस्य वृत्तिभेदपरिज्ञानाय अत्र स्वीकृतं वर्तते । सरस्वतीकण्ठाभरणस्य अध्यायवत् सप्तमाध्यायोऽपि

चतुर्षु पादेषु विभक्तः। सप्तमाध्याये आहत्य ६१९ सूत्राणि विद्यन्ते। सरस्वतीकण्ठाभरणस्य सप्तमाध्यायस्य हृदयहारिणी व्याख्यानं एतावता न प्रसिद्धीकृतं वर्तते। तस्य हस्तलेखा 'अटयार्' ग्रन्थशालायाः तथा पर्णलेखा 'तिरुवनन्तपुरं मानुस्क्रिप्ट्' ग्रन्थशालायाः च प्राप्तम् वर्तते। 'अटयार्' ग्रन्थशालायाः प्राप्ते पुस्तके २४२ पुटानि सन्ति। एवं सप्तमाध्यायस्य हृदयहारिण्याः सामान्यपठनमेव अस्मिन् अध्याये मया क्रियते।

**सप्तमोऽध्यायः- प्रथमः पादः ।**

**मृजेर्वृद्धिः। (७/१/१)**

सप्तमाध्यायस्य प्रथमं सूत्रं भवति 'मृजेर्वृद्धिः' इति । मृजेः, वृद्धि इति पदच्छेदः। द्विपदमिदं सूत्रम्। पाणिनीये इदं सूत्रम् 'अङ्गस्य'[1] इत्यधिकारे भवति। किन्तु 'अङ्गस्य' इति सूत्रमेव भोजव्याकरणे न दृश्यते। दण्डनाथेनापि अधिकारसूत्रत्वेन 'अङ्गस्य' इति सूत्रं न परामृष्टम्। 'मृजेर्वृद्धि' इत्यस्य सूत्रार्थः हृदयहारिण्यामेवं दृश्यते यत् 'मृजेः अकारस्य असेर्धातोः परस्यादेरिकारादेशो परतो वृद्धिर्भवति' इति। मार्ष्टि, मार्ष्टा, मार्ष्टव्यं, मार्जिता, इत्युदाहरणानि तत्र दत्तानि। तत्र मार्ष्टि, मार्ष्टा, मार्जिता इत्युदाहरणानि कौमुद्यामपि वर्तन्ते।

'मृजूँ शुद्धौ' इति धातोः 'स्त्रियां क्तिन्'[2] इति सूत्रेण क्तिन् प्रत्यये 'लशक्वतद्धिते'[3] इति

---

1 अ.६/४/१

2 स.क.२/४/१२०

3 स.क.१/२/१५

'ककारलोपे' 'मृज्' 'ति' इति जाते अनेन सूत्रेण 'आदिवृद्धौ' 'ऋकोऽणोरलौ'[4] इति रपरत्वे 'मार्ज् ति' इति जाते 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजपरिव्राजछशां षः'[5] इति सूत्रेण 'मृज्' इत्यस्य जकारस्य षत्वे मार्ष् ति इति जाते 'स्तोश्चुष्टुभ्यां तो'[6] इति सूत्रेण 'ष्टुत्वे' 'मार्ष्टि' इति रूपम्। वृद्ध्यभावे 'मृष्टः' इति च। पाणिनिना 'मृजेर्वृद्धिः'[7] इति सूत्रमुक्तम् । कौमुद्यां 'मृजेरिको वृद्धिस्याद्धातुप्रत्यये परे' इति सूत्रार्थ 'इक्' इत्यनेन 'ऋकारं' गृह्यते। किन्तु अत्र मृजेः अकारस्य असेर्धातोः परस्यादेरिकारादेशो परतो वृद्धिर्भवतीत्युक्ते अकारस्य इत्यत्र ऋकारः स्यात्। 'अस्' धातोः प्रसक्तिः अत्र कथं भवतीति न ज्ञायते।

**ॠतोऽचि वा । (७/१/२)**

'ॠतः' 'अचि' 'वा' इति पदच्छेदः। अचि परे ॠतः वा वृद्धिर्भवति। दण्डनाथेन 'मृजेः ऋकारस्याजादौ प्रत्यये परे वृद्धिर्वा भवतीति' सूत्रार्थः उक्तः। परिमृजन्ति परिमार्जन्ति, परिमृजन्तु, परिमार्जन्तु इत्यादीनि उदाहरणानि। मृजेर्वृद्धि इति सूत्रव्याख्याने क्ङित्जादौ इति वार्तिकमस्ति। तेन अजादौ प्रत्यये परेऽपि तत्र वृद्धिर्भवति। अत्र भोजदेवेन तस्य वार्तिकस्य प्रवृत्तिरनेन सूत्रेण साधिता।

---

4 स.क.१/२/३७

5 स.क.७/३/७९

6 स.क.७/४/१५३

7 पा.सू.७/२/११४

परिपूर्वक 'मृजूँ शुद्धौ' इति धातोः 'झिप्रत्यये' 'झोऽन्तः'[8] इति अन्तादेशे 'परिमृज् अन्त् इ', 'परिमृजन्ति' इति जाते 'ऋतोऽचि वा' इत्यनेन सूत्रेण वृद्धौ 'ॠकोऽणो रलो'[9] इति रपरत्वे परिमार्जन्ति इति रूपम्। वृद्ध्यभावे 'परिमृजन्ति' इति च। अत्र दण्डनाथेन सूत्रे ऋत इति किम् इत्युक्त्वा ममार्ज मार्जयति इति उदाहरणानि दत्तानि। एवमच्ग्रहणं किमर्थमित्यत्र 'मृष्टः' 'मृजः' इत्येते उदाहरणे दत्ते।

**अजागृणिश्वीनाम् सिचि परस्मैपदेषु। (७/१/३)**

परस्मैपदेपरे सिचिपरतः इगन्तायाः जागृणिश्विवर्जिता या प्रकृतेर्वृद्धिर्भवति आन्तरतम्यात् इति दण्डनाथेनोक्तः। सूत्रार्थे इगन्तायाः इति प्रयोगेन इकार-उकार-ऋकार-लृकारान्तानां ग्रहणम्। तस्मात् दण्डनाथः पाणिनिवत् प्रत्याहारसंज्ञा स्वीक्रियते इति वक्तुं शक्यते। 'अकार्षीत्', 'अचैषीत्', 'अनैषीत्', 'अस्तावीत्', 'अलावीत्', इत्याद्युदाहरणानि तत्र दत्तानि। 'कृ'धातोः 'लुङ्' लकारस्य प्रथमपुरुषैकवचने 'कृ लुङ्' इति जाते 'लुङि सिच्'[10] इति 'सिच्' प्रत्यये 'कृ सिच् ल्' इति जाते अनुबन्धलोपे 'कृ स् ल्' इति जाते 'लुङ्लङ्लृङ्क्ष्वड-माङ्योगे'[11] इति सूत्रेण अटागमे अनुबन्धलोपे 'अ कृ स् ल्' इति जाते 'लस्तिप्तस्झिसिप्थस्थमि-ब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'[12] तिप्रत्यये 'अ कृ स् ति' इति जाते 'इतो लोपः

---

8 स.क.३/१/३

9 स.क.१/२/३७

10 स.क.१/३/७७

11 स.क.६/३/८२

12 स.क.३/१/१

परस्मैपदेषु'[13] इति इकारलोपे 'अ कृ स् त्' इति जाते 'अभ्यस्ति-सिज्भ्यामपृक्तस्य'[14] इति 'ईडागमे' अनुबन्धलोपे 'अ कृ स् ई त्' इति जाते सकारस्य 'षत्वे' अनेनसूत्रेण 'कृ' इत्यस्य प्रकृतेर्वृद्धौ 'अकार्षीत्' इति रूपम्। पाणिनीये 'सिचिवृद्धिपरस्मैपदेषु'[15] इति वर्तते सूत्रम् । 'वृद्धि' इति अत्र दण्डनाथेन 'मृजेर्वृद्धि' इति सूत्रात् सूत्रार्थे अनुवर्तते। सूत्रे 'अजागृणीश्वीनाम्' इत्यस्य प्रयोजनम् 'अजागरीत्', 'औनयीत्', 'अध्वनयीत्', 'मेलयीत्', 'आर्दयीत्' इत्यादिरूपसिद्ध्यर्थमिति दण्डनाथेनोच्यते। पाणिनेः 'सिचिवृद्धिपरस्मैपदेषु' इति सूत्राधारेण उक्ते अस्मिन् सूत्रे 'जागृणिश्विवर्जितानामेव' प्रकृतेः वृद्धिर्विधीयते। किन्तु 'सिचिवृद्धि-परस्मैपदेषु' इत्यनेन जागृणिश्विवर्जितानां प्रतिपादनं न कृतं चेदपि पाणिनिना 'ह्म्यन्तक्षण-श्वसजागृणिश्व्येदिताम्' इति सूत्रेण 'हम्यान्तस्य क्षणादेर्ण्यन्तस्त श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि' इति उच्यते।

**हलोऽच । (७/१/४) व्रजवदर्लान्नित्यम्। (७/१/८)**

पाणिनीयस्य 'वदव्रजहलन्तस्याचः'[16] इति सूत्रं भोजेन 'हलोऽचः', 'व्रजवदर्लान्नित्यम्' इति सूत्रद्वयेन प्रतिपादितम्। कौमुद्यामस्य सूत्रार्थः 'वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात्सिचि परस्मैपदेषु' इत्यस्ति। दण्डनाथेन 'हलोऽच' इत्यस्य सूत्रार्थः 'परस्मैपदेपरे सिचि परतो हलन्तायाः प्रकृतेर्योऽल्तस्य वृद्धिर्भवति' इति उच्यते। कौमुदीकारेण 'वदव्रजेः हलन्तस्य

---

13 स.क.८/१/६३

14 स.क.७/२/३३

15 पा.सू.७/२/१

16 पा.सू.७/२/३

अङ्गस्य च हलः वृद्धिविधाने' दण्डनाथेन प्रकृतेः 'अलः' वृद्धिः विधीयते। 'हल्' 'अल्' इति प्रत्याहारसंज्ञयोः प्रयोगः अत्र दण्डनाथेन कृतः। 'अपाक्षीत्', 'अधाक्षीत्', 'अश्रैत्सीत्', 'अरौत्सीत्', 'अताप्सीत्' इत्यादीनि उदाहरणानि। 'व्रजवदर्लान्नित्यम्' इत्यस्य व्याख्यानं पूर्णतया हृदयहारिण्यां न दृश्यते। तत्र ''व्रजवद इत्येतयोः र्लकारान्तानां रेफान्तानां च प्रकृतेः सिचि इडादौ सिचिपरस्मै ...''इत्येव तत्र दृश्यते। पाणिनिना 'वदव्रजहलन्तस्य' इति सूत्रेण वृद्धिः विधीयते इत्यस्मात्  अत्रापि वृद्धिविधायकं भवेदिदं सूत्रम्।

**नेटि। (७/१/५)**

वृद्धिनिषेधात्मकमिदं सूत्रम्। 'न इटि' इति पदच्छेदः। 'इडादौ सिचि परस्मैपदे परे परतो हलन्ताया प्रकृतेरचोवृद्धिर्नभवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'इट्' 'हल्' 'अच्' इति प्रत्याहारसंज्ञाः दण्डनाथेन सूत्रार्थे स्वीकृताः। 'अदेवीत्', 'अकोषीत्' इत्येते उदाहरणे। पाणिनिना प्रयुक्ते 'नेटि'[17] इति सूत्रस्य स्वीकारः कृतश्चेदपि  अङ्गस्य वृद्धिर्नभवति इति वृत्तिः दण्डनाथेन न स्वीकृतः। अत्र अचः वृद्धिनिषेधः उक्तः। तथापि द्वयोरपि वृद्धिनिषेधकं सूत्रमिदम्।

**वोर्णोः  (७/१/६)**

विकल्पेन वृद्धिविधायकस्यास्य सूत्रस्य सूत्रार्थः 'उर्णोतेरिडादौ सिचि परस्मैपदपरे परतो वृद्धिर्भवति' इति हृदयहारिण्यामुच्यते। 'प्रौर्णावीत्' 'प्रौर्णविष्ट' इत्युदाहरणे। वृद्ध्यभावे

---

17 पा.सू.७/२/४

'प्रौर्णवीत्' 'प्रौणुविष्ट' इति च। पाणिनिना 'ऊर्णोतेर्विभाषा'[18] इति सूत्रेण इदं कार्यं प्रतिपादितम्। 'इडादौ सिचि परस्मैपदे परे वा वृद्धिः स्यात् पक्षे गुण' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। कौमुद्यामनेन विकल्पवृद्धिः उक्ता। किन्तु दण्डनाथेन विकल्पेन वृद्धिः नोच्यते। 'और्णावीत्', 'और्णाविष्टाम्', 'और्णाविषुः', 'और्णवीत्' इत्यादीनि उदाहरणानि तत्र दत्तानि। इमानि उदाहरणानि कौमुद्यामपि वर्तन्ते।

**हलादेरह्यन्तक्षणश्वसेदितोऽत उपधायाः (७/१//७)**

'अलोऽन्त्यात् पूर्व उपधा'[19] इति सूत्रेण उपधासंज्ञा भोजेनोक्ता। उपधायाः विकल्पेन वृद्धिविधायकमिदं सूत्रम्। 'हलादे प्रकृतेर्हान्तमान्तयान्तक्षणश्वसेदित् वर्जिताया इडादौ परस्मैपदपरे सिचि परतोकारस्योपधाया वृद्धिर्वा भवतीति' अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अकाणीत्' 'अराणीत्' इत्येते उदाहरणे। वृद्ध्यभावे 'अकणीत्' 'अरणीत्' इति च। पाणिनिना 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्'[20] इति सूत्रमुक्तम्। 'ह्मयान्तस्य क्षणादेर्ण्यन्तस्त श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'अतः हलादेर्लघोः' इति सूत्रेणापि पाणिनिना हलादेरङ्गस्य लघोरकारस्य विकल्पेन वृद्धिनिषेधः उक्तः। 'हलादेर्लघोरकारस्येडादौ परस्मैपदपरे सिचि वृद्धिर्वा स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। अनयोः द्वयोः सूत्रयोः सन्निवेशः भोजेन अत्र कृतः।

---

18 पा.सू.७/२/६

19 स.क.१/१/८५

20 पा.सू.७/२/५

**ञ्णिति। (७/१/९) अचः। (७/१/१०)**

पाणिनिना 'अचो ञ्णिति'[21] इति सूत्रमुक्तम्। कौमुद्यां 'ञिति णिति च प्रत्यये परेऽजन्ताङ्गस्य वृद्धिः' उक्तः। इदं सूत्रं अत्र 'ञ्णिति', 'अचः' इति द्विधा उच्यते। ञ्णिति इत्यस्य सूत्रार्थः ञिति णिति प्रत्यये परतः प्रकृतेरकारस्योपधाया वृद्धिर्भवति इति दण्डनाथेन उक्तः। 'पाकः', 'त्यागः' अपाचि 'पाचक' इत्यादीनि उदाहरणानि। 'अचः इत्यस्य ञिति णिति प्रत्यये परतोऽजन्तायाः प्रकृतेरन्त्यस्याचो वृद्धिर्भवति' इति  सूत्रार्थः हृदयहारिण्यामुच्यते। 'प्रापयति', 'चायः' 'चायकः' 'नायः' 'नायकः' 'भावः' 'भावकः' 'कारः' 'कारक' इत्यादीनि उदाहरणानि।

**किति च तद्धितेऽचामादेः। (७/१/११)**

पाणिनीये 'तद्धितेष्वचामादेः'[22] 'किति च'[23] , इति वृद्धिविधायकं सूत्रद्वयमुक्तं वर्तते। 'ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात् ' इति 'तद्धितेष्वचामादेः' इत्यस्य तथा 'किति च तद्धिते परे तथा' इति 'किति च' इति सूत्रस्य च सूत्रार्थः कौमुद्यामुक्तः। द्वयोः सूत्रयोः 'ञिति' 'णिति' 'किति' च तद्धिते परे अचामादेरचो वृद्धिः विधीयते। तस्मात् तत्सूत्रद्वयं मिलित्वा भोजेनात्रोच्यते। 'किति चकारात् ञ्णिति च तद्धिते प्रत्यये परतः प्रकृतेरचां मध्ये य आदिरच् तस्य वृद्धिर्भवति' इति हृदयहारिण्यामस्य सूत्रार्थः दृश्यते। एकैकस्य प्रत्ययस्य एकं वा द्वे वा उदाहरणं च दण्डनाथेन तत्र उक्तम्। यथा- 'फक्'- 'नाडायनः', 'ऐतिकायनः', 'ठक्' -

---

[21] पा.सू.७/२/११५

[22] पा.सू.७/२/११७

[23] पा.सू.७/२/११८

'रैवतिकः', 'ढक्' - 'रौहिणेयः', 'यञ्' - 'गार्ग्यः', 'इञ्' - 'दाक्षिः', 'णिति' - 'वासिष्ठः'। भोजदेवेन संज्ञाप्रकरणे 'प्राग्रितीयाणादयस्तद्धिताः'[24] इति सूत्रेण तद्धितसंज्ञा उक्ता। किन्तु पाणिनिना तद्धितसंज्ञा न प्रयुक्ता।

**केकयमित्रयुप्रलयानां यादेरियश्च। (७/१/१२)**

'केकयमित्त्रयुप्रलयानां यादेरियः'[25] इति पाणिनीयसूत्रमस्ति। यकारादेरियादेशः अनेन विधीयते। 'एषां यकारादेरियादेशः स्यात् ञिति णिति किति च तद्धिते परे' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन अस्मिन् सूत्रे 'च' इत्यपि संयोज्य वृद्धिश्च विधीयते। एवं 'केकयादीनां किति ञिति णिति तद्धिते परतो यादेः शब्दरूपस्येयादेशश्चकारादचामादेरचोवृद्धिश्च भवति' इति दण्डनाथस्य सूत्रार्थात् 'इयादेशेन' साकं वृद्धेः विधानमपि कृतम्। 'कैकेयः', 'मैत्रेयः', 'प्रालेयम्' इत्यादीनि उदाहरणानि हृदयहारिण्यां दत्तानि।

**देविकाशिंशपादिर्घसत्रश्रेयसांतत्प्राप्तावात् । (७/१/१३)**

'देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्'[26] इति पाणिनीयसूत्रमस्ति। सिद्धान्त-कौमुद्याम् 'एषां पञ्चानां वृद्धिप्राप्तावदेरच आत् स्यात् ञिति णिति किति च' इति अस्य सूत्रार्थः दृश्यते। हृदयहारिण्यां 'देविकादीनां तद्धिते किति ञिति णिति चाचामादेरचस्तत्प्राप्तौ वृद्धिप्रसङ्गे

---

24 स.क.१/१/१५

25 पा.सू.७/३/२

26 पा.सू.७/३/१

आकारादेशो भवतीति' सूत्रार्थः उच्यते। द्वयोरपि अनेन 'आकारादेशः' विहितः। 'दाविकमुदकम्', 'शांशपश्चमसः', 'दार्घसत्रम्', 'श्रायसम् ' इत्यादीन्युदाहरणानि दण्डनाथेन दत्तानि। इमानि उदाहरणानि कौमुद्यामपि दृश्यते।

**वहीनरस्यैत् ।** (७/१/१४)

'देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्' इति पाणिनीयसूत्रव्याख्याने कात्यायनेन 'वहीनरस्येद्वचनं कर्तव्यम्' इति वार्तिकं प्रयुक्तम्। भोजेन वार्तिकमिदमत्र सूत्रत्वेनोक्तम्। अचामादेरच एकादेशो अनेन विधीयते। 'वहीनरशब्दस्य किति ञिति णिति च परतोऽचामादेरच एकादेशो भवतीति' अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'वहीनरस्यापत्यं वैहीनरिः' इत्युदाहरणम्। तत्र दण्नाथेन वैहीनरिः इति रूपं वृद्ध्या सिद्धमिति चेत् वाहीनरिः इति रूपं माभूत् इति अस्य सूत्रस्य प्रयोजनं तत्र उच्यते।

**य्वः पदान्तात् प्रागैच् ।** (७/१/१५)

पाणिनिना 'न य्वाभ्यां पदान्ताभ्याम् पूर्वौ तु ताभ्यामैच्'[27] इति सूत्रमुक्तम्। अस्य कौमुदीव्याख्याने 'पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः। किंतु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः' इति सूत्रार्थः उक्तः। ऐजागमः वृद्धिनिषेधश्च अनेनोच्यते। अस्य सूत्रस्य आधारेण भोजेनेदं सूत्रमुक्तम्। 'किति ञ्णिति च तद्धिते परतो प्रकृतेरतत्प्राप्तौ वृद्धिप्रसङ्गे

27 पा.सू.७/३/३

इवर्णोवर्णयो स्थाने यौ यकार वकारौ पदान्तौ ताभ्यां पूर्वं यथासंख्यमैकारौकारौ भवतः' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। अत्र दण्डनाथः कुत्र ऐकारौकारौ भवितव्यौ इति अत्र स्पष्टीक्रियते। सूत्रार्थे लाघवमानेतुं तावत्परिश्रमः तेन कृतः इति सूत्रार्थात् ज्ञायते। 'ऐजागम' इति कौमुदीप्रयोगस्य स्थाने 'ऐकारौकारौ' इति दण्डनाथेन प्रयुक्तौ। दण्डनाथः प्रत्याहारसंज्ञां स्वीकरोति। तथापि सूत्रार्थलाघवाय ऐकारौकारौ इत्युक्तं स्यात्। 'वैयाकरणः', 'नैयायिकः', 'सौवग्रामिलः' इत्यादीन्युदाहरणानि हृदयहारिण्यां दत्तानि।

**द्वारस्वरस्वरितस्वादुमृदुव्यल्कशश्वन्स्फ्यकृतस्वस्वाध्यायस्वग्रामाणाम् । (७/१/१६)**

पाणिनीये गणपाठस्वीकारेण 'द्वारादीनां च'[28] इत्येव सूत्रमुच्यते। अस्य सूत्रार्थः कौमुद्यां 'द्वार, स्वर् ,व्यल्कश, स्वस्ति, स्वर, स्फ्यकृत् , स्वादु, मृदु, श्वस् ,श्वन् ,स्व एषां न वृद्धिरैजगामश्च' इत्युच्यते। भोजेन गणपाठस्वीकाराभावे द्वारादीन् सर्वान् शब्दानुच्चार्य सूत्रं प्रयुक्तम्। किन्तु स्वरितस्वग्रामशब्दौ गणपाठे न दृश्यते। अनयोः शब्दयोः द्वारादीनामिव प्रवृत्तिरिति ज्ञापनार्थं एतश्छब्दद्वयमत्र पठितं स्यात्। 'द्वारादीनां तद्धिते किति ञिति णिति प्रत्यये परतो य्वाः समीपस्यातो वृद्धिप्राप्तौ तयोः पूर्वावैजागमो भवतः' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'दौवारिकः', 'सौरवः', 'सौवः', 'सौवस्तिकः' 'सौवादुमृदवम्', 'वैयल्कशः' इत्यादीन्युदाहरणानि।

---

28 पा.सू.७/३/४

**न्यग्रोधस्य केवलस्य । (७/१/१७)**

पाणिनीयसूत्रे 'न्यग्रोधस्य च केवलस्य'[29] इत्यस्ति। ऐजागमेन साकं वृद्धिनिषेधश्च अनेन विधीयते। 'अस्य न वृद्धिरैजागमश्च' इति कौमुद्यां सूत्रार्थः उक्तः। द्वयोः (वृद्धेः ऐजागमस्य च) निषेधः उक्तः इत्यस्मात् पाणिनिना सूत्रे 'च' इति पदं प्रयुक्तम्। तत्सूत्राधारेण भोजेनोक्तमिदम् सूत्रम्। 'न्यग्रोधशब्दस्य केवलस्य तद्धिते ञ्णिति किति च प्रत्यये परतो यकारात्पूर्वमैजागमो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। दण्डनाथेन 'ऐजागमः' अनेनोच्यते। वृद्धिनिषेधः सूत्रार्थे दण्डनाथेन नोक्तश्चेदपि वृद्धिप्रसङ्गे 'ऐजागम' इति ज्ञापनं सूत्रार्थात् सिध्यति। 'नैयग्रोधश्चमसः' इत्युदाहरणम् तत्रोच्यते।

**न णचः। (७/१/१८)**

पाणिनिना 'न कर्मव्यतिहारे'[30] इति सूत्रं प्रयुक्तम्। 'अत्र ऐच् न स्यादिति' कौमुद्यामस्य सूत्रार्थः। ऐजागमनिषेधात्मकमिदं सूत्रम्। पाणिनिना 'कर्मव्यतिहारे णच् स्त्रियाम्'[31] इति सूत्रेण 'णच् ' प्रत्ययः विहितः। णच् प्रत्यये कृते 'न कर्मव्यतिहारे' इति सूत्रेण णजन्तायाः प्रकृतेः ऐजागमनिषेधः पाणिनिना क्रियते। भोजेन 'क्रियाव्यतिहारेऽनीहीक्ष्यादिभ्यो णच्'[32] इति सूत्रेण 'क्रियाव्यतिहारविषयेभ्यो धातुभ्यः ईहीक्ष्यादिवर्जितेभ्यः स्त्रियां भावे णच् प्रत्ययो भवति'

---

[29] पा.सू.७/३/५

[30] पा.सू.७/३/६

[31] पा.सू.३/३/४३

[32] स.क.२/४/१५४

इत्यनेन 'णच्' प्रत्यये कृते णजन्तानां 'न णच' इत्यनेन सूत्रेण ऐजागमनिषेधः कृतः। एवं णजन्तायाः प्रकृतेस्तद्धिते णिति किति च य्वोः प्रागैजागमौ न भवति इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'व्यावक्रोशी', 'व्यावलेखी', 'व्यावचर्ची', 'व्यावहासी' इत्येतानि उदाहरणानि तत्र दत्तानि।

**स्वागतस्वध्वरस्वङ्गव्यङ्गव्यडव्यवहारव्यायामानाम्।** (७/१/१९)

पाणिनिना 'स्वागतादीनां च'[33] इति सूत्रम् उक्तम्। ' ऐच् न स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदमपि ऐजागमनिषेधसूत्रं भवति। तस्य पाणिनीयसूत्रस्याधारेण भोजदेवेन इदं सूत्रं स्वागतादीन् सर्वान् शब्दानुच्चार्य प्रतिपादितम्।। स्वागतादीनां ञ्णिति किति च तद्धिते परतो य्वोः पूर्वमैजागमो न भवति इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। गणपाठे 'स्वागत, सध्वर, स्वङ्ग, व्यङ्ग, व्यड, व्यवहार स्वपति इति स्वागतादिः' इत्यस्ति। तत्रत्य 'स्वपतिशब्दः' भोजेन न स्वीकृतः किन्तु 'व्यायाम' इति नूतनशब्दः प्रयुक्तश्च। 'स्वागतिकः', 'स्वाध्वरिकः', 'स्वाङ्गिकः', 'व्याङ्गिः', 'व्याडिः', 'व्यावहारिकः', 'व्यायामः' इत्यादीनि उदाहरणानि। अत्र व्यायामशब्दसाधूकरणाय भोजदेवेन 'व्यायम' इति पदं सूत्रे प्रयुक्तं स्यात्। 'व्यायाम' इत्युदाहरणमुक्त्वा प्रयोजनमस्या 'व्यायामिका विद्या' इति दण्डनाथेनोक्तम्। 'स्वागतिकः' , 'स्वाध्वरिकः', 'व्याङ्गिः' ,'व्याडिः', 'व्यावहारिकः' इत्युदाहरणानि कौमुद्यामपि वर्तन्ते।

---

33 पा.सू.७/३/७

**श्वादेरिति। (७/१/२०) इञः। (७/१/२१)**

पाणिनिना 'श्वादेरिञि'[34] इति सूत्रमुक्तम्। 'ऐच् न' इति कौमुद्यां सूत्रार्थः। ऐजागमनिषेधसूत्रं भवति इदम्। पाणिनिना उक्तं सूत्रं विभज्य भोजेन सूत्रद्वयेन प्रतिपादितम्। 'श्वन् शब्दादिकारादौ ञ्णिति किति च तद्धिते परतो ऽच प्राक् ऐजागमो न भवति' इति दण्डनाथेन श्वादेरिति इति सूत्रस्य सूत्रार्थः उक्तः। 'श्वागणिकः', 'श्वायूथिकः' इत्याद्युदाहरणद्वयं तत्र प्रतिपादितम्। तयोः उदाहरणयोः 'श्वागणिकः' इत्युदाहरणं कौमुद्यामप्यस्ति। अस्य सूत्रस्याग्रिम सूत्रं भोजेन 'इञः' इति सूत्रमुक्तम्। 'श्वादेर्यञ्प्रत्ययान्तस्य ञ्णिति किति च तद्धिते परत ऐजागमो न भवति' इति 'इञः' इति सूत्रस्य सूत्रार्थः हृदयहारिण्यामुक्तः। श्वाभस्त्रम्, श्वाकर्णम् इत्युदाहरणद्वयं तत्र दण्डनाथेनोक्तम्।

**पदान्तस्यानिति वा। (७/१/२२)**

पाणिनिना 'पदान्तस्यान्यतरस्याम्'[35] इति सूत्रं प्रयुक्तम्। 'श्वादेरङ्गस्य पदशब्दान्त-स्यैज्वा' इति कौमुद्यामस्य सूत्रार्थः उक्तः। अस्य सूत्रस्याधारेण भोजेनोक्तमिदं सूत्रम्। 'पदशब्दोत्तरपदस्य श्वादेः शब्दस्येकारादिवर्जिते तद्धिते ञ्णिति किति च परत ऐजागमो वा भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। एताभ्यां सूत्राभ्यां विकल्पेन ऐजागमः विधीयते। 'श्वापदं' 'शौवापदम् ' इत्युदाहरणे कौमुद्यां हृदयहारिण्यां च वर्तेते।।

---

34 पा.सू.७/३/८

35 पा.सू.७/३/९

**न्यङ्कोश्च। (७/१/२३)**

न्यङ्कोः च इति पदच्छेदः। अनेन विकल्पेन ऐजागमो विधीयते। न्यङ्कुशब्दस्य 'तद्धिते ञ्णिति किति च यकारात् पूर्वमैजागमो वा' भवतीत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। अमरकोशे न्यङ्कुशब्दस्य 'मृगभेद' इत्यर्थः दृश्यते। 'नितरां अञ्चति /गच्छतीति न्यङ्कुः' ।

**गुरुलघुसंहतपदार्थोर्ध्वमुहूर्तादीनां उत्तरपदस्य (७/१/२४)**

पाणिनिना इदं सूत्रम् 'उत्तरपदस्य'[36] इत्येव उच्यते। गुरुलघ्वादीनां तद्धिते ञ्णिति किति च परतेरुत्तरपदस्याचामादेरचो वृद्धिर्भवति। 'गुरुलाघवम्', 'संहतपदार्थं', 'ऊर्ध्वमौहूर्त्तिकः' इत्यादीन्युदाहरणानि हृदयहारिण्यां दत्तानि।

**अवयवादृतोः। (७/१/२५)**

पाणिनिना उक्तेन 'अवयवादृतोः'[37] इति सूत्रेण अकारप्रत्ययः विधीयते। 'अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिः स्यात् ञिति णिति किति च तद्धिते परे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। तत्सूत्राधारेण भोजेन लिखितमिदं सूत्रम्। इदमपि वृद्धिविधायकं सूत्रं भवति। 'अवयववाचिनः परस्य ऋतुवाचिनः उत्तरपदस्य ञ्णिति किति चाचामादेरचो वृद्धिर्भवतीत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'पूर्ववार्षिकः', 'अपरवार्षिकः', 'पूर्वहैमनः', 'अपरहैमनः' इत्यादीन्युदाहरणानि तत्र दत्तानि। तेषु 'पूर्ववार्षिकः', 'अपरहैमनः' इत्युदाहरणद्वयं कौमुद्यामपि वर्तते।

---

36 पा.सू.७/३/१०

37 पा.सू.७/३/११

**सुसर्वार्धेभ्यो जनपदस्य ।  (७/१/२६)**

पाणिनिना इदं सूत्रं 'सुसर्वार्धाज्जनपदस्य'[38] इत्युक्तम्। उत्तरपदस्य वृद्धिविधायकमिदं सूत्रम्। 'सुसर्वार्धेभ्यो जनपदवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुच्यते। 'सुपाञ्चालकः', 'सर्वपाञ्चालकः', 'अर्धपाञ्चालकः', 'सुमागधकः', 'सर्वमागधकः', 'अर्धमागधकः' इत्यादीन्युदाहरणानि। 'सुपाञ्चालकः', 'सर्वपाञ्चालकः', 'अर्धपाञ्चालक' इत्युदाहरणानि कौमुद्यामपि दृश्यन्ते।

**अमद्राणां दिशः। (७/१/२७)**

पाणिनिना इदं सूत्रं 'दिशोऽमद्राणाम् [39]' इत्युच्यते। 'दिग्वाचकाज्जनपदवाचिनो वृद्धिः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदमपि वृद्धिविधायकं सूत्रं भवति। अस्य सूत्रस्याधारेण भोजेनोक्तं भवति 'अमद्राणां दिश' इति सूत्रम्। 'दिक्च्छब्दात् परस्यामद्रेभ्यो जनपदवाचिन उत्तरस्य किति ञ्णिति च तद्धिते परतोऽचामादेरचो वृद्धिर्भवति' इति हृदयहारिण्यामुच्यते। 'पूर्वपाञ्चालकः', 'अपरपाञ्चालकः' इत्येते उदाहरणे। 'पूर्वपाञ्चालक' इत्युदाहरणं कौमुद्यामपि वर्तते।

**प्राचां ग्रामनगराणाम्। (७/१/२८)**

पाणिनिना प्रयुक्तमिदं[40] सूत्रं तद्वदेव भोजदेवेनात्र स्वीकृतम्। पाणिनीये

[38] पा.सू.७/३/१२

[39] पा.सू.७/३/१३

[40] पा.सू.७/३/१४

वृद्धिविधायकत्वेन इदं सूत्रमुच्यते। 'प्राग्देशे यानि ग्रामनगराणि तेषां दिक्शब्देभ्य परेषामुत्तरपदानां तद्धिते ञ्णिति किति च परतोऽचामादेरचो वृद्धिर्भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'पूर्वकष्णमृत्तिका नामप्राक्षु ग्रामस्तत्र भवः पूर्वकार्ष्णमृत्तिकः'। 'पूर्वैषुकामशमः', 'नगराणाम् पूर्वस्मिन् कान्यकुब्जे भवः पूर्वकान्यकुब्जः' 'अपरकान्यकुब्जः' इत्येतानि उदाहरणानि तत्र दत्तानि। तेषु 'पूर्वैषुकामशम' इत्युदाहरणं कौमुद्यामप्यस्ति।

**सङ्ख्याधिकाभ्यां सङ्ख्यायाः। (७/१/२९)**

**संवत्सरपरिमाणस्याशाणकुलिजस्यासंज्ञायाम्। (७/१/३०)**

पाणिनिना 'संख्यायाः संवत्सरसंख्यस्य च'[41] इति सूत्रेण प्रतिपादितं कार्यं भोजेन 'सङ्ख्याधिकाभ्यां सङ्ख्यायाः', 'संवत्सरपरिमाणस्याशाणकुलिजस्यासंज्ञायाम्' इति सूत्रद्वयेन प्रतिपाद्यते। सङ्ख्यावाची दिक्वाचि शब्दाभ्यां योगे वृद्धिप्राप्त्यर्थमिदं सूत्रं प्रवृत्तम्। 'सङ्ख्यावाचिनोऽधिकशब्दाच्च परस्य सङ्ख्यावाचिन उत्तरपदस्य तद्धिते किति ञ्णिति च परतोऽचामादेरचः स्थाने वृद्धिर्भवति' इति 'सङ्ख्याधिकाभ्यां सङ्ख्यायाः इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'द्विषाष्टिकः', 'द्विसाप्ततिकः', 'अधिकषाष्टिकः', 'अधिकसाप्ततिक' इत्येतानि उदाहरणानि। संख्याया अधिकशब्दाच्च परस्य संवत्सरशब्दस्य शाणाकुलिजवर्जितस्य परिमाणवाचिनश्चोत्तरपदस्य किति ञ्णिति च तद्धिते परतोऽसंज्ञायां विषये अचामादेरचो वृद्धिर्भवति इति 'संवत्सरपरिमाणस्याशाणकुलिजस्यासंज्ञायाम्' इत्यस्य सूत्रार्थः हृदय-हारिण्यामुक्तः। 'द्विसांवत्सरिकः', 'त्रिसांवत्सरिकः', 'अधिकसांवत्सरिकः', 'द्विकौडबिकः',

---

41 पा.सू.७/३/१५

'त्रिकौडबिकः', 'अधिककौडबिकः' इत्यादीनि उदाहरणानि। 'द्विसांवत्सरिक' इत्युदाहरणं कौमुद्यां वर्तते।

**वर्षस्याभविनि। (७/१/३१)**

पाणिनीये वृद्धिविधायकमिदं सूत्रं 'वर्षस्याभविष्यति'[42] इत्युक्तम्। अनेन उत्तरपदस्य वृद्धिः विधीयते। दण्डनाथेन 'संख्याया अधिकशब्दाच्चोत्तरस्य वर्षस्य ञ्णिति किति च तद्धिते परतोऽचामादेरचः स्थाने वृद्धिर्भवति; न चेत् स तद्धितो भाविन्यर्थे विहितो भवति' इति अस्य भोजसूत्रस्य सूत्रार्थः उक्तः। 'द्विवार्षिकः', 'अधिकवार्षिकः' इत्येते उदाहरणे। 'द्विवार्षिक' इत्युदाहरणं कौमुद्यामप्यस्ति। 'संवत्सरपरिमाणस्याशाणकुलिजस्यासंज्ञायाम् ' साधितं 'द्विकौडविक' इति रूपं अस्य सूत्रव्याख्याने प्रयुक्तेन 'परिमाणान्तस्यासंज्ञाशरणयोः' इति वार्तिकेन सिध्यति।

**जाते प्रोष्ठभद्राभ्यां पदस्य। (७/१/३२)**

पाणिनिना 'जे प्रोष्ठपदानाम् '[43] इति सूत्रमुक्तम्। 'प्रोष्ठपादानामुत्तरपदस्याचामादेरचो वृद्धिः स्याज्जातार्थे ञिति णिति किति च इति' कौमुद्यामस्य सूत्रार्थः उक्तः। अत्र भोजदेवेन 'जे' इति पदस्य स्थाने 'जाते' इति प्रयुक्तम्। 'जातेऽर्थे विहिते तद्धिते किति ञ्णिति च परतो प्रोष्ठभद्राभ्यामुत्तरस्य पदस्याचामादेरचः स्थाने वृद्धिर्भवति' इति अस्य सूत्रार्थः

42 पा.सू.७/३/१६

43 पा.सू.७/३/१८

हृदयहारिण्यामुक्तः। 'प्रोष्ठपादः', 'भद्रपादः' इत्येते उदाहरणे। हृदयहारिणीकारेण व्याख्याने एवमुच्यते यत् 'प्रोष्ठपदाभिर्युक्तः कालः, चन्द्रवृत्तेर्नक्षत्राद् युक्तः कालः'[44] इति प्रग्निीतीयोऽञ्। तस्य लुप् तदविशेषण इति लुप् तदन्तात् 'तत्र जातः'[45] इत्यर्थे 'नक्षत्रादण्' 'प्रोष्ठपाद भद्रपादः' इति। 'प्रोष्ठपाद', 'भद्रपादः' इति उदाहरणद्वयं कौमुद्यामपि वर्तते।

**हृद्भगसिन्धोः पूर्वपदस्य च। (७/१/३३)**

पाणिनिना वृद्धिविधायकं 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च'[46] इति सूत्रमुक्तम् । अस्य कौमुदीव्याख्याने सुहृदोऽपत्यं 'सौहार्दः', सुभगाया अपत्यं 'सौभागिनेयः', सक्तुप्रधानाः सिन्धवः 'सक्तुसिन्धवः' तेषु भवः 'साक्तुसैन्धवः' इत्याद्युदाहरणानि तत्रोक्तानि। दण्डनाथेन 'हृद्भगसिन्ध्वन्तायाः प्रकृतेः तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति' इति वृद्धिविधायकस्य अस्य सूत्रार्थः उक्तः। 'सुहृदयस्य भावः सौहार्दम् ' इत्युक्त्वा सुदुर्हृदोस्तु मित्रामित्रपर्याययोर्निपातनसामर्थ्यात् हृच्छब्दस्यानर्थक्ये सत्युत्तरपदवृद्धिर्न भवति इति प्रतिपादयति। ततः 'सुहृदो भावः सौहृदं', 'दौर्हृदं', 'सौभाग्यं', 'दौर्भाग्यं', 'सौभागिनेयः' 'दौर्भागिनेयः', सक्तुप्रधानाः सिन्धवस्तेषु भवः 'साक्तुसैन्धवः', 'पानसैन्धवः' कच्छादित्वादण् लवणसिन्धोरयं 'लावणसैन्धव' इत्यादीनि उदाहरणानि दत्तानि। कौमुद्यपेक्षया 'पानसैन्धवः'

---

44 स.क.४/२/७

45 स.क.४/३/१२२

46 पा.सू.७/३/१९

'लावणसैन्धवः' इत्युदाहरणद्वयं दण्डनाथेनोच्यते।

**अनोः शतिकहोडसंवरणरहत्संवत्सराणाम्। (७/१/३४)**

'अनुशतिकादीनां च'[47] इति सूत्रं पाणिनिना प्रयुक्तम्। उभयपदवृद्धिः अनेन विधीयते। अनुशतिकादीनां गणस्थानां 'अनुपूर्वक शतिक, होड, संवरण, संवत्सर हरत् ' इति पञ्चशब्दानां प्रतिपादनं भोजदेवः सूत्रेणैव कृतम्। 'अनुशब्दात् परा ये शतिकादयस्तदन्तायाः प्रकृतेरत्तद्धिते किति ञ्णिति च परतः पूर्वपदस्य उत्तरपदस्याचामादेरचः स्थाने वृद्धिर्भवति' इति सूत्रार्थः दण्डनाथेनोक्तः। 'अनुशतिकस्येदम् आनुशतिकम्', 'अनुहोडेन चरति आनुहौडिकः', 'अनुसंवरणे दीयते आनुसांवराणिकम्', 'अनुरहतोऽपत्यं आनुराहतिः', 'अनुसंवत्सरे दीयते आनुसांवत्सरिकम् ' इत्यादीनि उदाहरणानि। किन्तु भोजसूत्रे हृदयहारिणीव्याख्यायां च सूत्रं 'अनोः शतिकहोडसंवरणरहत्संवत्सराणाम् ' इत्यस्ति। तत्र अनुशतिकादिगणे 'रहत् ' इति शब्दः न पठितः। तत्र 'रहत् ' इत्यस्य स्थाने 'हरत् ' इत्यस्ति। तस्मात् सूत्रेऽपि 'हरत् ' इति भवेत्। किन्तु दण्डनाथेन हरच्छब्दस्योदाहरणं दत्तमित्यनेन तत्सदृशानां रूपाणामपि प्रवृत्तिः अनेन सूत्रेण भवितुमर्हति।

**कुरोः कतपञ्चालयोः। (७/१/३५)**

'अनुशतिकादिगणे' पठितानां कुरुपूर्वककतपाञ्चालशब्दयोः पूर्वोत्तरपदवृद्धिप्राप्त्यर्थं

---

47 पा.सू.७/३/२०

भोजदेवेनेदं सूत्रं प्रतिपादितम्। 'कुरुशब्दात् परौ यौ कतपञ्चालौ तदन्तायाः प्रकृतेः तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति' इति सूत्रार्थः दण्डनाथेनोच्यते। 'कुरुकतस्यापत्यं कौरुकात्यः', 'कुरवश्च पञ्चालाश्च कुरुपञ्चालाः, तेषु भवः कौरुपाञ्चाल' इत्येते उदाहरणे।

**अधेर्देवभूतयोः। (७/१/३६)**

'अनुशतिकादिगणे' पठितानां अधिदेवाधिभूतशब्दयोः पूर्वोत्तरपदवृद्धिप्राप्त्यर्थं भोजदेवेनेदं सूत्रं प्रतिपादितम्। 'अधेः परौ यौ देवभूतशब्दौ तदन्तायाः प्रकृतेः तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरच स्थाने वृद्धिर्भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अधिदेवे भवमाधिदैविकम्', 'आधिभौतिकम् ' इत्येते उदाहरणे।

**इहपराभ्यां लोकस्य। (७/१/३७)**

'अनुशतिकादिगणे' पठितानां इहपरशब्दोपपदलोकशब्दयोः पूर्वोत्तरपदवृद्धिप्राप्त्यर्थं भोजदेवेनेदं सूत्रमुक्तम्। 'आभ्यां परो यो लोकशब्दस्तदन्तायाः प्रकृतेः तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेर्वृद्धिर्भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'इहलोके भवमैहलौकिकम्', 'पारलौकिकम् ' इत्येते उदाहरणे।

**सर्वात् भूमिपुरुषयोश्च। (७/१/३८)**

'अनुशतिकादिगणे' पठितानां सर्वशब्दोपपदलोकपुरुषशब्दयोः पूर्वोत्तरपदवृद्धिप्राप्त्यर्थं

भोजदेवेनेदं सूत्रमुक्तम्। 'सर्वशब्दात् परौ यौ भूमिपुरुषशब्दौ लोकशब्दश्च तदन्तायाः प्रकृतेस्तद्धिते किति ञ्णिति च परत पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'सर्वभूमेर्निमित्तं संयोग उत्पातो वा सर्वभूम्यां विदित ईश्वरो वा सार्वभौमः'। 'सर्वपुरुषाणामिदं सार्वपौरुषम्'। 'सर्वलोकेषु विदित सार्वलौकिकः' इत्यादीनि उदाहरणानि। अत्र सूत्रे भोजदेवेन 'अनुशतिकादिगणे' पठितस्य भूमिशब्दस्य प्रतिपादनं सूत्रे न कृतम्। तथापि दण्डनाथेन 'सर्वभूमेर्निमित्तं संयोग उत्पातो वा सर्वभूम्यां विदित ईश्वरो वा सार्वभौम' इति व्याख्याने दत्तम्। किन्तु पाणिनिना 'सर्वभूमिपृथिवीभ्यामणञौ'[48] इति सूत्रेण 'अण्' प्रत्यये 'अनुशतिकादीनां च'[49] इति उभयपदवृद्धौ 'सार्वभौमः' इति रूपस्य साधूकरणं कृतम्।

**अस्याद्धत्यहेत्योः। (७/१/३९)**

'अनुशतिकादिगणे' पठितानां 'अस्यशब्दोपपदहत्यहेत्यशब्दयोः' पूर्वोत्तरपदवृद्धिप्राप्त्यर्थं भोजदेवेनेदं सूत्रमुक्तम्। 'अस्यशब्दात् परौ यौ हत्यहेतिशब्दौ तदन्तायाः प्रकृतेस्तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अस्यहेति प्रयोजनमस्य आस्यहैतिकम् ' इत्युदाहरणम्।

---

48 पा.सू.५/१/४१

49 पा.सू.७/३/२०

**वध्योगप्रयोगाभिगमांगारवेणुपरस्त्रीपुष्करसदुदकशुद्धसूत्रनडचतुर्विद्यासिहत्याशातकुम्भसुखशयनादीनां च। (७/१/४०)**

'वध्योगप्रयोगाभिगमाङ्गारवेणुपरस्त्रीपुष्करसदुदकशुद्धसूत्रनडचतुर्विद्यासिहत्याशातकुम्भसुखशायनेति' 'अनुशतिकादिगणे' पठितानां शब्दानां पूर्वोत्तरपदवृद्धिप्राप्त्यर्थं भोजदेवेनेदं सूत्रमुक्तम्। 'वध्योगादीनां तद्धिति किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य च वाचामादेरचः स्थाने वृद्धिर्भवति' इति अस्य सूत्रार्थः दण्डनाथेनोच्यते।

**राजपुरुषपरिमण्डलप्रतिभूसर्ववेदानां ष्यञि(७/१/४१)**

अनुशतिकादिगणे पठितानां एतेषां शब्दानां पूर्वोत्तरपदवृद्धिविधायकमिदं सूत्रम्। 'राजपुरुषादीनां ष्यञिप्रत्यये परे पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति' इति दण्डनाथेनोच्यते। 'राजपौरुषम्', 'पारिमाण्डल्यम्', 'प्रातिभाव्यम्', 'सार्ववैद्यम्' इत्यादीन्युदाहरणानि।

अनुशतिकादीनां च इति सूत्रेण पाणिन्युक्तपूर्वोत्तरपदवृद्धेः प्रतिपादनाय भोजदेवेन 'अनोः शतिकहोडसंवरणरहत्संवत्सराणाम्', 'कुरोः कतपञ्चालयोः', 'अधेर्देवभूतयोः', 'इहपराभ्यां लोकस्य', 'सर्वात् भूमिपुरुषयोश्च', 'अस्याद्धत्यहेत्योः', 'राजपुरुषपरिमण्डलप्रतिभूसर्ववेदानां ष्यञि', 'वध्योगप्रयोगाभिगमांगारवेणुपरस्त्रीपुष्कर-सदुदकशुद्धसूत्रनडचतुर्विद्यासिहत्याशातकुम्भसुखशयनादीनां च' इति अष्टसूत्राणां प्रयोगः कृतः।

**प्राचां नगरान्तस्य। (७/१/४२)**

'प्राचां देशे वर्तमानस्य नगरान्तस्य किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरचोवृद्धिर्भवति' इति दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'सौह्मनागरः', 'पौर्वनागरः' इत्येते उदाहरणे दण्डनाथेन तत्र प्रतिपादिते। पाणिनिना 'प्राचां नगरान्ते'[50] इति सूत्रेण इमानि कार्याणि प्रतिपादितानि। 'सौह्मनागरः', 'पौर्वनागरः' इत्येते उदाहरणे कौमुद्यामपि दृश्यते।

**देवतानां द्वन्द्वे सूक्तहविषोः(७/१/४३)**

'सूक्तहविषोः सम्बन्धिनीनां देवतानां यो द्वन्द्वः तत्र तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अग्निवैष्णवम्', 'अग्निमारुतम्' इत्येते उदाहरणे। पाणिनिना उक्तं 'देवताद्वन्द्वे च'[51] इति सूत्रस्वीकारेण इमानि कार्याण्यत्र चर्चितानि। 'अग्निमारुतम्' इत्युदाहरणं कौमुद्यामपि वर्तते।

**नेन्द्रस्य परस्य (७/१/४४)**

वृद्धिनिषेधात्मकं सूत्रमिदम्। 'इन्द्रशब्दस्योत्तरपदस्य देवताद्वन्द्वेर्वृद्धिर्नभवतीति' अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अग्नेन्द्रं सूक्तम्', 'सौमेन्द्रं हविः' इत्येते उदाहरणे। पाणिन्युक्तं 'नेन्द्रस्य परस्य'[52] इति सूत्रं तद्वदेवात्र स्वीकृतः।

---

50 पा.सू.७/३/२४

51 .पा.सू .७/३/२१

52 पा.सू. ७/३/२२

**अर्धात्परिमाणस्य पूर्वस्य तु वा(७/१/४५)**

'अर्धशब्दात्परस्यपरिमाणवाचिनः शब्दस्य तद्धिते किति ञ्णिति च परतोऽचामादेरचः स्थाने वृद्धिः पूर्वस्य अर्धशब्दस्य वा भवति'। 'आर्धद्रौणिकम्', 'आर्धकौडविकम्' अर्धशब्दस्य वृद्ध्यभावे 'अर्धद्रौणिकम्', 'अर्धकौडविकम् ' इति च भवति। इदम् 'अर्धात्परिमाणस्य पूर्वस्य तु वा'[53] इति पाणिनीयसूत्रं तद्वदेव भोजेन स्वीकृतम्। 'आर्धद्रौणिकम्' इत्युदाहरणं कौमुद्यामपि वर्तते।

**नातः(७/१/४६)**

पाणिनिना 'नातः परस्य'[54] इति सूत्रेण वृद्धिनिषेधः उक्तः। 'अर्धात्परस्य परिमाणाकारस्य वृद्धिर्न पूर्वपदस्य तु वा ञिदादौ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। किन्तु दण्डनाथेन पुंवद्भावप्रतिषेधनिषेधः अनेनोच्यते। दण्डनाथस्य सूत्रवृत्तेः आदौ किञ्चिन्नष्टं तथापि 'इति पुंवद्भावप्रतिषेधो न स्यात्' इति सूत्रवृत्तेः अन्तिमभागः हृदयहारिण्यां द्रष्टुं शक्यते। 'अर्धप्रस्थे भवा भार्या अस्य आर्धप्रस्तभार्य' इति उदाहरणमपि तत्र दत्तम्।

**प्राद्वाहनस्य ढे (७/१/४७)**

'प्रात्परस्य वाहनशब्दस्य ढे तद्धिते किति ञ्णिति च परतोऽचामादेरचो नित्यं वृद्धिः पूर्वस्य च प्रशब्दस्य वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'प्रावाहणेयः'

---

53 पा.सू.७/३/२६

54 पा.सू.७/३/२७

इत्युदाहरणम् 'प्र' इत्यस्य वृद्ध्यभावे 'प्रवाहणेयः' इति च भवति। पाणिनिना 'प्रवाहणस्य ढे'[55] इत्युच्यते इदं सूत्रम्। 'प्रावाहणेयः' /'प्रवाहणेयः' इत्युदाहरणं कौमुद्यामपि दृश्यते।

**ढस्य च (७/१/४८)**

पाणिनिना 'प्रवाहणस्य ढे' इति सूत्रमुक्त्वा तदनन्तरं 'तत्प्रत्ययस्य च'[56] इति सूत्रं प्रतिपादयति। 'ढान्तस्य प्रवाहणस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा इति' कौमुद्यामस्य सूत्रार्थः उक्तः। तत् सूत्रं भोजदेवेन 'ढस्य च' इति प्रतिपादयति। 'ढान्तस्य चात्परस्य वाहनशब्दस्य तद्धिते किति ञ्णिति च परतोऽचामादेरचो नित्यं वृद्धिः पूर्वस्य पदस्य वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'प्रवाहणेयस्यापत्यं प्रावाहणेयिः', पूर्वपदस्य वृद्ध्यभावे 'प्रवाहणेयिः' इति च रूपम्। इदमेवोदाहरणं कौमुद्यामपि दृश्यते।

**नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्। (७/१/४९)**

'नञः परा ये शुच्यादयस्तदन्तानां प्रकृतीनां तद्धिते कितिञ्णिति च परत उत्तरपदस्याचामादेरचो नित्यं वृद्धिः पूर्वस्य तु नञो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अशौचम्'/'आशौचम्', 'अनैश्वर्यम्'/'आनैश्वर्यम्', 'अक्षेत्रज्ञम्'/ 'आक्षेत्रज्ञम्', 'आकौशलम्'/'अकौशलम्' 'आनैपुणम्'/'अनैपुणम्' इत्येतानि उदाहरणानि।

---

55 पा.सू.७/३/२८

56 पा.सू.७/३/२९

पाणिनिना प्रयुक्तं 'नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्'[57] इति सूत्रं तद्वदेव भोजेन स्वीकृतं वर्तते। दण्डनाथेनोक्तानि इमानि उदाहरणानि कौमुद्याञ्च दृश्यते।

**यथातथायथापुरयोः पर्यायेण। (७/१/५०)**

पाणिनिना 'यथातथायथापुरयोः पर्यायेण'[58] इति प्रयुक्तं सूत्रं तद्वदेव स्वीकृतं भोजदेवेन। हृदयहारिण्यां अस्य सूत्रार्थः 'नञः परौ यौ यथातथयथापुरशब्दौ तदन्तायाः प्रकृतेः तद्धिते किति ञ्णिति परतो नञ उत्तरपदस्याचामादेरचः पर्यायेण वृद्धिर्भवति' इत्यस्ति। 'आयथातथ्यम्'/'अयाथातथ्यम्'। 'आयथापुर्यम्'/'अयाथापुर्यम्' इत्युदाहरणानि तत्र दत्तानि। इमानि उदाहरणानि कौमुद्यामपि दृश्यन्ते।

**हनस्तोऽचिण्णलोः। (७/१/५१)**

पाणिनिना 'हनस्तोऽचिण्णलोः'[59] इति सूत्रम् प्रयुक्तम्। अनेन 'हन्तेः' 'तकारादेशः' विधीयते। 'चिण्णल्प्रतिषेधात् तद्धित इति तत्सम्बद्ध कितीत्यापि च निवृत्तम्, ञ्णितीति वर्तते चिण्णमुल्वर्जिते ञ्णिति प्रत्यये परतो हन्तेरन्यस्य तकारो भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। 'घातयति घातो वर्तते' इत्युदाहरणम्।

---

57 पा.सू.७/३/३०

58 पा.सू.७/३/३१

59 पा.सू.७/३/३२

**आतो युक् चिण्कृतोः। (७/१/५२)**

अस्य व्याख्यानं हृदयहारिण्यां नोपलभ्यते। पाणिनिना प्रयुक्तस्य 'आतो युक् चिण्कृतोः'[60] इति सूत्रेण चिणि कृति ञ्णिति परे 'युगागमो' विधीयते। तस्मात् दण्डनाथमतेऽपि इदं सूत्रं युगागमविधायकं स्यात्।

**नमः सेटो वृद्धिरवम्यमिकम्याचमः। (७/१/५३) उद्यमोपरमौ। (७/१/५४)**

आभ्यां सूत्राभ्यां वृद्धिनिषेधः उच्यते। 'धातोर्वम्यादिवर्जितस्य चिणि ञिणिति कृति च परतो वृद्धिर्न भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अशमि', 'अतमि', 'शमकः', 'तमकः' इत्यादीनि उदाहरणानि। पाणिनिना नोदात्तोपदेशस्य मान्तस्यानाचमेः[61] इति सूत्रमुक्तम्। तस्य व्यख्याने कात्यायनेन 'अनाचमिकमिवमीनामिति वक्तव्यम् ' इति वार्तिकञ्च प्रयुक्तम्। अनयोः सूत्रवार्तिकयोः मेलनेन 'नमः सेटो वृद्धिरवम्यमिकम्याचम' इति सूत्रं भोजेन प्रतिपादितम्। अस्य पाणिनीयसूत्रस्य काशिकाव्याख्याने ''कथम् उद्यमोपरमौ 'अड उद्यमे' 'यम उपरमे' इति निपातनादनुगन्तव्यौ'' इत्युक्तम्। तस्य काशिकाव्याख्यानस्याधारेण 'उद्यमोपरमौ' इति निपातनसूत्रं भोजेन प्रतिपादितम्। अनेन वृद्ध्यभावः निपात्यते। उदुपपूर्वयोर्यमिरम्योर्घञि वृद्ध्यभावो निपात्यते इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'उद्यमः', 'उपरमः' इत्येते उदाहरणे।

---

60 पा.सू.७/३/३३

61 पा.सू.७/३/३४

**जनिवध्योः। (७/१/५५)**

पाणिनिना प्रयुक्तं 'जनिवध्योश्च'[62] इति सूत्रं जनिवध्योः इति भोजेन स्वीकृतम्। वृद्धिनिषेधमिदं सूत्रम्। 'जनि वधि इत्येतयोश्चिणि कृति ञ्णिति च वृद्धिर्नभवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अजनि' 'जनकः' 'अजनकः' 'अवधि' 'वधकः' 'वधः' 'वधिः' इत्येतानि उदाहरणानि।

**विश्रमेर्वा। (७/१/५६)**

वृद्धिनिषेधः विकल्पश्च अनेन सूत्रेण विधीयते। ' विपूर्वस्य श्रमेश्चिणि ञ्णिति कृति च परतो वृद्धिर्वा न भवति' इति सूत्रार्थः दण्डनाथेनोक्तः। अनेन सूत्रेण भोजदेवेन 'विश्रमः' इति साधूकरणमुक्तं वर्तते। 'व्यश्रमि', 'व्यश्रामि', 'विश्रमः', 'विश्रामः' इत्यादीनि उदाहरणानि।

**णल्युत्तमे। (७/१/५७)**

पाणिनिना 'णलुत्तमो वा'[63] इति सूत्रं प्रयुक्तम्। 'उत्तमो णल्वा णित्स्यात्' इति कौमुद्यामस्य सूत्रार्थः। णित् इत्यनेन णित्कार्यं (वृद्धिः) तत्र विकल्पेन भवति इत्यर्थः। किन्तु अत्र वृद्धिनिषेधः विकल्पश्च अनेन विधीयते इति दण्डनाथेन स्पष्टमुक्तम्। 'उत्तमे णलि परतः प्रकृतेर्वृद्धिर्वा न भवति' इति अस्य सूत्रार्थः। 'अहं पपच', 'अहं ममद' इत्युदाहरणे। वृद्धौ 'अहं

---

62 पा.सू.७/३/३५

63 पा.सू.७/१/९१

पपाच', 'अहं ममाद' इति च।

**ऋह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ। (७/१/५८)**

पाणिनिना 'अर्तिह्रीव्लीरीक्नुयीक्ष्माय्यातां पुग्णौ'[64] इति सूत्रेण पुगागमः विधीयते। तत्सूत्राधारेण भोजेनोक्तमिदं सूत्रम्। अत्रापि पुगागमविधायकमिदं सूत्रम्। 'ऋप्रभृतीनामकारान्तानां च णौ प्रत्यये परतः पुगागमो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अर्पयति', 'ह्रेपयति', 'व्लेपयति', 'ऋरीयते', 'रिणातेर्वा रेपयति', 'क्नोपयति', 'क्ष्मापयति' इत्येतानि उदाहरणानि।

**शाच्छासाह्वाव्यावेपां युक्। (७/१/५९)**

युक् विधायकमिदं सूत्रं पाणिनिप्रयुक्तं[65] वर्तते। युगागमोऽनेन विधीयते। तं सूत्रमाधारीकृत्य भोजदेवेन उक्तमिदं सूत्रम्। 'शादीनां प्रकृतीनां णौ प्रत्यये परतो युगागमो भवति' इति अस्य सूत्रार्थः इति हृदयहारिण्याम् उक्तः। पुकोऽपवादः। 'शोतनूकरणे'- 'निशाययति'। 'छो छेदने'- 'अवछाययति'। 'षो अन्तकर्मणि' - 'अवसाययति', 'ह्वेञ्' - 'ह्वाययति', 'व्या' - 'संव्याययति', 'व्ये' -'वाययति', 'पै ओवैशोषणे' - 'पाययति' इत्यादीनि उदाहरणानि तत्र दत्तानि।

64 पा.सू.७/३/३६

65 पा.सू.७/३/३७

**वो विधूनने जुक्। (७/१/६०)**

जुक् विधायकमिदं सूत्रं पाणिनिना प्रयुक्तम्[66] तत् तद्वदेव भोजेनापि स्वीकृतम्। 'वा इत्यस्य विधूनने वर्तमानस्य णौ परतो जुगागमो भवति' इति अस्य सूत्रार्थः। 'पक्षेणोपवाजयति' इत्युदाहरणम्।

**धूञ्प्रीञोर्नुक्। (७/१/६१)**

'शाच्छासाह्वाव्यावेपां युक्' इति पाणिनीयसूत्रव्याख्याने कात्यायनेन 'धूञ्प्रीञोर्लुग्वक्तव्यः' इति वार्तिकं प्रयुक्तम्। वार्तिकं तत् भोजदेवेन सूत्रत्वेनात्रोक्तम्। नुगागमविधायकमिदं सूत्रम्। 'धूञ् कम्पने प्रीञ् तर्पणे इत्येतयोर्णौ परतो नुगागमो भवति' इति अस्य सूत्रार्थः। 'धूनयति', 'प्रीणयति' इत्येते उदाहरणे।

**लियस्नेहद्रवीकरणे वा। (७/१/६२) लो लुक्। (७/१/६३) पातेः। (७/१/६४)**

पाणिनिना 'लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने'[67] इति सूत्रं प्रयुक्तम्। तत्सूत्रं विभज्य भोजदेवेन 'लियस्नेहद्रवीकरणे वा', 'लो लुक्' 'पातेः' इति सूत्रत्रयमुक्तम्। 'लियस्नेहद्रवीकरणे वा' इति सूत्रेण 'नुगागमः' 'लो लुक्' 'पातेः' इति सूत्रयोः 'लुगागम'श्च विधीयन्ते। 'लिनातेर्लीयतेश्च णौ प्रत्यये परतः स्नेहद्रवीकरणेऽर्थे नुगागमो वा भवति इति लियस्नेहद्रवीकरणे वा' इत्यस्य सूत्रार्थः। 'घृतं विलीनयति', 'विलाययति' इत्युदाहरणे। 'लातेर्ला

66 पा.सू.७/३/३८

67 पा.सू.७/३/३९

इत्येवं कृतात्वस्य लिनातेः लीयतेश्च णौ परतः स्नेहद्रवीकरणेऽर्थे लुगागमो वा' भवति इति 'लो लुक्' इत्यस्य सूत्रार्थः। 'घृतं विलालयति', 'विलापयति' इत्युदाहरणे। 'पातेर्णौ परतो लुगागमो भवति' इति 'पातेः' इत्यस्य सूत्रार्थश्च हृदयहारिण्यामुक्तः। 'पालयति' इत्याद्युदाहरणम्।

**भियो हेतुभये षुक्। (७/१/६५)**

षुगागमविधायकमिदं सूत्रम्। पाणिनिप्रयुक्तमिदं सूत्रं[68] तद्वदेव भोजेन स्वीकृतम्। 'भी इत्येतस्य णौपरतः षुगागमो भवति सा चेत् भीहेतोः प्रयोजकाद् भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'मुण्डो भीषयते', 'जटिलो भीषयते' इत्येते उदाहरणे।

**स्फायो वः। (७/१/६६)**

पाणिनिप्रयुक्तं वकारान्तादेशविधायकमिदं सूत्रं[69] भोजेन तद्वदेव स्वीकृतं वर्तते। 'स्फायतेर्णोपरतो वकारोन्तादेशो भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। 'स्फावयति' इत्युदाहरणम्।

**शदेरगतौतः। (७/१/६७)**

पाणिनिना प्रयुक्तं 'शदेरगतौतः'[70] इति सूत्रं भोजदेवेन स्वीकृतं वर्तते। तकारान्तादेशविधायकमिदं सूत्रम्। 'शदेरगत्यर्थस्य णौ परतः तकारोन्तादेशो भवति' इति अस्य

68 पा.सू.७/३/४०

69 पा.सू.७/३/४१

70 पा.सू.७/३/४२

सूत्रार्थः हृदयहारिण्यामुक्तः। 'शातयति फलानि' इत्युदाहरणम्।

**रुहेः पो वा। (७/१/६८)**

पाणिनिना 'रुहः पोऽन्यतरस्याम्'[71] इति प्रयुक्तं सूत्रं 'रुहेः पो वा' इति भोजेन प्रतिपादितं वर्तते। 'रुहेर्णौपरतः पकारोऽन्तादेशो वा भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'रोपयति व्रीहीन्', 'रोहयति व्रीहीन् ' इत्येते उदाहरणे।

**मितां ह्रस्वः। (७/१/६९)**

पाणिनीये 'मितां ह्रस्वः'[72] इति प्रयुक्तं सूत्रं भोजेनापि स्वीकृतम्। द्वयोरपि ह्रस्वादेशः विधीयते। घटादयो धातवो मित्संज्ञास्तेषां णौ परतो ह्रस्वो भवति' इति दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'घटयति', 'व्यथयति', 'ज्वरयति', '़हिडयति', 'जनयति', 'रमयति' इत्युदाहरणानि।

**चिण्णमुलोदीर्घश्च। (७/१/७०)**

'चिण्णमुलोदीर्घोऽन्यतरस्याम्'[73] इति पाणिनीयसूत्रं स्वीकृत्य भोजेन इदं सूत्रं प्रतिपादितम्। कौमुद्यां 'चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात्' इति सूत्रार्थः उक्तः। तत्र सूत्रार्थे उपधाया दीर्घ इत्युच्यते। उपधासंज्ञं पाणिनीयमाश्रित्य भोजेनापि

---

71 पा.सू.७/३/४३

72 पा.सू.६/४/९२

73 पा.सू.६/४/९३

स्वीक्रियते'[74]। तथापि 'चिण्णमुल्परे णौपरे मितां प्रकृतीनां दीर्घश्चकारात् ह्रस्वश्च भवति' इति हृदयहारिण्याः सूत्रार्थे उपधा इति न परामृष्टम्। 'अघाटि'/'अघटि', 'घाटं घाटं'/'घटं घटम्', 'अशामि/अशमि', 'शामं शामं'/'शमं शमम्' इत्येतानि उदाहरणानि दत्वा वेत्येव सिद्धे दीर्घवचनं मितामनुपधाया अपि दीर्घार्थम् इति दण्डनाथेनोच्यते। दण्डनाथस्य एतेन वाक्येन उपधासंज्ञा सोऽपि स्वीकरोति इति ज्ञायते। सूत्रार्थलाघवाय तत्र उपधायाः अप्रयोगः। यदि सूत्रार्थे उपधा इति प्रयुज्यते तर्हि तस्य ज्ञानार्थं सूत्रान्तराश्रयणं कार्यम्।

**छादेर्घेऽद्व्याद्युपसर्गस्य। (७/१/७१)**

पाणिनिना 'छादेर्घेऽद्युपसर्गस्य'[75] इति प्रयुक्तं सूत्रं भोजदेवेन स्वीकृतं वर्तते। 'छायतेरद्व्याद्युपसर्गपूर्वस्यैकोपसर्गस्य वा घप्रत्यये परतो ह्रस्वो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'उरच्छदः', 'दन्तछदः', 'प्रच्छदः', 'परिछदः' इत्येतानि उदाहरणानि।

**इस्मन्त्रन्क्विषु। (७/१/७२)**

पाणिनिना 'इस्मन्त्रन्क्विषु च'[76] इति प्रयुक्तं सूत्रं भोजेनात्र स्वीकृतम्। 'एकारछादयतेरिसादिषु प्रत्ययेषु परतो ह्रस्वो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'छदिः', 'छद्म', 'छत्रम्', 'उपच्छत् ' इत्येतानि उदाहरणानि।

---

74 स.क.१/१/८५

75 पा.सू.६/४/९६

76 पा.सू.६/४/९७

**चङ्युपधायाः। (७/१/७३) णेश्च। (७/१/७४)**

'णौ चङ्युपधाया ह्रस्वः'[77] इति पाणिनिप्रयुक्तं सूत्रं विभज्य भोजेन चङ्युपधायाः, णेश्च इति सूत्रद्वयमुक्तम्। 'चङ् परे णौ या प्रकृतिस्तस्याः उपधाया ह्रस्वो भवति' इति चङ्युपधायाः इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'अचीकरत्' 'अपीपचत्' इत्युदाहरणे। णेश्च इति सूत्रे णेः च इति पदच्छेदः। ह्रस्वविधायकमिदं द्विपदं सूत्रम्। 'णिचः परो यश्चङ्परो णिजन्तस्तस्मिन् परत उपधाया ह्रस्वो भवति' इति सूत्रार्थः। 'वदति स्म वीणा' इत्युदाहरणम्।

**नाग्लोपि शास्वृदिताम्। (७/१/७५)**

पाणिनिना ' नाग्लोपिशास्वृदिताम्'[78] इति सूत्रं प्रयुक्तम् तथैव भोजदेवेन स्वीकृतम्। अग्लोपिनीनां प्रकृतीनां शासेः ऋदितां च चङपरे णावुपधाया ह्रस्वो न भवति इति सूत्रार्थः। 'लोमान्यनुमृष्टवान् अन्वनुलोमत्', 'राजानमाख्यातवान् अरराजत्' इत्यादीनि उदाहरणानि।

**भ्राजभासभाषदीपजीवमीलपीडां वा। (७/१/७६)**

पाणिनिना 'भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्'[79] इति प्रयुक्तं सूत्रमेव इदम्। भ्राजादीनां प्रकृतीनां चङ्परे णौ परतः उपधाया ह्रस्वो वा भवति इति अस्य सूत्रार्थः। 'अबीभ्राजत्'/'अबिभ्रजत्', 'अदिदीपत्'/'अदीदिपत्', 'अजिजीवत्'/'अजीजिवत्',

77 पा.सू.७/४/१

78 पा.सू.७/४/२

79 पा.सू. ७/४/३

'अमिमीलत्'/'अमीमिलत्', 'अपिपीडत्'/'अपीपिडत्' इत्यादीनि उदाहरणानि।

**कणवणभणश्रणलपह्वेञां च। (७/१/७७)**

'भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्' इति पाणिनीयसूत्रव्याख्याने काशिकायां 'काण्यादीनां चेति वक्तव्यम्' इत्यस्ति । तत् भोजदेवेन सूत्रत्वेनात्रोच्यते। ह्रस्वविधायकमिदं सूत्रम्। 'कणादीनां प्रकृतीनां चङ् परे णौ परत उपधाया ह्रस्वो भवति' वा इति अस्य सूत्रार्थः। 'अचीकणत्'/'अचकाणत्', 'अवीवणत्'/'अववाणत्', 'अबीभणत्'/ 'अबभाणत्', 'अशिश्रणत्'/'अशश्राणत्', 'अलीलपत्'/'अललापत्', 'अजूहवत्'/'अजुहावत्' इत्येतानि उदाहरणानि।

**उर्ऋत्। (७/१/७८)**

पाणिनिना 'ऋकारादेशविधायकं उर्ऋत्'[80] इति प्रयुक्तं सूत्रं भोजेनात्र स्वीकृतम्। 'चङ् परे णौ परे ऋवर्णस्योपधाया ऋकार आदेशो वा भवति' इति सूत्रार्थः। 'अचीकृतत्', 'अचिकीर्तत्', 'अवीवृतत्', 'अववर्तत्' इत्येते उदाहरणे।

**घ्र इत्। (७/१/७९)**

'घ्र इत् ' इति इकारादेशविधायकं द्विपदं सूत्रम्। 'घङ् परे णौ परतो जिघ्रतेरुपधाया इकारादेशो वा भवति' इति अस्य सूत्रार्थः। 'अजिघ्रिपत्', 'अजिघ्रपत्' इत्येते उदाहरणे।

---

80 पा.सू. ७/४/७

पाणिनिना जिघ्रतेर्वा[81] इति प्रयुक्तमिदं सूत्रम्।

**स्थः। (७/१/८०)**

'स्थः' इति एकपदं सूत्रम्। 'चङ्परे णौ परतस्तिष्ठतेरुपधाया इदादेशो योगविभागान्नित्यं भवति' इति अस्य अर्थः। पाणिनिना 'तिष्ठतेरित्'[82] इति प्रयुक्तमिदं सूत्रम्। 'अतिष्ठिपत्', 'अतिष्ठिपताम्' इत्येते उदाहरणे।

**पिबः पीप्यः साभ्यासस्य । (७/१/८१)**

'लोपः पिबतेरीच्चाभ्यासस्य'[83] इति पाणिनिना प्रयुक्तमिदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'पिबतेः साभ्यासस्य चङ्परे णौ परतः पीप्य इत्ययमादेशो भवति' इति सूत्रार्थः। 'अपीप्यत्', 'अपीप्यताम्' इत्येते उदाहरणे।

**देङो दिगि लिटि। (७/१/८२)**

पाणिनिना 'दयतेर्दिगि लिटि'[84] इति प्रयुक्तं सूत्रमिदम्। 'देङः साभ्यासस्य लिटि प्रत्यये परतो दिगीत्ययमादेशो भवति' इति दण्डनाथेन सूत्रार्थः उक्तः। 'अवदिग्ये', 'अवदिग्याते', 'अवदिग्यिरे' इत्यादीनि उदाहरणानि।

---

81 पा.सू.७/४/६

82 पा.सू.७/४/५

83 पा.सू.७/४/४

84 पा.सू.७/४/९

**ह्लादेः ह्लत् क्तिन्निष्ठयोः।** (७/१/८३)

'ह्लादेः क्तिनि निष्ठायां च प्रत्यये परतो' इत्येव हृदयहारिणीव्याख्याने दृश्यते। पाणिनिना 'ह्लादो निष्ठायाम्'[85] इति ह्रस्वविधायकं सूत्रमुच्यते। अत्र 'ह्लादेः क्तिनिष्ठायां च प्रत्यये परतः ह्लत् इति ह्रस्वः भवति' इति भवेत् सूत्रार्थः।

**प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः। (७/१/८४)**

अस्य सूत्रार्थोदाहरणादीनां हृदयहारिणीव्याख्यानं न दृश्यते। पाणिनिना 'प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः'[86] इति सूत्रमुक्तम्। तत्र प्रत्ययस्थात् ककारात् पूर्वस्य अकारस्य इकारादेशो भवतीत्युच्यते।

**मामकनरकयोश्च। (७/१/८५)**

'प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः' इति सूत्रव्यख्याने कात्यायनेन 'मामकनरकयोरुपसंख्यानम्' वार्तिकमुच्यते। तं वार्तिकं भोजदेवेन अत्र सूत्रत्वेन प्रतिपाद्यते। 'मामकनरकशब्दयोश्च आपि परतः कात्पूर्वस्याकारस्येदादेशो भवति' इति दण्डनाथेन सूत्रार्थः उक्तः। 'ममेयं', 'मामिका' इत्युदाहरणम्।

---

85 पा.सू.६/४/९५

86 पा.सू.७/३/४४

**अधातुत्यत्त्यप्यकाभ्यामाप्स्थानस्य वा। (७/१/८६)**

'प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः' इति सूत्रव्यख्याने कात्यायनेन 'त्यत्त्यपोश्च' इति वार्तिकमुच्यते। तं वार्तिकं भोजदेवेन अत्र सूत्रत्वेन प्रतिपाद्यते। 'मामकनरकशब्दयोश्च आपि परतः कात्पूर्वस्याकारस्येदादेशसिद्ध्यर्थमिदं' सूत्रमुक्तम्। हृदयहारिण्यां 'धात्वादिभ्य अन्यस्य सम्बन्धिनौ यौ यकारककारौ ताभ्यामुत्तरस्यापृस्थानस्याकारप्रत्ययस्य कात्पूर्वस्यासुपः परे आपि परतः इदादेशो वा भवति' इति सूत्रार्थः उक्तः। 'इभ्यका'/'इभ्यिका', 'क्षत्रियिका'/'क्षत्रियका', 'चटकिका'/'चटकका' 'मूषिकिका'/'मूषिकका' इत्यादीनि उदाहरणानि।

**भस्त्रैषाजाज्ञाद्वास्वानाम्। (७/१/८७)**

पाणिनिना 'भस्त्रैषाऽजाज्ञाद्वास्वानञ्पूर्वणामपि;[87] इति सूत्रेण इत्वविकल्पः विधीयते। तत्सूत्रस्वीकारेण भोजेनेदं सूत्रं प्रतिपादितम्। 'भस्त्रादीनां य आप् तत्स्थाना (पन्न)स्याकारप्रत्ययस्य कात्पूर्वस्यासुपः परे आपि परत इत्वं वा भवति' अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'अभस्त्रका'/'अभस्त्रिका', 'एषका'/'एषिका', 'अजका'/'अजिका', 'अनजका'/'अनजिका, 'ज्ञका/ज्ञिका', 'अज्ञका'/'अज्ञिका', 'द्वके'/'द्विका', 'स्वका'/'स्विका', 'अस्वका'/'अस्विका' इत्यादीनि उदाहरणानि।

---

87 पा.सू. ७/३/४७

**अभाषितपुंस्कादा च। (७/१/८८)**

पाणिनिना 'अभाषितपुंस्काच्च'[88] इति सूत्रं प्रयुक्तम्। तदेव भोजदेवेनात्र स्वीकृतं वर्तते। 'अभाषितपुंस्कान्नित्यं स्त्रीविषयाद्विहितो य आप् तत्स्थानस्यातः प्रत्ययस्थात् कात्पूर्वस्यासुपः परे आपि परत आकारः इच्च वा भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। 'ह्रस्वा', 'खट्वा', 'खट्वाका', 'खट्विका', 'खट्वका', 'न खट्वा अखट्वा', 'अखट्वाका', 'अखट्विका', 'अखट्वका' इत्यादीनि उदाहरणानि तत्र दत्तानि।

**वर्तका शकुनौ। (७/१/८९)**

'न यासयोः'[89] इति पाणिनीयसूत्रव्याख्याने कात्यायनेन 'वर्तका शकुनौ प्राचाम्'[90] इत्युक्तं वार्तिकं भोजेनात्र सूत्रत्वेन प्रतिपादितम्। वर्तकेति शकुनावर्थे इत्वं वा निपात्यते इति अस्य सूत्रार्थः। 'वर्तका शकुनिः', 'वर्तिका' वा इत्युदाहरणम्।

**सूतकापुत्रकावृन्दारकाः। (७/१/९०)**

'न यासयोः' इति पाणिनीयसूत्रव्याख्याने 'सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्'[91] इति कात्यायनप्रयुक्तं वार्तिकं भोजदेवेन सूत्रत्वेन उक्तम्। 'सूतकादय इत्वाभावार्थं वा

---

88 पा.सू.७/३/४८

89 पा.सू.७/३/४५

90 वा.४५३३

91 वा.४५३५

निपात्यन्ते' इति सूत्रार्थः। 'सूतका', 'सूतिका', 'पुत्रका', 'पुत्रिका', 'वृन्दारका', 'वृन्दारिका' इत्यादीनि उदाहरणानि।

**न यत्तत्यकानाम् ।** (७/१/९१)

पाणिनिना 'न यासयोः' इति प्रयुक्तमिदं सूत्रम्। इत्वनिषेधः द्वयोरपि अनेन विधीयते। 'यदादीनामकारस्येत्वं न भवति' इति सूत्रार्थः। 'यका', 'सका', 'यकामधीमहे', 'तकां पचामहे', 'उपत्यका', 'अधित्यका' इत्यादीनि उदाहरणानि।

**आशिषि।** (७/१/९२)

'न यासयोः' इति पाणिनीयसूत्रव्याख्याने 'आशिषि वुनश्च न'[92] इति कात्यायनप्रयुक्तं वार्तिकं भोजदेवः सूत्रत्वेनोच्यते। 'आशीर्विषयो यः वुन् तस्य प्रत्ययस्थात् कात्पूर्वस्याकारस्येकारो न भवति' इति सूत्रार्थः। 'जीवका', 'जीवताम्', 'नन्दका', 'नन्दताम्' इत्यादीन्युदाहरणानि।

**उत्तरपदलोपे।** (७/१/९३)

'न यासयोः' इति पाणिनीयसूत्रव्याख्याने कात्ययनेन 'उत्तरपदलोपे च'[93] इति प्रयुक्तं वार्तिकमिदम्। 'उत्तरपदलोपे सति कात्पूर्वस्येकारो न भवति' इति सूत्रार्थः। 'अनुकम्पिता देवदत्ता', 'देवदत्तका यज्ञका' इत्यादीनि उदाहरणानि।

---

92 वा.४५२८

93 वा.४५२९

**क्षिपकाध्रुवकाधुवकालहकाचरकाचटकेष्टकैडकैरकाकरकावकालकादण्डकापिप्पकाकन्यकामेन कादीनाम्। (७/१/९४)**

'न यासयोः' इति पाणिनीयसूत्रव्याख्याने कात्यायनेन 'क्षिपकादीनां च'[94] इति प्रयुक्तं वार्तिकं क्षिपकादिगणान् सर्वानुच्चार्य एवमुक्तम्। 'क्षिपकादीनां कात्पूर्वस्याकारस्येदादेशो न भवति'। 'क्षिपका', 'ध्रुवका', 'धुवका', 'लहका', 'चरका', 'चटका', 'इष्टका', 'एडका', 'एरका', 'करका', 'अवका', 'अलका', 'दण्डका', 'पिप्पका', 'कन्यका', 'मेनका' इत्यादीनि उदाहरणानि।

**तारका ज्योतिषि। (७/१/९५)**

'न यासयोः' इति पाणिनीयसूत्रव्याख्याने 'तारकाज्योतिषि'[95] इति कात्यायनवार्तिकं अत्र सूत्रत्वेन प्रतिपाद्यते। तारकेति ज्योतिषीत्वाभावो निपात्यते। 'तारका नक्षत्रम्', 'अक्ष्णः कनीनिका' इतियादीनि उदाहरणानि।

**वर्णका तान्तवे। (७/१/९६)**

'न यासयोः' इति पाणिनीयसूत्रव्याख्याने कात्यायनेन प्रयुक्तं 'वर्णका तान्तवे'[96] इति वार्तिकं भोजदेवेन सूत्ररूपेणात्र उच्यते। 'वर्णकेति तान्तवे द्रव्ये इत्वाभावे निपात्यते'। 'वर्णका वस्त्रविशेषः'। तान्तव इति किं वर्णिका भागुरी लोकायतस्य।

---

[94] वा.४५३०

[95] वा.४५३१

[96] वा.४५३२

**अष्टका पितृदेवत्ये। (७/१/९७)**

'न यासयोः' इति पाणिनीयसूत्रव्याख्याने कात्यायनकृतं 'अष्टकापितृदैवत्ये'[97] इति वार्तिकं अस्ति। तदत्र भोजदेवेन सूत्रत्वेन स्वीकृतम्। 'अष्टकेति पितृदेवत्येऽर्थे इत्वाभावो निपात्यते' अष्टकापितृदेवत्यमहः पितृदेवत्य इति किं अष्टिका खारी। 'न यासयोः' इति पाणिनीयसूत्रव्याख्याने कात्यायनकृतानि अष्टवार्तिकानि भोजदेवेन सूत्रत्वेन प्रतिपादितानि।

**च जोः कुघिण्यतोः। (७/१/९८)**

पाणिनिना 'चजोः कु घिण्ण्यतोः'[98] इति प्रयुक्तं सूत्रमिदम्। 'चकारजकारान्तायाः प्रकृतेः घिति ण्यति च प्रत्यये परतः कवर्गोऽन्तादेशो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'घिति'- 'पाकः', 'त्यागः', 'ण्यति'-'पाक्यम्', 'भाग्यम्' इत्युदाहरणानि।

**न्यञ्चिमस्जिभ्रस्जीनामौ। (७/१/९९)**

पाणिनिना 'न्यङ्क्वादीनां च'[99] इति प्रयुक्तेण सूत्रेण उक्तं कार्यं भोजदेवेन अनेन सूत्रेण उच्यते। 'निपूर्वस्याञ्चतेः मस्जिभ्रस्ज्योश्च उप्रत्यये कवर्गादेशो भवति' इति सूत्रस्य अर्थः। व्यतिषजतीति 'व्यतिषङ्गः', 'अनुषङ्गः', 'न्यङ्कुः' इत्यादीन्युदाहरणानि।

---

97 वा.४५३४

98 पा.सू.७/३/५२

99 पा.सू.७/३/५३

**तञ्चिवञ्च्योरकि। (७/१/१००)**

न्यङ्क्वादीनां तक्र-वक्रशब्दयोः कुत्वविधायकमिदं सूत्रम्। 'तञ्चिवञ्च्योश्चकारस्य रकि प्रत्यये कवर्गादेशो भवति' इति अस्य सूत्रार्थः। 'तक्रम्', 'वक्रम्' इत्येते उदाहरणे।

**पचेर्दूरादिभ्यो णे। (७/१/१०१)**

न्यङ्क्वादीनां च इति सूत्रेणैव पाणिनिना एतेषां कुत्वविधानं कृतम्। किन्तु भोजः गणपाठं न स्वीकरोति इत्यस्मात् न्यङ्क्वादीनां दूरपाक-क्षणपाकशब्दयोः कुत्वविधानार्थं पृथक् सूत्राणि प्रतिपादितानि। 'दूरादिभ्यः परस्य पचेश्चकारस्य णप्रत्यये कवर्गादेशो भवति' इति अस्य सूत्रार्थः। 'दूरेपाकः', 'दूरेपाका', 'दूरेपाकुः', 'क्षणेपाकः', 'क्षणेपाकुः' इत्येतानि उदाहरणानि।

**कपोतोलूकश्वमांसेभ्योऽणि (७/१/१०२)**

न्यङ्क्वादीनां च इति गणे प्रयुक्तानां कपोतपाक-उलूकपाक-मांसपाक-श्वपाकशब्दानां कुत्वविधानार्थं भोजदेवेनेदं सूत्रमुक्तम्। 'कपोतादिभ्यः परस्य पचेश्चकारस्याण् प्रत्यये कवर्गादेशो भवति' इति अस्य सूत्रार्थः। 'कपोतान् पचति कपोतपाकः', 'उलूकपाकः', 'श्वपाकः', 'मांसपाकः' इत्यादीनि उदाहरणानि।

**उचः के गुणश्च।। (७/१/१०३)**

पाणिनिना 'ओक उचः के'[100] इति सूत्रेण गुणः कुत्वञ्च निपात्येते। भोजदेवेन

[100] पा.सू.७/३/६४

अस्यसूत्रस्याधारेण उक्तेन अनेन कवर्गादेशः गुणः च विधीयते। 'उचेश्चकारस्य के परतः कवर्गादेशः प्रकृतेरिति को गुणश्च भवति' इति सूत्रार्थः। 'न्योकः'-'संरुतः', 'न्योकः'-'वृक्षः' इत्यादीनि उदाहरणानि।

**शुचिरुच्योर्घञि। (७/१/१०४)**

इदमपि कुत्वविधायकं सूत्रं भवति। 'शुचिरुच्योश्चकारस्य घञि परतः कुत्वं भवति' इति अस्य सूत्रार्थः। 'शोकः', 'रोकः' इत्येते उदाहरणे।

**मिहेर्हस्याचि संज्ञायाम्। (७/१/१०५)**

अनेनापि कुत्वं विधीयते। 'मिहेर्हकारस्याचि परतः संज्ञायां कुत्वं भवति इति अस्य सूत्रार्थः'। 'मेघः', 'घनः' इत्युदाहरणे।

**वहेः सम्प्रसारणं चानुपसर्गस्य। (७/१/१०६)**

'वहेरनुपसर्गस्याचि परतो हस्य कुत्वं सम्प्रसारणं च भवति' इति अस्य सूत्रार्थः। 'ओघः प्रवाहः' इत्युदाहरणम्।

**दहेर्न्यवाभ्यां घञि। (७/१/१०७)**

'न्यवाभ्यामुत्तरस्य दहेर्हकारस्य घञि प्रत्यये परतः संज्ञायां कुत्वं भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'निदाघः', 'अनुवाघः' इत्युदाहरणे।

**अर्हः। (७/१/१०८)**

'अर्हतेर्हकारस्य घञिपरतः संज्ञायां कुत्वं भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अर्घः' इत्युदाहरणम्।

**हन्तेर्ञ्णिति। (७/१/१०९)**

'होहन्तेर्ञ्णिन्नेषु'[101] इति पाणिनीयसूत्रेण कुत्वविधानं क्रियते। तस्याधारेण भोजदेवेनोक्तमिदं सूत्रम्। 'हन्तेर्हकारस्य ञिति णिति च प्रत्यये परतः कुत्वं भवति' इति अस्य सूत्रार्थः। 'घातुकः', 'घातयति' इत्युदाहरणे।

**उपधालोपे च। (७/१/११०)**

'उपधालोपे च सति हन्तेर्हकारस्य कुत्वं भवति' इति सूत्रार्थः। 'घ्नन्ति', 'अघ्नन्', 'स्वघ्नः' इत्यादीनि उदाहरणानि।

**द्वित्वहेतौ। (७/१/१११)**

हन्तेर्हकारस्य दित्वहेतौ प्रत्यये परतो हकारस्य कुत्वं भवति। जिघांसति जङ्घन्यते जघनिथ। 'अभ्यासाच्च'[102]इति पाणिनीयसूत्रेण इदं कार्यं प्रतिपादितम्। भोजदेवेन

101 पा.सू.७/३/५४

102 पा.सू.७/३/५५

'अभ्याससंज्ञा' स्वीक्रियते। तथापि इदं सूत्रं द्वित्वहेतौ इत्युक्तम्।

**हेरचङि। (७/१/११२)**

कुत्वविधायकं 'हेरचङि'[103] इति सूत्रं पाणिनिना प्रयुक्तम्। तदाधारीकृत्य भोजदेवेनेदं सूत्रं प्रयुक्तम्। 'हिनोतेर्धातोश्चङ्वर्जिते द्वित्वहेतौ प्रत्यये परतो हकारस्य कुत्वं भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'प्रजिघाय', 'प्रजिघीषति', 'प्रजेघीयते' इत्यादीनि उदाहरणानि।

**सन्लिटोर्जेः। (७/१/११३)**

पाणिन्युक्तं सूत्रं[104] तथापि भोजदेवेनात्र स्वीकृतम्। 'सनि लिटि च द्वित्वहेतौ प्रत्यये परतो जयतेर्जकारस्य कुत्वं भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'जिगीषति', 'जिगाय', 'विजिग्ये' इत्यादीनि उदाहरणानि।

**चेर्वा। (७/१/११४)**

'विभाषा चेः'[105]इति पाणिन्युक्तं सूत्रं भोजदेवेन स्वीकृतम्। 'चिनोतेर्द्वित्वहेतौ सनि लिटि च परतः कुत्वं वा भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'चिकीषति'/

---

103 पा.सू.७/३/५६

104 पा.सू.७/३/५७

105 पा.सू.७/३/५८

'चिचीषति', 'चिकाय'/'चिचाय', 'चिक्ये'/'चिच्ये' इत्यादीनि उदाहरणानि।

**न क्वाद्यजिव्रज्यादेर्निष्ठायां सेटः। (७/१/११५)**

पाणिनिना 'न क्वादेः'[106] 'अजिवृज्योश्च'[107] इति सूत्रद्वयं प्रतिपादितम्। अनयोः द्वयोः सूत्रयोः मेलनेन भोजदेवेनोक्तमिदं सूत्रम्। 'कवर्गादेर्धातोरजि व्रज्यादेश्च निष्ठायां सेद्वम्बन्धिनश्च ञिणि ण्यति च प्रत्यये परतः कुत्वं न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'उत्कोचः', 'उत्कोच्यम्', 'कूजः', 'कूज्यम्', 'खर्ज्यः', 'खर्ज्यम्', 'गर्जः', 'गर्ज्यम्', 'उदाजः', 'समाजः', 'परिव्राजः', 'परिव्राज्यम् ' इत्यादीनि उदाहरणानि।

**भुजन्युब्जौ बाहूतपयोः। (७/१/११६)**

'भुज न्युब्ज इत्येतौ शब्दौ यथासङ्ख्यं बाहूपतापयोरर्थयोः निपात्येते'। 'भुज्यतेऽनेनेति भुजः बाहुः' 'न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जो नाम रोगविशेषः' इत्येते उदाहरणे। 'भुजन्युब्जौ पाण्युपतापयोः'[108] इति सूत्रं पाणिनिना उक्तम्। पाणिशब्दस्य स्थाने भोजदेवः बाहुशब्दप्रयोगं कृतवान्।

**वञ्चर्गतौ। (७/१/११७)**

कुत्वनिषेधात्मकं 'वञ्चेर्गतौ'[109] इति सूत्रं पाणिनिना उक्तम्। भोजदेवोऽपि अनेन सूत्रेण

---

106 पा.सू.७/३/५९

107 पा.सू.७/३/६०

108 पा.सू.७/३/६१

109 पा.सू.७/३/६३

कुत्वनिषेधं उक्तवान्। 'वञ्चेर्गतौ वर्तमानस्य कुत्वं न भवति'। 'वाच्यं वदन्ति वाणिजाः', 'गम्यं गच्छन्तीत्यर्थः' ।

**प्रयाजानुयाजोपांशुयाजपत्नीसंयाजर्तुयाजा यज्ञाङ्गे। (७/१/११८)**

'प्रयाजानुयाजौ यज्ञाङ्गे'[110] इति पाणिनीयसूत्रमस्ति। किन्तु भोजदेवेन सूत्रे पांशुयाज-पत्नीसंयाज-ऋतुयाजशब्दानां योजनं कृतम्। 'प्रयाजादयः शब्दाः घञन्ता यज्ञसंयोगेऽभिधे-येकृतकुभावाः साधवो भवन्ति'। 'पञ्चप्रयाजाः', 'त्रयोऽनुयाजाः', 'एकादशोऽपयाजाः', 'उपांशुयाजाः', 'पत्नीसंयाजाः', 'ऋतुयाजाः', इत्यादीनि उदाहरणानि।

**ण्य आवश्यके। (७/१/११९)**

पाणिनिना उक्तमिदं सूत्रं[111] तद्वदेव भोजदेवेनात्र स्वीकृतम्। आवश्यकोपाधिके ण्यप्रत्यये कुत्वं न भवति। 'अवश्यवाच्यम्', 'अवश्यरेच्यम्', 'अवश्यभाज्यम्' इत्युदाहरणानि।

**प्रवचयजत्यजाम्। (७/१/१२०)**

पाणिनिना 'यजयाचरुचप्रवचर्चश्च'[112] इति सूत्रं प्रयुक्तम्। तस्मात् सूत्रात् 'प्रवचयजयोः' प्रतिपादनं भोजदेवेन अस्मिन् सूत्रे कृतम्। 'प्रवचादीनां ण्यप्रत्यये कुत्वं न भवति' इति अस्य सूत्रार्थः उक्तः। 'प्रवाच्य' इत्युदाहरणम्।

---

110 पा.सू.७/३/६२

111 .पा.सू ७/३/६५

112 पा.सू.७/३/६६

**वचोऽशब्दसंज्ञायाम्। (७/१/१२१)**

इदमेव सूत्रं पाणिनिना[113] उक्तम्। कुत्वनिषेधः अनेन विधीयते। 'प्रवचादीनां ण्यप्रत्यये कुत्वं न भवति' इति सूत्रार्थः। 'वाच्यम्' इत्युदाहरणम्।

**निप्राभ्यां युजः शक्ये। (७/१/१२२)**

पाणिनिना 'प्रयोज्यनियोज्यौ शक्यार्थे'[114] इति इदं सूत्रं प्रतिपादितम्। कुत्वनिषेधसूत्रमिदम्। 'निप्राभ्यामुत्तरस्य युजेः शक्येऽर्थे ण्यप्रत्यये परतः कुत्वं न भवति' इति अस्य सूत्रार्थः। 'नियोक्तुं शक्यः नियोज्यः', 'प्रयोज्यः' इत्युदाहरणे।

**भोज्यमन्ने। (७/१/१२३)**

पाणिनेः सूत्रमस्ति 'भोज्यं भक्ष्ये'[115] इति । कुत्वाभावः तेन निपात्यते। 'भोज्यमित्यन्नेऽभिधेये कु(त्वं न भवति) त्वाभावो निपात्यते' इति दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'भोज्यमन्नं', 'भोज्या यवागूः' इत्येते उदाहरणे।

**रुहेर्विन्यग्भ्यां क्विबचोर्धः। (७/१/१२४)**

धकारादेशविधायकमिदं सूत्रम्। रुहेर्धातोर्विन्यग्भ्यामुत्तरस्य यथासंख्यं क्विबचोः परतोऽन्त्यस्य धकारादेशो भवति इति अस्य सूत्रार्थः। 'विरोहतीति वीरुत्', 'न्यग्रोहतीति

---

113 पा.सू.७/३/६७

114 पा.सू.७/३/६८

115 पा.सू.७/३/६९

न्यग्रोधः', इत्येते उदाहरणे।

**ओतोलोपःश्यनि। (७/१/१२५)**

'ओतः श्यनि[116] इति पाणिनीयसूत्रस्वीकारेण भोजदेवेनोक्तमिदं सूत्रम्। द्वयोरपि लोपः विधीयते। भोजदेवः अनेन सूत्रेण लोपः विधीयते सूत्रेणैव स्पष्टीक्रियते। 'ओकारान्तायाः प्रकृतेः श्यन् प्रत्यये परतोऽन्त्यस्य लोपो भवति' इति तत्र सूत्रार्थः उक्तः। 'दो अवद्यति', 'शोभ्यति', 'शो अवच्छ्यति', 'षो अवस्यति' इत्यादीन्युदाहरणानि।

**क्सस्याचि। (७/१/१२६)**

पाणिनिना प्रयुक्तमिदं[117] सूत्रं तद्वदेव भोजदेवेन स्वीकृतं वर्तते। 'अजादौ प्रत्यये परतः क्सस्यलोपोऽन्त्यस्य धकारादेशो भवति' इत्यस्य सूत्रार्थः। 'अधुक्षाताम्', 'अधुक्षाथाम्', 'अधिक्षाताम्', 'अधिक्षाथाम्' इत्यादीन्युदाहरणानि।

**लुग्वा दुहदिहलिहगुहिभ्य आत्मनेपदेदन्त्ये। (७/१/१२७)**

'लुग्वादुहदिहलिहगुहामात्मनेपदे दन्त्ये'[118] इति पाणिनीयसूत्रमेव भोजेन अत्र प्रतिपादितं वर्तते। 'दुहादिभ्यः परस्य क्सप्रत्ययस्य दन्त्यादावात्मनेपदेपरतो लुग्वा भवति' इति

---

116 पा.सू.७/३/७१

117 पा.सू.७/३/७२

118 पा.सू.७/३/७३

अस्य सूत्रार्थः। 'अदुग्ध', 'अधुक्षत', 'अदुग्धाः', 'अधुक्षथाः', 'अदिग्ध', 'अधिक्षत', 'अलीढ', 'अलिक्षत', 'न्यगूढ', 'न्यधुक्षत' इत्यादीन्युदाहरणानि।

**शमामष्टानां श्ये दीर्घः। (७/१/१२८)**

दीर्घविधायकं शमामष्टानां दीर्घः श्यनि[119] इति पाणिनीयसूत्रस्वीकारेण भोजेनेदं प्रतिपादितम्। अत्रापि दीर्घः विधीयते। शमादीनामष्टानां श्यनिप्रत्यये दीर्घो भवति इति अस्य सूत्रार्थः। 'शाम्यति', 'ताम्यति', 'दाम्यति', 'श्राम्यति', 'भ्राम्यति', 'क्षाम्यति', 'क्लाम्यति', 'माद्यति' इत्यादीनि उदाहरणानि।

**ष्ठिवुक्लम्वाचमां शिद्विकरणे। (७/१/१२९) क्लमः परस्मैपदेषु। (७/१/१३०)**

पाणिनिना 'ष्ठिवुक्लमुचमां शिति[120] इति सूत्रमुच्यते। अस्य सूत्रस्वीकारेण भोजेने 'ष्ठिवुक्लम्वाचमां शिद्विकरणे', 'क्लमः परस्मैपदेषु' इति सूत्रद्वयं प्रतिपादितम्। द्वयोरपि दीर्घः विधीयते। 'ष्ठिवेः क्लमेराचमेश्च शिति विकरणे परतो दीर्घो भवति' इति 'ष्ठिवुक्लम्वाचमां शिद्विकरणे' इत्यस्य सूत्रार्थः हृदयहारिण्यां उक्तः। 'ष्ठावति', 'क्लामति', 'आचामति' इत्यादीनि उदाहरणानि। 'क्लमः परस्मैपदेषु' इत्यस्य 'परस्मैपदनिमित्ते शितिविकरणे परतो दीर्घो भवति' इति सूत्रार्थः। 'क्रामति', 'आक्रामति' इत्येते उदाहरणे।

[119] पा.सू.७/३/७४

[120] पा.सू.७/३/७५

**इषुगमियमां छः। (७/१/१३१)**

पाणिनिना 'इषुगमियमां छः'[121] इति सूत्रं प्रयुक्तम्। तेन छकारादेशो विधीयते। किन्तु भोजेन उक्तस्यास्य सूत्रस्य हृदयहारिणीवृत्तौ शकारान्तादेशत्वेन सूत्रमिदं प्रतिपादितम्। भोजेन सूत्रे छः इति प्रयुक्तम् । उदाहरणेष्वपि छकारः दृश्यते च। तर्हि हृदयहारिण्यां शकारः कथमागतः इति चिन्तनीयः। 'इषुगमियमां शिति विकरणे परतः शकार अन्तादेशो भवति' इति तत्र सूत्रार्थः। 'इच्छति', 'व्यतीच्छते', 'गच्छति', 'सङ्गच्छते', 'आयच्छति', 'आयच्छते' इत्यादीनि उदाहरणानि।

**प्राघ्राध्मास्थाम्नादाण्दृश्यर्तिशदसदांपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः। (७/१/१३२)**

इदं सूत्रं पाणिनिना यथा उक्तं[122] तथा एव भोजेन स्वीकृतम्। 'पादीनां दशानां धातूनां शिति विकरणे यथासंख्यं पिबादयो दशादेशा भवन्ति' इति दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'पिबति', 'जिघ्रति', 'तिष्ठति', 'आमनति', 'प्रयच्छति', 'पश्यति', 'ऋच्छति', 'शीयते', 'सीदति' इत्यादीन्युदाहरणानि।

**सर्त्तेर्धावोवेगितायां गतौ। (७/१/१३३)**

अनेन धावादेशः विधीयते। 'वेगः संजातोऽस्या इति वेगिता तस्यां गतौ वर्तमानस्य

121 पा.सू.७/३/७७

122 पा.सू. ७/३/७८

सर्त्ते सिद्धीशिद्विकरणे धावादेशो भवति' इति अस्य सूत्रार्थः। 'धावति' इत्युदाहरणम्। प्राघ्राध्मास्थाम्नादाण्दृश्यर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः इति पाणिनीयसूत्रव्याख्यानावसरे काशिकायां 'सर्तेर्वेगितायां गतौ' धावादेशम् इच्छन्ति इत्युक्तम्। तदत्र भोजदेवेन सूत्रत्वेन स्वीकृतम्।

**ज्ञाजनोर्जा।** (७/१/१३४)

जादेशविधायकमिदं सूत्रम्। 'ज्ञा जन इत्येतयोः शिति विकरणे जा इत्ययमादेशो भवति' इत्यस्य सूत्रार्थः। 'जानाति', 'जानीते', 'जानानः', 'जायते', 'जायमानः' इत्यादीनि उदाहरणानि। इदं सूत्रं पाणिनिना यथा प्रयुक्तं[123] तथा एव भोजेन स्वीकृतम्।

**प्वादीनां ह्रस्वः।** (७/१/१३५)

पाणिनिना उक्तं[124] ह्रस्वविधायकमिदं सूत्रम् भोजदेवेनात्र स्वीकृतम्। 'क्र्यादिषु पूञ् पवन इत्यत आरभ्य वृत्करणपर्यन्ता आगणान्ताः प्वादयस्तेषां शिति विकरणे ह्रस्वो भवति' इति अस्य सूत्रार्थः। 'पूञ् पुनाति', 'लूञ् लुनाति' इत्येते उदाहरणे।

**मिदेरेत्।** (७/१/१३६)

एकारादेशविधायकमिदं सूत्रम्। मिदेर्य इत् तस्य स्थाने शिद्विकरणे परतः एकारादेशो

---

123 पा.सू.७/३/७९

124 पा.सू.७/३/८०

भवति इति अस्य सूत्रार्थः। 'मेद्यति', 'मेद्यतः' इत्युदाहरणे। पाणिनिना इदं सूत्रं 'मिदेर्गुणः'[125] इति प्रतिपादितम्। सूत्रलाघवाय अत्र 'मिदेरेत्' इत्युक्तम्।

**सृजिदृशोर्झल्यं गुणवृद्धिप्रसङ्गे। (७/१/१३७)**

अमागमविधायकमिदं सूत्रम्। 'गुणवृद्ध्योः प्रसङ्गः प्राप्तिर्यस्मिन् तस्मिन् झलादौ प्रत्यये पादः परतः सृजिदृशि इत्येतयोरामागमो भवति' इति अस्य सूत्रार्थः। 'स्रष्टा', 'स्रष्टुं', 'द्रष्टा' इत्यादीन्युदाहरणानि। पाणिनिना 'सृजिदृशोर्झल्यमकिति'[126] इति प्रतिपादितम् अमादेशविधायकं सूत्रमिदम्।

**स्पृशमृशकृशतृपदृपसृपां वा। (७/१/१३८)**

इदमपि अमागमविधायकं भवति। 'स्पृशादीनां झलादौ गुणवृद्धिप्रसङ्गे प्रत्यये परतो अमागमो वा भवति' इति अस्य सूत्रार्थः। 'स्पृष्टा', 'स्पर्ष्टा', 'मृष्टा', 'मर्ष्टा', 'कृष्टा', 'कर्ष्टा', 'तृप्ता', 'तर्प्ता', 'दृप्ता', 'दर्प्ता', 'सृप्ता', 'सर्प्ता' इत्यादीनि उदाहरणानि।

**सप्तमाध्यायः-द्वितीयपादः ।**

**सार्वधातुकार्धधातुकयोर्गुणः। (७/२/१)**

'सार्वधातुके आर्धधातुके च प्रत्यये परत इगन्तायाः प्रकृतेर्गुणो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'जयति', 'भवति', 'तरोति', 'तनोति'। आर्धधातुके 'जेता'

---

125 पा.सू.७/३/८२

126 पा.सू.६/१/५८

'नेता' इत्यादीनि उदाहरणानि। पाणिनिना इदं सूत्रं 'सार्वधातुकार्धधातुकयोः' इत्युच्यते। तत्रापि गुणविधायकमिदं सूत्रम्। अनेन सूत्रेणविधीयमानः 'गुणः' भोजदेवेन सूत्रे एव उच्यते। अनेन सूत्रेण सार्वधातुके आर्धधातुके प्रत्यये परे इक् अन्तायाः या प्रक्रतिः अस्ति तस्याः गुणो भवतीत्यर्थः। 'इ', 'उ', 'ऋ', 'लृ' एते 'इकः' भवन्ति। अर्थात् येषां प्रकृतीनाम् 'इ', 'उ', 'ऋ',ळ'लृ' एतेष्वेकमन्ते अस्ति तस्मात् सार्वधातुकार्धधातुकप्रत्यये परे 'इ', 'उ', 'ऋ',ळ'लृ' इतीगन्तानां गुणः भवति । भोजदेवेन 'धातोस्तिङ् शित् सार्वधातुकं'[127] इति सार्वधातुकसंज्ञा उक्ता। अनेन धातोः विहितः 'तिङ्' 'शित्' च प्रत्ययः सार्वधातुकसंज्ञको [128]भवति। 'आर्धधातुकं शेषः'[129] इत्यनेन तिङ् शित् च प्रत्ययान् विहाय शेषः आर्धधातुकसंज्ञो भवति इति च व्यक्तमभवत्। तस्मात् 'सार्वधातुकार्धधातुकप्रत्यये परे' इत्यस्मात् सर्वेषां धातुप्रत्ययान् गृह्यते। 'जि जये' इत्यस्मात् धातोः 'वर्तमाने लट्' इति सूत्रेण 'लटि' 'तिङां त्रीणि त्रीणि प्रथममध्यमोत्तमाः'[130] इति प्रथमपुरुषे 'तान्येकवचनद्विवचनबहुवचनान्येकशः'[131] इति एकवचने 'लस्तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'[132] इति 'ति' प्रत्यये

---

[127] स.क.१/१/२०९

[128] स.क.१/४/१६५

[129] स.क.१/१/१२०

[130] स.क.१/१/२०

[131] स.क.१/१/२२

[132] स.क.३/१/१

'जि' 'ति' इति जाते 'कर्तरि शप्'[133] इति शपि 'लशक्वतद्धिते'[134] इति 'शित्वात्' अनेन सूत्रेण 'गुणे' 'अयादेशे' 'जयति' इति रूपम्।

**जुस् पुकोः। (७/२/२)**

'इगन्तायाः प्रकृतेर्जुसि सार्वधातुके पुकि च सत्यार्धधातुके परतो गुणो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अबिश्रयुः', 'अजुहवुः', 'ऐयरुः', 'अजागरुः', 'हेपयति', 'क्नोपयति', 'अर्पयति' इत्यादीनि उदाहरणानि। पाणिनिना 'जुसि च'[135] इति इदं सूत्रं प्रतिपादितम्। 'अजादौ जुसीगन्ताङ्गस्य गुणः स्यात् इति' कौमुद्यामस्य सूत्रार्थः उक्तः। 'अजागरुः' इत्युदाहरणं कौमुद्यामपि दृश्यते।

**जागुरक्वत्स्कानेकिति। (७/२/३) अचिण्णलिञिणिति। (७/२/४)**

पाणिनिना 'जाग्रोऽविचिण्णल्ङित्सु'[136] इति सूत्रं प्रयुक्तम्। 'जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनेदं सूत्रं विभज्य 'जागुरक्वत्स्कानेकिति', 'अचिण्णलिञिणिति' इति सूत्रद्वयमुक्तम्। 'जागुरक्वत्स्कानेकिति इत्यस्य सूत्रार्थः जागर्तेः क्वसुकानज्वर्जिते किति प्रत्यये परतो गुणो भवति' इति दण्डनाथेनोक्तः। 'जागरितः', 'जागरितवान्', 'जागर्यते', 'जागर्यात्' इत्यादीनि

---

133 स.क.१/३/१०८

134 स.क.१/२/१५

135 पा.सू.७/३/८३

136 पा.सू.७/३/८५

उदाहरणानि। 'अचिण्णलिञिणिति इत्यस्य सूत्रार्थः जागर्तेर्धातोश्चिण्णलवर्जितेञ्णिति प्रत्यये परतो गुणो भवति' इति हृदयहारिण्यां दृश्यते। 'जागरः', 'जागरवः', 'साधुजागरि', 'जागरयति' इत्यादीनि उदाहरणानि।

**लघोरुपधायाः(७/२/५)**

पाणिनिना 'पुगन्तलघूपधस्य च'[137] इति सूत्रं प्रयुक्तम्। 'पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजदेवेन 'लघोरुपधाया' इति स्वीकृतम्। तत्र दण्डनाथेन 'सार्वधातुके आर्धधातुके च प्रत्यये परतः लघोरुपधाया गुणो भवति' इति सूत्रार्थः उक्तः। 'वेत्ति', 'दोग्धि', 'ननर्त्त' इत्यादीनि उदाहरणानि। दण्डनाथेन उपधासंज्ञः स्वीक्रियते इति सूत्रार्थात् ज्ञायते।

**नाभ्यस्तस्याचिसार्वधातुके (७/२/६)**

पाणिनिना 'नाभ्यस्तस्याचि पिति सार्वधातुके'[138] इति सूत्रमुक्तम्। 'लघूपधगुणो न स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'अभ्यस्तसंज्ञिकायाः प्रकृतेर्लघोरुपधायाः अजादौ सार्वधातुके गुणो न भवति' इति अस्य सूत्रार्थः हृदयहारिण्यां दण्डनाथेनोक्तः। 'नेनिजानि', 'अनेनिजम्', इत्यादीनि उदाहरणानि। 'नेनिजानि' इत्युदाहरणं कौमुद्यामपि दृश्यते।

---

137 पा.सू.७/३/८६

138 पा.सू.७/३/८७

**अपिति। (७/२/७)**

पाणिनिना 'सार्वधातुकमपित्'[139] इति सूत्रमुक्तम्। 'सार्वधातुकं यदपित् तत् ङिद्वद् भवति' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रम् 'अपिति' इत्येवोक्तम्। 'अपिति सार्वधातुके परतः इगन्तायाः प्रकृतेः लघूपधायाश्च गुणो न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः दण्डनाथेनोक्तः। 'यान्ति', 'स्तुतः', 'स्तुवन्ति', 'बिभृतः', 'बिभ्रति', 'वित्तः', 'विदन्ति', 'दुग्धः', 'दुहन्ति' इत्यादीनि उदाहरणानि।

**अनांलिट्यजागुः। (७/२/८)**

गुणनिषेधात्मकत्वेन भोजेनेदं सूत्रमुक्तम्। 'जागर्तिवर्जितायाः प्रकृतेरामो अन्यस्मिन्नपिति लिटिप्रत्यये परतो गुणो न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'जिग्यतुः', 'जिग्ये', 'जुहवतुः', 'चक्रतुः', 'वितुदतुः', 'दुदुहतुः', इत्येतानि उदाहरणानि। पाणिनिना 'असंयोगाल्लिङ्कित्'[140] इति सूत्रेण 'असंयोगात्परोऽपिल्लिट् कित्स्यात्' इत्युच्यते। एवं कित्वात् 'क्ङिति च' इति गुणवृद्धिनिषेधः प्राप्नोति। भोजदेवेनोक्तेनानेन सूत्रेण दण्डनाथः गुणनिषेधः साक्षादुच्यते। एवं चेत् 'क्ङिति च' इति सूत्रप्रवृत्तेः अवसरोऽपि न भवति।

---

139 पा.सू.१/२/४

140 पा.सू.१/२/५

**क्ङिति (७/२/९)**

पाणिनिना 'क्ङिति च'[141] इति सूत्रं प्रयुक्तम्। 'गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन 'क्ङिति' इत्येवेदं सूत्रं प्रयुक्तम्। कौमुद्यां 'गुणवृद्धिनिषेधः' अनेनोक्तः किन्तु भोजेन 'गुणनिषेधमेवोच्यते। 'क्ङिति च प्रत्यये परतः प्रकृतेर्गुणो न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'जीयते', 'हूयते', 'क्रियते', 'भिद्यते', 'बेभिद्यते', 'अंबिभयन्' , 'अशिषः', 'अपुषन्' इत्यादीनि उदाहरणानि।

**यङ्यक्क्यलोपे वृद्धिश्चातिङि (७/२/१०)**

'यङ्यक्यानां लोपे सत्यतिङि प्रत्यये परतो वृद्धिश्चकारात् गुणश्च न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। यङ्लोपे - 'चेज्यः', 'नेन्यः', 'लोलुवः', 'बिभेदिता', 'बोबुधिता', यग्लोपे - 'कुषुभिता' 'मगधकः', क्यलोपे - 'समिधिता', 'दृषदकः' इत्यादीनि उदाहरणानि।

**कुटादीनामञ्णिति (७/२/११)**

पाणिनिना 'गाङ्कुटादिभ्योऽञ्णिन्ङित्'[142] इति सूत्रमुक्तम्। 'गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं

---

141 पा.सू.१/१/५

142 पा.सू.१/२/१

'कुटादीनामञ्णिति' इति प्रयुक्तम्। 'गुणवृद्धिनिषेधः' अनेन विधीयते। 'कुटादीनां धातूनां ञितो णितश्चान्यस्मिन् प्रत्यये गुणो वृद्धिश्च न भवति' इति दण्डनाथेन हृदयहारिण्यां सूत्रार्थः उक्तः। 'उत्कटिता', 'उत्पुटिता', 'नुविता', 'धुविता', 'न्यनुवीत्', 'न्यधुवीत्' इत्यादीनि उदाहरणानि। पाणिनिना अनेन सूत्रेण ङित् विहितः। 'ङित्' इत्यस्य प्रयोजनं 'क्ङिति च' इति सूत्रेण गुणवृद्धिनिषेधः। किन्तु भोजदेवेन सूत्रेणैव गुणवृद्धिनिषेधः कृतः इत्यनेन सूत्रान्तराश्रयणं नावश्यकं इति लाघवमस्ति।

**विज इटि (७/२/१२)**

पाणिनिना 'विज इट्'[143] इति सूत्रमुक्तम्। 'विजेः पर इडादिप्रत्ययो ङिद्वत्' इति सिद्धान्तकौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनात्र 'विज इटि' इति सूत्रमुक्तम्। गुणनिषेधात्मकमिदं सूत्रम्। हृदयहारिण्यां दण्डनाथेन 'विजेर्धातोरिङादौ प्रत्यये गुणो न भवति' इति सूत्रार्थः उक्तः। 'उद्विजिता', 'उद्विजितुम् ' इत्येते उदाहरणे। एतेषु 'उद्विजिता' इत्युदाहरणं कौमुद्यामपि अस्ति। अत्रापि पूर्वसूत्रवत् अनेन सूत्रेणैव कार्यं सिध्यति। भोजदेवेन सूत्रेणैव गुणनिषेधः कृतः इत्यनेन सूत्रान्तराश्रयणं नावश्यकं इति लाघवमस्ति।

**ऊर्णो र्वा (७/२/१३)**

पाणिनिना 'विभाषोर्णोः'[144] इति सूत्रमुक्तम्। 'इडादिप्रत्ययो वा ङित्स्यात्' इति अस्य

---

143 पा.सू.१/२/२

144 पा.सू.१/२/३

सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं 'ऊर्णो र्वा' इत्युक्तम्। गुणनिषेधात्मकं भवतीदं सूत्रम्। हृदयहारिण्याम् 'ऊर्णोतेरिडादौ प्रत्यये परतो गुणो न वा भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'प्रोर्णुविता', 'प्रोर्णविता', इत्येते उदाहरणे। पाणिनेः ङिद्विधानस्य स्थाने भोजदेवेन कृतः गुणनिषेधः कार्यसिद्ध्यर्थं लाघवमायाति।

**निष्ठायामशीङ्सूस्विदिमिदिक्ष्विदिधृषः(७/२/१४)**

पाणिनिना 'निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः'[145] इति सूत्रमुक्तम्। 'एभ्यः सेण्निष्ठा किन्न स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन 'निष्ठा' इत्यस्य स्थाने 'निष्ठायाम्' इत्युक्तम्। 'शीङ्' इत्यस्य 'अशीङ्सू' इति च भोजदेवेन कृत्वा सूत्रं प्रयुक्तम्। अस्य सूत्रार्थः 'हृदयहारिण्यां इडादौ निष्ठाप्रत्यये परतः शीङादिवर्जितानामेव धातूनां गुणो न भवति' इत्यस्ति। 'विदितः', 'विदितवान्', 'रुषितः', 'रुषितवान्', 'तृषितः', 'तृषितवान्' इत्येतानि उदाहरणानि। अस्मात् सूत्रात् भोजदेवः तथा सूत्रार्थात् दण्डनाथश्च निष्ठासंज्ञाम् अङ्गीकुरुतः इति ज्ञातुं शक्यते।

**मृषेरक्षमायाम् । (७/२/१५)**

पाणिनिना 'मृषस्तितिक्षायाम् '[146] इति सूत्रमुक्तम्। 'सेण्निष्ठाकिन्न स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन 'मृषेरक्षमायाम् ' इति सूत्रमुक्तम्। हृदयहारिण्यां 'मृषेः क्षमाया अन्यत्रार्थे वर्तमानस्येडादौ निष्ठाप्रत्यये गुणो न भवति' इति अस्य सूत्रार्थः उक्तः।

---

145 पा.सू.१/२/१९

146 पा.सू.१/२/२०

गुणनिषेधात्मकमिदं सूत्रम्।। अपमृषितम् वाक्यमाह इत्युदाहरणम्। पाणिनेः सूत्रस्य मृषः तितिक्षायाम् इति पदच्छेदः। 'शीतोष्णातिद्वन्द्वसहिष्णुता तितिक्षा' इति वेदान्तसारः। अर्थात् 'क्षमा' इत्यर्थः। मृषः क्षमायामित्यर्थः तस्मात् प्राप्नोति। 'मर्षितः' 'मृषितवान्' इति तत्र उदाहरणे दत्ते। पाणिनेः सूत्रे क्षमायामिति किं इत्यत्र 'अपमृषितम्' इत्युदाहरणं तत्र दत्तम्। किन्तु भोजदेवेन अक्षमायाम् इत्युक्तम्। भोजसूत्रे दण्डनाथेन अक्षमायामिति किम् इत्यस्य प्रयोजनरूपेण 'मर्षितः' 'मषितवान्' इति दत्तम्।

**उदुपधस्यशब्वतो भावादिकर्मणोर्वा । (७/२/१६)**

पाणिनिना 'उदुपधाद्भावादिकर्मणोरन्यतरस्याम्'[147] इति सूत्रं प्रयुक्तम्। 'उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजमते 'उदुपधस्यशब्वतो भावादिकर्मणोर्वा' इति अस्ति सूत्रम्। 'उकारोपधस्य शब्विकरणस्य धातोर्भावे आदिकर्मणि च या निष्ठा तस्यामिडादौ परतो गुणो वा न भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'द्युतितमनेन', 'द्योतितमनेन', 'प्रद्युतितः', 'प्रद्योतितः', 'मुदितमनेन', 'मोदितमनेन', 'प्रमुदितः', 'प्रमोदितः' इत्येतानि उदाहरणानि। पाणिनिना 'कित् ' निषेधः अथवा विकल्पः उक्तः। भोजेन गुणनिषेधः अथवा विकल्पश्च उच्यते।

**मृडमृदगुधकुषक्लिशवदवसलुचां क्त्वि (७/२/१७)**

पाणिनिना 'मृडमृदगुधकुषक्लिशवदवसः क्त्वा'[148] इति सूत्रं प्रयुक्तम्। 'एभ्यः सेट् क्त्वा

[147] पा.सू.१/२/२१

[148] पा.सू.१/२/७

कित् ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'लुचाम् ' इति पदयोजनेन 'क्त्वा' इत्यस्य 'क्त्वि' इति आदेशेन च भोजदेवेनेदं सूत्रं प्रयुक्तम्। 'मृडादीनामेव धातूनामिडादौ क्त्वाप्रत्यये परतो गुणो न भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'मृडित्वा', 'मृदित्वा', 'गुधित्वा', 'कुषित्वा', 'क्लिशित्वा', 'उदित्वा', 'उषित्वा', 'लुचित्वा' इत्यादीनि उदाहरणानि। पाणिनिना विकल्पेन कित् विधाने भोजेन गुणनिषेधो उच्यते।

**ऋततृषमृषकृशां वा (७/२/१८)**

भोजदेवेन गुणनिषेधार्थमिदं सूत्रमुक्तम्। 'ऋतादीनां धातूनामिडादौ क्त्वा प्रत्यये गुणो वा न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'ऋतित्वा', 'अर्तित्वा', 'तृषित्वा', 'तर्षित्वा', 'मृषित्वा', 'मर्षित्वा', 'कृशित्वा', 'कर्शित्वा' इत्यादीनि उदाहरणानि। 'तृषिमृषिकृशेः काश्यपस्य'[149] इति सूत्रं पाणिनिना प्रतिपादितम्। 'तृषि मृषि कृशि इत्येतेभ्यः परः क्त्वा प्रत्ययः सेट् कश्यपाचार्यस्य मते किद् वा न भवति' इति अनेन पाणिनीयसूत्रेण प्रतिपाद्यते। एभ्यः सेट् क्त्वा किद्वा इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन स्वीकृतेषूदाहरणेषु 'तृषित्वा', 'तर्षित्वा', 'मृषित्वा', 'मर्षित्वा', 'कृशित्वा', 'कर्शित्वा' इत्येतानि सिद्धान्तकौमुद्यां वर्तन्ते। पाणिनेः 'कितः' विकल्पनिषेधविधानस्य स्थाने भोजेन गुणस्य विकल्पनिषेधविधानं क्रियते।

**रलोहलादेरिदुदुपधस्य सनि च (७/२/१९)**

पाणिनिना रलो व्युपधाद्धलादेः संश्च[150] इति सूत्रं प्रयुक्तम्। 'उकार-इकारोपधात् धातोः

---

149 पा.सू.१/२/२५

150 पा.सू.१/२/२६

रलन्तात् हलादेः परः संश्च त्क्वा च सेटौ भवतः' इति वक्तुं पाणिनिना इदं सूत्रं प्रतिपादितम्। 'उश्च इश्च वी ते उपधे यस्य तस्माद्धलादे रलन्तात्परौ त्क्वासनौ सेटौ वा कितौ स्तः' इति सिद्धान्तकौमुद्यामस्य सूत्रार्थः उक्तः। किन्तु भोजदेवेन गुणविकल्पात्मकमथवा निषेधात्मकमिदं सूत्रमुक्तम्। 'रलन्तस्य हलादेरिकारोकारोपधस्य धातोरिडादौ सनि त्क्वायां च प्रत्यये परतो गुणो वा न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः दण्डनाथेनोक्तः। 'लिखित्वा', 'लेखित्वा', 'लिलिखिषति', 'लिलेखिषति', 'द्युतित्वा', 'द्योतित्वा', 'दिद्युतिषते', 'दिद्योतिषते' इत्येतानि उदाहरणानि।

**रुदविदमुषग्रहाम् (७/२/२०) सन्यनिटि (७/२/२१)**

पाणिनिना 'रुदविदमुषग्रहिस्वपिप्रच्छः सँश्च'[151] इति सूत्रं प्रयुक्तम्। 'रुदादयः रुद विद मुष ग्रहि स्वपि प्रच्छ इति भवन्ति'। एतेभ्यः संश्च त्क्वा च कितौ भवतः' इति वक्तुं पाणिनिना इदं सूत्रं प्रतिपादितम्। 'एभ्यः सन् त्क्वा च कितौ स्तः' इति अस्य सूत्रार्थः सिद्धान्तकौमुद्यामुक्तः। किन्तु भोजेन 'गुणनिषेधात्मकमिदं' सूत्रमुक्तम्। 'रुदादीनामिडादौ सनि त्क्वायां च परतो गुणो न भवति' इति दण्डनाथेन सूत्रार्थः उक्तः। 'रुदित्वा', 'रुरुदिषति', 'विदित्वा', 'विविदिषति', 'मुषित्वा', 'मुमुदिषति', 'गृहीत्वा' इत्यादीन्युदाहरणानि।

भोजेन गुणनिषेधात्मकमिदं सूत्रमुक्तम्। अनिटि सन् प्रत्यये परतः प्रकृतेरिगन्ताया लघूपधायाश्च गुणो न भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'चिचीषति', 'चिकीर्षति',

---

151 पा.सू.१/२/८

'बिभत्सति', 'बुभुत्सते', 'विवृत्सति' इत्येतानि उदाहरणानि।

**लिङ्गिचोरुपधायाः (७/२/२२)**

इदमपि गुणनिषेधसूत्रं भवति। लिङि सिचि चानिडादौ परतः प्रकृतेरिक उपधाया गुणो न भवति इति हृदयहारिण्यामस्य सूत्रार्थो उक्तः। 'भित्सीष्ट', 'भुत्सीष्ट', 'सृक्षीष्ट', 'अभित्त', 'अबुद्ध', 'असृक्षताम् ' इत्येतानि उदाहरणानि। 'लिङ्गिचावात्मनेपदेषु'[152] इति कित्वविधायकं पाणिनीयसूत्रमस्ति। तस्याधारेण प्रतिपादितमिदं सूत्रम्। किन्त्वत्र उपधायाः गुणनिषेधः अनेन विधीयते।

**उश्च(७/२/२३)**

पाणिनिना 'उश्च'[153] इति सूत्रमुक्तम्। ऋवर्णात्परौ झलादी लिङ् तङ्गरः सिच्चेत्येतौ कितौ स्तः इति सिद्धान्तकौमुद्यामस्य सूत्रार्थः उक्तः। किन्तु भोजदेवेन अत्रापि गुणनिषेधकत्वं सूत्रमुक्तम्। लिङि सिचि चानिडादौ परतः ऋवर्णान्तायाः प्रकृतेः गुणो न भवति इति हृदयहारिण्यां सूत्रार्थः उक्तः। 'कृषीष्ट', 'हृषीष्ट' इत्युदाहरणे।

**सिचि दाधास्थामिच्च(७/२/२४)**

इदमपि गुणनिषेधसूत्रं भवति। दाधास्था इत्येतासां प्रकृतीनामनिडादौ सिचि परत

---

152 पा.सू.१/२/११

153 पा.सू.१/२/१२

इकारोऽन्तादेशस्तस्य (इ)च गुणो न भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अदित', 'अदिषाताम्', 'अधित' 'अधिषाताम्', 'उपास्थिष्ट', 'उपास्थिषाताम्' इत्येतानि उदाहरणानि। पाणिनिना 'स्था घ्वोरिच्च'[154] इति सूत्रं प्रतिपादितम्। भोजदेवः घुसंज्ञां न स्वीकरोति इत्यस्मात् सूत्रे दाधा इति प्रयुक्तम्।

**गाङ ई स्ये च। (७/२/२५)**

अस्य सूत्रस्य हृदयहारिणीव्याख्यानं नष्टं जातम्। तत्र अगास्त इति पदमेव व्याख्याने दृश्यते। इदं कदाचिदस्य सूत्रस्योदाहरणं भवेत्।

**भूसुवोरनभ्यस्तयोस्तङिपिति। (७/२/२६)**

पाणिनिना 'भूसुवोस्तिङि'[155] इति सूत्रं प्रतिपादितम्। सार्वधातुके तिङ्प्रत्यये परे भूधातोः तथा सुधातोः अङ्गस्य गुणनिषेधार्थमिदं सूत्रमुक्तम्। 'भू सू एतयोः सार्वधातुके तिङिपरे गुणो न स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। किन्तु भोजदेवेन 'तङि पिति प्रत्यये परे गुणो न' इति उक्तम्। 'भू सू इत्येतयोरनभ्यस्तयोस्तङि पिति प्रत्यये परतो गुणो न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अभूत्', 'अभूः', 'सुवै', 'सुवावहै' इत्युदाहरणानि।

**हल्यनुंश्नोरुत औत्। (७/२/२७)**

'उतो वृद्धिर्लुकिहलि'[156] इति पाणिनीयसूत्रं वर्तते। लुग्विषये उकारस्य वृद्धिः स्यात्पिति

154 पा.सू.१/२/१७

155 पा.सू.७/३/८८

156 पा.सू.७/३/८९

हलादौ सार्वधातुके न त्वभ्यस्तस्य इति कौमुद्यामस्य सूत्रार्थः उक्तः। वृद्धिविधायकं सूत्रमिदम्। किन्तु दण्डनाथेन अनेन सूत्रेण औकारान्तादेशः विधीयते। हलादौ तिङि पिति प्रत्यये परतः उश्नुवर्जितस्योकारान्तहलादौ अनभ्यस्तस्यौकार अन्तादेशो भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'यौति', 'रौति' इत्येते उदाहरणे। यौति इत्युदाहरणं कौमुद्यामपि दृश्यते।

**वेर्णोः।** (७/२/२८)

पाणिनिना 'ऊर्णोतेर्विभाषा'[157] इति सूत्रं प्रतिपादितम्। पाणिनीये विकल्पेनवृद्धिविधायकमिदं सूत्रम्। वा वृद्धिः स्याद्धलादौ पिति सार्वधातुके इति अस्य सूत्रार्थः सिद्धान्तकौमुद्यामुक्तः। किन्तु भोजदेवेन विकल्पेन उद्विधायकमिदं सूत्रम्। ऊर्णोतेर्धातोस्तिङि पिति प्रत्यये परत उद्वा भवति इति दण्डनाथेन सूत्रार्थः उक्तः। 'प्रोर्णोति' इत्युदाहरणम्।

**नैकाली।** (७/२/२९)

पाणिनिना गुणोऽपृक्ते इति सूत्रमुक्तम्। सिद्धान्तकौमुद्यां ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके इति सूत्रार्थः उक्तः। तत्र वृद्धेः अपवादरूपेण गुणः विहितः। किन्तु औत् निषेधार्थमिदं सूत्रं भोजदेवेनोक्तं वर्तते। एकश्चासावल् एकाल् तस्मिन् हलि तिङ्प्रत्यये परतः ऊर्णोतेरुत औन्न भवति  इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'प्रोर्णोत्', 'प्रोर्णोः' इत्येते उदाहरणे।

157 पा.सू.७/३/९०

**तृणह इम् । (७/२/३०)**

पाणिनिना 'तृणह इम् '[158] इति सूत्रमुक्तम्। हलि पिति सार्वधातुके तृणह इत्यस्य अङ्गस्य इमागमार्थमिदं सूत्रमुक्तम्। 'तृहः श्नमि कृते इमागमः स्याद्धलादौ पिति' इति अस्य सूत्रार्थः सिद्धान्तकौमुद्यामुच्यते। भोजेनापि अनेनसूत्रेण इमागमो विधीयते। 'तृणह इति तृहिरागतश्नम्को गृह्यते तस्य हलादौ तिङि पिति प्रत्यये परतः इमागमो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'तृणेढि', 'तृणेक्षि', 'तृणेह्मि', 'अतृणेट्' इत्यादीनि उदाहरणानि।

**ब्रुवोरनाहेरीट्। (७/२/३१)**

पाणिनिना 'ब्रुव ईट्'[159] इति सूत्रमुक्तम्। ब्रुवः परस्य हलादेः पित ईट् स्यात् इति सिद्धान्तकौमुद्यामस्य सूत्रार्थः उक्तः। पाणिनिवत् भोजदेवोऽपि अनेन सूत्रेण इडागमो विधीयते। हृदयहारिण्यां ब्रुवो धातोराहादेशवर्जितात् परस्य हलादेः पितस्तिङ ईडागमो भवति इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'ब्रवीति', 'ब्रवीषि', 'ब्रवीमि' इत्यादीनि उदाहरणानि।

**यङो बहुलम्। (७/२/३२)**

पाणिनिना 'यङो वा'[160] इति सूत्रं प्रयुक्तम्। इडागमोऽनेन विधीयते। 'यङन्तात्परस्य

---

158 पा.सू.७/३/९२

159 पा.सू.७/३/९३

160 पा.सू.७/३/९४

हलादेः पितः सार्वधातुकस्य ईड्वा स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं यङो बहुलमित्युच्यते। यङन्ताद्धातोः परस्य हलादेः पितस्तिङ ईडागमो बहुलं भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। बहुलार्थे ईडागमो भोजेन विधीयते। तस्मात् क्वचिन्नित्यमेव। 'वावदीति', 'लालपीति', रोरवीति' क्वचिन्न भवति। 'नर्नर्ति', 'वर्वर्त्ति', 'वर्वर्ष्टि' क्वचिद्विकल्पः 'बोभोति', 'बोभवीति' इत्येतानि उदाहरणानि।

**अभ्वस्तिसिज्भ्यामपृक्तस्य। (७/२/३३)**

भोजदेवेन ईडागमविधायकमिदं सूत्रमुक्तम्। भूवर्जितास्तेः सिचश्च परस्यापृक्तस्य हलः पितस्तिङः ईडागमो भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'आसीत्', 'आसीः', 'अकार्षीत्', 'अकार्षीः' इत्येतानि उदाहरणानि। पाणिनिना 'अस्तिसिचोऽपृक्ते'[161] इति ईडागमविधायकं सूत्रं प्रयुक्तम्। 'अपृक्तस्य सार्वधातुकस्य अस्तेरङ्गात् सिजन्तात् च परे ईडागमः' अनेन विधीयते। इदं सूत्रं स्वीकृत्य भोजेन अभ्वस्तिसिज्भ्यामपृक्तस्य' इति सूत्रं प्रतिपादितम्।

**रुदिस्वपिश्वस्यनिजाक्षिभ्योऽट् च। (७/२/३४)**

पाणिनिना 'रुदश्च पञ्चभ्यः'[162] इति सूत्रं प्रयुक्तम्। 'हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। रुदादीनां पञ्चानां प्रतिपादनेन भोजेनेदं सूत्रमुक्तम्।

---

161 पा.सू.७/३/९६

162 पा.सू.७/३/९८

'रुदादिभ्यः पञ्चभ्यः परस्यापृक्तस्य तिङोऽट् चकारादीट् चागमो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अरोदत्', 'अरोदीत्', 'अस्वपत्', 'अस्वपीत्', 'अश्वसत्', 'अश्वसीत्', 'प्राणत्' 'प्राणीत्', 'अजक्षत्', 'अजक्षीत्', इत्यादीनि उदाहरणानि।

**अदः। (७/२/३५)**

पाणिनिना 'अदः सर्वेषाम्'[163] इति सूत्रमुक्तम्। अडागमोऽनेन विधीयते। 'अदः परस्यापृक्तसार्वधातुकस्य अडागमः स्यात्सर्वमतेन' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनेदं सूत्रम् 'अदः' इत्येवोक्तम्। 'अदेर्धातोः परस्यापृक्तस्य हलस्तिङोऽडागमो भवति' इति हृदयहारिण्यामस्यार्थः उक्तः। 'आदत्' 'आदः' इत्युदाहरणे।

**अत आद् यञि। (७/२/३६)**

पाणिनिना इदं सूत्रं 'अतो दीर्घो यञि'[164] इत्युक्तम्। 'अतोऽङ्गस्य दीर्घः स्याद् यञादौ सार्वधातुके परे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन अत् आत् यञि इति सूत्रमुक्तम्। 'अकारान्तायाः प्रकृतेर्यञादौ तिङि प्रत्यये परतोऽन्त्यस्याकारादेशो भवति' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'भवामि', 'पचामि', 'पचावः', 'करिष्यामि', 'करिष्यावः' इत्यादीनि उदाहरणानि।

163 पा.सू.७/३/१००

164 पा.सू.७/३/१०१

**सुपि च। (७/२/३७)**

पाणिनिना इदं सूत्रं 'सुपि च'[165] इत्येवोक्तम्। 'यञादौ सुपि परेऽतोऽङ्गस्य दीर्घः स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजदेवेनेवमेवस्वीकृतस्यास्य सूत्रार्थः दण्डनाथेन 'सुपि च यञादौ प्रत्यये परतोऽदन्तायाः प्रकृतेरन्त्यस्यात् भवति' इत्युक्तम्।। 'वृक्षाय', 'वृक्षाभ्याम्' इत्युदाहरणे।

**बहुवचने झल्येत्। (७/२/३८)**

पाणिनिना 'बहुवचने झल्येत् '[166] इति सूत्रं प्रयुक्तम्। अङ्गस्यैकारः अनेन विधीयते। 'झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'सुपि झलादौ बहुवचने परतोऽदन्तायाः प्रकृतेरन्त्यस्यैत् भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'वृक्षेभ्यः', 'वृक्षेषु', 'अमीभिः', 'विश्वेषाम्' इत्यादीनि उदाहरणानि।

**ओसि च(७/२/३९)**

'ओसि च' इति भोजसूत्रस्यार्थः हृदयहारिणीव्याख्याने दण्डनाथेन 'अदन्तायाः प्रकृतेरोसि परतोऽन्त्यस्यैद्' भवति इत्युक्तम्। 'ओसि च'[167] इति सूत्रं पाणिनिना उक्तं भवति।

---

165 पा.सू.७/३/१०२

166 पा.सू.७/३/१०३

167 पा.सू.७/३/१०४

तत् सूत्रं भोजदेवेनात्र स्वीकृतम्। 'वृक्षयोः', 'स्वम्' 'वृक्षयोर्निधेहि' इत्युदाहरणम्।

**टि च दीर्घापः(७/२/४०)**

पाणिनिना इदं सूत्रम् 'आङि चापः'[168] इति प्रतिपादितम्। 'आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात् ' इति कौमुद्यामस्यार्थः उक्तः। भोजदेवेनेदं सूत्रं 'टि च दीर्घापः' इति उक्तम्। पाणिनिवत् एकारः अनेन विधीयते। 'दीर्घो य आप् तदन्तायाः प्रकृतेस्तृतीयैकवचने ओसि च परतोऽन्त्यस्यैत्वं भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'खट्वया', 'खट्वयोः', 'बहुराजया', 'बहुराजयोः' इत्येतानि उदाहरणानि।

**सम्बुद्धौ च(७/२/४१)**

भोजव्याख्याने हृदयहारिण्यां सम्बोधनप्रथमैकवचने दीर्घाबन्तायाः प्रकृतेरन्त्यस्यै-कारादेशो भवति इति अस्य सूत्रार्थः दृश्यते। पाणिनिना 'सम्बुद्धौ च'[169] इत्येवेदं सूत्रं प्रतिपादितम्। तत् सूत्रं भोजदेवेनात्र स्वीकृतम्। 'हे खट्वे', 'हे बहुराजे', 'हे कारीषगन्ध्ये' इत्येतानि उदाहरणानि।

**अम्बार्थानामडलेकानां ह्रस्वः। (७/२/४२) स्त्र्याख्येदूतोऽनियुवः। (७/२/४३)**

पाणिनिना सम्बुद्धौ अम्बार्थानां नद्यन्तानां च ह्रस्वविधायकं 'अम्बार्थनद्योर्ह्रस्वः'[170] इति

168 पा.सू.७/३/१०५

169 पा.सू.७/३/१०६

170 पा.सू.७/३/१०७

सूत्रं प्रयुक्तम्। अस्य सूत्रव्याख्याने 'डलकवतीनां प्रतिषेधो वक्तव्य' इति वार्तिकं कात्यायनेन उक्तञ्च। अस्य सूत्रस्य तथा वार्तिकस्य स्वीकारेण भोजेनेदं सूत्रद्वयमुक्तम्। 'अम्बार्था मात्रर्थाः तेषां डलेकशब्दरहितानामाबन्तानां सम्बुद्धौ परतो ह्रस्वो भवति' इति 'अम्बार्थानामडलेकानां ह्रस्वः' इत्यस्य तथा 'स्त्र्याख्यं यदीदन्तमूदन्तं वा अनियुवसम्बन्धिप्रकृतिरूपं तस्य सम्बुद्धौ परतोऽलोन्त्यस्य ह्रस्वो भवति' इति 'स्त्र्याख्येदूतोऽनियुवः' इत्यस्य चार्थः हृदयहारिण्यामुक्तः। 'हे अम्ब', 'हे अक्क', 'हे अल्ल', 'हे अत्त', इत्यादीनि 'अम्बार्थानामडलेकानां ह्रस्वः' इत्यस्य एवं 'हे कुमारि', 'हे गौरि', 'हे लक्ष्मि', 'हे तन्त्रि', 'हे ब्रह्मबन्धु' 'स्त्र्याख्येदूतोऽनियुवः' इत्यस्य च उदाहरणानि दत्तानि। पाणिनिना 'यूस्त्र्याख्यौ नदी'[171] इति सूत्रेण ईकारान्त-ऊकारान्तस्त्रीलिङ्गशब्दानां नदीसंज्ञा उक्ता इत्यस्मात् अम्बार्थनद्योर्ह्रस्वः इति सूत्रमुक्तम्। भोजदेवः दण्डनाथश्च 'नदी संज्ञा' न स्वीकुरुतः।

**स्त्रियाः। (७/२/४४)**

पाणिनिना 'स्त्रियाः'[172] इति सूत्रं प्रयुक्तम्। 'इयङ्' आदेशः अनेन विधीयते। 'स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। किन्तु भोजदेवेन 'पाणिनिना सम्बुद्धौ प्रत्यये परे' इति नोक्तम्। भोजदेवेन इदं सूत्रमत्र स्वीकृतम्। 'स्त्रीशब्दस्य सम्बुद्धौ परतो ह्रस्वो भवति' इति हृदयहारिण्यां सूत्रार्थः उक्तः। 'हे स्त्रि' इत्युदाहरणम्।

---

171 पा.सू.१/४/३

172 पा.सू.६/४/७९

**मातुर्मातच् पुत्रे श्लाघ्ये। (७/२/४५)**

भोजदेवेन मातजादेशविधायकं इदं सूत्रं प्रतिपादितम्। हृदयहारिण्यां 'स्वपदार्थोपसर्जनो यो मातृशब्दो बहुव्रीहौ समासेऽन्यपदार्थे श्लाघ्ये पुत्रे वर्तते। तस्य सम्बुद्धौ परतो मातजादेशो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'हे गार्गीमात', 'हे वात्सीमातेति' उदाहरणे। 'अम्बार्थनद्योर्ह्रस्वः' इति सूत्रव्याख्याने 'मातृणां मातजादेशो वक्तव्यः सम्बुद्धौ, पुत्राय पुत्रम् अभिधातुम्' इति वाक्यमस्ति। तत् भोजदेवेनात्र सूत्रत्वेनोक्तम्।

**इदुतोर्गुणः। (७/२/४६)**

गुणविधायकमिदं भोजसूत्रम्। इदुदन्तायाः प्रकृतेः सम्बुद्धौ परतो गुणो भवति इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'हे अग्ने', 'हे वायो', 'हे बुद्धे', 'हे धेनो', 'हे वारे', 'हे त्रपो' इत्यादीनि उदाहरणानि। पाणिनिना 'ह्रस्वस्य गुणः'[173] इति सूत्रेण इमानि कार्याणि उक्तानि।

**जसि च। (७/२/४७)**

पाणिनिना 'जसि च'[174] इति सूत्रं प्रयुक्तम्। 'ह्रस्वान्तस्याऽङ्गस्य गुणः स्याज्जसि परे' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदमेव सूत्रं भोजदेवेनात्र स्वीकृतम्। 'इधुपधायाः प्रकृतेर्जसिप्रत्यये परतोऽन्त्यस्य गुणो भवति' इति हृदयहारिण्यां सूत्रार्थः उक्तः। जसि परे गुणः

---

173 पा.सू.७/३/१०८

174 पा.सू.७/३/१०९

द्वयोरपि विधीयते। 'अग्नयः', 'वायवः', 'बुद्धयः', 'धेनवः' इत्यादीनि उदाहरणानि।

**ङित्यसख्युः। (७/२/४८)**

इदमपि गुणविधायकं सूत्रं भवति। 'इदुदन्तायाः सखिवर्जितायाः प्रकृतेर्ङिति सुपि प्रत्यये परतो गुणो' भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अग्नये', 'अग्नेरागच्छति' 'अग्नेः स्वम्'। 'वायवे', 'वायोरागच्छति', 'वायोः स्वम्' इत्यादीनि उदाहरणानि। पाणिनिना घिसंज्ञमुक्तम्। तस्याधारेण इदं सूत्रं 'घेर्ङिति'[175] इत्युक्तम्। भोजदेवेन घिसंज्ञा न स्वीक्रियते इत्यस्मात् 'ङित्यसख्युः' इत्युक्तम्।

**पत्युः समास एव। (७/२/४९)**

पाणिनिना 'पतिः समास एव'[176] इति सूत्रं प्रयुक्तम्। पतिशब्दः समास एव घिसंज्ञः स्यात् इति कौमुद्यामस्यार्थः उक्तः। 'शेषो घ्यसखि'[177] इति सूत्रेण पतिशब्दस्य घिसंज्ञा प्राप्ता। अनेन वर्तमानसूत्रेण सा संज्ञा नियम्यते। अत्र भोजेन सूत्रं तत् स्वीकृतं चेदपि अर्थाः भिन्नाः कल्पिताः। 'पतिशब्दस्य समास एव वर्तमानस्य ङिति प्रत्यये परतो गुणो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उकक्तः। 'बृहस्पतये', 'बृहस्पतेरागच्छति', 'बृहस्पतेः स्वम्' इत्यादीनि उदाहरणानि।

---

175 पा.सू.७/३/१११

176 पा.सू.१/४/८

177 पा.सू.१/४/७

**स्त्रियां वा ।** (७/२/५०)

विकल्पेन गुणविधायकमिदं सूत्रम्। दण्डनाथेन अस्य सूत्रार्थः 'इकारान्तस्योकारान्तस्य च स्त्रियां वर्तमानस्य ङिति सुपि परतो गुणो वा भवति' इति उक्तः। 'बुद्धये'/'बुद्ध्यै', 'धेनवे'/'धेन्वै', 'बुद्धेः'/'बुद्ध्याः', 'धेनोः'/'धेन्वाः', 'शुचये'/'शुच्यै', 'पटवे'/'पट्व्यै' इत्युदाहरणानि।

**स्त्रीयूभ्यां चाट्।** (७/२/५१)

पाणिनिना 'आण्नद्याः'[178] इति सूत्रं प्रयुक्तम्। आडागमविधायकमिदं सूत्रम्। 'नद्यन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य आडागमो भवतीति' अस्य सूत्रार्थः कौमुद्यामुक्तः। नदीसंज्ञा भोजदेवेन न प्रयुक्ता इत्यस्मात् 'स्त्रीयूभ्यां चाट् ' इति सूत्रमुक्तम्। 'नित्यस्त्रीविषयं यदीदन्तमुदन्तं चकारादिदन्तमुदन्तं च तस्मादुत्तरस्य ङित सुप आडागमो भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। 'कुमार्यै', 'कुमार्याः', 'कुमार्याम्', 'लक्ष्म्यै', 'लक्ष्म्याः', 'लक्ष्म्याम्', 'वध्वै', 'वध्वाः', 'वध्वाम्', 'बुद्ध्यै', 'बुद्ध्याः', 'बुद्ध्याम्', 'धेन्वै', 'धेन्वाः', 'धेन्वाम्' इत्यादीनि उदाहरणानि। पूर्वसूत्रेण स्त्रियामित्यनुवर्तमाने पुनः स्त्रीग्रहणं नित्यस्त्रीविषयार्थम् इति दण्डनाथेनोच्यते।

---

178 पा.सू.७/३/११२

**इयुवुस्थानाभ्यामस्त्रियां वा। (७/२/५२)**

'इयुवोः स्थानं यदीदन्तमूदन्तं च स्त्रीशब्दवर्जितं नित्यस्त्रीविषयं तस्मात्परस्य ङितः सुप आडागमो वा भवति'। आडागमो अनेन विधीयते। 'श्रियै', 'श्रिये', 'श्रियः' इत्यादीनि उदाहरणानि।

**याडापः । (७/२/५३)**

पाणिनिना 'याडापः'[179] इति सूत्रं प्रयुक्तम्। आपः परस्य ङिद्वचनस्य याडागमः स्यात् इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन स्वीकृतस्यास्य सूत्रार्थः दण्डनाथेन 'आबन्तायाः प्रकृतेरुत्तरस्य ङितः सुप्प्रत्ययस्य याडागमो भवति' इत्युक्तम्। 'खट्वायै', 'खट्वायाः', 'खट्वायाम्' इत्यादीनि उदाहरणानि।

**सर्वनाम्नः स्याडच्च। (७/२/५४)**

पाणिनिना 'सर्वनाम्नः स्याड्ढ्रस्वश्च'[180] इति सूत्रं प्रयुक्तम्। 'आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'सर्वनाम्नः स्याडच्च' इत्युक्तम्। आडागमेन साकं चकारान्तादेशोऽपि अनेन विधीयते। 'आबन्तात्सर्वनाम्नः परस्य ङितः सुप्रत्ययस्याडागम आबन्तस्य चकार अन्तादेशो भवति' इति हृदयहारिण्यामस्य

---

[179] पा.सू.७/३/११३

[180] पा.सू.७/३/११४

सूत्रार्थः उक्तः। 'सर्वस्यै', 'सर्वस्याः', 'सर्वस्याम्', 'विश्वस्यै', 'विश्वस्याः', 'विश्वस्याम्' इत्यादीनि उदाहरणानि। एतेषु 'सर्वस्यै', 'सर्वस्याः' इत्युदाहरणे कौमुद्यां स्तः।

**द्वितीयातृतीयाभ्यां वा। (७/२/५५)**

पाणिनिना 'विभाषा द्वितीयातृतीयाभ्याम्'[181] इति सूत्रं प्रयुक्तम्। 'आभ्यां ङितः स्याड्वा स्यादापश्च ह्रस्वः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं द्वितीयातृतीयाभ्यां वा इत्युक्तम्। 'द्वितीयातृतीयाशब्दाभ्यामाबन्ताभ्यां परस्य ङितः सुपः स्याडागमो भवति तत्सन्नियोगेन च पूर्वस्य अकारः अन्तादेशो वा भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'द्वितीयस्यै', 'द्वितीयायै', 'द्वितीयस्याः', 'द्वितीयायाः', 'द्वितीयस्यां', 'द्वितीयायां', 'तृतीयस्यै', 'तृतीयायै' 'तृतीयस्याः' 'तृतीयायाः' 'तृतीयस्यां' 'तृतीयायाम्' इत्यादीनि उदाहरणानि। तेषु 'द्वितीयस्यै', 'द्वितीयायै', 'द्वितीयस्याः', 'द्वितीयायाः', 'द्वितीयस्यां', 'द्वितीयायाम्' इमानि कौमुद्यामपि वर्तन्ते।

**ङेरामाडादिभ्यः। (७/२/५६) नियः। (७/२/५७)**

पाणिनिना 'ङेराम्नद्याम्नीभ्यः'[182] इति सूत्रं प्रयुक्तम्। 'नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात् इति' कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन इदं सूत्रं विभज्य 'ङेरामाडादिभ्यः' 'नियः' इति सूत्रद्वयमुक्तम्। 'ङेरामाडादिभ्यः इत्यस्य आट् याट् स्याड्च आगमेभ्यः परस्य ङेरामादेशो

181 पा.सू.७/३/११५

182 पा.सू.७/३/११६

भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'कुमार्यां', 'ब्रह्मबन्ध्वां', 'बुद्ध्यां', 'धेन्वां', 'श्रियां', 'भ्रुवां', 'रषद्वायां' 'सर्वस्याम्' इत्यादीनि उदाहरणानि। 'नियः' इत्यस्य नी इत्येतस्यात्परस्य ङेरामादेशो भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। 'नियां', 'परमनियां', 'ग्रामण्यां', 'सेनान्याम्' इत्यादीनि उदाहरणानि।

**सखिपतिभ्यामौत् (७/२/५८)**

पाणिनिना 'औत्'[183] इति सूत्रं प्रतिपादितम्। इदुद्भ्यां परस्य ङेरौत्स्यात् इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिनिना केवलमौत् इति प्रयुक्तं सूत्रं भोजेन सखिपतिभ्यामौत् इति प्रतिपादितम्। सखिपतिभ्यामुत्तरस्य ङेरौकारादेशो भवति इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'सख्यौ', 'पत्यौ' इत्युदाहरणे। 'सख्यौ' इति उदाहरणं सिद्धान्तकौमुद्यां च दृश्यते।

**इदुद्भ्यामेङोऽच्चैङः। (७/२/५९)**

पाणिनिना 'इदुद्भ्याम्'[184] इति इदं सूत्रं प्रयुक्तम्। 'नदीशब्दकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन 'इदुद्भ्यामेङोऽच्चैङः' इति इदं सूत्रं प्रयुक्तम्। 'इदन्तादुदन्ताच्च कृतैङः परस्य ङेरौकारस्य चैङस्तत्सन्नियोगेनाकारादेशो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'अग्नौ', 'वायौ', 'वध्वौ', 'धेनौ' इत्यादीनि उदाहरणानि।

---

183 पा.सू.७/३/११८

184 पा.सू.७/३/११७

**टोऽस्त्रियां न। (७/२/६०)**

पाणिनिना इदं सूत्रम् 'आङो नाऽस्त्रियाम्'[185] इति प्रतिपादितम्। 'घेः परस्याङो ना स्यादस्त्रियाम्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेन 'टोऽस्त्रियां न' इति सूत्रमुक्तम्। हृदयहारिण्याम् 'इदन्तादुदन्ताच्च परस्य टेस्तृतीयैकवचनस्यास्त्रियां ना इत्ययमादेशो भवति' इति सूत्रार्थः उक्तः। 'अग्निना', 'वायुना', 'प्रियसखिना', 'नरपतिना' इत्यादीनि उदाहरणानि।

**ऋतो ङिसुटोर्गुणः । (७/२/६१) संयोगादेर्लिटि। (७/२/६२)**

पाणिनिना 'ऋतश्च संयोगादेर्गुणः'[186] इति सूत्रं प्रयुक्तम्। 'ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं द्विधा विभक्तम् 'ऋतो ङिसुटोर्गुणः', 'संयोगादेर्लिटि' इति च। 'ऋतो ङिसुटोर्गुणः इत्यस्य सूत्रार्थः हृदयहारिण्यां ऋकारान्तायाः प्रकृतेर्ङौ सुटि च प्रत्यये परतो गुणो' भवति इत्युक्तः। 'पितरि', 'पितरौ', 'पितरः', 'पितरं', 'पितरौ', 'मातरि', 'मातरौ', 'मातरः', 'मातरं', 'मातरौ', इत्यादीनि उदाहरणानि। 'संयोगादेर्लिटि' इत्यस्य सूत्रार्थः 'ऋदन्तस्य संयोगादेर्धातोः लिटि परतोऽन्त्यस्य गुणो भवति' इति हृदयहारिण्यामुक्तः। 'सस्मरतुः', 'सस्मरुः', 'सस्वरतुः', 'सस्वरुः, इत्यादीनि उदाहरणानि।

**ऋद्दच्छृणाम्। (७/२/६३)**

पाणिनिना 'ऋच्छत्यृताम्'[187] इति सूत्रं प्रयुक्तम्। 'तौदादिकऋच्छेर्ऋधातोर्ऋतां च

---

185 पा.सू.७/३/१२०

186 पा.सू.७/४/१०

187 पा.सू.७/४/११

गुणः स्याल्लिटि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'ऋद्दच्छृणाम्' इति प्रयुक्तम्। 'ऋकारान्तानामृच्छति ऋकारस्य च लिटि प्रत्यये परतो गुणो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'विचकरतुः' 'विचकरुः' इत्येते उदाहरणे।

**श्दृप्रां ह्रस्वश्च। (७/२/६४)**

पाणिनिना 'श्दृप्रां ह्रस्वो वा'[188] इति सूत्रमुक्तम्। 'एषां किति लिटि ह्रस्वो वा स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजदेवेन 'श्दृप्रां ह्रस्वश्च' इति इदं सूत्रं प्रतिपादितम्। हृदयहारिण्यां 'श्दृप्रा' इत्येतासां 'प्रकृतीनां लिटि प्रत्यये परतो ह्रस्वश्चकाराद्यथा प्राप्तो गुणश्च भवति' इति अस्य सूत्रार्थः उक्तः। 'विशश्रतुः', 'विशश्रुः', 'विशशरतुः', 'विशशरुः', 'विदद्रतुः', 'विदद्रुः', 'विददरतुः', 'विददरुः', 'निपप्रतुः', 'निपप्रुः', 'निपपरतुः', 'निपपरुः' इत्येतानि उदाहरणानि।

**ऋद्दशोऽङि। (७/२/६५)**

पाणिनिना 'ऋद्दशोऽङि गुणः'[189] इति इदं सूत्रं प्रतिपादितम्। 'ऋवर्णान्तानां दृशेश्च गुणः स्यादङि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'ऋद्दशोऽङि' इति प्रतिपादितम्। 'ऋवर्णानां धातूनां दृशेश्चाङिप्रत्यये परतो गुणो भवति' इति हृदयहारिण्या-मस्यार्थः उक्तः। 'आरत्', 'आरताम्', 'असरत्', 'असरताम्', 'अजरत्', 'अजरताम्', 'अदर्शत्',

188 पा.सू.७/४/१२

189 पा.सू.७/४/१६

'अदर्शताम्' इत्येतानि उदाहरणानि।

**श्वयतेरत् ।** (७/२/६६)

पाणिनिना 'श्वयतेरः'[190] इति इदं सूत्रं प्रतिपादितम्। 'श्वयतेरिकारस्य अकारः स्यादङि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनेदं 'श्वयतेरत्' इति प्रतिपादितम्। 'श्वयतेर्धातो-रङ्प्रत्यये परतोऽकारोऽन्तादेशो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अश्वत्' 'अश्वताम्' इत्येते उदाहरणे। इमे उदाहरणे कौमुद्यामपि दृश्यते।

**असुपतवचां थुक्पुतुमः।** (७/२/६७)

पाणिनिना अङि परे अस्यतेरङ्गस्य थुगागमविधायकं 'अस्यतेस्थुक्'[191] पतेरङ्गस्य पुमागमविधायकं 'पतः पुम्'[192] वचेरङ्गस्य उमागमविधायकं 'वच उम्'[193] इति सूत्रत्रयमुक्तम्। इमानि सूत्राणि सम्मिल्य भोजदेवेन 'असुपतवचां थुक्पुतुमः' इति सूत्रमुक्तम्। 'असु पतवच इत्येतेषां धातूनाम् आङि प्रत्यये परतो यथासंख्यं थुक् पुङम् इत्येते आगमा भवन्ति' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'आस्थत्' 'आस्थताम्' 'पर्यास्थत' 'अपप्रत्' 'अपप्रताम्' 'अवोचत्' 'अवोचताम्' इत्येतानि उदाहरणानि। 'आस्थत्' 'अवोचत्' 'अवोचताम्' इत्येतानि

---

190 पा.सू.७/४/१८

191 पा.सू.७/४/१७

192 पा.सू.७/४/१९

193 पा.सू.७/४/२०

उदाहरणानि तत्तत् सूत्रव्याख्याने कौमुद्यामुक्तानि।

**के तद्धितेऽणो ह्रस्वः। (७/२/६८)**

पाणिनिना 'केऽणः'[194] इति सूत्रं प्रयुक्तम्। 'के परेऽणो ह्रस्वः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'के तद्धितेऽणो ह्रस्वः' इति इदं सूत्रं भोजदेवेन प्रतिपादितम्। 'तद्धिते कन् प्रत्यये परतोऽणन्तायाः प्रकृते ह्रस्वो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'खट्वका', 'किलालपका', 'कुमारिका', 'ब्रह्मबन्धुका', इत्यादीनि उदाहरणानि। भोजदेवेन 'तद्धित' इति पदं सूत्रे प्रयुक्तम्। तस्य प्रयोजनमुच्यते 'राका' 'धाका' प्रकृतेरित्येव कुमारिकायति इत्यत्र कुमारिक कुमारिकः न कपीति निषेधादिह सानुबन्धस्यापि कपोग्रहणं भवति इति।

**न कापि। (७/२/६९)**

'न कापि'[195] इति सूत्रं पाणिनिना प्रयुक्तं वर्तते। 'कापि परेऽणो ह्रस्वो न स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन तद्वदेवेदं सूत्रं स्वीकृतम्। 'कापि प्रत्यये परतोऽणो ह्रस्वो न भवति' इति हृदयहारिण्यामस्यार्थः उक्तः। 'बहुकीलालपाकः', 'बहुकुमारिकः', 'बहुवधूकः' इत्येतानि उदाहरणानि।

---

194 पा.सू.७/४/१३

195 पा.सू.७/४/१४

**आपो वा। (७/२/७०)**

'आपोऽन्यतरस्याम्'[196] इति इदं सूत्रं पाणिनिना प्रयुक्तम्। 'काप्याबन्तस्य ह्रस्वो वा स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। भोजेन 'आपो वा' इति इदं सूत्रं स्वीकृतम्। 'कपि प्रत्यये परत आपो ह्रस्वो वा न भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'बहुखद्वकः', 'बहुखद्वाकः', 'बहुमालकः', 'बहुमालाकः', इत्येतानि उदाहरणानि।

**शीङ एत् सार्वधातुके। (७/२/७१)**

'शीङः सार्वधातुके गुणः'[197] इति सूत्रं पाणिनिना प्रयुक्तम्। शीङः अङ्गस्य सार्वधातुके परतः गुणप्राप्त्यर्थमिदं सूत्रमुक्तम्। क्ङिति च इत्यस्य अपवादसूत्रमिदम्। गुणशब्दस्य एत् इति कृत्वा भोजदेवेन सूत्रमुक्तम्। 'शीङो धातोः सार्वधातुके प्रत्यये परतः एत् भवति' इति हृदयहारिण्यामस्य सूत्रार्थो दण्डनाथेनोक्तः।। 'शेते', 'शयाते', 'शयानः' इत्यादीनि उदाहरणानि। 'शेते', 'शयाते' इति इमे उदाहरणे कौमुद्यां वर्तेत।

**अयङ्यिक्ङिति। (७/२/७२)**

पाणिनिना 'अयङ् यि क्ङिति'[198] इति सूत्रं प्रयुक्तम्। 'शीङोऽयङादेशः स्याद्यादौ क्ङिति परे' इति अस्य अर्थः कौमुद्यामुक्तः। भोजदेवेनेदं सूत्रमत्र स्वीकृतम्। 'यकारादौ क्ङिति

---

196 पा.सू.७/४/१५

197 पा.सू.७/४/२१

198 पा.सू.७/४/२२

प्रत्यये परतः शीङो धातोरयङित्ययमादेशो' भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'शय्यते', 'शाशय्यते', 'संशय्य', 'शय्यायि' इत्यादीनि उदाहरणानि।

**उपसर्गादूहो ह्रस्वश्च। (७/२/७३)**

'उपसर्गाद्ध्रस्व ऊहतेः'[199] इति सूत्रं पाणिनिना प्रयुक्तम्। यकारादौ क्ङिति प्रत्यये परे उपसर्गादुत्तरस्य उहतेरङ्गस्य ह्रस्वविधायकार्थमिदं सूत्रं प्रवृत्तम्। इदं सूत्रं भोजदेवेन 'उपसर्गादूहो ह्रस्वश्च' इति प्रतिपादितम्। 'उपसर्गात्परस्य ऊहतेर्यकारादौ क्ङिति प्रत्यये परतो ह्रस्वो न भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'समुह्यते', 'समुह्यात्', 'समुह्यगतः' इत्येतानि उदाहरणानि।

**लिङीणः। (७/२/७४)**

पाणिनिना 'एतेर्लिङि'[200] इति सूत्रमुक्तम्। 'उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यादार्धधातुके किति लिङि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनेदं सूत्रं 'लिङीणः' इति प्रतिपादितम्। 'उपसर्गात्परस्येणो धातोर्यकारादौ लिङि प्रत्यये परतो ह्रस्वो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'उदियात्', 'उदियास्ताम्' 'उदियासुः' इत्यादीनि उदाहरणानि।

---

199 पा.सू.७/४/२३

200 पा.सू.७/४/२४

**दीर्घोऽकृत्सार्वधातुके। (७/२/७५)**

'अकृत्सार्वधातुकयोर्दीर्घः'[201] इति सूत्रं पाणिनिना प्रतिपादितम्। 'अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे न तु कृत्सार्वधातुकयोः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनेदं सूत्रं 'दीर्घोऽकृत्सार्वधातुके' इति प्रतिपादितम्। 'कृत्सार्वधातुकवर्जिते यकारादौ क्ङितिप्रत्यये परतोन्त्यस्य दीर्घो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः दण्डनाथेनोक्तः। 'भृशायते', 'सिधीयति', 'मधूयति', 'चीयते', 'सूयते', 'चेचीयते', 'चीयात्' 'सूयात्' इत्यादीनि उदाहरणानि।

**च्वौ च। (७/२/७६)**

पाणिनिना 'च्वौ च'[202] इति सूत्रं प्रतिपादितम्। 'च्वौ परे पूर्वस्य दीर्घः स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन तद्वदेवेदं सूत्रं स्वीकृतम्। 'च्विप्रत्यये परतोऽजन्तायाः प्रकृतेर्दीर्घो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'शुचीकरोति', 'शुचीभवति' इत्येते उदाहरणे।

**रीङ्गृतः। (७/२/७७)**

'रीङ् ऋतः'[203] इति सूत्रं पाणिनिना प्रतिपादितम्। 'अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजदेवेन स्वीकृतस्यास्य सूत्रस्य सूत्रार्थः 'ऋकारान्तायाः प्रकृतेश्च्वौ यकारादावकृत्सार्वधातुके च प्रत्यये

---

201 पा.सू.७/४/२५

202 पा.सू.७/४/२६

203 पा.सू.७/४/२७

परतो रीङित्ययमादेशो' भवति इति हृदयहारिण्यामुच्यते। 'पित्रीकरोति', 'पित्रीभवति', 'पित्रीस्यात्', 'पित्रीयते', 'चेक्रीयते', 'जह्रीयते' इत्येतानि उदाहरणानि।

**रिङ् शे। (७/२/७८) यगाशीर्लिङोर्ये। (७/२/७९)**

पाणिनिना 'रिङ् शयग्लिङ्क्षु',[204] इति सूत्रं प्रतिपादितम्। शप्रत्यये परे यक् प्रत्यये परे असार्वधातुके लिङ्लकारे परे च ऋकारान्तधातोः रिङ् आदेशसिद्ध्यर्थमिदं सूत्रं पाणिनिना प्रयुक्तम्। 'शे यकि यादावार्धधातुके लिङि च ऋतो रिङादेशः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। किन्तु भोजदेवेनानेन 'रिङ् शे' इति सूत्रेण केवलं 'शप्रत्यये परे रिङादेशः' उक्तः। 'ऋदन्तस्य धातो शप्रत्यये परतो रिङादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'व्याप्रियते', 'भाद्रियते', 'आध्रियते' इत्यादीनि उदाहरणानि।

'यगाशीर्लिङोर्ये' इति 'यक्प्रत्यये' 'असर्वधातुकलिङ्लकारे परे च रिङादेशः' सिध्यति। हृदयहारिण्यामस्य सूत्रार्थः एवमुच्यते यत् भोजसूत्रेण 'यक्याशीर्लिङि च यकारादौ प्रत्यये परतो रिङन्तादेशो भवति' इति। 'क्रियते', 'ह्रियते', 'क्रियास्ताम्' इत्युदाहरणम्। पाणिनीयं 'रिङ् शयग्लिङ्क्षु' इति सूत्रं भोजदेवेन विभज्य प्रयुक्तम्।

**असुद्वंयोगाद्यर्त्योर्गुणः। (७/२/८०)**

पाणिनिना 'गुणोऽर्तिसंयोगाद्योः'[205] इति सूत्रं प्रयुक्तम्। 'सुङ्वर्जितसंयोगादीनामृ-कारान्तानामर्त्तेश्च धातोर्यक्याशार्लिङि च यकारादौ प्रत्यये परतोऽलोऽन्त्यस्य अर्तेः

[204] पा.सू.७/४/२८

[205] पा.सू.७/४/२९

संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिनीयमिदं सूत्रं भोजदेवेनैवमुक्तम्। 'सुड्वर्जितसंयोगादीनामृकारान्तानामर्त्तेश्च धातोर्यक्याशीर्लिङि च यकारादौ प्रत्यये परतोऽलोऽन्त्यस्य गुणो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'स्मर्यते', 'स्मर्यात्', 'स्वर्यते', 'स्वर्यात्' इत्यादीनि उदाहरणानि।

**यङि च। (७/२/८१)**

पाणिनिना 'यङि च'[206] इति सूत्रं प्रतिपादितम्। 'अर्तेः संयोगादेश्च ऋतो गुणः स्याद्यङि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'यङि परतोऽसुट् संयोगादीनामृकारान्तानामर्तेश्च गुणो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'सास्मर्यते', 'सास्वर्यते', 'आरार्यते' इत्येतानि उदाहरणानि।

**हनो घ्नी हिंसायाम् । (७/२/८२)**

पाणिनिना 'यङि च' इति सूत्रं प्रतिपादितम्। अस्य सूत्रस्य व्याख्याने कात्यायनेन 'हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः' इति एकं वार्तिकं प्रतिपादितम्। अस्य वार्तिकस्वीकारेण भोजेनेदं सूत्रमुक्तम्। 'हनो हिंसायां वर्तमानस्य यङि परतो घ्नी इत्ययमादेशो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'जेघ्नीयते' इत्युदाहरणम्।

**ईघ्राध्मोः। (७/२/८३)**

पाणिनिना 'ई घ्राध्मोः'[207] इति सूत्रं प्रयुक्तम्। घ्रा ध्मा इत्येतयोः यङि परतः

---

206 पा.सू.७/४/३०

207 पा.सू.७/४/३१

ईकारादेशसिद्ध्यर्थमिदं सूत्रं प्रतिपादितम्। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। घ्राध्मा इत्येतयोर्यङि परत ईकारः अन्तादेशो भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'जेघ्रीयते', 'देध्मीयते' इत्येते उदाहरणे। इमे उदाहरणे कौमुद्यां वर्तेत।

**अस्य च्वावनव्ययस्य। (७/२/८४)**

पाणिनिना 'अस्य च्वौ'[208] इति सूत्रं प्रतिपादितम्। अवर्णस्य ईत्स्यात् च्वौ इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं 'अस्य च्वावनव्ययस्य' इति प्रतिपादितम्। 'अवर्णान्तायाः प्रकृतेरव्ययवर्जितायाश्च्वौ परत ईकारादेशो भवति' इति हृदयहारिण्यां दण्डनाथेनास्य सूत्रार्थः उक्तः। 'शुक्लीकरोति', 'शुक्लीभवति', 'शुक्लीस्यात्', 'खट्वीकरोति', 'खट्वीभवति', 'खट्वीस्यात्' इत्यादीनि उदाहरणानि। सूत्रे अनव्ययस्य इत्यस्य प्रयोजनमनेनोदाहरणेन स्पष्टीकरोति दण्डनाथः । यथा-दिवाभूता रात्रिः दोषाभूतमहः इति। कौमुद्यां कात्यायनेन तदर्थमेकं वार्तिकमुक्तं 'अव्ययस्य च्वावीत्वं नेति वाच्यम्' इति। 'अस्य च्वौ' इति पाणिनीयसूत्रस्य तथा 'अव्ययस्य च्वावीत्वं नेति वाच्यम्' इति कात्यायनवार्तिकस्य च योजनेन भोजदेवेनेदं सूत्रं प्रयुक्तम्।

**क्वचि च। (७/२/८५)**

'क्वचि च'[209] इति सूत्रं पाणिनिना प्रयुक्तं भवति। 'अस्य ईत्स्यात्' इति अस्य सूत्रार्थः

---

[208] पा.सू.७/४/३२

[209] पा.सू.७/४/३३

कौमुद्यां दृश्यते। भोजेन प्रतिपादितस्यास्य सूत्रार्थः 'क्यचि प्रत्यये परतोऽवर्णान्तायाः प्रकृतेरीकार अन्तादेशो भवति' इति हृदयहारिण्यां दण्डनाथेनोक्तम्। दीर्घत्वस्यापवादो भवतीतम्। 'पुत्रीयति', 'खट्वीयति' इत्येते उदाहरणे।

**न क्षुध्यशनस्य। (७/२/८६) धनस्य तृष्णायाम्। (७/२/८७) उदकस्योदन् पिपासायाम्। (७/२/८८)**

'अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु'[210] इति सूत्रं पाणिनिना प्रतिपादितम्। 'अशनाय' 'उदन्य' 'धनाय' इत्येतानि 'बुभुक्षा' 'पिपासा' 'गर्ध' इत्येतेषु अर्थेषु निपात्यन्ते। 'क्यजन्ता निपात्यन्ते' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं पाणिनीयसूत्रं स्वीकृत्य भोजदेवेन त्रिधा उच्यते 'न क्षुध्यशनस्य', 'धनस्य तृष्णायाम्' , 'उदकस्योदन्' 'पिपासायाम्' इति। सूत्रत्रयेणापि ईकारान्तादेशः निषिध्यते। 'अशनशब्दस्य क्यचि प्रत्यये परतः क्षुधिबुभुक्षार्थे ईकारः अन्तादेशो न भवति' इति न 'क्षुध्यशनस्य' इत्यस्य सूत्रार्थः हृदयहारिण्यामुच्यते। 'अशनायति' इत्युदाहरणम्। क्षुध्यतीत्यर्थः। इदमुदाहरणं सिद्धान्तकौमुद्यामपि दृश्यते।

एवं 'धनशब्दस्य क्यचि परतस्तृष्णायामर्थे ईकारः अन्तादेशो न भवति' इति 'धनस्य तृष्णायाम्' इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'धनायति' इत्युदाहरणम्। गृध्यतीत्यर्थः। इदमुदाहरणं सिद्धान्तकौमुद्यामपि दृश्यते।

---

210 पा.सू.७/४/३४

'उदकशब्दस्य क्यचि प्रत्यये परतः पिपासायामर्थे उदन् इत्ययमादेशो भवति' इति उदकस्योदन् पिपासायाम् इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'उदन्यति' इत्युदाहरणम्। तृष्यतीत्यर्थः। इदमुदाहरणं सिद्धान्तकौमुद्यामपि दृश्यते।

**वृषाश्वयोर्मैथुनेच्छायां सुक्। (७/२/८९)**

'अश्वक्षीरवृषलवणानाम् आत्मप्रीतौ क्यचि'[211] इति पाणिनीयसूत्रव्याख्याने कात्यायनेन 'अश्ववृषयोर्मैथुनेच्छायाम् '[212] इति वार्तिकं प्रयुक्तम्। भोजदेवेन वार्तिकमिदं सूत्रत्वेन स्वीकृतम्। 'वृषाश्वयोः क्यचि प्रत्यये मैथुनेच्छायां सुगागमो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः।' वृषस्यति गौः अश्वस्यति वा इत्युदाहरणम्।

**दो सोमस्थामित् तिकिति। (७/२/९०)**

'द्यतिस्यतिमास्थामित्ति किति'[213] इति पाणिनीयसूत्रेण इकारादेशो विधीयते। 'एषामिकारोऽन्तादेशः स्यात्तादौ किति' इति सिद्धान्तकौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेन एवं प्रतिपादितम्। 'स्था इत्येतेषां धातूनां तकारादौ किति प्रत्यये परत इदन्तादेशो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'निर्दितः', 'निर्दितवान्', 'दित्वा', 'दितिः', 'अवसितः', 'अवसितवान्', 'मितः', 'मितवान्', 'स्थितः', 'स्थितवान्' इत्येतानि उदाहरणानि।

---

211 पा.सू.७/४/५१

212 वा.४३०९

213 पा.सू.७/४/४०

**छाशोर्वा। (७/२/९१)**

'शाच्छोरन्यतरस्याम्'[214] इति पाणिनीय सूत्रेण 'इकारादेशो' विधीयते। 'तकारादौ किति परे शा छा इत्येतयोः इकारादेशो' अनेन सूत्रेण उक्तः। इदं सूत्रं भोजदेवेन एवं प्रतिपादितम्। 'अन्यतरस्याम् इकारादेशो छा शा इत्येतयोर्धात्वोस्तकारादौ कितिप्रत्यये परत इदन्तादेशो वा भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अवछितः', 'अवच्छितवान्' 'अवच्छातः' 'अवच्छातवान्' 'निशितः' 'निशितवान्' 'निशातः' 'निशातवान्' इत्यादीनि उदाहरणानि।

**संशितो व्रते। (७/२/९२)**

भोजोक्तं द्विपदमिदं सूत्रम्। संशितः व्रते इति पदच्छेदः। 'संशित इति श्यतेः क्तप्रत्यये व्रतविषये इत्वं निपात्यते' इति हृदयहारिण्यामुच्यते। 'संशितं साधितं व्रतमस्य संशितव्रतः' इत्युदाहरणम्।

**दधातेर्हिः। (७/२/९३)**

पाणिनिना दधातेर्हिः[215] इति सूत्रं प्रयुक्तम्। तकारादौ किति प्रत्यये परे दधातेरङ्गस्य हि इति आदेशः अनेन विधीयते। भोजदेवेनापि इदं सूत्रं हि आदेशविधायकत्वेन प्रतिपादितम्। दधातेस्तकारादौ किति प्रत्यये परतो हिरित्ययमादेशो भवति इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'विहितः', 'विहितवान्' इत्युदाहरणे।

---

214 पा.सू.७/४/४१

215 पा.सू.७/४/४२

**जहातेः क्त्वि। (७/२/९४)**

जहातेश्च क्त्वि [216] इति इदं सूत्रं पाणिनिना प्रतिपादितम्। त्क्वाप्रत्यये परे जहातेरङ्गस्य हि इति आदेशः न केवलं पणिनिना किन्तु भोजेनापि अनेन सूत्रेण विहितः। हृदयहारिण्यां ओहाक् त्याग इत्यस्य त्क्वाप्रत्यये हिरित्ययमादेशो भवति इति अस्य सूत्रार्थः उक्तः। 'हित्वा तूष्टं वनं गतः' इत्युदाहरणम्।

**दो दत् । (७/२/९५)**

पाणिनिना दो दद् घोः[217] इति सूत्रमुक्तम्। घुसंज्ञकस्य दा इत्यस्य दथ् स्यात्तादौ किति इति सिद्धान्तकौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवः पाणिनीयसूत्रात् घोः इति त्यक्त्वा सूत्रं प्रयुक्तम्। घुसंज्ञकस्य दा इत्यस्य सूत्रार्थोपि हृदयहारिण्यां नोक्तम्। तत्र केवलं दा इत्यस्य इत्येव अस्ति। तद्यथा दा इत्यस्य तकारादौ किति प्रत्यये परतो ददित्ययमन्तादेशो भवति इति दण्डनाथेनोक्तः। 'दत्तः', 'दत्तवान्', 'दत्त्वा', 'दत्तिः', 'दत्रिमं', 'दोद' इत्यादीनि उदाहरणानि।

**उपसर्गादचस्तः। (७/२/९६) सुविन्यवानुभ्यः क्ते वा । (७/२/९७) प्रादादिकर्मणि। (७/२/९८)**

पाणिनिना अच उपसर्गात्तः[218] इति सूत्रं प्रयुक्तम्। अजन्तादुपसर्गात्परस्य दा इत्यस्य

---

[216] पा.सू.७/४/४३

[217] पा.सू.७/४/४६

[218] पा.सू.७/४/४७

घोरचस्तः स्यात्तादौ किति इति सिद्धान्तकौमुद्यामस्य सूत्रार्थः उक्तः। भोजेन अस्य सूत्रस्य क्रमविन्यासेन उपसर्गादचस्तः इति सूत्रं प्रतिपादितम्। अजन्तादुपसर्गात् परस्य दासम्बन्धिनोऽचः स्थाने तकारादौ किति प्रत्यये परतस्तकारादेशो भवति इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'प्रत्तः', 'प्रत्तवान्', 'परीत्तः', 'परीतवान्', 'परितिमम्', 'अवत्त', 'अवत्तवान्', 'अवत्तिः' इत्यादीनि उदाहरणानि।

भोजप्रयुक्तेन 'सुविन्यवानुभ्यः क्ते वा' तथा 'प्रादादिकर्मणि' इति सूत्रद्वयेन सिद्धरूपाण्यपि सिद्धान्तकौमुद्याम् 'अच उपसर्गात्तः' इति सूत्रव्याख्याने दृश्यते। इत्यस्मात् पाणिनिना तेन सूत्रेण साकं अनयोः भोजसूत्रयोः कार्याणि साधितानि स्युः। 'सुविन्यवानुभ्यः क्ते इत्यस्य सुविनि अव अनु इत्येतेभ्य उपसर्गेभ्यः परस्य दासम्बन्धिनोऽचः स्थाने क्तप्रत्यये परतस्तकारादेशो वा भवति' इति 'सुविन्यवानुभ्यः क्ते वा' इत्यस्य सूत्रार्थः दण्डनाथेन उक्तः। 'सूत्तं', 'सुदत्तम्', 'वीत्तं', 'विदत्तम्' 'नीत्तं', 'निदत्तम्', 'अवत्तम्' 'अवदत्तम्', 'अनूत्तम्', 'अनुदत्तम्' इत्यादीनि उदाहरणानि। 'प्रादादिकर्मणि इत्यस्य प्रादुपसर्गात् परस्य क्रियावृत्ते र्दा इत्यस्य च स्थाने क्तप्रत्यये परतस्तकारादेशो वा भवति' इति 'प्रादादिकर्मणि' इत्यस्य सूत्रार्थः दण्डनाथेन उक्तः। 'प्रत्तः', 'प्रदत्तः' इत्येते उदाहरणे। दातुं प्रारब्धवान् इत्यर्थः। 'प्र', 'सु', 'वि', 'नि', 'अव' 'अनु' इत्येते अजन्ताः उपसर्गाः इत्यस्मात् एकेनैव 'अच उपसर्गात्तः' इति सूत्रेण सम्पूर्णं कार्यमुक्तं स्यात्। भोजदेवेन किञ्चिदपि स्पष्टीकर्तुं इमानि कार्याणि सूत्रत्रयेन पृथक् पृथक् उक्तं स्यात्।

**मरुतश्च। (७/२/९९)**

'मरुतश्च' इति सूत्रं पाणिनीये न दृश्यते। भोजप्रयुक्तं द्विपदमिदं सूत्रम्। मरुतः च इति पदच्छेदः। 'मरुच्छबादात् परस्य दा इत्यस्याचः स्थाने क्तप्रत्यये परतस्तकारादेशो भवति' इति दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'मरुत एनं देयासुर्मरुत्तः' इत्युदाहरणम्।

**अपो भि। (७/२/१००)**

पाणिनिना अपो भि[219] इति प्रयुक्तमिदं सूत्रम्। अपस्तकारः स्याद्भादौ प्रत्यये परे इति कौमुद्यामस्य सूत्रार्थः उक्तः। दण्डनाथनारायणेन हृदयहारिण्यामस्य सूत्रार्थः 'अप् इत्यस्याः प्रकृतेर्भकारादौ प्रत्यये परतस्तकारोऽन्तादेशो भवति' इत्युच्यते।। 'अद्भिः' 'अद्भ्यः' इत्येते उदाहरणे।

**सः स्यार्धधातुके। (७/२/१०१)**

पाणिनिना सः स्यार्द्धधातुके[220] इति सूत्रं प्रयुक्तम्। सस्य तः स्यात्सादावार्धधातुके इत्यस्ति कौमुद्यामस्य सूत्रार्थः। हृदयहारिण्यां दण्डनाथेन 'सकारान्तायाः प्रकृतेः सकारादावार्धधातुके परतस्तकारोन्तादेशो भवति' इति अस्य सूत्रार्थः उक्तः। 'वत्स्यति', 'अवात्सीत्', 'वत्सीष्ट', 'विवत्सति', 'जिघत्सति', इत्यादीनि उदाहरणानि।

---

219 पा.सू.७/४/४८

220 पा.सू.७/४/४९

**ताससोर्ह एति। (७/२/१०२)**

पाणिनिना 'ह एति'[221] इति सूत्रं प्रयुक्तम्। 'तासस्त्योः सस्य हः स्यादेति परे' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'ताससोः' इत्यपि संयोज्य इदं सूत्रं भोजदेवेनात्र उक्तं वर्तते। 'तासेरस्तेश्च सम्बन्धिनः सकारस्य एकारे प्रत्यये परतो हकारादेशो भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। 'कर्ताहे', 'व्यक्तिहे' इत्येते उदाहरणे।

**रसोर्लोपः। (७/२/१०३)**

पाणिनिना 'तासस्त्योर्लोपः'[222] 'रि च'[223] इति सूत्रद्वयं प्रयुक्तम्। 'तासस्त्योर्लोपः' इत्यस्य 'तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे' इति सूत्रार्थः कौमुद्यामुक्तः। 'रि च' इत्यस्य रादौ प्रत्यये प्राग्वत् इति च सूत्रार्थः कौमुद्यामुक्तः। अनयोः द्वयोः सूत्रयोः मेलनेन भोजदेवेनेदं सूत्रं प्रयुक्तम्। अस्य सूत्रार्थः 'रेफादौ सकारादौ प्रत्यये परतस्तासेरस्तेश्च सकारस्य लोपो भवति' इति दण्डनाथेन हृदयहारिण्यामुच्यते। 'कर्तारौ', 'कर्तारः', 'कर्तासि' इत्यादीनि उदाहरणानि।

**यीवर्णयोर्दीधीवेव्योः। (७/२/१०४)**

पाणिनिना 'यीवर्णयोर्दीधीवेव्योः'[224] इति सूत्रं प्रयुक्तम्। 'एतयोरन्त्यस्य लोपः

---

221 पा.सू.७/४/५२

222 पा.सू.७/४/५०

223 पा.सू.७/४/५१

224 पा.सू.७/४/५३

स्याद्यकार इवर्णे च परे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'यकारादाविवर्णादौ च प्रत्यये परतो दीधीवेव्योरन्त्यस्य लोपो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'आदीध्यते', 'आवेव्यते', 'आदीध्यगतः', 'आवेव्यगतः', 'आदीधिता', 'आवेविता', 'आदीधीत', 'आवेवीत' इत्यादीनि उदाहरणानि।

**योऽचि। (७/२/१०५)**

पाणिनिना 'योऽचि' इति सूत्रं प्रयुक्तम्। 'अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन स्वीकृतस्यास्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामेवमुच्यते अजादौ प्रत्यये परतो दीधीवेव्योर्यकारोऽन्तादेशो भवति' इति। गुणवृद्ध्योरपवादभवतीदम्। 'आदीध्यै', 'आषेव्यै', 'आदीध्यनम्', 'आषेव्यनम्', 'आदीध्यकः', 'आषेव्यकः' इत्यादीनि उदाहरणानि। '

**मीमारभलभशकपतपपददाधामच इस्सिसनि। (७/२/१०६)**

पाणिनिना 'सनि मीमाघुरभलभशकपतपपदामच इस्'[225] इति सूत्रं प्रयुक्तम्। 'एषामच इस् स्यात्सादौ सनि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। सनिशब्दमादौ प्रयुज्य 'इस्' इत्यत्र 'इस्सि' इति प्रयुज्य 'घु' शब्दं त्यक्त्वा 'दाधा' इति पदं संयोज्य च भोजदेवेनेदं सूत्रं प्रयुक्तम्। 'सकारादौ सनि प्रत्यये परतो मीप्रभृतीनामचः स्थाने इसादेशो भवति'। दण्डनाथेन धातून् निर्दिश्य तत्र उदाहरणानि दत्तानि। यथा- 'डुमिञ् - निमित्सति मितिमिञोर्ग्रहणम्' -

[225] पा.सू.७/४/५४

'मित्सते', 'प्रमित्सति' 'मेति मामाङ्मेङां ग्रहणम्' - 'मित्सति', 'मित्सते', 'अपमित्सते' 'रभ' - 'आरिप्सते', 'लभ' - 'लिप्सते', 'शक' -'शिक्षति', 'पत' - 'पित्सति', 'पद' - 'पित्सते', 'दा इति दाण्दाञ्दोदेङां ग्रहणम्' - 'दित्सति', 'दित्सते', 'दाप्दैपोस्तु' 'दीदासति'। 'धा इति धाञ्धेटोर्ग्रहणम्' - 'धित्सति' इति।

**राधो हिंसायाम्। (७/२/१०७)**

पाणिनिना 'राधो हिंसायाम्'[226] इति सूत्रं प्रयुक्तम्। 'एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन पाणिनीयमिदं सूत्रं तद्वदेव स्वीकृतम् किन्तु पाणिनिना लोपविधायकमिदं सूत्रं दण्डनाथेन इसित्ययस्यादेशरूपेणोक्तम्। ''हिंसायां वर्तमानस्य राधधातोः सकारादौ सनि प्रत्यये परतोऽचः स्थाने इसित्ययमादेशो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'प्रतिरित्सति', 'अवरित्सति' इत्येते उदाहरणे।

**ऋधापोरीत्। (७/२/१०८) ज्ञपेरनन्त्यस्य। (७/२/१०९)**

पाणिनिना 'आप्ज्ञप्यृधामीत्'[227] इति सूत्रेण सनि सकारादौ परे आप् ज्ञपि ऋध इत्येतेषामङ्गानामच ईकारादेशो विधीयते। 'एषामच ईत्स्यादौ सनि इति कौमुद्यामस्य सूत्रार्थः' उक्तः। इदं सूत्रं भोजदेवेन 'ऋधापोरीत् ज्ञपेरनन्त्यस्य' इति सूत्रद्वयेन विभक्तम्। 'ऋधापोरीत्' इत्यस्य सूत्रार्थः 'ऋधेराप्नोतेश्च सकारादौ सनि प्रत्यये परतोऽचः स्थाने ईदादेशो भवति' इति

226 पा.सू.६/४/१२३

227 पा.सू.७/४/५५

हृदयहारिण्यां दण्डनाथेनास्य  उक्तः। 'ईत्सति', 'ईप्सति' इत्येते उदाहरणे।

एवं ज्ञपेरनन्त्यस्य इति सूत्रस्य सूत्रार्थः 'ज्ञपेः सकारादौ सनि प्रत्यये परतोऽनन्त्यस्याचः स्थाने ईदादेशो भवति' इति हृदयहारिण्यामुच्यते।। 'ज्ञीप्सति' इत्युदाहरणं कौमुद्यां तथा हृदयहारिण्यां च दृश्यते।

**दम्भ इच्च। (७/२/११०)**

पाणिनिना 'दम्भ इच्च'[228] इति सूत्रं प्रयुक्तम्। 'दम्भेरच इत्स्यादीच्च सादौ सनि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं पाणिनीयं सूत्रं भोजदेवेनात्र स्वीकृतम्। हृदयहारिण्यां दम्भेः सकारादौ सनि प्रत्यये परतोऽचः स्थाने इत् चकारादीदादेशो भवति इति अस्य सूत्रार्थः उक्तः। 'धिप्सति', 'धीप्सति' इत्येते उदाहरणे हृदयहारिण्यां कौमुद्यां च दृश्येत।

**मुचेः कर्मकर्तर्योद्वा। (७/२/१११)**

पाणिनिना 'मुचोऽकर्मकस्य गुणो वा'[229] इति सूत्रं प्रयुक्तम्। अनेन मुचोऽकर्मकस्य सकारादौ सनि परे विकल्पेन  गुणो विधीयते। पाणिनीयेऽस्मिन्सूत्रे कानिचन परिवर्तनानि कृत्वा भोजदेवेन सूत्रमुक्तम्। 'मुचेः कर्मकर्तृविषयस्य सकारादौ सनि प्रत्यये परतोऽचः स्थाने ओदादेशो वा भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। पाणिनिना अकर्मकस्य विकल्पेन

---

228 पा.सू.७/४/५६

229 पा.सू.७/४/५७

गुणविधायकमिदं सूत्रम्। भोजदेवेन करमकर्तृविषयस्य अचः स्थाने विकल्पेन ओदादेशः उक्तः। 'मोक्षते वत्सः', 'स्वयमेव मुमुक्षते' इत्येते उदाहरणे हृदयहारिण्यां कौमुद्यां च वर्तेत।

**इसादिष्वप्रयोगोऽभ्यासस्य। (७/२/११२)**

पाणिनिना 'अत्र लोपोऽभ्यासस्य'[230] इति सूत्रेण अभ्यासलोपो विधीयते। किन्तु भोजदेवेनात्र अभ्यासस्य अप्रयोगो उच्यते। 'मीमेत्यत आरभ्य ये इसादय आदेशास्ते सत्स्वभ्यासस्याप्रयोगो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः।

**हलोऽनादेः। (७/२/११३)**

पाणिनिना 'हलादिशेषः'[231] इति सूत्रं प्रयुक्तम्। 'अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजदेवेन 'हलोऽनादेः' इत्यनेन अभ्यासस्य आदिर्हल् विहाय अन्येऽप्रयोगो भवति। अत्र अप्रयोगः उक्तः न तु लोपः। 'अभ्यासस्य सम्बन्धिनो हलोऽनादेरप्रयोगो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'विवक्षति', 'जाजाय्यते' इत्येते उदाहरणे।

**खयि खरः। (७/२/११४)**

'शर्पूर्वाः खयः'[232] इति पाणिनीयसूत्रव्याख्याने काशिकायां खर्पूर्वाः खय इति

---

230 पा.सू.७/४/५८

231 पा.सू.७/४/६०

232 पा.सू.७/४/६१

वक्तव्यमित्युक्तम्। तदत्र भोजदेवेन सूत्ररूपेण स्वीकृतम्। 'अभ्यासस्य सम्बन्धिनः खरोऽभ्याससम्बन्धिन्येव खयिपरतोऽप्रयोगो भवति'। अनाद्यप्रयोगस्यापवादोऽयम्। 'उचिच्छिषति', 'चुश्चोतिषति', 'चिस्स्वलिषति', 'तुष्टूयति', 'तिष्ठासति', 'पिस्पन्दिषते', 'पुस्फूर्जिषति', 'खयीति' इत्यादीनि उदाहरणानि।

**खयां चयः। (७/२/११५)**

'अभ्याससम्बन्धिनां खयां स्थाने अन्तरतमाश्चयो भवन्ति' इति अस्य सूत्रार्थः हृदयहारिण्यामस्ति। 'चिच्छद', 'टिठकारयिषति', 'तिष्ठासति', 'पफाल' इत्यादीन्युदाहरणानि।

**झषां जशः। (७/२/११६)**

'झलां जशोऽन्ते'[233] इति पाणिनीयसूत्रमस्ति। किन्तु पदान्तस्य झलः जशादेशः अनेन विहितः। अत्र अभ्यासस्य झलः आदेशः भोजेनोच्यते इत्यस्मात् 'झलां जशोऽन्ते' इति पाणिनीयसूत्राधारितं भवति इदमिति वक्तुं न शक्यते। 'झषामभ्याससम्बन्धिनां यथासंख्यं जश आदेशा भवन्ति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'झॄ', 'जझार', 'बभार', 'जघास', 'डुढौके', 'दध्यौ'।

**कुहोश्चुः। (७/२/११७)**

पाणिनिना 'कुहोश्चुः'[234] इति सूत्रं प्रयुक्तम्। 'अभ्यासकवर्गहकारयोः चवर्गादेशो

---

233 पा.सू.८/२/३९

234 पा.सू.७/४/६२

भवतीति' कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'अभ्याससम्बन्धिनः कवर्गस्य हकारस्य च स्थाने चवर्गादेशो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'चकार', 'चखान', 'जगाम', 'जघास', 'जुहुवे', 'जुहोति' इत्यादीनि उदाहरणानि।

**न कवतेर्यङि। (७/२/११८)**

पाणिनिना 'न कवतेर्यङि'[235] इति सूत्रं प्रयुक्तम्। 'कवतेरभ्यासस्य श्चुत्वं न स्याद्यङि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं तद्वदेव भोजदेवेन स्वीकृतम्। 'कवतेर्यङि परतोऽभ्यास कवर्गस्य अत्वं न भवति' इति दण्डनाथेन सूत्रार्थः उक्तः। कौमुद्यां श्चुत्वनिषेधमिदं सूत्रं हृदयहारिण्यां अत्वनिषेधकमभवत्। 'कोकूयते', 'कूकवीति', 'कवतेरिति' उदाहरणानि।

**उरत्। (७/२/११९)**

पाणिनिना 'उरत्'[236] इति सूत्रं प्रतिपादितम्। 'अभ्यासऋवर्णस्य अत्स्यात्प्रत्यये परे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं तद्वदेव भोजेन स्वीकृतम्। 'ऋवर्णान्तस्याभ्यासस्य स्थानेऽकारोऽन्तादेशो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः।। 'चकार', 'जगार' इत्येते उदाहरणे। सूत्रे तपरकरणं दीर्घोऽपि स्थानिनि ह्रस्वार्थम् इति दण्डनाथेनोच्यते।

**ह्रस्वः। (७/२/१२०)**

पाणिनिना 'ह्रस्वः'[237] इति सूत्रं प्रतिपादितम्। 'अभ्यासस्याचो ह्रस्वः स्यात्' इति अस्य

---

235 पा.सू.७/४/६३

236 पा.सू.७/४/६६

237 पा.सू.७/४/५९

सूत्रार्थः उक्तः। तं सूत्रं भोजेनात्र स्वीकृतम्। 'अभ्याससम्बन्धिनोऽचः स्थाने ह्रस्वो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'पपौ', 'निनाय', 'लुलाव', 'सिसेकिषते', 'लुलोकिषते' इत्यादीनि उदाहरणानि।

**द्युतिस्वाप्योः सम्प्रसारणमभ्यासनिमित्तानन्तर्ये। (७/२/१२१)**

पाणिनिना 'द्युतिस्वाप्योः सम्प्रसारणम्'[238] इति सूत्रं प्रयुक्तम्। 'अनयोरभ्यासस्य सम्प्रसारणं स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। पाणिनीयसूत्रेण साकं 'अभ्यासनिमित्तानन्तर्ये' इति योजयित्वा भोजदेवेन सूत्रं प्रयुक्तम्। दण्डनाथेन 'द्युतेः स्वापेश्चाभ्यासस्याभ्यासप्रत्ययनिमित्तानन्तर्ये' सति सम्प्रसारणं भवति इति अस्यार्थः उक्तः। हलोऽनादेरप्रयोगस्यापवादः विदिद्युते। 'विदिद्योतिषते' 'व्यदिद्युतत् ' 'सुष्वापयिषति' इत्यादीनि उदाहरणानि कौमुद्यां तथा हृदयहारिण्यां चोक्तानि।

**व्यथो लिटि। (७/२/१२२)**

पाणिनिना 'व्यथो लिटि'[239] इति सूत्रं प्रयुक्तम्। 'व्यथोऽभ्यासस्य सम्प्रसारणं स्याल्लिटि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदमेवसूत्रं भोजदेवेनात्र स्वीकृतम्। दण्डनाथेन 'व्यथेरभ्यासस्य लिटि प्रत्यये परतः सम्प्रसारणं भवति' इति अस्य सूत्रार्थः उक्तः। भोजवत् दण्डनाथः 'सम्प्रसारणस्य स्वीकारः कृतः' इति अनेन सूत्रार्थेन ज्ञायते।

---

238 पा.सू.७/४/६७

239 पा.सू.७/४/६८

हलोनादेरप्रयोगस्यापवादः। 'विव्यथे', 'विव्यथाते', इत्येते उदाहरणे। इमे उदाहरणे कौमुद्यां वर्तेत।

**दीर्घोऽपितीणः। (७/२/१२३)**

पाणिनिना 'दीर्घ इणः किति'[240] इति सूत्रं प्रयुक्तम्। 'इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं 'दीर्घोऽपितीणः' इति प्रतिपादितम्। 'अपितिलिटि परत इणो धातोरभ्यासस्य दीर्घो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'ईयतुः', 'ईयुः', इत्येते उदाहरणे। इमे उदाहरणे कौमुद्यामपि दृश्यते।

**अत आदेः। (७/२/१२४)**

पाणिनिना 'अत आदेः'[241] इति सूत्रं प्रयुक्तम्। 'अभ्यासस्यादेरतो दीर्घः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं तद्वदेव भोजदेवेन स्वीकृतम्। 'लिटि परतोऽभ्यास-स्यादेरकारस्य दीर्घो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'आटतुः', 'आटुः', 'आर', 'आरतुः' इत्यादीनि उदाहरणानि।

**तस्मान्नुडनेकहलः। (७/२/१२५)**

पाणिनिना 'तस्मान्नुड् द्विहलः'[242] इति सूत्रं प्रयुक्तम्। 'द्विहलोर्धातोर्दीर्घीभूतादकारात्प-रस्य नुच् स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'द्विहलः इत्यस्य स्थाने अनेकहलः' इति

---

240 पा.सू.७/४/६९

241 पा.सू.७/४/४०

242 पा.सू.७/४/७१

प्रयुज्य भोजदेवेन सूत्रं प्रयुक्तम्। हृदयहारिण्यां 'तस्माद् दीर्घभूतादभ्यासात् परस्यानेकहलो धातोर्लिटि परतो नुडागमो भवति' इति सूत्रार्थः उक्तः। अर्च-आनर्च आनर्चतुः आनञ्ज आनञ्जतुः इत्यादीनि उदाहरणानि।

**ऋमदश्नोत्योश्च। (७/२/१२६)**

पाणिनिना 'अश्नोतेश्च'[243] इति सूत्रं प्रयुक्तम्। दीर्घाभ्यासावर्णात्परस्य नुट् स्यात् इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं ऋमदश्नोत्योश्च इति प्रतिपादितम्। दण्डनाथेन तस्माद् दीर्घभूतादभ्यासादुत्तरस्य ऋमतोऽश्नोतेश्चधातोर्लिटि परतो नुडागमो भवति इति अस्य सूत्रार्थः उक्तः। आनृधतुः आनृधुः आनृजे आनृजाते व्यानशे व्यानशाते इत्यादीनि उदाहरणानि।

**भुवोऽत्। (७/२/१२७)**

पाणिनिना 'भवतेरः'[244] इति सूत्रं प्रयुक्तम्। 'भवतेरभ्यासोकारस्य अः स्यात् लिटि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजदेवेन 'भुवोऽत्' इति प्रयुक्तम्। 'भवतेर्धातोर्लिटि परतोऽभ्यासस्याकारोऽन्तादेशो' भवति इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। बभूव बभूवतुः अनुबभूव इत्यादीनि उदाहरणानि। इमानि उदाहरणानि कौमुद्यामपि उक्तानि।

**निजिविजिविषां गुणः श्लौ। (७/२/१२८)**

पाणिनिना 'निजां त्रयाणां गुणः श्लौ'[245] इति सूत्रं प्रयुक्तम्। 'णिज्विज्विषामभ्यासस्य

[243] पा.सू.७/४/७२

[244] पा.सू.७/४/७३

[245] पा.सू.७/४/७५

गुणः स्यात् श्लौ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'निजां' त्रयाणां निर्देशेन भोजदेवेन इदं सूत्रं प्रयुक्तम्। 'निजादीनां श्लौ अभ्यासस्येको गुणो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'नेनेक्ति', 'नेनिक्ते', 'वेवेक्ति', 'वेविक्ते', 'वेवेष्टि', 'वेविष्टे' इत्यादीनि उदाहरणानि।

**ऋपृभृहाङ् माङामित्। (७/२/१२९)**

पाणिनिना 'भृञामित्'[246], 'अर्तिपिपर्त्योर्श्च'[247] इति प्राणिनिप्रतिपादितं इकारान्तादेश-विधायकं सूत्रद्वयं सम्मिल्य भोजदेवेनेदं सूत्रमुक्तम्। दण्डनाथेन हृदयहारिण्यामस्य सूत्रार्थः 'ऋप्रभृतीनां धातूनां श्लौ सत्यभ्यासस्येकारोऽन्तादेशो भवति' इति उच्यते। 'इयर्ति', 'पिपर्त्ति', 'बिभर्त्ति', 'जिहीते', 'मिमीते' इत्युदाहरणानि।

**सन्यतः। (७/२/१३०)**

पाणिनिना 'सन्यतः'[248] इति प्रयुक्तं सूत्रं तद्वदेव भोजदेवेन स्वीकृतम्। अभ्यासस्यात इकारः स्यात्सनि इति कौमुद्यामस्य सूत्रार्थः उक्तः। एवं सनि परतोऽवर्णान्तस्याभ्यासस्येदादेशो भवति इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'पिपक्षति', 'तिष्ठासति', 'पिपासति', 'प्रतीषिषति' इत्युदाहरणानि।

---

[246] पा.सू.७/४/७६

[247] पा.सू.७/४/७७

[248] पा.सू.७/४/७९

**ओः पुयण्ज्यपरे। (७/२/१३१)**

पाणिनिना 'ओः पुयण्ज्यपरे'[249] इति प्रयुक्तं सूत्रं भोजदेवेनात्र स्वाकृतम्। 'सनि परे यदङ्गं तदवयवाभ्यासोकारस्येत्वं स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। हृदयहारिण्यां दण्डनाथेन इकारोऽन्तादेशोऽनेन विधीयते। 'सनि परत उवर्णान्तस्याभ्यासस्य पवर्गे यणि जकारऽवर्णपरे परत इकारोऽन्तादेशो भवति' इति अस्य सूत्रार्थः। 'पिपविषति', 'पिपावयिषति', 'बिभावयिषति', 'यियविषति', 'यियावयिषति', 'रिरावयिषति', 'लिलावयिषति', 'जिजावयिषति', इत्यादीनि उदाहरणानि।

**श्रुस्रुद्रुप्रुप्लुच्यूनां वा। (७/२/१३२)**

पाणिनिना 'स्रवतिश्रृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा'[250] इति सूत्रं प्रयुक्तम्। 'एषामभ्यासोकारस्येत्वं वा स्यात्सन्यवर्णपरे धात्वपक्षे परे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। सूत्रे प्रयुक्तानां क्रियापदानां स्थाने तेषां धातूनां योजनेन भोजेनेदं सूत्रं प्रयुक्तम्। हृदयहारिण्यां दण्डनाथेन इकारोऽन्तादेशोऽनेन विधीयते। 'सनि श्रृणोत्यादीनाम् अभ्यासस्योवर्णान्तस्यावर्णपरे यणि परत इकारोऽन्तादेशो वा भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'शिश्रावयिषति', 'शुश्रावयिषति', 'सिस्रावयिषति', 'सुस्रावयिषति', 'दिद्रावयिषति', 'दुद्रावयिषति', 'पिप्रावयिषति', 'पुप्रावयिषति', 'पिप्लावयिषति', 'पुप्लावयिषति', 'चिच्यावयिषति', 'चुच्यावयिषति' इत्यादीनि उदाहरणानि।

---

249 पा.सू.७/४/८०

250 पा.सू.७/४/८१

**गुणो यङ्लुकोः(७/२/१३३)**

'गुणो यङ्लुकोः'[251] इति पाणिनिप्रयुक्तमिदं सूत्रं तद्वदेवात्र भोजेन स्वीकृतम्। 'अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'यङि यङ्लुकि च योऽभ्यासस्तस्येको गुणो भवति' इति सूत्रार्थः दण्डनाथेनोक्तः। 'चेचीयते', 'लोलूयते', 'बेभिद्यते', 'बोभुज्यते', 'वेव्यः', 'लोलुपः', 'बोभवीति', 'रोरवीति' उदाहरणानि।

**दीर्घोऽनागमस्य। (७/२/१३४)**

पाणिनिना 'दीर्घोऽकितः'[252] इति सूत्रं प्रयुक्तम्। 'अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेन 'दीर्घोऽनागमस्य' इति प्रयुक्तम्। 'यङि यङ्लुकि चानगमाभ्यासस्याचः स्थाने दीर्घो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'पापच्यते', 'पापचीति', 'जाज्वल्यते', 'जाज्वलीति' इत्युदाहरणानि।

**नीग्वञ्चुस्रन्सुध्वन्सुभ्रन्सुकसपतपदस्कन्दाम् । (७/२/१३५)**

पाणिनिना 'नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्'[253] इति सूत्रं प्रयुक्तम्। 'एषा-मभ्यासस्य नीगागमः स्याद्यङ्यङ्लुकोः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं तद्वदेव भोजदेवेन स्वीकृतम्। 'यङि यङ्लुकि च वञ्चुप्रभृतीनामभ्यासस्य नीगागमो भवति' इति

---

251 पा.सू.७/४/८२

252 पा.सू.७/४/८३

253 पा.सू.७/४/८४

दण्डनाथेनास्य सूत्रार्थः उक्तः।

**नुगतो ञमन्तस्य। (७/२/१३६)**

पाणिनिना इदं सूत्रं 'नुगतोऽनुनासिकान्तस्य'[254] इति प्रयुक्तम्। 'अनुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुक् स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन 'अनुनासिकान्तस्य' इत्यस्य 'ञमन्तस्य' इति प्रयुक्तम्। हृदयहारिण्यामस्य व्याख्यानं किञ्चित् नष्टं जातम्। कौमुद्यां नुगागमविधायकमिदं सूत्रमित्यनेन अत्रापि नुगागमोऽनेन विधीयेत। 'जङ्गम्यते', 'जङ्गमीति', 'तन्तन्यते', 'तन्तनीति', 'बंभण्यते', 'बंभणीति' इत्यादीनि उदाहरणानि दण्डनाथेन तत्र दत्तानि।

**जपजभदहदशभञ्जपसाम्। (७/२/१३७)**

पाणिनिना 'जपजभदहदशभञ्जपशां च'[255] इति सूत्रं प्रयुक्तम्। 'एषामभ्यासस्य नुक् स्याद्यङ्यङ्लुकोः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनेदं सूत्रं 'भञ्जपशां च' इत्यस्य स्थाने 'भञ्जपसाम् ' इति कृत्वा सूत्रं प्रयुक्तम्। 'यङि यङ्लुकि च जपादीनामभ्यासस्य नुगागमो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'जञ्जप्यते', 'जञ्जपीति', 'दन्दह्यते', 'दन्दहीति', 'दन्दभ्यते', 'दन्दभीति', 'बम्भज्यते', 'बंभजीति', 'पम्पस्यते', 'पम्पसीति' इत्यादीनि उदाहरणानि।

---

254 पा.सू.७/४/८५

255 पा.सू.७/४/८६

**चरफलोः। (७/२/१३८)**

पाणिनिना 'चरफलोश्च'[256] इति सूत्रं प्रयुक्तम्। 'अनयोरभ्यासस्यातो नुक् स्याद्यङ्लुकोः परतः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन पाणिनीयसूत्रात् 'च' इति परित्यज्य 'चरफलो' इति सूत्रं प्रयुक्तम्। 'यकि यङ्लुकि च चरफल इत्येतयोः अभ्यासस्य नुगागमो' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'चञ्चूर्यते', 'चञ्चुरीति', 'पंफुल्यते', 'पंफुलीति' इत्यादीनि उदाहरणानि।

**उत्परस्यातः। (७/२/१३९)**

पाणिनिना 'उत्परस्यातः'[257] इति प्रयुक्तं सूत्रमिदम्। 'चरफलोरभ्यासात्परस्यात उत्स्याद्यङ्यङ्लुकोः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजव्याकरणस्य व्याख्याने हृदयहारिण्यां 'यङि यङ्लुकि च चरफलोरभ्यासात् परस्याकारस्योदादेशो भवति' इत्यस्ति अस्य सूत्रार्थः। 'चञ्चूर्यते', 'चञ्चुरीति', 'पंफुल्यते', 'पंफुलीति' इत्यादीनि उदाहरणानि। इमानि उदाहरणानि कौमुद्यामपि दृश्यते च।

**ति च। (७/२/१४०)**

पाणिनिना 'ति च'[258] इति प्रयुक्तं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'चरफलोपत उत्स्यात्तादौ किति' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजव्याकरणव्याख्याने दण्डनाथेन

---

256 पा.सू.७/४/८७

257 पा.सू.७/४/८८

258 पा.सू.७/४/८९

'तकारादौ प्रत्यये परतश्चरफलोरकारस्योदादेशो भवति' इति सूत्रार्थः उक्तः। चूर्तिः प्रफुल्तिः प्रफुल्तास्सुमनसः लत्वस्यासिद्धत्वात् फुल्लः फुल्लवान् इत्यादीनि उदाहरणानि।

**रीगृत्वतः। (७/२/१४१)**

पाणिनिना 'रीगृदुपधस्य च'[259] इति सूत्रं प्रयुक्तम्। कौमुद्यां अस्य सूत्रव्याख्याने 'रीगृत्वत इति वक्तव्यम्' इति कात्यायनेन वार्तिकमपि प्रयुक्तम्। इदं वार्तिकं भोजदेवेन सूत्रत्वेनात्र उच्यते। 'यङि यङ्लुकि च ऋकारवतो धातोरभ्यासस्य रीगागमो भवति' इति दण्डनाथेन अस्य सूत्रार्थः उक्तः। दरीदृश्यते दरीदृशीति परीपृच्छ्यते परीपृच्छतीति उदाहरणानि उक्तानि।

**रुग्रिकौ च लुकि। (७/२/१४२)**

पाणिनिना 'रुग्रिकौ च लुकि'[260] इति सूत्रं प्रयुक्तम्। तत् सूत्रं तद्वदेव भोजेनात्र स्वीकृतम्। 'ऋत्वतो धातोर्यङो लुकि अभ्यासस्य रुग्रिकौ चकाराद् रीक्चागमा भवन्ति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। नर्नीति नरिनर्ति नरीनर्ति ममुजः मरीमृजः इत्यादीनि उदाहरणानि।

**सन्वल्लघुनि णौ चङ्यनम्लोपे। (७/२/१४३)**

पाणिनिना इदं सूत्रं 'सन्वल्लघुनि चङ्परेऽनग्लोपे'[261] इति प्रयुक्तम्। चङ्परे इति

---

259 पा.सू.७/४/९०

260 ७/४/९१

261 पा.सू.७/४/९३

बहुव्रीहिः। स चाङ्गस्येति च द्वयमप्यावर्तते। 'अङ्गसंज्ञानिमित्तं यच्चङ्गरं णिरिति यावत् तत्परं यल्लघु तत्परो योऽङ्गस्याभ्यासस्तस्य सनीवकार्यं स्यात् णावग्लोपेऽसति' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं 'णौ' इति योजयित्वा भोजदेवेन स्वीकृतम्। दण्डनाथेन हृदयहारिण्यां 'लघुनि धात्वक्षरे परतो योऽभ्यासस्तस्य च चङ्गरे णौ अनग्लोपे सति सनीव कार्यं भवति' इति अस्य सूत्रार्थः उक्तः। अचीकरत् अपीपचत् अबीभवत् असिस्रवत् असुस्रवत् अशिश्रवत् अशुश्रवत् इत्यादीनि उदाहरणानि।

**णेश्च। (७/२/१४४)**

अस्य सूत्रस्य सूत्रार्थः दण्डनाथेन एवमुच्यते 'णिजन्तस्य धातोश्चङ्गरे णौ परतो लघुनि च धात्वक्षरे योभ्यासस्तस्य सनीव कार्यं भवति' इति। वादितवन्तं प्रयोजितवान्। अवीवदद्वीणां परिवादकेन। अपीपठत् माणवकमुपध्यायेन इत्युदाहरणम्।

**दीर्घो लघोः। (७/२/१४५)**

'दीर्घो लघोः'[262] इत्येवमेव प्रयुक्तमिदं पाणिनीयसूत्रं तथा तत्र कात्यायनेन प्रयुक्तं 'कमेश्च्लेश्चङ्वक्तव्यः' इति वर्तिकं च योजयित्वा भोजदेवेन स्वीकृतम्। 'लघोरभ्यासस्य दीर्घः स्यात्सन्वद्भावविषये' इति कौमुद्यामस्य सूत्रार्थः उक्तः। हृदयहारिण्यामस्य सूत्रार्थः 'लघुनि धात्वक्षरे चण्ङ्गरे णौ परतोऽनग्लोपे सति लघोरभ्यासस्य दीर्घो भवति' इति भवति। अपीपचत् अबीभवत् इत्यादीनि उदाहरणानि।

---

262 पा.सू.७/४/९४

**स्मृदृत्वरप्रथम्रदस्तृस्पशामत् । (७/२/१४६)**

पाणिनिना 'अत् स्मृदृत्वरप्रथम्रदस्तृस्पशाम्'[263] इति सूत्रमुक्तम्। 'एषामभ्यासस्य अकारोऽन्तादेशः स्याच्चङ्परे णौ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं 'स्मृदृत्वरप्रथ-म्रदस्तृस्पशामत्' इति प्रयुक्तम्। 'चङ्परे णौ परतः स्मरत्यादीनामभ्यासस्याकारोऽन्तादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। इत्वस्यापवादः। असस्मरत्, अददरत्, अतत्वरत्, अपप्रथत्, अमम्रदत्, अतस्तरत्, अपस्पशत्, इत्यादीनि उदाहरणानि। इमानि उदाहरणानि कौमुद्यामपि दृश्यते।

**वेष्टिचेष्ट्योर्वा। (७/२/१४७)**

'विभाषा वेष्टिचेष्ट्योः'[264] इति सूत्रं पाणिनिना प्रयुक्तम्। 'अभ्यासस्यात्वं वा स्याच्चङ्परे णौ' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'वेष्टि चेष्टि इत्येतयोरभ्यासस्य चङ्परे णौ परतोऽकारोऽन्तादेशो वा भवति' इति सूत्रार्थः दण्डनाथेनोक्तः। अववेष्टत् अविवेष्टत् अचचेष्टत् अचिचेष्टत् इत्यादीनि उदाहरणानि। इमानि उदाहरणानि कौमुद्यामपि दृश्यते।

**ई च गणः। (७/२/१४८)**

पाणिनिना 'ई च गणः'[265] इति सूत्रं प्रयुक्तम्। 'गणेरभ्यासस्य ई स्याच्चाच्चङ् परे णौ'

---

263 पा.सू.७/४/९५

264 पा.सू.७/४/९६

265 पा.सू.७/४/९७

इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं पाणिनीयसूत्रं तद्वदेव भोजदेवेनात्र स्वीकृतम्। 'गणेर्धातोश्चङ्परे णौ परतोऽभ्यासस्य ईकारश्चकारादकारश्चान्तादेशो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। अजीगणत् इत्युदाहरणम्। इदमुदाहरणं कौमुद्यामपि दृश्यते।

**सप्तमाध्यायः-तृतीयपादः ।**

**पदस्य वीप्सायां द्वे (७/३/१)**

इदं सूत्रं पाणिनिना 'नित्यवीप्सयोः'[266] इति प्रयुक्तम् वर्तते। सिद्धान्तकौमुद्यां 'आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्' इति सूत्रार्थः उच्यते। हृदयहारिण्यां दण्डनाथेन 'वीप्सा' शब्दः एवमुक्तः- 'पृथक् संख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण वा युगपद्प्रयोक्तुनिच्छा वीप्सा' इति। 'तस्यां गम्यमानायां पदस्य स्थाने द्वेशब्दरूपे भवतः' इति तस्य सामान्योऽर्थः। 'वीप्सावत् सुबन्ते' 'वृक्षं वृक्षं सिञ्चति', 'अर्थमर्थमभिनिविशते', 'ग्रामो ग्रामो रमणीयः', 'पुरुषः पुरुषोऽभिरूपः', 'ग्रामे ग्रामे पानीयं', 'गृहे गृहे लूखाः', इत्यादीन्युदाहरणानि। अत्रोक्तमुदाहरणद्वयं कौमुद्यामपि दृश्यते।

**सगतेश्चाभीक्ष्ण्ये। (७/३/२) त्त्वाणमुलोः। (७/३/३)**

पाणिनिना 'आभीक्ष्ण्ये णमुल्च'[267] इति सूत्रं प्रयुक्तम्। तत् सूत्रं विभज्य भोजदेवेन सूत्रद्वयं प्रतिपादितम्। सगतेश्चाभीक्ष्ण्ये इति सूत्रव्याख्यानावसरे प्रथमं दण्डनाथेन 'आभीक्ष्ण्ये'

---

[266] पा.सू.८/१/४

[267] पा.सू.३/४/२२

इति पदस्य निर्वचनमुच्यते। 'पौनःपुन्यमाभीक्ष्ण्यम् स च क्रियाधर्मः' इति। क्रियापदमत्र संबध्यते। तस्मिन् गम्यमाने सगतेस्तिङन्तस्य पदस्य चकारात् केवलस्य स्थाने द्वे शब्दरूपे भवतः इति हृदयहारिण्यामस्य सूत्रार्थः उच्यते। 'पुनः पुनः प्रपचति', 'प्रपचति प्रपचति', 'अधीते अधीते', 'पचति पचति', 'वर्धते वर्धते' इत्यादीनि उदाहरणानि।

त्त्वाणमुलोः इत्यस्य त्त्वाप्रत्ययान्तस्य णमुलन्तस्य च पदस्य स्थाने आभीक्ष्ण्ये गम्यमाने द्वे शब्दरूपे भवतः इति हृदयहारिण्यामर्थः उक्तः। 'भुक्त्वा भुक्त्वा व्रजति', 'भोजं भोजं व्रजति' इत्येते उदाहरणे। अत्र पूर्वेण सूत्रेण द्विर्वचने सिद्धे अस्य सूत्रस्य आवश्यकता का इति विषये दण्डनाथेन उच्यते आभीक्ष्ण्य एव द्योत्ये यत्र त्त्वाणमुलौ विधीयेते तत्र लोड्वद्विर्वचनसहितावेव त्त्वाणमुलावाभीक्ष्ण्यं द्योतयतो न यङ्वत्केवलाविति इति।

**क्रियासमभिहारेलोटः। (७/३/४) आनुपूर्व्ये। (७/३/५)**

पाणिनिना 'क्रियासमभिहारे लोट् लोटौ हिस्वौ वा च तध्वमोः'[268] इति सूत्रं प्रतिपादितम्। 'पौनः पुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्तस्य च हिस्वौ स्तस्तिङामपवादः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'प्रकारे गुणवचनस्य'[269] इति पाणिनीयसूत्रव्याख्याने कात्यायनेन 'क्रियासमभिहारे च'[270] 'आनुपूर्व्ये द्वे वाच्ये'[271] इति वार्तिकद्वयं प्रतिपादितम्।

---

[268] पा.सू.३/४/२

[269] पा.सू.८/१/१२

[270] वा.४६९५

[271] वा.४६१२

लुनीहि लुनीहीत्येवायं लुनाति इति प्रथमवार्तिकस्य मूले मूले स्थूलः इति च द्वितीयवार्तिकस्य च उदाहरणं कौमुद्यामुच्यते। इदं वार्तिकद्वयं भोजदेवेनात्र सूत्रद्वयेन प्रतिपादितम्। क्रियासमभिहारेलोटः इत्यस्यार्थः 'क्रियासमभिहारविषयो यो लोट् तदन्तस्य स्थाने द्वेशब्दरूपे भवतः' इति हृदयहारिण्यामुक्तः। 'लुनीहि लुनीहि' इत्युदाहरणम्। 'पापच्यते पापच्यत' इति अस्मिन्सूत्रेण यङ्विषयस्यापि द्विर्वचनं दृश्यते इति प्रश्ने दण्डनाथेन समाधानमुच्यते ''क्रियासमभिहारः द्विविधः - पौनपुन्यं भृशार्थश्च। यदा पौनपुन्ये यङ् प्रयुज्यते तत्र नास्ति द्विर्वचनम्। यदा भृशार्थे यङ् प्रयुज्यते तदा तत्र पौनपुन्यद्योतनाय द्विर्वचनम्। 'पापच्यते पापच्यत' इतिवत्। यदा तु तत्प्रतिपादनाय लोड्विधीयते तदा तस्य द्विर्वचनसहायस्यैवा-भीक्ष्ण्यप्रतिपादने सामर्थ्यमिति द्विर्वचनमपि भवति पापच्यस्व पापच्यस्व इति।''

आनुपूर्व्ये इति सूत्रव्याख्याने दण्डनाथेन किं नाम आनुपूर्व्यमिति प्रथमं प्रस्तौति। क्रमानामुल्लंघनमानुपूर्व्यम् , सद्विशिष्टेऽर्थे वार्तमानस्य सुबन्तस्य पदस्य स्थाने द्वे शब्दरूपे भवतः इति आनुपूर्व्ये इति सूत्रस्यार्थः दण्डनाथेनोच्यते। 'मूले मूले स्थूलाः', 'अग्रे अग्रे सूक्ष्माः', 'ज्येष्ठं ज्येष्ठं प्रवेशय', 'कनिष्ठं कनिष्ठमाशय' इत्यादीन्युदाहरणानि।

**अनेकावधारणे। (७/३/६)**

भोजदेवेन अस्य सूत्रार्थः हृदयहारिण्यामेवमुच्यते यत् अनेकार्थस्यावधारणे इयत्तापरिच्छेदे गम्यमाने सुबन्तस्य पदस्य स्थाने द्वे शब्दरूपे भवतः इति। 'माषं माषं देहि', 'द्वौ द्वौ देहि', 'त्रीन् त्रीन् देहि' इत्यादीनि उदाहरणानि। अत्र सूत्रे दण्डनाथेन 'अवीप्सार्थं वचनम्'

इत्युच्यते। 'पदस्य वीप्सायां द्वे' इति अस्य पादस्य प्रथमसूत्रे 'वीप्सा' इत्यस्य निर्वचनं दत्तम्। यथा 'वीप्सा' शब्दः एवमुक्तः- 'पृथक् संख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण वा युगपद्प्रयोक्तुनिच्छा वीप्सा' इति। न वीप्सा अवीप्सा।।

**डाच्यव्यक्तानुकरणे।** (७/३/७)

'अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच्'[272] इति पाणिनीयसूत्रेण डाच् प्रत्ययः विधीयते। 'डाचि विवक्षिते द्वे बहुलम्' इति वार्तिकमपि तत्र कात्यायनेन उक्तम्। अनयोः सूत्रवार्तिकयोः मेलनेन भोजेनेदं सूत्रमुक्तम्। 'अव्यक्तानुकरणे वर्तमानस्य पदस्य डाचिविषये द्वे शब्दरूपे भवतः' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'पटत् पटदिति करोति, पटपटाकरोति' इत्युदाहरणम्।

**डतरडतमयोः समानं स्त्रीभावप्रश्ने।** (७/३/८)

हृदयहारिण्यां दण्डनाथेन 'समानां केनचिद्गुणेन तुल्यतया सम्प्रधारितानां स्त्रीलिङ्गस्य भावस्य प्रवृत्तिनिमित्तस्य धात्वर्थस्य वा प्रश्ने वर्तमानस्य डतरान्तस्य डतमान्तस्य च परस्य स्थाने द्वे शब्दरूपे भवतः' इति सूत्रार्थः उक्तः। 'उभाविमावाढ्यौ कतराः कतरा', 'अनयोराढ्यता कतमा कतमा अनयोराढ्यता', 'एवं सर्व इमे आढ्याः', 'कतराः कतराः एषामेषामाढ्यता', 'कतमाः कतमाः एषामाढ्यता', 'सर्व इमे आढ्याः' 'यतरा यतरा एषां विभूतिस्ततरा ततरा

---

272 पा.सू.५/४/५७

कथ्यताम्' इत्यादीनि उदाहरणानि। सूत्रे डतरडतमयोः समानस्य स्त्रीग्रहणस्य तथा प्रश्न इत्येतेषां पृथगुदाहरणानि दत्वा प्रयोजनमुच्यते दण्डनाथेन। 'कतरकतमौ जातिपरिप्रश्ने'[273] इति सूत्रं पाणिनिना प्रयुक्तम्। तस्य भाष्ये "जातिपरिप्रश्न एव डतमचो विधानात्। वस्तुतस्तु डतरडतमविधौ द्वयोरिति बहूनामिति जातिपरिप्रश्ने" इति प्रत्याख्यातम्। अस्य वाक्यस्याधारेण भोजेनेदं सूत्रं प्रयुक्तं स्यात्।

**पूर्वप्रथमयोरर्थातिशये वा। (७/३/९)**

पूर्वप्रथम इत्येतयोः पदयोरर्थातिशये द्योत्ये द्वे शब्दरूपे वा भवतः इति अस्य सूत्रार्थः हृदयहारिण्यामुच्यते। आतिशायिकप्रत्ययस्यापवादः पक्षे सोऽपि भवति। पूर्वं पूर्वं पुष्यति पूर्वतरं पुष्यति, प्रथमं प्रथमं पच्यते प्रथमतरं पच्यते इत्यादीनि उदाहरणानि।

**वर्जने परेरसमासे। (७/३/१०)**

पाणिनिना 'परेर्वर्जने'[274] इति सूत्रं प्रयुक्तम्। 'वर्जनेऽर्थे परि इत्येतस्य द्वे भवतः' इति वक्तुं भोजेनेदं सूत्रं प्रतिपादितम्। तत्र 'परेर्वर्जने वावचनम्' इति वार्तिकं कात्यायनेन उक्तम्। अनयोः सूत्रवार्तिकयोः स्वीकारेण भोजेनेदं सूत्रं प्रवृत्तम्। 'परिशब्दस्य वर्जनेऽर्थे वर्तमानस्यासमासे द्वे शब्दरूपे वा भवतः' इति दण्डनाथेनास्यार्थः उक्तः। 'परि परि त्रिगर्तेभ्यो

---

[273] पा.सू.२/१/६३

[274] पा.सू.८/१/५

वृष्टो देवः परित्रिगर्तेभ्यः' इत्युदाहरणम्।

**अधोऽध्युपरीणां सामीप्ये। (७/३/११)**

'उपर्यध्यधसः सामीप्ये'[275] इति सूत्रं पाणिनिना प्रयुक्तम्। अस्य सूत्रस्य स्वीकारेण भोजेनेदं सूत्रमुक्तम्। 'सामीप्ये विवक्षिते उपरि अधि अधसित्येतेषां द्वे भवतः' इति प्रतिपादयितुं पाणिनिना इदं सूत्रमुक्तम्। समानरूपेणैव दण्डनाथेनापि सूत्रार्थः उक्तः। अधस्, अधि, उपरि इत्येतेषां सामीप्ये प्रत्यासत्तौ गम्यमानायां द्वे शब्दरूपे भवतः इति हृदयहारिण्यामुक्तः। 'अधोऽधोग्रामम्' 'उपर्युपरिग्रामम्' इत्येते उदाहरणे।

**वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु। (७/३/१२)**

पाणिनिना 'वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु'[276] इति सूत्रं प्रयुक्तम्। तदेव सूत्रं भोजदेवेनात्र स्वीकृतम्। 'परगुणानामसहनमसूया युवजनमाहिमत्यं चासम्मतिः क्रोधः कोपः निन्दाकुत्सनम् अपकारशब्दैर्भयोत्पादनं भर्त्सनम्। एते च प्रत्ययोऽत्र धर्मा नाभिधेयधर्माः तेषु। द्योत्येषु वाक्यादेरामन्त्रितस्य सम्बोधनप्रथमान्तस्य पदस्य स्थाने द्वे शब्दरूपे भवतः' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'असूयायाम्'-'अभिरूप अभिरूपकरिक्तं ते आभिरूप्यकम्', 'सम्मतौ'-'माणवकमाणवक शोभनः नः खल्वसि', 'कोपे'-'अविनीतक अविनीतक इदानीमास्यसि जाल्म' 'कुत्सने'-'शक्तिके शक्तिके रिक्ताते शक्तिः'

---

275 पा.सू.८/१/७

276 पा.सू.८/१/८

'भर्त्सने'-'चौर चौर चौराण्य चौराण्य' इत्यादीन्युदाहरणानि।

**एकस्य सुब्लुक्। (७/३/१३)**

पाणिनिना 'एकं बहुव्रीहिवत्'[277] इति सूत्रमुक्तम्। 'द्विरुक्तः एकशब्दः बबुव्रीहिवत्स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजेनात्र 'एकस्य सुब्लुक्' इति स्वीक्रियते। आदेरिति वर्तते। 'एक इत्यस्य द्वित्वे सति आदेः शब्दरूपस्य सम्बन्धिनः सुपो लुक् भवति' इति अस्य सूत्रार्थः उक्तः। द्विर्वचनं तु यथासम्भवं वीप्सादावर्थे भवति। 'एकैकमक्षरं पठति', 'एषामेकैकस्मै देहि' इत्येते उदाहरणे।

**आबाधे पुंवच्च। (७/३/१४)**

पाणिनिना 'अबाधे च'[278] इति सूत्रं प्रयुक्तम्। 'पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेन 'अबाधे पुंवच्च' इति प्रयुक्तं वर्तते। आबाधो मनसः पीडाप्रयोक्तृधर्मः। तस्मिन् गम्यमाने सुबन्तस्य पदस्य द्वे शब्दरूपे भवतः। आदेः परस्य दस्य सुब्लुक्पुंवद्भावश्च भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'गतगतः', 'नष्टनष्टः', 'गतगता', 'नष्टनष्टा' इत्यादीनि उदाहरणानि।

**प्रकारे गुणवचनस्य वा। (७/३/१५)**

'प्रकारे गुणवचनस्य'[279] इति सूत्रं पाणिनिना प्रयुक्तम्। 'सादृश्ये द्योत्ये गुणवचनस्य द्वे

---

277 पा.सू.८/१/९

278 पा.सू.८/१/१०

279 पा.सू.८/१/१२

स्तस्तच्च कर्मधारयवत्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेनात्र उक्तम्। 'प्रकारः सादृश्यं तस्मिन् गम्यमाने गुणवचनस्य पदस्य द्वे शब्दरूपे वा भवतः। आदेः परस्य सुब्लुक् पुंवद्भावश्च भवति इति अस्यार्थः हृदयहारिण्यामुक्तः। 'शुक्लशुक्लः पाठः', 'शुक्लशुक्लं रूपं', 'पटुः पटुः पटुपट्वी' इत्यादीनि उदाहरणानि।

**अकृच्छ्रे प्रियसुखयोः। (७/३/१६)**

'अकृच्छे प्रियसुखयोरन्यतरस्याम्'[280] इति सूत्रं पाणिनिना प्रतिपादितम्। 'अकृच्छ्रे द्योत्ये प्रिय सुख इत्येतयोः अन्यतरस्यां द्वे भवतः' इति अस्य सूत्रार्थः। भोजेनेदं सूत्रम् 'अकृच्छ्रे प्रियसुखयोः' इत्युक्तम्। दण्डनाथेन सूत्रार्थकथनात्पूर्वं अकृच्छ्रशब्दस्य निर्वचनमुच्यते 'कृच्छ्रं कष्टं तदभावोऽकृच्छ्रम्' इति। 'दुःखाभावादिके वर्तमानयोः प्रियसुखशब्दयोर्द्वे शब्दरूपे वा भवतः। सुब्लुक्त्वादेः शब्दरूपस्य भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। 'प्रियप्रियेण ददाति, प्रियेण ददाति' 'सुखसुखेन ददाति, अकृच्छ्रेण ददाति' इत्यादीनि उदाहरणानि।

**अन्यस्य क्रियायाः सातत्ये। (७/३/१७)**

'अन्यशब्दस्य क्रियायाः सातत्ये गम्यमाने द्वे शब्दरूपे भवतः' इति दण्डनाथेन हृदयहारिण्यामस्य सूत्रार्थः उक्तः। आदेश्च सुब्लुक् भवति। 'प्रकारे गुणवचनस्य' इति सूत्रव्याख्याने 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्'[281] इति वार्तिकमुक्तम्।

---

[280] पा.सू.८/१/१३

[281] वा.४७००

तेन वार्तिकेन कौमुद्यामिमानि कार्याणि साधितानि। 'अन्ये चान्ये च जायन्ते', 'अन्यस्य चान्यस्य प्रादुर्भावः' 'अन्यान्यप्रादुर्भावः' इत्यादीनि उदाहरणानि।

**एकवच्चेतरस्य व्यतीहारे। (७/३/१८) परान्ययोः सुक् च। (७/३/१९) एषामपुंस्यां सुपो वा। (७/३/२०)**

'प्रकारे गुणवचनस्य' इति सूत्रस्य व्याख्याने 'स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः'[282] इति वार्तिकमुक्तम्। अस्य वार्तिकाधारेण भोजदेवेन सूत्रत्रयमुक्तम्। दण्डनाथेन हृदयहारिण्यामस्य एकवच्चेतरस्य व्यतीहारे इत्यस्य सूत्रार्थं एवमुच्यते यत् 'इतरशब्दस्य क्रियाव्यतीहारे द्वेशब्दरूपे आदेः सुब्लुक् समुदायस्य चैकवद्भावो भवति'। 'इतरेतरं भोजयतः', 'इतरेतरेण भोजयति' इत्येते उदाहरणे। परान्ययोः सुक् च इत्यस्य सूत्रार्थः 'परान्य इत्येतयोः क्रियाव्यतीहारे द्वे शब्दरूपे आदेः सुगागमः समुदायस्य चैकवद्भावो भवति' इति हृदयहारिण्यामुक्तः। 'परस्परं भोजयतः', 'परस्परं भोजयन्ति', 'परस्परेण भोजयतः', 'परस्परेण भोजयन्ति', 'अन्योन्यं भोजयतः', 'अन्योन्यं भोजयन्ति', 'अन्योन्येन भोजयतः', 'अन्योन्येन भोजयन्ति' इत्येतानि उदाहरणानि।

'एषामपुंस्यां सुपो वा' इत्यस्य 'एषामितरपरान्यशब्दानां क्रियाव्यतीहारे द्विरुक्तानां यथायोगमादेः परस्य कृतसुब्लुक् सुगागमानां स्त्रियां नपुंसके च प्रयुज्यमानानां सुपः स्थाने आमित्ययमादेशो वा भवति' इति अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुक्तः। 'इमे सख्यौ

---

[282] वा.४७०१

इतरेतरां भोजयतः', 'इतरेतरं भोजयतः', 'इतरेतरेण भोजयतः'। 'एवमिमे सख्यौ परस्परां भोजयतः', 'परस्परं भोजयतः', 'इमे सख्यावन्योन्यं भोजयतः' 'अन्योन्यां भोजयतः'। नपुंसके- 'इमे ब्राह्मणकुले इतरेतरां भोजयतः', 'इतरेतरं भोजयतः', 'परस्परां भोजयतः', 'परस्परं भोजयतः', 'अन्योन्यां भोजयतः', 'अन्योन्यं भोजयतः' इत्यादीनि उदाहरणानि।

**यथास्वे यथायथम्। (७/३/२१)**

'यथास्वे यथायथम्'[283] इति सूत्रं पाणिनिना प्रतिपादितं वर्तते। यथास्वम् इति वीप्सायामव्ययीभावः। योऽयमात्मा यच्चात्मीयं तद्यथास्वम्। 'तस्मिन्यथाशब्दस्य द्वेक्लीबत्वं च निपात्यते' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनानेन सूत्रेण अम्भावो निपात्यते। 'यो य आत्मा यद्यदात्मीयं वा तत् तद्यथास्वं तस्मिन्नर्थे यथाशब्दस्य द्विर्वचनमुत्तरस्य वाचनस्थाने अम्भावो निपात्यते' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'यथायथं ज्ञाताः' इत्युदाहरणम्। ज्ञाताः सर्वपदार्थाः  अत्र यथायथं यथास्वभावमित्यर्थः। सर्वेषां तु यथायथं यथात्मीयमित्यर्थः इति च दण्डनाथेनोदाहरणस्य व्याख्या दत्ता। कौमुद्यामपि 'यथायथं ज्ञाताः' इत्युदाहरणम् दृश्यते।

**द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगेषु। (७/३/२२) अत्यन्तसहचरिते लोकविज्ञाते। (७/३/२३) द्वन्द्वःकलहयुग्मसमासादिषु। (७/३/२४)**

पाणिनिना 'द्वन्द्वं रहस्यमर्यादावचनव्युत्करमणयज्ञपात्रप्रयोगाभिव्यक्तिषु'[284] इति सूत्रं प्रयुक्तम्। कौमुद्यां 'द्विशब्दस्य द्विर्वचनं पूर्वपदस्य अम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च

---

283 पा.सू.८/१/१४

284 पा.सू.८/१/१५

निपात्यते एष्वर्थेषु' इति सूत्रार्थः उक्तः। तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यं इतरे विषयभूताः इत्युक्त्वा उदाहरणानि प्रतिपादयन्ति। अस्य सूत्राधारेण भोजदेवेन सूत्रत्रयमुक्तम्। द्वन्द्वमिति द्विशब्दस्य द्विर्वचनम्। 'पूर्वपदस्य सुपो लुक् इकारस्याम्भावः उत्तरस्यात्वं सुपोभावश्च रहस्यादिषु गम्यमानेषु निपात्यते च' इति हृदयहारिण्यां सूत्रार्थः उक्तः। 'द्वन्द्वं मन्त्रयन्ते', 'आचतुरं हिमे पशवो द्वन्द्वं मिथुना जायन्ते', 'द्वन्दं व्युत्क्रान्ताः', 'द्वन्द्वं यज्ञपात्राणि युनक्ति' इत्यादीनि उदाहरणानि। एतेषु उदाहरणेषु 'द्वन्द्वं मन्त्रयन्ते', 'आचतुरं हिमे पशवो द्वन्द्वं मिथुना जायन्ते', 'द्वन्दं व्युत्क्रान्ताः', 'द्वन्द्वं यज्ञपात्राणि युनक्ति' इत्यादीनि उदाहरणानि कौमुद्यामपि दृश्यते।

'द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु' इति सूत्रस्य उदाहरणे एव 'द्वन्दं सङ्कर्षणवासुदेवौ' इत्युक्त्वा अभिव्यक्तौ सहचार्येणेत्यर्थः उक्तः। किन्तु 'अत्यन्तसहचरिते लोकविज्ञाते' इति सूत्रमुक्त्वा तत्कार्यं भोजदेवः पृथक् निर्दिशति। 'अत्यन्तसहचरितत्वेन लोकविज्ञानमभिव्यक्तिरिति महाभाष्यवचनम्'। 'अव्यभिचारेण सहचरिते लोकप्रसिद्धे युग्मे द्विशब्दस्य पूर्ववत् द्वन्द्वमिति निपात्यते' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'द्वन्द्वं नारदपर्वतौ', 'द्वन्द्वं रामलक्ष्मणौ' 'द्वन्द्वं बलभद्रवासुदेवौ' इत्यादीनि उदाहरणानि। सूत्रे अत्यन्तसहचरित तथा लोकविज्ञात इत्यनयोः प्रयोजनमुच्यते 'युधिष्ठिरार्जुनौ' 'देवदत्तयज्ञदत्तौ' इति उदाहरणद्वयेन। 'सह चरतीति सहचरी अत्यन्तं सहचरी अत्यन्तसहचरिः'। लोके रामलक्ष्मणौ बलभद्रवासुदेवादयो सहचरिते प्रसिद्धाः। तत्र अनेन सूत्रेण द्वन्द्वमिति निपात्यते इत्याशयः।

'द्वन्द्व इति द्विशब्दस्याकारान्तः कलहादिष्वर्थेषु निपात्यते' इति 'द्वन्द्वःकलहयुग्म-समासादिषु' इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'द्वन्द्वः कलहः', 'द्वन्द्वं युद्धं', 'द्वन्द्वं युग्मं', 'द्वन्द्वः समासः' इत्याद्युदाहरणानि। अत्र सूत्रे आदिग्रहणात् द्वन्द्वानि सहते इत्यनेन दुःखानि सहते इत्यर्थः । 'द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु' इति सूत्रस्य व्याख्याने व्युत्क्रमणं पृथगवस्थानम् इत्युक्त्वा चार्थे द्वन्द्वः इति निपातनादन्यत्रापीति सिद्धमित्युक्तम्। पाणिनिना एकेन सूत्रेण प्रतिपादितानि इमानि कार्याणि भोजदेवेन सूत्रत्रयेण प्रतिपादितानि।

**वाक्यस्यापि सम्भ्रमे यावद्बोधम्। (७/३/२५)**

'भयादिभिश्चित्तविक्षेपात् प्रयोक्तुस्त्वरणं सम्भ्रमस्तस्मिन् द्योत्ये वाक्यस्यापि शब्दात्पदस्य च न केवलं द्वे एव शब्दरूपे, अपितु यावद्बोधं बहून्यपि शब्दरूपाणि प्रयोक्तव्यानि भवन्ति' इति अस्य सूत्रस्य व्याख्यानं हृदयहारिण्यां वर्तते। 'अहिरहि बुध्यस्व', 'अहिरहिः बुध्यस्व बुध्यस्व बुध्यस्व', 'हस्त्यागच्छति हस्त्यागच्छति', 'लघु पलायध्वं लघु पलायध्वम्' इत्यादीनि उदाहरणानि। 'प्रकारे गुणवचनस्य' इति सूत्रव्याख्याने 'सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः'[285] इति वार्तिकमुक्तम्। अस्य वार्तिकस्याधारेण भोजदेवेनोक्तमिदं सूत्रम्।

**पदादपदादौ समानवाक्ये। (७/३/२६)**

इदमधिकारसूत्रं भवति। हृदयहारिण्यामस्यार्थ एवमुच्यते अधिकारोऽयम्, यदितऊर्ध्वमनुक्रमिष्यामः तत्पदात् परस्यापादादौ वर्तमानस्य भवतीत्येवं तद्वेदितव्यम्,

[285] वा.५०५६

तेचेन्निमित्तनिमित्तीभूते पदे समाने एकस्मिन् वाक्ये भवतः इति।

**युष्मदस्मदोर्लुग्विषभक्त्यन्तयोर्वस्नसौ वा। (७/३/२७) द्विवचनस्य वां नावौ। (७/३/२८)**

'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ'[286] 'बहुवचनस्य वस्नसौ'[287] इति सूत्रद्वयं पाणिनिना प्रयुक्तम्। अनयोः द्वयोः सूत्रयोः आधारेण भोजेन सूत्रद्वयमिदं प्रवृत्तम्। 'द्वितीया चतुर्थी षष्ठी चेति लुग्विभक्तयस्तदन्तयोर्युष्मदस्मदोः पदयोः पदात् परयोरपादादौ वर्तमानयोः समानवाक्ये यथासंख्यं वस् नस् इत्येतावादेशौ वा भवतः' इति 'युष्मदस्मदोर्लुग्विषभक्त्यन्त-योर्वस्नसौ वा' इत्यस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'वस्', 'नस्' आदेशविधायकमिदं सूत्रम्। 'ग्रामो वोऽरक्षत्', 'जनपदो नोऽरक्षत्', 'ग्रामो युष्मान् रक्षतु', 'जनपदोऽस्मान् रक्षतु', 'ग्रामो वा दीयते', 'जनपदो वा दीयते', 'ग्रामो युष्मभ्यं दीयते', 'ग्रामोऽस्मभ्यं दीयते', 'ग्रामो वः स्वं', 'जनपदो नः स्वं', 'ग्रामो युष्माकं स्वं', 'जनपदोऽस्माकं स्वम्' इत्यादीनि उदाहरणानि।

'द्विवचनस्य वां नावौ' इत्यस्य 'पदात् परयोर्लुग्विभक्तिद्विवचनान्तयोर्युष्मदस्मदोरपादादौ समाने वाक्ये यथासंख्यं वां नावित्येतावादेशौ वा भवतः' इति सूत्रार्थः दण्डनाथेनोक्तः। 'वां' 'नावौ' आदेशौ अनेन विहितौ। 'ग्रामो वां रक्षतु', 'जनपदौ नौ रक्षतु', 'ग्रामो युवां रक्षतु', 'जनपद आवां रक्षतु', 'ग्रामो वां दीयते', 'जनपदौ नौ दीयते', 'ग्रामो युष्मभ्यं दीयते', 'ग्रामोऽस्मभ्यं दीयते', 'ग्रामो वां स्वं', 'जनपदो नौ स्वं', 'ग्रमो युवयोः स्वं', 'जनपदो आवयोः स्वम्' इत्यादीनि उदाहरणानि।

286 पा.सू.८/१/२०

287 पा.सू.८/१/२१

**ते मयावेकवचनस्य। (७/३/२९)**

पाणिनिना 'ते मयावेकवचनस्य'[288] इति सूत्रं प्रयुक्तम्। 'उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। अर्थात् 'युष्मदस्मदोः एकवचनान्तयोः षष्ठीचतुर्थीस्थयोः यथासंख्यं ते मे इत्यादेशौ भवतः' इति। 'ते' 'मे' इत्येतावादेशौ एव भोजेनापि विधीयते। 'पदाद् परयोर्लुग्विभक्त्येकवचनान्तयोर्युष्मदस्मदोरपादादौ समानवाक्ये यथासंख्यं ते मे इत्येतावादेशौ वा भवतः' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। उत्तरसूत्रे द्वितीयायाः पृथगुपादानात् चतुर्थीषष्ठ्योरेकवचनमिहगृह्यते इति दण्डनाथेन व्याख्याने स्पष्टमुक्तम्। 'ग्रामस्ते दीयते', 'ग्रामो मे दीयते', 'ग्रामस्तुभ्यं दीयते', 'जनपदो मह्यं दीयते', 'ग्रामस्ते स्वं', 'जनपदो मे स्वं', 'ग्रामस्तवस्वम्', 'जनपदो मम स्वम्' इत्यादीनि उदाहरणानि।

**त्वामौ द्वितीयायाः। (७/३/३०)**

पाणिनिना 'त्वामौ द्वितीयायाः'[289] इति सूत्रं प्रयुक्तम्। 'द्वितीयैकवचनान्तयोस्त्वा मा एतौ स्तः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'त्वा मा इत्येतावादेशौ' एव भोजेनापि अनेन सूत्रेण विधीयते। 'पदात् परयोर्द्वितीयैकवचनान्तयोर्युष्मदस्मदोरपदादौ समानवाक्ये यथासंख्यं त्वा मा इत्येतावादेशौ वा भवतः' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'ग्रामस्त्वा रक्षतु', 'जनपदो मा रक्षतु', 'ग्रामस्त्वां रक्षतु', 'जनपदो मां रक्षतु' इत्यादीनि उदाहरणानि।

---

288 पा.सू.७/३/२९

289 पा.सू.८/१/२३

**वस्नसादयो नित्यमन्वादेशे। (७/३/३१)**

अन्वादेशः इति पदस्य निर्वचनेन दण्डनाथेनास्य सूत्रार्थः उच्यते 'कथितानुकथनमात्र-मन्वादेशः कस्यचित्किञ्चिद्विधाय तेनान्येन वा शब्देन पुनरन्यद्विधानं कथनमित्यर्थः, अस्मिन्विषयो वस्नसादयो युष्मदस्मदादेशा यथास्वं नित्यं भवन्ति' इति। 'यूयं विनीतास्तद्वो देवा रक्षन्तु', 'वयं विनीतास्तन्नो देवा रक्षन्तु', 'युवां शीलवन्तौ तद्वां देवा रक्षन्तु', 'आवां शीलवन्तौ तन्नौ देवा रक्षन्तु', 'त्वं विद्वान् अथो ते ग्रामो दीयते', 'अहं विद्वान् अथो मे ग्रामो दीयते', 'धनवांस्त्वम् अथो त्वालोको मानयति', 'धनवानहं अतो मा लोको मानयति' इत्याद्युदाहरणान्युक्त्वा दण्डनाथेन अन्वादेशो नित्यवचनात् पूर्वो विकल्पविधिरन्वादेशोऽवतिष्ठते इत्युक्तम्। कौमुद्यां 'त्वामौ द्वितीयाः' इति सूत्रव्याख्याने 'एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्यः'[290] इति कात्यायनवार्तिकमुक्त्वा अन्वादेशे तु नित्यं स्युः इति प्रतिपादयति। एतस्मात् व्याख्यानात् भोजदेवस्य इदं सूत्रं प्रयुक्तं स्यात्।

**सपूर्वात् प्रथमान्ताद्वा। (७/३/३२)**

'सपूर्वायाः प्रथमाया विभाषा'[291] इति सूत्रं पाणिनिना प्रयुक्तं वर्तते। 'विद्यमानपूर्वात्प्रथमान्तात्परयोरनयोरन्वादेशेऽप्येते आदेशा स्युः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। अर्थात् 'विद्यमानपूर्वात्प्रथमान्तात्पदातुत्तरयोः युष्मदस्मदोः विभाषा वान्नावादयो न भवतीति' काशिका।

---

290 वा.४७१७

291 पा.सू.८/१/२६

भोजेनेदं सूत्रं 'सपूर्वात् प्रथमान्ताद्वा' इति प्रयुक्तम्। 'विद्यमानपूर्वात् प्रथमान्तात् पदात् परयोर्युष्मदस्मदोरन्वादेशोऽपि वस्नसादय आदेशा यथायथं वा भवन्ति' इति भोजसूत्रस्य हृदयहारिणीव्याख्याने अस्य सूत्रार्थः उक्तः। 'यूयं विनीतास्तद्देवा वो रक्षन्तु', 'तद् देवा युष्मान् रक्षन्तु', 'वयं विनीतास्तद् देवो नो रक्षन्तु', 'तद्देवा अस्मान् रक्षन्तु' इत्यादीनि उदाहरणानि।

**न च वाहाहैव योगे। (७/३/३३)**

पाणिनिना 'न चवाहाहैव युक्ते'[292] इति सूत्रं प्रयुक्तम्। 'चादिपञ्चकयोगे नैते आदेशाः स्युः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'च' 'वा' 'ह' 'अह' 'एव' एते चादिपञ्चकाः। तेषां योगे युष्मदस्मदोः वान्नावादयः न भवन्ति। भोजेनास्मिन् सूत्रे 'युक्ते' इत्यस्य 'योगे' इति पदं प्रयुक्तम्। 'चादिभिर्योगे युष्मदस्मदोर्यथोक्तवस्नसादयो न भवन्ति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'ग्रामो युष्मांश्च रक्षतु', 'ग्रामोऽस्मांश्च रक्षतु', 'ग्रामो युष्मान् वा रक्षतु', 'ग्रामोऽस्मान् वा रक्षतु', 'ग्रामो युष्मान् ह रक्षतु', 'ग्रामोऽस्मान् ह रक्षतु', 'ग्रामो युष्मानह रक्षतु', 'ग्रामोऽस्मानह रक्षतु', 'ग्रामो युष्मानेव रक्षतु', 'ग्रामोऽस्मानेव रक्षतु' इत्यादीनि उदाहरणानि।

**दृश्यर्थैरनालोकने। (७/३/३४)**

पाणिनिना 'पश्यार्थैश्चानालोचने'[293] इति सूत्रं प्रयुक्तम्। अत्र पश्यार्थाः दर्शनार्थाः। दर्शनं ज्ञानं, आलोचनं चक्षुर्विज्ञानमिति अर्थाः काशिकायां दृश्यते। 'अचाक्षुषज्ञानार्थैर्धातु-

---

[292] पा.सू.८/१/२४

[293] पा.सू.८/१/२५

भिर्योगे एते आदेशा न स्युः' इति कौमुद्यामस्य सूत्रस्यार्थः उक्तः। 'पश्यार्थस्य तथा आलोचनस्य च अर्थव्याप्तिद्योतनाय' भोजदेवेन 'दृश्यर्थैरनालोकने' इति सूत्रं परिवर्तितं स्यात्। 'दृशिना समानार्था दृश्यार्थास्तैर्धातुभिरनालोकने अचक्षुर्विज्ञाने वर्तमानैर्योगे युष्मदस्मदोर्यथोक्तावस्नसा-दयो न भवन्ति' इति सूत्रार्थः दण्डनाथेनोक्तः। 'ग्रामो युष्मान् समीक्ष्यागतः', 'ग्रामोऽस्मान् समीक्ष्यागतः', 'ग्रामो युवामवेक्षागतः', 'ग्राम आवामवेक्ष्यागतः', 'ग्रामस्त्वामवेक्षते', 'ग्रामो मामवेक्षते', 'ग्रामो युष्मभ्यं दीयमानमुत्पश्यति', 'ग्रामोऽस्मभ्यं दीयमानमुत्पश्यति', 'ग्रामो युवाभ्यां दीयमानं निरूपयति', 'ग्राम आवाभ्यां दीयमानं निरूपयति', 'ग्रामस्तुभ्यं दीयमानं निध्यापयति', 'ग्रामो मह्यं दीयमानं निध्यापयति', 'ग्रामो युष्माकं स्वं समुपलक्षयति', 'ग्रामोऽस्माकं स्वं समुपलक्षयति', 'ग्रामो युवयोः स्वं सम्पश्यति', 'ग्राम आवयोः स्वं सम्पश्यति', 'ग्रामस्तवकार्यमालोचयति', 'ग्रमो मम कार्यमालोचयति' इत्यादीनि उदाहरणानि।

**आमन्त्रितं पूर्वमसद्वत्। (७/३/३५)**

पाणिनिना 'आमन्त्रितं पूर्वमविद्यमानवत्'[294] इति सूत्रं प्रयुक्तम्। आमन्त्रितं पूर्वमविद्यमानवद् भवति, तस्मिन् सति यत्कार्यं तन्न भवति, असति यत् तद्भवति इति अस्यार्थः काशिकायामुच्यते। भोजेन 'आमन्त्रितं पूर्वमसद्वत्' इति इदं सूत्रमुक्तम्। 'सम्बोधनप्रथमान्तं पदं युष्मदस्मद्भ्यां पूर्वमसद्वदविद्यमानवद् भवति  तस्मिन् यत्कार्यं तन्न भवति असति यत्तद्भवतीत्यर्थः' अस्य हृदयहारिण्यामुक्तः। 'हे ब्राह्मणा युष्मान् रक्षतु ग्रामः', 'हे ब्राह्मणा

294 पा.सू.८/१/७२

अस्मान् रक्षतु ग्रामः', 'हे ब्राह्मणा युष्मभ्यं दीयते', 'हे ब्राह्मण अस्मभ्यं दीयत' इत्यादीनि उदाहरणानि।

**न समानाधिकरणे सामान्यवचनम्। (७/३/३६)**

'नामन्त्रिते समानाधिकरणे सामान्यवचनम्'[295] इति सूत्रं पाणिनिना प्रयुक्तम्। 'विशेष्यं समानाधिकरणे आमन्त्रिते परे नाविद्यमानवत्स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेन आमन्त्रितमिति पदं सूत्रे नोक्तं चेदपि दण्डनाथेन सूत्रार्थे उच्यते। 'आमन्त्रिते समानाधिकरणे परत आमन्त्रितं सामान्यवचनमस्मद्वन्न भवति' इति अस्य सूत्रार्थः हृदयहारिण्यां दृश्यते। 'माणवक जटिलक त्वा रक्षन्तु देवाः', 'माणवक जटिलक ते रोचते मोदकः', 'माणवक जटिलक ते स्वमेवम्, इत्यादीनि उदाहरणानि।

**जस् वा। (७/३/३७)**

पाणिनिना 'विभाषितं विशेषवचने बहुवचनम्'[296] इति सूत्रं प्रयुक्तम्। 'आमन्त्रितान्ते विशेषणे परे पूर्वं बहुवचनान्तमविद्यमानावद्वा' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'जस्' इति बहुवचनप्रत्ययः भवति। भोजेन अस्य सूत्रस्य स्थाने 'जस् वा' इति सूत्रं प्रयुक्तम् स्यात्। 'जस् युक्तमामन्त्रितं सामान्यवचनं समानाधिकरण आमन्त्रिते विशेषवचने परतोऽसद्वद्वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यां दृश्यते। 'ब्राह्मणाः शरण्याः' 'अस्मानथो ब्राह्मणाः शरण्याः', 'जनोऽथो रक्षत किं ब्राह्मणा शरणं प्रपद्ये' इत्यादीनि उदाहरणानि।

---

295 पा.सू.८/१/७३

296 पा.सू.८/१/७४

**पूर्वत्रासिद्धम्। (७/३/३८)**

'पूर्वत्रासिद्धम्'[297] इति अधिकारसूत्रं पाणिनिना उक्तम्। 'तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यमपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनापि इदं अधिकारसूत्रत्वेनोक्तम्। 'आअध्यायपरिसमाप्तेः अस्य अधिकारः' इति भोजेनोच्यते। 'यदित ऊर्ध्वं लक्षणमनुक्रमिष्यामः तत्पूर्वस्मिन् लक्षणे कर्तव्ये असिद्धं भवति इति वेदितव्यम्। इत उत्तरमितः पूर्वस्मिन् पूर्वस्मिन् योगे कर्तव्ये परः परोऽसिद्धो भवति। असिद्धवचनमादेशलक्षणकार्यप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च आहुः' इति च हृदयहारिण्यां दण्डनाथेन उक्तः। 'अस्मा उद्धरद्वा अस्मा इन्द्रः' इत्यत्र यवयोर्लोपस्यासिद्धत्वात् सवर्णदीर्घगुणौ न भवतः इति, 'अमुष्मै', 'अमुष्मात्', 'अमुष्य', 'अमुष्मिन्' अत्रोत्वस्यासिद्धत्वात् अत इत्यधिकृत्य विधीयमाना आदेशलक्षणाः स्मादयो भवन्ति, 'ऊढमाख्यत्', 'ऊढिमाख्यत्', 'औजढत्', 'औजिढत्' इत्यढत्वधत्वष्टुत्वढलोपानामसिद्धत्वात् णौ टि लोपस्य स्थानिवद्भावात् चङीति च द्विर्वचनं भवति, इत्यादीनि उदाहरणानि व्याख्यानसहितं तत्र दण्डनाथेन उक्तानि।

**न लोपः सुपि। (७/३/३९)**

'न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति'[298] इति सूत्रं पाणिनिना प्रयुक्तं वर्तते। 'सुब्विधौ स्वरविधौ संज्ञाविधौ कृतितुग्विधौ च नलोपोऽसिद्धो नान्यत्र राजश्व इत्यादौ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं 'न लोपः सुपि' इत्युक्तम्। 'सुपि परभूते यो नलोपः स च

---

297 पा.सू.८/२/१

298 पा.सू.८/२/२

पूर्वत्रासिद्धे भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'राजभ्यां', 'राजभ्यः', 'राजसु', 'राजभिः' इत्येतानि उदाहरणानि। अत्र सुपि परतो नलोपस्यासिद्धत्वात् दीर्घत्वमेत्वैत्वं च न भवति इति व्याख्यानं दण्डनाथेन दत्तं वर्तते।

**न नि मुः। (७/३/४०) सिज् लोप एकादेशे। (७/३/४१) षठनोर्निष्ठादेशः। (७/३/४२) प्लुतविकारश्छेतुकि। (७/३/४३) धुटि श्चुत्वम्। (७/३/४४) द्वित्वे परसवर्णः। (७/३/४५)**

पाणिनिना 'न मु ने'[299] इति सूत्रं प्रयुक्तम्। 'नाभावे कर्तव्ये कृते च मुभावो नासिद्धः स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन 'न नि मुः' इति इदं सूत्रं प्रयुक्तम्। 'नाशब्दे परतो यत्कार्यं तस्मिन् कर्तव्ये मुभावोऽसिद्धो न भवति'। 'अमुना' इत्युदाहरणम्। अत्र मुभावस्य सिद्धत्वादतो यञि सुपीति दीर्घत्वं न भवति निकर्तव्ये मुभावस्य यत्सिद्धत्वात् तदर्थतः सङ्गृहीतम् इत्यपि हृदयहारिण्यां वर्तते।

अस्य सूत्रस्य कौमुदीव्याख्याने नववार्तिकानि प्रयुक्तानि कात्यायनेन। तत्र प्रथमं भवति 'सिज्लोप एकादेशे सिद्धो' वक्तव्य इति। इदं वार्तिकं भोजेन सूत्रेण प्रतिपादितम् 'सिज्लोप एकादेशे' इति। 'एकादेशे कर्तव्ये सिज्लोपः सिद्धो न भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अलावीत्' इत्युदाहरणम्। अत्र ई सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घो भवति।

कात्यायनेन तत्र प्रतिपादितं द्वितीयं वार्तिकं भवति 'निष्ठादेशः षत्वस्वरप्रत्यविधीड्विधिषु

---

299 पा.सू.८/२/३

सिद्धो वाच्यः' इति। भोजेनेदं वार्तिकं सूत्रत्वेनोक्तम् 'षठनोर्निष्ठादेशः' इति। 'षत्वे ठप्रत्यये च विधातव्ये निष्ठादेशो सिद्धो न भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'वृक्णः', 'वृक्णवान्' इत्येते उदाहरणे। अत्र निष्ठादेशनत्वस्य सिद्धनत्वस्य सिद्धत्वात् झल्ग्रहणं षत्वं न भवति। इति च दण्डनाथेन व्याख्याने दत्तम्।

कात्यायनेन तत्रोक्तं नवमं वार्तिकं भवति 'प्लुतविकारस्तुग्विधौ छे सिद्धो वक्तव्यः' इति। इदं वार्तिकं भोजेन 'प्लुतविकारश्छे तुकि' इति सूत्रत्वेन उक्तम्। 'छे परतो यस्तुक् तस्मिन् कर्तव्ये प्लुतविकारोऽसिद्धो न भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अग्ना इच्छात्रम्' 'पटाण्य उच्छत्रम्' इत्येते उदाहरणे। अत्र प्लुतविकारस्य सिद्धत्वात् छेचेति नित्यं तुग्भवति न तु पदान्तलक्षणो विकल्पित इति च तत्रोक्तं दण्डनाथेन।

कात्यायनेन तत्र प्रयुक्तं 'श्चुत्वं धुटि सिद्धं वक्तव्यम्' इति। इदमपि भोजेन 'धुटि श्चुत्वं' इति सूत्रेण उक्तम्। अस्य सूत्रार्थः हृदयहारिण्यात् नष्टं जातम्। 'स्तोः श्चुना श्चुः इत्यनेन जायमानं श्चुत्वं ड सि धुट् इति पूर्वत्रिपादीसूत्रस्य कृते सिद्धं ज्ञेयं इति' अस्य वार्तिकस्य आशयः। तस्मात् तदेव अस्य भोजसूत्रास्यापि आशयः स्यात्। 'अभति अभति गवा भति' इत्युदाहरणम्। अत्र च्युतिर् क्षरण इत्ययं धातुः सकारादिः पठ्यते तस्य श्चुत्वस्यासिद्धत्वात् डसोः धुट् नश्चेति प्राप्नोति। सिद्धत्वान्न भवति इति दण्डनाथः।

तत्र कात्यायनेन प्रतिपादितं पञ्चमं वार्तिकं भवति 'द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम्' इति। द्वित्वे परसवर्णः इति सूत्रं भोजेन अस्य वार्तिकाधारेण उक्तं वर्तते। 'द्वित्वे कर्तव्ये

परसवर्णो नासिद्धो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'सय् यन्ता', 'सव् वँत्सरः', 'तल् ल्लोकम्' इत्यादीनि उदाहरणानि। अत्र परसवर्णस्यासिद्धत्वात् यर इति द्वित्वं न स्यात् सिद्धत्वात् भवति इति च दण्डनाथेनोक्तः।

**अमात्तदुपधाच्च मतोर्वः। (७/३/४६)**

'मादुपधायाश्च मतोर्वोऽयवादिभ्यः'[300] इति पाणिनीयसूत्रं वर्तते। 'मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'अमात्तदुपधाच्च मतोर्वः' इति उक्तम्। 'अवर्णान्तादवर्णो-पधान्मकारान्तान्मकारोपधाच्च प्रातिपदिकात्परस्य मतोरादेर्वकारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। अवर्णान्तात् - 'वृक्षान् खट्वान्', अवर्णोपधात् - 'पयस्वान् वस्वान्' मकारान्तात् - 'किम्वान् इदम्वान्' मकारोपधात्- 'लक्ष्मीवान्' इत्यादीनि उदाहरणानि।

**झयः। (७/३/४७)**

पाणिनिना 'झयः'[301] इति सूत्रं प्रयुक्तम्। 'झयन्तान्मतोर्मस्य वः स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजेनात्र स्वीकृतम्। 'झयन्तात् प्रातिपदिकात् परस्य मतोरादेर्वकारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः दण्डनाथेनोक्तः। 'समिद्वान्', 'कुमुद्वान्', 'विद्युत्वान्', 'तटित्वान्' इत्यादीनि उदाहरणानि।

---

300 पा.सू.८/२/९

301 पा.सू.८/२/१०

**संज्ञायाम्। (७/३/४८)**

'संज्ञायाम्'[302] इति सूत्रं पाणिनिना प्रतिपादितम्। 'मतोर्मस्य वः स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनात्रेदं सूत्रं स्वीकृतम्। 'संज्ञायां विषये मतोर्वकारादेशो भवति स च पूर्वमादेः प्रवृत्तत्वादिहापि आदेरेव भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अहीवती', 'कपीवती' 'मणीवती' 'मुनीवती' इत्यादीनि उदाहरणानि।

**अष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वत्यः। (७/३/४९)**

'आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती'[303] इति सूत्रं पाणिनिना प्रयुक्तं वर्तते। 'एते षट् संज्ञायां निपात्यते' इति कौमुद्यामस्यार्थः उक्तः। अर्थात् 'आसन्दीवत्' 'अष्ठीवत्' 'चक्रीवत्' 'कक्षीवदत्' 'रुमण्वत्' 'चर्मण्वती' एते षट् संज्ञायां निपात्यते इति। भोजेनेदं सूत्रं 'अष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वत्यः' इत्युक्तम्। 'एते शब्दाः मत्वन्ताः संज्ञायां विषये निपात्यन्ते' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। अत्र भोजदेवेन 'आसन्दीवत्' शब्दस्य स्वीकारः नकृतः। तस्मात् भोजमते 'अष्ठीवत्' 'चक्रीवत्' 'कक्षीवदत्' 'रुमण्वत्' 'चर्मण्वती' इति पञ्चशब्दाः संज्ञायां विषये निपात्यते इत्यर्थः भवेत्। अस्थिशब्दस्य मतुबि अष्ठीभावो मतुपो वत्वं च निपात्यते 'अष्ठीवान्', चक्रशब्दस्य चक्रीभावः 'चक्रीवान्' गर्दभः, कक्षशब्दस्य सम्प्रसारणं 'कक्षीवान्' ऋषिः, 'रुमण्वान्' नाम पर्वतः, 'चर्मवती' नदी इत्येतानि उदाहरणानि।

---

302 पा.सू.८/२/११

303 पा.सू.८/२/१२

**उदन्वानुदधौ च। (७/३/५०)**

'उदन्वानुदधौ च'[304] इति पाणिनिना प्रतिपादितमिदं सूत्रं भोजदेवेन स्वीकृतम्। 'उदकस्य उदन्भावो मतौ उदधौ संज्ञायं च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'उदकशब्दस्य मतावुदन्भाव उदधावर्थे संज्ञायांच विषये निपात्यते' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'उदन्वान् घटः', 'उदन्वान् मेघः', यस्मिन्नुदकं दीयते स एवमुद्यते 'उदन्वान् समुद्रः' 'उदन्वान् ऋषिः' इत्यादीनि उदाहरणानि।

**राजन्वान् सौराज्ये। (७/३/५१)**

पाणिनिना 'राजन्वान् सौराज्ये'[305] इति सूत्रं प्रयुक्तम्। 'सौराज्ये गम्यमाने राजन्वानिति निपात्यते' इति अस्य अर्थः। इदमेवसूत्रं भोजेन स्वीकृतम्। 'राजन्वानिति सौराज्ये गम्यमाने मतो नलोपाभावो निपात्यते' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'राजन्वान् देशः', 'राजन्वती पृथिवी', 'राजन्वत्यः प्रजाः' इत्यादीनि उदाहरणानि।

---

304 पा.सू.८/२/१३

305 पा.सू.८/२/१४

**न यवोर्मिदल्मिभूमितिमिकृमिक्रुञ्चाद्राक्षाध्राक्षावासोहरित्गरुत्ककुज्ज्योतिष्मद्गोमद्भ्यः। (७/३/५२)**

**कान्तिशिम्बिहरिचार्विक्षुमधुबन्ध्विन्दुबिन्दुद्रुवस्वंशुश्रुहनुसानुभान्वादिभ्यश्च। (७/३/५३)**

**कृपो रो लोऽकृपणकृपाणकर्पटकृपीटकर्परकर्पूरकृपादीनाम्। (७/३/५४)**

**कपिरिकातिप्पिरिकाङ्गुरिकरोमपरुषतरुणसरिरारम्मूरकरीरकर्ममुकुरपांसुररेखारिक्षादीनाम्। (७/३/५९)**

'कृपो रो लः'[306] इति सूत्रं पाणिनिना प्रतिपादितं वर्तते। 'कृपो यो रेफस्तस्य लः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'कृपो रो लोऽकृपणकृपाणकर्पटकृपीटकर्परक-पूरकृपादीनाम्' इति प्रतिपादितम्। 'कृपेः सम्बन्धिन्या रश्रुतेर्लश्रुतिर्भवति, न न चेद् सा कृपणादीनां सम्बन्धिनी भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'क्लृप्तः', 'कृप्तवान्', 'चिक्लृप्सति', 'अचीक्लृपत्', 'कल्पते', 'कल्पिता', 'कल्पा', 'चलीकल्प्यते' इत्यादीनि उदाहरणानि।

अस्य सूत्रस्य व्याख्याने कौमुद्यां 'कपिलकादीनां संज्ञाच्छन्दसोर्वेति वाच्यम्' इति वार्तिकं कात्यायनेन उक्तं वर्तते। अस्य वार्तिकाधारेण भोजदेवेन 'कपिरिकातिप्पिरिकाङ्गुरि-करोमपरुषतरुणसरिरारम्मूरकरीरकर्ममुकुरपांसुररेखारिक्षादीनाम्' इति सूत्रं प्रयुक्तम्। 'कापिरिकादीनां सम्बन्धिनो रेफस्य लकारादेशो वा भवतीति' दण्डनाथेनास्य सूत्रार्थः उक्तः। 'कपिरिका'/'कपिलिका', 'तिप्पिरिका'/'तिप्पिलिका', 'अङ्गुरी'/'अङ्गुली', 'रोम'/'लोम',

---

306 पा.सू.८/२/१८

'पुरुषः'/'पुलुषः', 'तरुणः'/'तलुनः', 'सरिरं'/'सलिलम्', 'अरम्'/'अलं', 'मूरं'/'मूलं', 'करीरं'/'कलीलं', 'कर्म'/'कल्म', 'मुकुरं'/'मुकुलं', 'पांसुरः'/'पांसुलः', 'रेखा'/'लेखा', 'लिक्षा'/'रिक्षा' इत्यादीनि उदाहरणानि।

**उपसर्गस्यायतौ। (७/३/५५)**

पाणिनिना 'उपसर्गस्यायतौ'[307] इति सूत्रं प्रयुक्तम्। 'अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदमेवसूत्रं भोजेन स्वीकृतम्। 'उपसर्गसम्बन्धिनो रेफस्यायतौ धातौ परतः लकारादेशो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'प्लायते', 'पलायते', 'पल्ययते', 'निलयते' इत्यादीनि उदाहरणानि।

**ग्रो यङि । (७/३/५६)**

'ग्रो यङि'[308] इति सूत्रं पाणिनिना प्रतिपादितम्। 'गिरते रेफस्य लत्वं स्याद्यङि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजेनात्र स्वीकृतम्। 'यङि प्रत्यये परतो गिरतेर्धातो रेफस्य लकारादेशो भवतीति' दण्डनाथेनास्य सूत्रार्थः उक्तः। 'गर्हितः', 'निर्गमति', 'निजेगिल्यते' इत्यादीनि उदाहरणानि।

**अचि वा । (७/३/५७)**

'अचि विभाषा'[309] इति पाणिनीयसूत्रं वर्तते। 'गिरते रेफस्य लत्वं वा स्यादजादौ' इति

---

307 पा.सू.८/२/१९

308 पा.सू.८/२/२०

309 पा.सू.८/२/२१

अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजेन 'अचि वा' इति प्रतिपादितम्। 'अजादौ विहितस्य गिरतेः सम्बन्धिनो रेफस्य लकारादेशो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'निगरणं', 'निगलनं', 'निगारकः', 'निगालकः' इत्येतानि उदाहरणानि।

**परेर्घाङ्कयोगेषु। (७/३/५८)**

'परेश्च घाङ्कयोः'[310] इति सूत्रं पाणिनिना प्रतिपादितम्। 'परे रेफस्य लो वा स्याद्घशब्दे अङ्कशब्दे च' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं किञ्चित्परिवर्तनेन 'परेर्घाङ्कयोगेषु' इति भोजेन प्रतिपादितम्। 'परेः सम्बन्धिनो रेफस्य घ अङ्क योग इत्येतेषु परतो लकारादेशो वा भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'परिघः'/'पलिघः', 'पर्यङ्कः'/'पल्यङ्कः', 'परियोगः'/'पलियोगः' इत्येतानि उदाहरणानि। भोजदेवेन अस्मिन् सूत्रे योगशब्दोऽपि योजितः।

**इरातर्परकरभशरभवाखाररेघुगरादीनामर्थभेदे। (७/३/६०)**

'इरादीनां सम्बन्धिनो रेफस्यार्थभेदे लकारादेशो वा भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'इरा' अमृतम् 'इला' भूमिः 'तर्परः' पशूनां कण्ठः 'तत्फला' गजपृष्ठैकदेशः 'करभः' उष्ट्रः 'कलभः' करिशबकः 'शरभः' सरपोऽष्टापदः 'शलभः' पतङ्गः 'कारो' रक्षानिर्वेशः 'कालः' वर्णः 'वरः' क्रियाभ्यावृत्तिः 'वालः' केशः 'रघुः' राजा 'लघुः' अपचिपरिमाणः 'गरः' विषं 'गलः' प्राण्यङ्गम् इत्यादीनि उदाहरणानि। तत्र रेफस्य लकारादेशे अर्थभेदः जायते।

310 पा.सू.८/२/२२

**असंयुक्तानादेर्डः। (७/३/६१)**

डकारस्य लकारादेशविधायकमिदं सूत्रम्। असंयुक्तस्य पदानादेश्च डकारस्य लकारादेशो भवति वा इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'वडभी', 'वलभी', 'चूडा', 'चूला', 'इडा', 'इला', 'व्याडः', 'व्यालः', 'पुरोडाशः', 'पुरोलाशः', 'षोडश', 'षोलश', इत्यादीनि उदाहरणानि।

**जपादीनां पो वः। (७/३/६२)**

पकारस्य विकल्पेन वकारादेशविधायकमिदं सूत्रम्। 'जपा इत्येवमादीनां सम्बन्धिनः पकारस्य वकारादेशो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'जपः'/'जवः', 'कपलः'/'कवलः', 'कपाटः'/'कवाटः', 'पारापतः'/'पारावतः', 'पारापारः'/'पारावारः', 'अपाची'/'अवाची' 'विष्टवम्'/'विष्टपम्' 'त्रिविष्टपम्'/'त्रिविष्टपम्' इत्यादीनि उदाहरणानि।

**प्रातिपदिकस्यानह्नो नो लोपः। (७/३/६३)**

नकारान्तस्याहन् वर्जितस्य प्रातिपदिकस्य पदस्यालोन्त्यस्य लोपो भवति इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'राजाच्चः', 'वृत्रहा', 'वाग्मी', 'राजपुरुषः', 'राजकाम्यति' इत्यादीनि उदाहरणानि। पाणिनिना 'नलोपप्रातिपदिकान्तस्य' इति सूत्रेणैव कार्यमिदं सिध्यति। तत्र व्याख्याने प्रातिपदिकग्रहणस्य प्रयोजनमुच्यते अहन् इति तिङन्तस्यापि सिध्यर्थमिति। अत्र अह्नो सिद्धिः नेष्टः इत्यनेन भोजेन इदं सूत्रमुक्तम्।

**क्ये। (७/३/६४)**

क्य इति क्यच् क्यष् क्यङां सामान्येन ग्रहणम् तस्मिन् परतो नकारान्तस्य प्रातिपदिकस्यालोऽन्त्यस्य लोपो भवति। राजीयति राजीयते चर्मायति चर्मायते इत्यादीनि उदाहरणानि।

**न सम्बुद्धौ। (७/३/६५)**

सिद्धान्तकौमुद्यां हलन्तनपुंसकलिङ्गप्रकरणे 'सम्बुद्धौ नपुंसकानां न लोपो वा वाच्यः' इत्यस्ति। तदाधारेण भोजेनोक्तमिदं सूत्रम्। 'नकारान्तस्य प्रातिपदिकस्य नपुंसके वर्तमानस्य सम्बुद्धावलोऽन्त्यस्य लोपो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'हे चर्म'/'हे चर्मन्', 'हे दाम'/'हे दामन्' इत्येते उदाहरणे।

**सुपि वलि तद्वत्। (७/३/६६)**

सुपीति प्रत्याहारः स्वौजसीति सुशब्दादारभ्य आकपः पकारात् तदित्यनेन च प्रकृतं पदं परामृश्यते वलादौ सुपि प्रत्यये परतः पूर्वस्य पद तद्वत् पदवत्  पूर्वमुत्तरं च कार्यं भवति राजभ्यां राजत्वं राजकल्पः द्युद्भ्यां  द्युमान् द्युकल्पः वलीति किम् राजानौ सुबन्तात् तद्धितोत्पत्तौ सुपोलुकि प्रत्ययलक्षणेन तद्धितेषु पदकार्येसिद्धे नियमार्थं वचनम्। वलादावेव तद्धिते यथा स्यात् वलादौ माभूत्। दिव्यं पायसमिति प्रातिपदिकात् तु तद्धितोत्पत्तौ विध्यर्थमिति।

**संयोगस्य। (७/३/६७)**

पाणिनिना 'संयोगान्तस्य लोपः'[311] इति सूत्रं प्रयुक्तम्। 'संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजेन 'संयोगस्य' इति प्रतिपादितम्। 'संयोगान्तस्य परस्यालोऽन्त्यस्य लोपो भवति' इति दण्डनाथेन हृदयहारिण्यां सूत्रार्थः उक्तः। 'कुर्वन्', 'कृतवान्', 'गोमान्', 'अनड्वान्', 'श्रेयान्' इत्यादीनि उदाहरणानि।

**रात् सः। (७/३/६८)**

'रात्सस्य'[312] इति पाणिनीयसूत्रमस्ति। 'रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'संयोगान्तस्य पदस्य सम्बन्धिनो रेफात्परस्य सकारस्यैव लोपो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः दण्डनाथेनोक्तः। 'पितुः' 'मातुः' इत्येते उदाहरणे।

**धि सङि। (७/३/६९)**

'धि च'[313]  इति सूत्रं पाणिनिना उक्तम्। 'धादौ प्रत्यये परे सलोपः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजेन 'धि सङि' इति प्रतिपादितम्। सूत्रे प्रयुक्तेन 'सङीति' प्रत्याहारेण 'सनः' सशब्दादारभ्य 'हिङो' ङकारेण धातुप्रत्यया गृह्यन्ते इति दण्डनाथेन अस्य सूत्रस्य हृदयहारिणीव्याख्यानस्यादौ उच्यते। 'सङि, तस्मिन् धकारादौ परतः सकारस्य

---

311 पा.सू.८/२/२३

312 पा.सू.८/२/२४

313 पा.सू.८/२/२५

लोपो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'चकाधि', 'आशाध्वम्', 'अलविध्वम्', 'अलविड्वम्' इत्यादीनि उदाहरणानि।

**इट ईटि। (७/३/७०)**

पाणिनिना 'इट ईटि'[314] इति सूत्रं प्रतिपादितम्। 'इटः परस्य सस्य लोपः स्यादीटि परे' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। पाणिनीयमिदं सूत्रं तथा एव भोजदेवेन स्वीकृतम्। 'इटः परस्य सकारस्य ईडादौ सङि परतो लोपो भवति' इति अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुक्तः। 'अलावीत्', 'अस्तावीत्' इत्येते उदाहरणे।

**झलो झलि। (७/३/७१)**

'झलो झलि'[315] इति सूत्रं पाणिनिना प्रयुक्तं वर्तते। 'झलः परस्य सस्य लोपः स्यात् झलि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजेन स्वीकृतं वर्तते। 'झलः परस्य सकारादौ झलादौ सङि परतो लोपो भवति' इति अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुक्तः। 'अभैत्ताम्', 'अभैत्त', 'अभित्थाः' इत्यादीनि उदाहरणानि।

**ह्रस्वाद्धातोः। (७/३/७२)**

पाणिनिना 'ह्रस्वादङ्गात्'[316] इति सूत्रं प्रतिपादितम्। 'सिचो लोपः स्याज्झलि' इति

314 पा.सू.८/२/२८

315 पा.सू.८/२/२६

316 पा.सू.८/२/२७

कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजेन 'ह्रस्वाद्धातोः' इति प्रयुक्तम्। 'ह्रस्वान्ताद्धातोः परस्य सकारस्य झलादौ सङि परतः लोपो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'आहत', 'आहथाः', 'आदित', 'आदिथाः', 'अकृत', 'अकृथाः' इत्यादीनि उदाहरणानि।

**स्कोः संयोगाद्योरन्ते च। (७/३/७३)**

'स्कोः संयोगाद्योरन्ते च'[317] इति पाणिनीयं सूत्रं भवति। 'पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रमत्र स्वीकृतम्। 'सकारककारयोः संयोगाद्योः झलादौ सङि पदान्ते च लोपो भवतीति' अस्य सूत्रार्थः दण्डनाथेनोक्तः। ओलस्जी-'नग्नः','नग्नवान्', साधुलक् मस्ज- 'मग्नः', 'मग्नवान्', साधुमक् कक्ष्- 'तष्टम्', 'तष्टवान्', 'ताष्टनत्', 'काष्टतट्' चक्षु आचष्टे इत्यादीनि उदाहरणानि।

**चोः कुः। (७/३/७४)**

'चो कुः'[318] इति पाणिनीयं सूत्रं भोजेनापि स्वीकृतम्। 'चवर्गस्य कवर्गः स्याज्झलि पदान्ते च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'चो कुः' इति भोजसूत्रस्यार्थः दण्डनाथेन हृदयहारिण्यामेवमुक्तम् 'चवर्गस्य झलादौ सङि परतः पदान्ते च कवर्गादेशो भवति' इति। 'वक्ता', 'वक्ष्यति', 'वाक्', 'त्यक्त्वा', 'त्यजति', अर्धभाक् तद्वदतिदेशात् 'वाग्भिः', 'वाग्त्वम्'

---

317 पा.सू.८/२/२९

318 पा.सू.८/२/३०

'अर्धभाक्तमः' इत्यादीनि उदाहरणानि।

**हो ढः। (७/३/७५)**

पाणिनिना 'हो ढः'[319] इति सूत्रं प्रयुक्तम्। 'हस्य ढः स्याज्झलि पदान्ते च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजेन स्वीकृतम्। 'हकारस्य झलि परतः पदान्ते च त्सकारादेशो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'लेढा', 'सोढा', 'वोढा', 'मधुलिट्', 'तुराषाट्' सपि वलि तद्वदतिदेशात् 'मधुलिड्भ्यां', 'मधुलिड्भिः', 'मधुलिड्भ्यः' इत्यादीनि उदाहरणानि।

**दादेर्धातोर्घः। (७/३/७६)**

'दादेर्धातोर्घः'[320] इति पाणिनीयं सूत्रं वर्तते। 'उपदेशे दादेर्धातोर्हस्य घः स्याज्झलि पदान्ते च' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। सूत्रमिदं भोजेनात्र स्वीकृतम्। 'उपदेशे दादेर्धातोः सम्बन्धिनो हकारस्य झलि पदान्ते च घकारादेशो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। ढस्यापवादः। 'दग्ध्वा', 'दोग्ध्वा', 'काष्ठधक्', 'गोधुक्', 'काष्ठधुक्भ्यां', 'गोधुग्भ्याम्' इत्यादीनि उदाहरणानि। पाणिनिवत् भोजेनापि अत्र उपदेशग्रहणं स्वीकृतम्। तस्मात् 'अधात्' 'धोक्' 'अधाक्षीत्' इत्यत्रापि भवति।

319 पा.सू. ८/२/३१

320 पा.सू.८/२/३२

**वा द्रुहमुहष्णुहष्णिहाम्। (७/३/७७)**

'वा द्रुहमुहष्णुहष्णिहाम्'[321] इति सूत्रं पाणिनिना प्रतिपादितं वर्तते। 'एषां हस्य वा घः स्याज्झलि पदान्ते च' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। तद्वदेव इदं पाणिनीयं सूत्रं भोजेनात्र स्वीकृतम्। 'द्रुहादीनां सम्बन्धिनो हकारस्य झलि पदान्ते च घकारादेशो वा भवति' इति अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुक्तः। 'द्रुहेः' प्राप्ते अन्येषामप्राप्ते विकल्पः 'द्रोग्धा', 'द्रोढा', 'मित्रध्रुक्', 'मित्रध्रुट्' 'मित्रध्रुग्भ्यां', 'मित्रध्रुड्भ्याम्' इत्यादीनि उदाहरणानि।

**न हाहोर्धतौ। (७/३/७८)**

पाणिनिना 'न होधः'[322] 'आहस्थः'[323] इति सूत्रद्वयं प्रतिपादितम्। 'नहो हस्य धः स्याज्झलि पदान्ते च' इति प्रथमसूत्रस्य अर्थः कौमुद्यामुक्तः। 'झलिपरतः आहो हकारस्य चर्त्वं' द्वितीयसूत्रेण विधीयते। अनयोः द्वयोः सूत्रयोः स्वीकारेण 'न हाहोर्धतौ' इति सूत्रं भोजदेवेन प्रतिपादितम्। 'झलि पदान्ते च नहाहो सम्बन्धिनो हकारस्य पथासङ्ख्यं धकारतकारावादेशौ भवतः' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'नद्धा', 'नत्स्यति', 'उपानत्', 'उपानद्भ्याम्', 'आत्थ' इत्यादीनि उदाहरणानि।

---

321 पा.सू.८/२/३३

322 पा.सू.८/२/३४

323 पा.सू.८/२/३५

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजपरिव्राजछशां षः। (७/३/७९)**

'व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः'[324] इति सूत्रं पाणिनिना प्रयुक्तं वर्तते। 'व्रश्चादीनां सप्तानां छशन्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। पाणिन्युक्तैः 'व्रश्च, भ्रस्ज, सृज, मृज, यज, राज, भ्राज' इत्येतैः सप्तैः सह परिव्राजशब्दोऽपि भोजदेवेन योजितं वर्तते। भोजदेवेन 'व्रश्चभ्रस्जसृजमृजयजराज-भ्राजपरिव्राजछशां षः' इति सूत्रं प्रतिपादितम्। 'व्रश्चादीनां धातूनां परिव्राजः शकारान्तानां च झलिपरतः पदान्ते च षकारोऽन्तादेशो भवति' इति दण्डनाथेन सूत्रार्थः उक्तः। भोजदेवेन सूत्रे छशामिति प्रयुक्तं चेदपि दण्डनाथेन सूत्रार्थे शकारान्तानामित्येव प्रयुक्तं वर्तते।

**झष एकाचः स्ध्वोर्बशो भष्। (७/३/८०)**

'एकाचो बशो भष् झषन्तस्य'[325] इति पाणिनीयसूत्रं वर्तते। 'धातोरवयवो य एकाज्झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात्सकारे ध्वशब्दे पदान्ते च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजेन 'झष एकाचः स्ध्वोर्बशो भष्' इति प्रतिपादितम्। 'झषन्तस्यैकाचो धातोरवयवस्य सम्बन्धिनो वसन्वाबशः स्थाने थ ध्व शब्दे च परतः पदान्ते च भषादेशो भवति' इति अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुक्तः। 'बुध-भोत्स्यते'- 'अभुध्वम्', 'अर्थभुत्', 'गुह-निघोक्ष्यते'- 'न्यघुढ्वम्', पर्णघुट् दुहः-'धोक्ष्यते', 'अधुग्ध्वम्'

[324] पा.सू.८/२/३६

[325] पा.सू.८/२/३७

'गोधुक्' इत्येतानि उदाहरणानि।

**धाञस्तथोश्च। (७/३/८१)**

'दधस्तथोश्च'[326] इति पाणिनीयं सूत्रमस्ति। 'द्विरुक्तस्य झषन्तस्य धाञो बशो भष् स्यात्तथयोः स्ध्वोश्च परतः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'धाञस्तथोश्च' इति उच्यते। 'झषन्तस्य धाञ् धातोरवयवस्य बशः स्थाने तकारथकारयोश्चकारात् स्ध्वोश्चपरतो भषादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'धत्ते', 'धत्थः', 'धत्से', 'धध्वे' इत्यादीनि उदाहरणानि।

**झषस्तथोर्धोऽधः। (७/३/८२)**

पाणिनिना 'झषस्तथोर्धोऽधः'[327] इति सूत्रमुक्तम्। 'झषः परयोस्तथयोर्धः स्यान्न तु दधातेः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन इदमेव सूत्रं स्वीकृतम्। 'अदधातोर्झषन्ताद्धातोः परयोस्तथोः स्थाने धकारादेशो भवति' इति हृदयहारिण्यां दण्डनाथः अस्य सूत्रार्थः उक्तः। 'लब्ध्वा', 'अलब्धाः', 'अदुग्ध', 'अदुग्धाः', 'लेढा', 'अलीढ', 'अलीढाः', 'अबुद्ध', 'अबुद्धाः' इत्यादीनि उदाहरणानि।

---

[326] पा.सू.८/३/३८

[327] पा.सू.८/२/४०

**षढोः कः सि। (७/३/८३)**

'षढोः कः सि'[328] इति सूत्रं पाणिनिना उक्तम्। 'षस्य ढस्य च कः स्यात्सकारे परे' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन इदं सूत्रं स्वीकृतम्। 'षकारढकारयोः सकारे परतः ककारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः प्रतिपादितः। 'पेक्ष्यति', 'पिपिक्षति', 'अद्राक्षीत्', 'अयाक्षीत्', 'लेक्ष्यति', 'लिलिक्ष्यति', 'अलिक्षत्', 'लिलेक्ष्यति' इत्यादीनि उदाहरणानि।

**रदाभ्यां निष्ठातो दश्च नः। (७/३/८४)**

'रदाभ्यां निष्ठातो नः पूर्वस्य च दः'[329] इति सूत्रं पाणिनिना प्रतिपादितम्। 'रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजेन 'रदाभ्यां निष्ठातो दश्च नः' इति उक्तम्। अथ 'दकाराभ्यां परस्य निष्ठासम्बन्धिनस्तकारस्य नकार आदेशः पूर्वस्य च दकारस्य भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'पूर्णः', 'पूर्णवान्', 'तीर्णः', 'तीर्णवान्', 'भिन्नः', 'भिन्नवान्' इत्यादीनि उदाहरणानि। अत्र पाणिनीयसूत्रात् 'पूर्वस्य' इति पदं विना भोजेनेदं सूत्रं प्रयुक्तं चेदपि दण्डनाथेन 'पूर्वस्य च दकारस्य' इति सूत्रार्थे प्रतिपादितम्।

---

328 पा.सू.८/२/४१

329 पा.सू.८/२/४२

**यण् संयोगादेरातः। (७/३/८५)**

'संयोगादेरातो धातोर्यण्वतः'[330] इति पाणिनिना सूत्रं प्रतिपादितम्। 'संयोगादिः यो धातुराकारान्तो यण्वान्, तस्मादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति' इति अस्य सूत्रार्थः काशिकायामुच्यते। सिद्धान्तकौमुद्यामस्यार्थः 'निष्ठातस्य नः स्यादिति' भवति। पाणिन्युक्तसूत्रात् किञ्चित् परिवर्त्य भोजेन सूत्रं प्रयुक्तम्। तस्य मते इदं सूत्रं 'यण् संयोगादेरातः' इति प्रतिपादितम्। 'यणा संयोगो यण्संयोगस्तदादेराकारान्तात् धातोः परस्य निष्ठातकारस्य नकारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'स्त्यानः', 'स्त्यानवान्', 'निद्राणः', 'निद्राणवान्', 'ग्लानः', 'ग्लानवान्' इत्यादीनि उदाहरणानि।

**ऋल्वादिभ्यः क्तिनश्च। (७/३/८६) पूञो नाशे। (७/३/८७) दुग्वोरु च। (७/३/८८) सेर्ग्रासे कर्मकर्तरि। (७/३/८९)**

पाणिनिना 'ल्वादिभ्यः'[331] इति सूत्रं प्रतिपादितम्। 'एकविंशतेर्लूञादिभ्यः प्राग्वत्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'लूञ् छेदने' इत्येतत् प्रभृति 'वृञ् वरणे' इति यावत् वृत्करणेन समापिता ल्वादयो गृह्यन्ते। तेभ्यः उत्तरस्य निष्ठातकारस्य नकारादेशो भवति' इति अस्यार्थः काशिकायामुक्तः। तत्रैव कात्यायनेन 'ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः' इति वार्तिकमुक्तम्। अस्य पाणिनीयसूत्रस्य तथा वार्तिकस्य च स्वीकारेण भोजदेवेन 'ऋल्वादिभ्यः क्तिनश्च' इति

330 पा.सू.८/२/४३

331 पा.सू.८/२/४४

सूत्रं प्रतिपादितम्। 'ॠकारान्तेभ्यो ल्वादिभ्यश्च धातुभ्यः परस्य क्तिनो निष्ठायाश्च तकारस्य नकारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'तीर्णः', 'तीर्णिः', 'गीर्णिः', 'पूर्णिः' इत्यादीनि उदाहरणानि। 'ल्वादिभ्यः' इति पाणिनीयसूत्रस्य व्याख्याने कौमुद्यां 'दुग्वोदीर्घश्च', 'पूञो विनाशे', 'सिनोतेर्ग्रासकर्मकर्तृकस्य' इत्यादीनि वार्तिकान्यपि कात्यायनेन प्रतिपादितानि। तानि वार्तिकानि भोजदेवेनात्र सूत्रत्वेन प्रतिपादितानि। 'पूञो विनाशे' इति भोजसूत्रस्य सूत्रार्थः हृदयहारिण्यां 'पूञो नाशे वर्तमानात् परस्य निष्ठातकारस्य नकारादेशो भवति' इत्यस्ति। पूनापवादः, यवाः विनष्टाः इत्यर्थः। 'दुम्वोरु च' इति भोजसूत्रस्य हृदयहारिणीव्याख्याने 'द उपतापे गु पुरीषोत्सर्गे इत्येताभ्यां परस्य निष्ठातकारस्य नकार उकारश्चानयोरन्तादेशो भवति' इति सूत्रार्थः उक्तः। 'दूनः', 'दूनवान्', 'गूनः', 'गूनवान्' इत्यादीनि उदाहरणानि। 'सिनोतेर्ग्रासकर्मकर्तृकस्य' इति वार्तिकस्वीकारेण भोजदेवेन 'सेर्ग्रासे कर्मकर्तरि' इति सूत्रं प्रतिपादितम्। 'षिञ् बन्धन इत्येतस्मात् परस्य निष्ठातकारस्य ग्रासे कर्मकर्तर्यभिधेये नकारादेशो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'सितो ग्रासः स्वयमेव' इत्युदाहरणम्।

**ओदितः। (७/३/९०) सूयत्यादिभ्यो नवभ्यः। (७/३/९१)**

'ओदितश्च'[332] इति पाणिनीयसूत्रमस्ति। 'ओकारेतो धातोरुत्तरस्य निष्ठातकारस्य नकारादेशो भवति' इति काशिकायामस्य सूत्रार्थः उक्तः। भोजदेवेन 'च' इति अव्ययं त्यक्त्वा 'ओदितः' इत्येव सूत्रं प्रयुक्तम्। 'ओकार इद्येषां धातूनां तेभ्यः परस्य निष्ठा तकारस्य नकारादेशो

[332] पा.सू.८/२/४५

भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। ओङ - नजी नग्नः नग्नवान्, भञ्जो - भग्नः भग्नवान् इत्यादीनि उदाहरणानि। 'ओदितश्च' इति सूत्रव्याख्याने एव षूङ् प्राणिप्रसवे इत्याद्या नव धातव ओदित इति दिवादिगणे पठितम् इत्युक्तम्। तस्मात् तेन सूत्रेणैव षूङ् प्रणिप्रसवे इति नवभ्यो धातुभ्यो परस्य निष्ठातकारस्य नकारादेशो सिध्यति। किन्तु भोजदेवेन तेषां नवधातूनां नकारादेशसिध्यर्थं सूयत्यादिभ्यो नवभ्यः इति सूत्रमुक्तम्। षूङ् प्रणिप्रसवे इति दैवादिको धातुः तदादिभ्यो नवभ्यो धातुभ्यः परस्य निष्ठातकारस्य नकारादेशो भवति इति अस्य सूत्रार्थः कौमुद्यामुक्तः। प्रसूनः/प्रसूनवान्, दूनः/दूनवान्, दीनः/दीनवान्, धीनः/धीनवान्, मीनः/मीनवान्, रीणः/रीणवान्, लीनः/लीनवान्, डीनः/डीनवान्, व्रीणः/व्रीणवान् इत्यादीनि उदाहरणानि।

**क्षेः क्षी च। (७/३/९२)**

पाणिनिना इदं सूत्रं 'क्षियो दीर्घात्'[333] इति प्रतिपादितम्। 'दीर्घात् क्षियो निष्ठातस्य नः स्यादिति' अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेन इदं सूत्रं 'क्षेः क्षी च' इति प्रतिपादितम्। 'क्षियो धातोः परस्य निष्ठातकारस्य नकारः धातोश्च क्षी इत्ययमादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'क्षीणः, 'क्षीणवान्' इत्येते उदाहरणे।

**वा भावाक्रोशदैन्येषु। (७/३/९३)**

पाणिनिना 'वाक्रोशदैन्ययोः'[334] इति सूत्रं प्रयुक्तम्। 'क्षियो निष्ठायां दीर्घो वा

---

333 पा.सू.८/२/४६

334 पा.सू.६/४/६१

स्यादाक्रोशे दैन्ये च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजेन 'वा भावाक्रोशदैन्येषु' इति प्रयुक्तम्। 'भावेऽर्थे आक्रोशे दैन्ये च गम्यमाने क्षेर्धातोः परस्य निष्ठातकारस्य नकारो धातोश्च क्षी इत्ययमादेशो वा भवति' इति हृदयहारिण्यामस्यार्थः दण्डनाथेनोक्तः। 'क्षितमनेन'/'क्षीणमनेन', 'क्षितायुर्जाल्मः'/'क्षीणायुर्जाल्मः', 'क्षितस्तपस्वी'/'क्षीणस्तपस्वी' इत्यादीनि उदाहरणानि।

**श्योऽस्पर्शे। (७/३/९४)**

पाणिनिना 'श्योऽस्पर्शे'[335] इति सूत्रं प्रतिपादितम्। 'श्यैङो निष्ठातस्य नः स्यादस्पर्शेऽर्थे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिन्युक्तवदेव भोजेनापि इदं सूत्रं प्रतिपादितम्। 'स्पर्शो गुणस्ततोऽन्यत्रार्थे वर्तमानस्य श्यायतेः परस्य निष्ठातकारस्य नकारादेशो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'शीनं' 'घृतं', 'शीनं' 'मेदः', 'प्रतिशीनः' 'प्रतिशीनवान्' इत्यादीनि उदाहरणानि।

**अञ्चोऽनपादाने। (७/३/९५)**

'अञ्चोऽनपादाने'[336] इति सूत्रं पाणिनिना प्रतिपादितम्। 'अञ्चो निष्ठातस्य नः स्यान्नत्वपादाने' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेन तद्वदेवेदं सूत्रं स्वीकृतम्। 'अञ्चतेर्धातोः परस्य निष्ठातकारस्य नकारादेशो भवति न चेदपादानमञ्चत्यर्थे भवति' इति अस्य

---

335 पा.सू.८/२/४७

336 पा.सू.८/२/४८

सूत्रार्थः हृदयहारिण्यामुक्तः। 'समक्नौ', 'शकुनेः', 'पक्षौ' इत्यादीनि उदाहरणानि।

**दिवोऽविजिगीषायाम्। (७/३/९६)**

कौमुद्यां 'दिवो निष्ठातस्य नः स्यादविजिगीषायाम्' इत्यर्थयुक्तं पाणिनिन्युक्तं 'दिवोऽविजिगीषायाम्'[337] इति सूत्रं भोजदेवेन तद्वदेवात्र स्वीकृतम्। 'विजेतुमिच्छा विजिगिषा', 'ततोऽन्यत्रार्थे वर्तमानात् दिवो धातोः परस्य निष्ठातकारस्य नकारादेशो भवतीति' दण्डनाथः हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अद्यूनः', 'परिद्यूनः' इत्येते उदाहरणे।

**अवाते निर्वाणः। (७/३/९७)**

'निर्वाणेऽवाते'[338] इति सूत्रं पाणिनिना प्रतिपादितं वर्तते। 'निर्वाणः इति निस्पूर्वाद् वातेरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते, न चेद् वाताधिकरणो वात्यर्थो भवति' इति अस्यार्थः काशिकायां दृश्यते। भोजदेवेनेदं सूत्रं 'अवाते निर्वाणः' इति प्रतिपादितम्। 'निर्वाण इति निस्पूर्वात् वा धातोरुत्तरस्य निष्ठातकारस्य नकारादेशो निपात्यते न चेद्वाताधिकरणो धात्वर्थो भवति' इति हृदयहारिण्यामस्य सूत्रस्य व्याख्यानं दण्डनाथेनेच्यते। 'निर्वाणो भिक्षुः', 'निर्वाणोऽग्निः' इत्येते उदाहरणे।

**ऋणमाधमर्ण्ये। (७/३/९८)**

पाणिनिना 'ऋणमाधमर्ण्ये'[339] इति प्रयुक्तं सूत्रं भोजदेवेन तद्वदेवात्र स्वीकृतम्।

---

337 पा.सू.८/२/४९

338 पा.सू.८/२/५०

339 पा.सू.८/२/६०

'ऋधातोः क्ते तकारस्य नत्वं निपात्यते अधमर्णव्यवहारे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिनिना प्रयुक्तवदेव भोजदेवेनेदं सूत्रं स्वीकृतम्। 'ऋणामिति ऋ इत्येतस्माद्धातोः परस्य निष्ठातकारस्य नत्वमाधमर्ण्यविषये निपात्यते' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'ऋणं ददाति', 'ऋणं धारयति' इत्येते उदाहरणे।

**ह्रीघ्रावोन्दनुदविनत्तिभ्यो वा। (७/३/९९)**

पाणिनिना 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्'[340] इति सूत्रं प्रयुक्तम्। 'एभ्यो निष्ठातस्य नो वा' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'नुद', 'विद', 'उन्द', 'त्रा', 'घ्रा' 'ह्री' इत्येतेभ्यो निष्ठातकारस्य नकारादेशो भवतीत्यर्थः। भोजेनेदं सूत्रं 'ह्रीघ्रावोन्दनुदविनत्तिभ्यो वा' इति प्रतिपादितम्। 'ह्रीप्रभृतिभ्यः परस्य निष्ठातकारस्य नकारादेशो वा भवति' इति हृदयहारिण्यामस्यार्थः उक्तः। 'ह्रीणः'/'ह्रीणवान्', 'ह्रीतः'/'ह्रीतवान्', 'घ्राणः'/'घ्राणवान्', 'घ्रातः'/'घ्रातवान्', 'त्राणः'/'त्राणवान्', 'त्रातः'/'त्रातवान्', 'समुन्नः'/'समुन्नवान्', 'समुत्तः'/'समुत्तवान्', 'नुन्नः'/'नुन्नवान्', 'नुत्तः'/'नुत्तवान्', 'वित्तः'/'वित्तवान्' इत्यादीनि उदाहरणानि।

**प्रस्त्यो मः। (७/३/१००), क्षायो नित्यम्। (७/३/१०१)**

पाणिनिना 'क्षायो मः'[341] 'प्रस्त्योऽन्यतरस्याम्'[342] इति सूत्रद्वयमुक्तम्। 'क्षै

---

340 पा.सू.८/२/५६

341 पा.सू.८/२/५३

342 पा.सू.८/२/५४

धातोरुत्तरस्य निष्ठातकारस्य मकारादेशो भवति' इति काशिकायां 'क्षायो मः' इत्यस्य सूत्रार्थः उक्तः। 'प्रपूर्वात् स्त्यायतेः उत्तरस्य निष्ठातकारस्य अन्यतरस्यां मकारादेशो भवतीति' 'प्रस्त्योऽन्यतरस्याम्' इत्यस्य सूत्रार्थः काशिकायामुक्तः। अनयोः द्वयोः सूत्रस्वीकारेण भोजेन 'प्रस्त्यो मः', 'क्षायो नित्यम्' इति सूत्रद्वयमुक्तम्। 'प्रपूर्वात् स्त्यायतेः परस्य निष्ठातकारस्य मकारादेशो वा भवति' इति 'प्रस्त्यो मः' इत्यस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'प्रस्तीमः', 'प्रस्तीमवान्', 'प्रस्तीतः', 'प्रस्तीतवान्' इत्युदाहरणम्। 'क्षायतेः परस्य निष्ठातकारस्य नित्यं मकारादेशो भवति' इति 'क्षायो नित्यम्' इत्यस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'क्षामः', 'क्षामवान्' इत्येते उदाहरणे।

**शुषः कः। (७/३/१०२)**

पाणिनिना 'शुषः कः'[343] इति सूत्रं प्रयुक्तम्। 'शुषेः धातोरुत्तरस्य निष्ठातकारस्य ककारादेशे भवतीति' काशिकायामस्य सूत्रार्थः उक्तः। तदेव सूत्रं भोजेनात्र स्वीकृतम्। 'शुषेः परस्य निष्ठातकारस्य ककारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'शुष्कः', 'शुष्कवान्' इत्येते उदाहरणे।

**पचो वः। (७/३/१०३)**

पाणिनिना 'पचो वः'[344] इति सूत्रं प्रयुक्तम्। 'पचेः धातोरुत्तरस्य निष्ठातकारस्य

---

343 पा.सू.८/२/५१

344 पा.सू.८/२/५२

वकारादेशो भवतीति' अस्य सूत्रार्थः काशिकायामुक्तः। तदेव सूत्रं भोजेनात्र स्वीकृतम्। 'पचेर्धातोः परस्य निष्ठातकारस्य वकारादेशो भवतीति' अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'पक्वः' 'पक्ववान्' इत्येते उदाहरणे।

**फलेरनुपसर्गाल्लः। (७/३/१०४), समुद्ध्यां च। (७/३/१०५), क्षीबकृशपरिकृशोल्लाघः। (७/३/१०६)**

पाणिनिना 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः'[345] इति सूत्रं प्रयुक्तम्। तस्य व्याख्याने 'उत्फुल्लसम्फुल्लयोरिति वक्तव्यम्' इति कात्यायनेन वार्तिकं प्रयुक्तम्। अस्य सूत्रवार्तिकयोराधारेण भोजेन सूत्रत्रयमिदं प्रतिपादितम्। सूत्रे 'परिशब्दः' पाणिनिना नोक्तम्। किन्तु भोजदेवेन 'परि' इत्यपि संयोज्य 'क्षीबकृशपरिकृशोल्लाघः' इति सूत्रमुक्तम्। 'ञिफलाविशारण इत्यस्मादनुपसर्गात् परस्य निष्ठातकारस्य लकारादेशो भवति' इति 'फलेरनुपसर्गाल्लः' इत्यस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'फुल्लः', 'फुल्लवान्' इत्येते उदाहरणे। 'समुद्ध्यामुपसृष्टात् फलेः परस्य निष्ठातकारस्य लकारादेशो भवति' इति 'समुद्ध्यां च' इत्यस्य अर्थः हृदयहारिण्यामुक्तः। 'सम्फुल्लः', 'सम्फुल्लवान्', 'उत्फुल्लः', 'उत्फुल्लवान्' इत्यादीनि उदाहरणानि। 'क्षीबादयः शब्दाः क्तप्रत्ययान्ता निपात्यन्ते, न चेदुपसर्गात् परे भवन्ति। 'क्षीब मदे', 'कृश तनूकरणे' 'परिपूर्वश्चलाघृ सामर्थ्ये' उत्पूर्वः एभ्यः परस्य क्तप्रत्ययतकारस्य लोपः इडभावश्च निपात्यते' इति 'क्षीबकृशपरिकृशोल्लाघः' इत्यस्य अर्थः

[345] पा.सू.८/२/५५

हृदयहारिण्यामुक्तः। 'क्षीबः', 'परिकृशः', 'कृशः' 'उल्लाघः' इत्यादीनि उदाहरणानि। पाणिनिना एकेन सूत्रेण प्रतिपादितं कार्यं साधयितुं अत्र सूत्रत्रयं प्रयुक्तम्।

**न पृमूर्च्छिमदिख्याध्यादेवत्राभ्यः। (७/३/१०७)**

पाणिनिना 'न ध्याख्यापृमूर्छिमदाम्'[346] इति सूत्रमुक्तम्। 'एभ्यो निष्ठातस्य नत्वं न' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजदेवेन 'न पृमूर्च्छिमदिख्याध्यादेवत्राभ्यः' इति प्रतिपादितम्। 'पृप्रभृतिभ्यः परस्य निष्ठातकारस्य नकारादेशो न भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'पूर्तः', 'पूर्तवान्', 'मूर्तः', 'मूर्तवान्', 'मत्तः', 'मत्तवान्' इत्यादीनि उदाहरणानि।

**वित्तो धनप्रतीतयोः। (७/३/१०८)**

पाणिनिना 'वित्तो भोगप्रत्यययोः'[347] इति सूत्रमुक्तम्। 'विन्दतेर्निष्ठातस्य निपातोऽयं भोग्ये प्रतीते चार्थे' इति कौमुद्यामुक्तः। भोजेन इदं 'वित्तो धनप्रतीतयोः' इत्युक्तम्। 'वित्त इति विन्दतेः क्तान्तस्य धने प्रतीते चार्थे नत्वाभावो निपात्यते' इति हृदयहारिण्यामुच्यते। 'विद्यते लभ्यत इति वित्तं धनं', 'विद्यते उपलभ्यतेऽसाविति वित्तः' प्रतीतः प्रसिद्धः इति यावत्।

**भित्तम् शकलम्। (७/३/१०९)**

पाणिनिना 'भित्तं शकलम्'[348] इति सूत्रं प्रयुक्तम्। तदेव सूत्रं भोजदेवेनात्र स्वीकृतम्।

---

346 पा.सू.८/२/५७

347 पा.सू.८/२/५८

348 पा.सू.८/२/५९

'भित्तमिति भिदेः परस्य क्तप्रत्ययतकारस्य शकलेऽभिधेये नत्वाभावो निपात्यते' इति हृदयहारिण्यामस्यार्थः उक्तः। 'भित्तं' इत्युदाहरणम्। शाकलमित्यर्थः।

**झलां जशोऽन्ते। (७/३/११०)**

पाणिनिना 'झलां जशोऽन्ते'[349] इति सूत्रं प्रतिपादितम्। 'पदान्ते झलां जशः स्युः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजदेवेन सूत्रमिदमत्र स्वीकृतम्। 'पदस्येति वर्तते, पदस्यान्ते वर्तमानानां झलां स्थाने जशादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'त्रिष्टुबत्र', 'मधुलिडत्र', 'क्षुदत्र', 'वागत्र' इत्यादीनि उदाहरणानि।

**क्विन् दृशोः कुः। (७/३/१११)**

पाणिनिना 'क्विन्प्रत्ययस्य कुः'[350] इति सूत्रं प्रयुक्तम्। 'क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात्पदान्ते' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं 'प्रत्ययस्य' इति स्थाने 'दृशोः' इत्युक्त्वा 'क्विन् दृशोः कुः' इति भोजदेवेन प्रतिपादितम्। 'क्विन्नन्तस्य दृशेः च कवर्गादेशो भवति' इति दण्डनाथेन सूत्रार्थः उक्तः। 'घृतस्पृक्', 'प्राक् देवद्यङ्', 'ऋत्विक्', 'दिक्', 'स्रक्', 'अन्यादृक्', 'तादृक्', 'दृशेः पश्यति दर्शनं', 'वा दृक्' इत्यादीनि उदाहरणानि।

**नशेर्वा। (७/३/११२)**

कौमुद्यां 'नशे कवर्गोऽन्तादेशो वा स्यात्पदान्ते' इति अर्थयुक्तं 'नशेर्वा'[351] इति सूत्रं

---

349 पा.सू.८/२/३९

350 पा.सू.८/२/६२

351 पा.सू.८/२/६३

पाणिनिना प्रतिपादितम्। तदेव सूत्रं भोजदेवेनात्र स्वीकृतम्। 'नशेः पदान्ते कवर्गादेशो वा न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'जीवनक्', 'जीवनट्', 'जीवनग्भ्यां', 'जीवनड्भ्याम्' इत्यादीनि उदाहरणानि।

**मोनौ म्वोश्च। (७/३/११३)**

पाणिनिना 'मो नो धातोः'[352], 'म्वोश्च'[353] इति सूत्रद्वयं प्रयुक्तम्। 'धातोर्नस्य नः स्यात्पदान्ते' इति 'मो नो धातोः' इत्यस्य सूत्रार्थः कौमुद्यामुक्तः। 'म्वोश्च' इत्यस्य 'मान्तस्य धातोर्मस्य नकारादेशः स्यान्मकारे वकारे च परे णत्वम्' इति सूत्रार्थः कौमुद्यामुक्तः। अनयोः सूत्रयोः मेलनेन भोजेनेदं सूत्रं 'मोनौ म्वोश्च' इति प्रतिपादितम्। 'दादेर्धातोर्घः इत्येतो धातोरिति वर्ततो धातोः सम्बन्धिनो मकारस्य पदान्ते म्वोश्च परतो नकारादेशो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'प्रशान्', 'प्रतान्', तद्वदतिदेशात् 'प्रशान्भ्यां', 'प्रतान्भ्याम्' इत्यादीनि उदाहरणानि।

**ससजुषो रुः। (७/३/११४)**

'ससजुषो रुः'[354] इति सूत्रं पाणिनिना प्रयुक्तम्। कौमुद्यां 'पदान्तस्य सस्य सजुषशब्दस्य च रुः स्यात्' इति अस्यार्थः उक्तः। तदेव सूत्रं भोजदेवेनात्र स्वीकृतम्। 'सकारान्तस्य पदस्य सजुष् इत्येतस्य चालोऽन्त्यस्य रुरित्ययमादेशो भवति' इति हृदयहारिण्यामस्यार्थः उक्तः।

---

352 पा.सू.८/२/६४

353 पा.सू.८/२/६५

354 पा.सू.८/२/६६

'अग्निरत्र', 'वायुरत्र', 'सजूर्देवैः', 'सजूर्ऋषिभिः' इत्यादीनि उदाहरणानि।

**अह्नः। (७/३/११५)**

पाणिनिना 'अहन्'[355] इति सूत्रं प्रतिपादितम्। 'अहन्नित्यस्य रुः स्यात्पदान्ते' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजदेवेनेदं 'अह्नः' इति प्रतिपादितम्। 'अहन् इत्येतस्य पदस्यालोन्त्यस्य रुरित्ययमादेशो भवति' इति अस्यार्थः हृदयहारिण्यामुक्तः। 'दीर्घा हा निदाघः', 'हे दीर्घाहोऽत्र' इत्येते उदाहरणे।

**लुक्यरेफे रः। (७/३/११६)**

पाणिनिना इदं सूत्रं 'रोऽसुपि'[356] इति प्रतिपादितम्। रोरपवादः। 'अह्नो रेफादेशः स्यान्न तु सुपि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'असुपि' इति शब्दस्य स्थाने 'लुकि' इति स्पष्टनिर्देशेन भोजव्याकरणे इदं सूत्रं 'लुक्यरेफे रः' इति प्रतिपादितम्। प्रकृतसूत्रं 'सुब्लुकि' एव भवति, अतः अस्मिन् सूत्रे 'असुपि' इत्यस्य स्थाने 'लुकि' इति उक्तं स्यात्। अपि च अनयोः पाणिनीय भोजसूत्रयोः अ-रेफे, अ-रि इति ग्रहणेन एतदपि स्पष्टी भवति यत् भोजमते सर्वेषु अपि रेफादौ शब्देषु प्रकृतसूत्रेण प्राप्तं रेफादेशं बाधित्वा अहन् इत्यनेन रुत्वमेव प्रवर्तते। 'अहन् इत्येतस्य पदस्य लुकि सति अरेफादौ पदे परतो सरेफोऽन्तादेशो भवतीति' दण्डनाथेन हृदयहारिण्यामस्यार्थः प्रतिपादितः। 'अहरधीते', 'अहरेति' इत्येते उदाहरणे।

---

355 पा.सू.८/२/६८

356 पा.सू.८/२/६९

**प्रचेतसो राजनि वा। (७/३/११७) अहर्गिरादीनां पत्यादिषु। (७/३/११८)**

'अम्नरूधरवरित्युभयथा छन्दसि'[357] इति पाणिनीयसूत्रव्याख्याने 'छन्दसि भाषायां च विभाषा प्रचेतसो राजन्युपसङ्ख्यानं कर्तव्यम्', 'अहरादीनां पत्यादिषु उपसङ्ख्यानं कर्तव्यमिति' वार्तिकद्वयं प्रयुक्तम्। इमे वार्तिके भोजदेवेनात्र सूत्रद्वयेन प्रतिपादिते। प्रचेतस् इत्येतस्य पदस्य राजन् शब्दे परतो रेफोऽन्तादेशो वा भवति' इति प्रचेतसो राजनि वा इत्यस्य सूत्रार्थः हृदयहारिण्यामुक्तम्। 'प्रचेता राजन्', 'प्रचेतो राजन्' इत्येते उदाहरणे। 'अहरादीनां दानं पत्यादिषु परतो रेफोऽन्तादेशो वा भवति' इति अहर्गिरादीनां पत्यादिषु इत्यस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अहर्पतिः/अहःपतिः', 'गीर्पतिः/गीष्पतिः', 'धूर्पतिः/ धूः पतिः' इत्यादीनि उदाहरणानि।

**उषर्बुधः। (७/३/११९)**

'उषसीत्यस्य बुधशब्दे कप्रत्ययान्ते परतोऽलोन्त्यस्य रुत्वबाधनार्थं रेफो निपात्यते' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'उषसि बुध्यते', 'उषर्बुधोऽग्निः' इत्येते उदाहरणे।

**स्रन्सुध्वन्स्वनडुहां दः। (७/३/१२०) वसोः सः। (७/३/१२१)**

पाणिनिना 'वसुस्रंसुध्वंस्वनडुहां दः'[358] इति सूत्रं प्रयुक्तम्। 'सान्तवस्वन्तस्य स्रंसादेश्च

[357] पा.सू.८/२/७०

[358] पा.सू.८/२/७२

दः स्यात्पदान्ते' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेन सूत्रद्वयेन प्रतिपादितम्। 'स्रन्सु ध्वन्सु अनडुह् इत्येतेषां पदस्यान्ते दकारादेशो भवति' इति 'स्रन्सुध्वन्स्वनडुहां दः' इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'उरवास्रत्', 'पर्णध्वत्', 'बह्वनडुत् कुलम्', इत्येतानि उदाहरणानि तत्र दत्तानि। 'वस्वन्तस्य सकारान्तस्य पदस्य दकारोऽन्तादेशो भवति' इति 'वसोः सः' इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'विद्वत् कुलं विद्वद्भ्यां विद्वत्ता' 'पपिवत्कुलम् पपिवद्भ्याम् पपिवत्ता' इत्यादीनि उदाहरणानि तत्र दत्तानि।

**तिपि। (७/३/१२२)**

पाणिनिना 'तिप्यनस्तेः'[359] इति सूत्रमुक्तम्। 'पदान्तस्य सस्य दः स्यात्तिपि न त्वस्तेः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। हृदयहारिण्यां 'तिपि परतः सकारान्तस्य पदस्य दकारोऽन्तादेशो भवति' इति सूत्रार्थः उक्तः। 'अचकात् भवान्', 'अन्वशातद् भवान्' इति उदाहरणे तत्र दत्ते।

**सिपि वा। (७/३/१२३) दोरुः। (७/३/१२४) धातोर्वोरनचीको दीर्घः। (७/३/१२५)**

पाणिनिना 'सिपि धातो रुर्वा'[360] 'दश्च'[361] 'वोरुपधाया दीर्घ इकः'[362] इति

---

359 पा.सू.८/२/७३

360 .८/२/७४

361 .८/२/७५

362 .८/२/७६

सूत्रत्रयमुक्तम्। 'पदान्तस्य धातोः सस्य रुः स्याद्वा पक्षे जश्त्वेन दः इति 'सिपि धातो रुर्वा' इत्यस्य धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा' इति 'दश्च' इत्यस्य 'रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात्पदान्ते' इति 'वोरुपधाया दीर्घ इकः' इत्यस्य च सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रत्रयं भोजदेवेन 'सिपि वा', 'दोरुः', 'धातोर्वोरनचीको दीर्घः' इति सूत्रत्रयत्वेन परिवर्तितम्। 'सिपि परतः चकारान्तस्य पदस्य दकारोऽन्तादेशो भवति' इति 'सिपि वा' इत्यस्य 'सिपि परतो दकारान्तस्य रुरन्तादेशो वा भवति' इति 'दोरुः' इत्यस्य 'धातोर्यौ रेफवकारौ तयोः परतोरिको दीर्घो भवति न चेत् तावच्परौ भवतः' इति 'धातोर्वोरनचीको दीर्घः' इत्यस्य च सूत्रार्थः हृदयहारिण्यामुक्तः। 'अचकात्वम्', 'अचकास्त्वम्', 'अन्वशात्वम्', 'अन्वशात्त्वम्', इति प्रथमस्य 'अभिनत्त्वम्', 'अभिनस्त्वम्', इति द्वितीयस्य 'गीः', 'धूः', 'आशीः', 'समूःशीष्म', 'धूष्म', 'आस्तीणम्', 'प्रस्तीर्णम्', 'चिकीर्षति', 'वुवूर्षति', 'दीव्यति', 'सीव्यति', 'प्रतिदिन्ना' इति तृतीयस्य सूत्रस्य च उदाहरणानि हृदयहारिण्यां दत्तानि।

**नाभ्यासकुरच्छुराम्। (७/३/१२६)**

पाणिनिना 'न भकुर्छुराम्'[363] इति सूत्रं पाणिनिना प्रयुक्तम्। 'भस्य कुर्च्छुरोश्चोपधाया दीर्घो न स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। पाणिन्युक्तमिदं सूत्रमत्र भोजेन स्वीकृतम्। 'अभ्यासस्य कुरर्छुरोश्च सम्बन्धिन इकोर्वोः परतो दीर्घो न भवति पूर्वेण प्राप्ते प्रतिषेधे' इति तस्यार्थः हृदयहारिण्यामुक्तः। किधः 'रिर्यतुः', 'रिर्युः', 'संवियुः', 'संविव्यतुः', व्युः 'कुर्यात्',

---

363 पा.सू.८/२/७९

'कुर्युः', 'छुर्यात्', 'छुर्युः' इत्यादीनि उदाहरणानि।

**यि तद्धिते। (७/३/१२७)**

'यकारादौ तद्धिते परतोर्वोरिको दीर्घो न भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः।। धुरं वहति धुर्यः धुरि साधुर्धुर्यः इत्युदाहरणम्।

**अदसोऽत्वे दादुदोमः। (७/३/१२८)**

पाणिनिना 'अदसोऽसेर्दादु दो मः'[364] इति प्रतिपादितम्। 'अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य च मः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'अदसोऽत्वे दादुदोमः' इति प्रतिपादितम्। 'अदसस्त्यदाद्यत्वे सति दात्परस्य वर्णस्योवर्णादेशो दकारस्य च मकारो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अमुं', 'अमू', 'अमून्, इत्यादीनि उदाहरणानि।

**अद्रौ वा। (७/३/१२९)**

'अदसोऽसेर्दादु दो मः' इति पाणिनीयसूत्रव्याख्याने 'अदसोऽनोस्र वक्तव्यम्' इति कात्यायनवार्तिकमुक्तम्। त्रैव काशिकायां ''अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत्'' इति व्याख्यानं दत्तम्। इमानि कार्याणि मनसि निधाय भोजेनेदं सूत्रमुक्तम्। 'अदसोद्र्यादेशे सति दात्परस्य वर्णस्योत्वं दस्य मत्वं च वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः।

---

364 पा.सू.८/२/८०

**एत ईद् बहुवचने। (७/३/१३०)**

पाणिनिना 'एत ईद्बहुवचने'[365] इति सूत्रं प्रयुक्तम्। 'अदसो दात्परस्यैत ईत्स्याद्दस्य च मो बह्वर्थोक्तौ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेन इदं सूत्रं तद्वदेवात्र स्वीकृतम्। 'बहुत्वे वर्तमानस्यादसो दात्परस्यैकारस्य ईदादेशः दस्य च मकारो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अमी', 'अमीभिः', 'अमीभ्यः', 'अमीषाम्', 'अमीषु' इत्यादीनि उदाहरणानि।

**वाक्यटेः प्लुतः। (७/३/१३१)**

पाणिनिना 'वाक्यस्य टेः प्लुत उदात्तः'[366] इति सूत्रं प्रयुक्तम्। इदमधिकारसूत्रं भवति। वाक्यस्य यष्टिस्तस्य प्लुतो भवतीत्येतदापादपरिसमाप्तेः अधिकृतं वेदितव्यम्। वाक्यग्रहणमनन्त्यस्य प्लुतनिवृत्यर्थम्। टिग्रहणं हलन्त्यस्यापि टेरचः प्लुतो यथा स्यात् इतरथा ह्यचा वाक्ये विशिष्यमाणेऽजन्तस्यैव प्लुतः स्यात्।

**दूराद्धूते। (७/३/१३२)**

पाणिनिना 'दूराद्धूते च'[367] इति सूत्रं प्रयुक्तम्। 'दूरात्संबोधने यद्वाक्यं तस्य टेः प्लुतः स्यात्' इति अस्यार्थः कौमुद्यामुक्तः। तत्सूत्रं भोजेनात्र स्वीकृतम् । 'दूराह्वाने यद्वाक्यं वर्तते तस्य

---

365 पा.सू.८/२/८१

366 पा.सू.८/२/८२

367 पा.सू.८/२/८४

टेः प्लुतो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। आगच्छ भो माणव देवदत्त आगच्छ भो माणव माणव इत्यादीनि उदाहरणानि।

**है हेप्रयोगे हैहयोः। (७/३/१३३)**

पाणिनिना 'हैहेप्रयोगे हैहयोः'[368] इति सूत्रं प्रयुक्तम्। 'एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात्' इति कौमुद्यामस्यार्थः उक्तः। 'हैहेप्रयोगे दूराद्धूते यद्वाक्यं वर्तते तत्रानन्त्ययोरपि हैहयोरेव प्लुतो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'है देवदत्त आगच्छ', 'आगच्छ है देवदत्त', 'आगच्छ हे देवदत्त', 'आगच्छ देवदत्त हे' इत्यादीनि उदाहरणानि।

**गुरोरेकैकस्यानृतो वा। (७/३/१३४)**

पाणिनिना 'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्'[369] इति सूत्रं प्रयुक्तम्। 'दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनेदं सूत्रं 'गुरोरेकैकस्यानृतो वा' इति प्रतिपादितम्। 'ऋकारवर्जितस्य गुरोरेकैकस्य दूराद्धूते सम्बोधनपदे वर्तमानस्य प्लुतो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'आगच्छ देवदत्त देवदत्त यथाप्राप्तश्च भवति' 'आगच्छ देवदत्त आगच्छ भो क्लृत्यशिख आगच्छ

---

368 पा.सू.८/२/८५

369 पा.सू.८/२/८६

भो क्लृप्तशित्य' इत्यादीनि उदाहरणानि।

**अस्त्रीशूद्रप्रत्यभिवादे नामगोत्रयोः। (७/३/१३५)**

पाणिनिना 'प्रत्यभिवादेऽशूद्रे'[370] इति सूत्रं प्रयुक्तम्। 'अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् स चोदात्तः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। तत्र 'स्त्रियां न', 'भोराजन्यविशां वेति वाच्यम्' इति वार्तिकद्वयमपि कात्यायनेनोक्तम्। एतेषां पाणिनीयसूत्राणां कात्यायनवार्तिकानां च स्वीकारेण भोजेनेदं सूत्रमुक्तम्। 'यदभिवाद्यमानो गुरुः कुशलानुयोगेनाशिषा वा युक्तं वाक्यं प्रयुङ्क्ते स प्रत्यभिवादः तस्मिन्नस्त्रीशूद्रविषये नाम्नो गोत्रस्य च सम्बन्धिनो वाक्यस्य टेः प्लुतो' भवति इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अभिवादये देवदत्तोऽहं भो आयुष्मानेधि देवदत्तत्य' 'अभिवादये गोर्ग्योऽहं भो आयुष्मानेधि गार्गत्य' इत्यादीनि उदाहरणानि।

**भो राजन्यविशां वा। (७/३/१३६)**

प्रत्यभिवादेऽशूद्रे इति पाणिनीयसूत्रव्याख्याने कात्यायनेन भो राजन्यविशाः वेति वक्तव्यम् इति वार्तिकमुक्तम्। भोजदेवेन तद्वार्तिकमत्र सूत्रत्वेनोक्तम्। 'भो इत्येतस्य राजन्यवाचिनां वैश्यवाचिनां च प्रत्यभिवादवाक्यस्यान्ते प्रत्यभिवाद्यमानानां टेः प्लुतो वा भवति इति' अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अभिवादये देवदत्तोऽहं भोः', 'आयुष्मानेधि देवदत्त भोः', 'देवदत्त भोः अभिवादये इन्द्रमहिं', 'भोः आयुष्मानेधि इन्द्रवर्मन् इन्द्रवर्मन् अभिवादये',

---

370 पा.सू. ८/२/८३

'इन्द्रपालितोऽहं भोः आयुष्मानेधि इन्द्रपालितः इन्द्रपालितः' इत्यादीनि उदाहरणानि।

**पृष्टप्रतिवचने हेः। (७/३/१३७)**

पाणिनिना विभाषा 'पृष्टप्रतिवचने हेः'[371] इति सूत्रं प्रयुक्तम्। 'पृष्टप्रतिवचने विभाषा हेः प्लुतो भवति' इति अस्यार्थः काशिकायामुक्तः। 'पृष्टप्रतिवचने यद्वाक्यं वर्तते तत्सम्बन्धिनो हेः प्लुतो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अकार्षीः कटं देवदत्त अकार्षं हि अकार्षं हि', 'अलावीः केदारं देवदत्त अलाविषं हि अलाविषं हि' इत्यादीनि उदाहरणानि।

**निगृह्यानुयोगे। (७/३/१३८)**

पाणिनिना 'निगृह्यानुयोगे च'[372] इति सूत्रं प्रयुक्तम्। 'अत्र यद्वाक्यं तस्य टेः प्लुतो वा' इति कौमुद्यामस्य सूत्रार्थः उक्तः। स्वमतात् प्रच्यावनं निग्रहः। अनुयोगस्तथाविष्करणम् उपालम्भ इति यावत् तत्र यद्वाक्यं वर्तते तस्य टेः प्लुतो वा भवति इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। अद्य श्राद्धमित्यात्थ अद्यामावास्येत्यात्थ अमावास्येत्यात्थ अद्यामावास्येत्यात्थ अद्य श्राद्धमद्यामावास्येति वादी युक्त्या स्वतः प्रच्याव्यैवमुपालभ्यते।

**भर्त्सनेऽङ्गयुक्तं तिङाकांक्षम्। (७/३/१३९)**

पाणिनिना 'आम्रेडितं भर्त्सने'[373] 'अङ्गयुक्तं तिङाकाङ्क्षम्'[374] इति सूत्रद्वयं

---

371 पा.सू.८/२/९३

372 पा.सू.८/२/९४

373 पा.सू.८/२/९५

374 पा.सू.८/२/९६

प्रतिपादितम्। अनयोः द्वयोः सूत्रयोः मेलनेन भोजदेवेनेदं सूत्रं प्रयुक्तम्। 'वाक्यादेः आमन्त्रितस्य इति भर्त्सने द्विर्वचनमुक्तम् तस्य आम्रेडितं प्लवते इति काशिकायाम् आम्रेडितं भर्त्सने' इत्यस्यार्थः उक्तः। 'अङ्गयुक्तं तिङ् आकाङ्क्षम् इत्यस्य अङ्ग इत्यनेन युक्तं तिङन्तमाकाङ्क्षं भर्त्सने प्लवते' इति काशिका। 'अङ्गेत्यनेन युक्तं तिङन्तं प्लवते' इति कौमुद्यां च उक्तः। 'अङ्गशब्देन युक्तं यत् तिङन्तं सोकांक्षं तस्य भर्त्सनेन गम्यमाने टेः प्लुतो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अङ्गकूजत्य इदानीं ज्ञास्यसि जाल्म' 'अङ्गकूज इदानिं ज्ञास्यसि जाल्म', 'अङ्गव्याहर इदानिं ज्ञास्यसि जाल्म', 'अङ्गव्याहरत्य अङ्ग व्यावहर ज्ञास्यसि जाल्म' इत्यादीनि उदाहरणानि।

**द्विस्त्रिरुक्तं पर्यायेण। (७/३/१४०)**

'आम्रेडितं भर्त्सने' इति सूत्रव्याख्याने पर्यायेण पूर्वेत्तरयोः इत्यदीनि कार्याणि चर्चितानि। तान्यत्र भोजदेवेन सूत्रत्वेन स्वीकृतम्। भर्त्सने यत् क-ताद्विर्वचनं तस्य पर्यायेण प्लुतो वा भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। पूर्वस्य वा उत्तरस्य वा न वा कस्यचिदित्यर्थः 'चौरत्य चौर चौर चौर', 'चौर चौर चौर घातयिष्यामि त्वा बन्धयिष्यामि त्वा' इत्यादीनि उदाहरणानि।

**सम्मत्यसूयाकोपकुत्सनेषु पूर्वम्। (७/३/१४१)**

पाणिनिना 'स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु'[375] इति सूत्रं प्रयुक्तम्। 'स्वरितः

---

[375] पा.सू.८/२/१०३

प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजदेवेन 'सम्मत्यसूयाकोपकुत्सनेषु पूर्वम्' इति प्रतिपादितम्। 'सम्मतावसूयायां कोपे कुत्सने च यद् द्विरुक्तं तस्य यत्पूर्वं शब्दरूपं तस्य टेः प्लुतो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। असूयायां-'माणवक माणवक अभिरूपक अभिरूपक शोभनः खल्वसि'। अविनीतक रिक्तं अभिरूप्यम्। कोपे-'माणवक माणवक अविनीतक अविनीतक इदानिं ज्ञास्यसि' जाल्म कुत्सने-'शात्तीक त्य शात्तीक याष्टीक त्य याष्टीक रिक्ता च शक्तिः वा वचनाद् पक्षे न भवति माणवक माणवक अभिरूपक अभिरूपक शोभनः खल्वसि वाक्यादेरामन्त्रितस्यासूयासम्मति कोपकुत्सनभर्त्सनेष्विति पूर्वत्रेह च द्विर्वचनम्।

**विचारे। (७/३/१४२)**

पाणिनिना 'विचार्यमाणानाम्'[376] इति सूत्रं प्रयुक्तम्। 'वाक्यानां टेः प्लुतः' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं सूत्रं भोजेन 'विचारे' इत्येव प्रतिपादितम्। विचारणं नानावगमनविचारः। 'अनेकरूपप्रतिभासः सम्प्रय इति यावत् तस्मिन् विषये संशय्यमानयोर्यत् पूर्वं तस्य प्लुतो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः।

**प्रतिश्रुतौ। (७/३/१४३)**

पाणिनिना 'प्रतिश्रवणे च'[377] इति सूत्रं प्रयुक्तम्। 'वाक्यस्य टे प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'प्रतिश्रुतौ' इत्युक्तम्।

---

376 पा.सू. ८/२/९७

377 पा.सू. ८/२/९९

'प्रतिश्रुतौ च यद्वाक्यं वर्तते तस्य टेः प्लुतो वा भवति श्रवणाभिमुख्यमभ्युपगमः' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। प्रतिज्ञानं च प्रतिश्रुतिः। श्रवणाभिमुख्ये- भो देवदत्त किमात्थत्य किमात्थ अभ्युपगमे- गां मे देहि भोः एषते ददामि त्य , एष ते ददामि, प्रतिज्ञाने- नित्यः शब्दो भवितुमर्हति त्य नित्यः शब्दो भवितुमर्हति।

**अभिपूजिते। (७/३/१४४)**

पाणिनिना 'अनुदात्तं प्रशान्ताभिपूजितयोः'[378] इति सूत्रं प्रयुक्तम्। 'अनुदात्तः प्लुतः स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं 'अभिपूजिते' इत्येवोक्तम्। 'अभिपूजितविषयं यद्वाक्यं तस्य टेः प्लुतो  वा भवति' इति हृदयहारिण्यामस्यार्थः उक्तः। 'शोभनः खल्वसि माणवक त्य', 'शोभनः खल्वसि माणवक' इत्युदाहरणम्।

**चिदित्युपमार्थे प्रयुज्यमाने। (७/३/१४५)**

पाणिनिना 'चिदिति चोपमाऽर्थे प्रयुज्यमाने'[379] इति सूत्रं प्रयुक्तम्। 'वाक्यस्य टेरनुदात्तः प्लुतः अग्निचिद्भाया३त् अग्निरिव भायात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'चिदित्युपमार्थे प्रयुज्यमाने' इति प्रयुक्तम्। 'चिदित्यस्मिन्नुपमार्थे प्रयुज्यमाने वावयवस्य टेः प्लुतो वा भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अग्निचिद्भाया त्य अग्निचिद्भायात्'

---

378 पा.सू.८/२/१००

379 पा.सू.८/२/१०१

'राजचिद् ब्रूया त्य राजचिद् ब्रूया' अग्निरिवराजेवेत्यर्थः।

**क्षियाशीः प्रैषेषु तिङाकांक्षम्। (७/३/१४६)**

पाणिनिना 'क्षियाऽऽशीः प्रैषेषु तिङ् आकाङ्क्षम्'[380] इति सूत्रं प्रयुक्तम्। 'आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यादाचारभेदे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'क्षिया आचारभेदः आशीः प्रार्थनाविशेषः प्रैषः असत्कारपूर्विका पारणाक्षियादिषु गम्यमानेषु साकांक्षं यत् तिङन्तं तिङन्तान्तरमाकांक्षति तस्य टेः प्लुतो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। स्वयं ह रथेन याति त्य, उपाध्यायं पदातिं गमयति, स्वं ह रथेन याति, उपाध्यायं पदातिं गमयति, स्वयं होदनं भुङ्क्ते, उपाध्यायं सक्तून् पाययति, आशिषि- पुत्रांश्च लप्सीष्ठाः त्य धनं च तात पुत्राश्च लप्सीष्ठाः धनं च तात, प्रैषे- कटं च कुरु त्य ग्रामं च गच्छ, कटं च कुरु ग्रामं च गच्छ इत्यादीनि उदाहरणानि।

**अनन्त्यस्यापि प्रश्नाख्यानयोः। (७/३/१४७)**

पाणिनिना 'अनन्त्यस्यापि प्रश्नाख्यानयोः'[381] इति सूत्रं प्रयुक्तम्। 'अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्वरितः प्लुतः एतयोः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं स्वीकृतम्। 'प्रश्ने आख्याने च गम्यमाने अनन्त्यस्य पदस्य अपि शब्दादन्त्यस्यापि टेः प्लुतो वा भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। प्रश्ने अगमः त्य पूर्वात्यिन् ग्रामात्यन् अगमः पूर्वान् ग्रामान् देवदत्त

---

380 पा.सू. ८/२/१०४

381 पा.सू.८/२/१०५

अगमं त्य पूर्वा त्यन् ग्रामात्यन् भोग्यः अगमं पूर्वान् ग्रामान् भोः इत्यादीनि उदाहरणानि।

**प्लुतावै च इदुतौ। (७/३/१४८)**

पाणिनिना 'प्लुतावैच इदुतौ'[382] इति सूत्रं प्रयुक्तम्। 'दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते' इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिन्युक्तवदिदं सूत्रं भोजेनापि स्वीकृतम्। 'दूराद्धूत इत्येवमादिभिर्विहितस्य प्लुतस्यैचः प्लुतप्रसंगे तदवयवादिदुतौ प्लवेते' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'ऐत्यतिकायनः', 'औत्यपगवः' इत्युदाहरणे। अत्र यदि इवर्णोवर्णयोरवर्णस्य  च समप्रविभागस्तदा इदुतौ द्विमात्रावनेन क्रियेते, प्लुताविति हि क्रियानिमित्तोऽयं व्यपदेशः। इदुतौ प्लवेते वृद्धिं गच्छत इत्यर्थः तावती च सा प्लुतिर्भवति। यावत्या च तावेचौ त्रिमात्रौ सम्पद्येते। यदात्वर्धमात्रावर्णस्य अध्यर्धमात्रा इवर्णोवर्णयोस्तदा तावर्धतृतीयमात्रौ क्रियेते। महाभाष्यकारस्त्वत्रविषये चतुर्मात्रं प्लुतमिच्छति तत् कथं समप्रविभागपक्षे इदुतोरनेन त्रिमात्रः प्लुतो विधीयते इति दण्डनाथेन हृदयहारिण्यामुक्तम्। तदेव व्याख्यानं पाणिनीयस्य काशिकाव्याख्यायां दृश्यते। दण्डनाथेन कृतं व्याख्यानमधिकतया काशिकाव्याख्यानस्वीकारेण भवति।

**एचोऽप्रगृह्यस्य प्रश्नान्ताभइपूजितं विचारप्रत्यभिवादेष्वादिदुत्परः पदान्ते। (७/३/१४९)**

पाणिनिना 'एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ'[383] इति सूत्रं प्रयुक्तम्। अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्धस्याकारः प्लुतः स्यादुत्तरस्य त्वर्धस्य इदुतौ स्तः

---

382 पा.सू. ८/२/१०६

383 पा.सू.८/२/१०७

इति कौमुद्यामस्य सूत्रार्थः उक्तः। तत्र 'प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्वेव' इति वार्तिकं कात्यायनेनोक्तम्। अनयोः सूत्रवार्तिकयोः स्वीकारेण भोजेनेदं सूत्रं प्रयुक्तम्। 'प्रश्नान्तादिषु विषयेष्वेचः प्रगृह्यवर्जितस्य पदान्ते वर्तमानस्यार्धस्य स्थाने अकारः प्लुतः इदुत्पर आदेशो भवति स चान्तरतम्यात् एकारैकारयोरिकारपरः ओकारौकारयोरुकारपरो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। प्रश्नान्ते अगम त्य पूर्वाण्य ग्रामा त्य अग्निभूतात्य इ पटा त्य उ इत्युदाहरणानि।

**तयो र्य्वा वचि संहितायाम्। (७/३/१५०)**

पाणिनिना 'तयो र्य्वावचि संहितायाम्'[384] इति सूत्रं प्रतिपादितम्। 'इदुतोर्यकारवकारौ स्तोऽचि संहितायाम् ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। इदं पाणिनीयं सूत्रं तद्वदेव भोजदेवेन स्वीकृतम्। 'तयोः प्लुतपरयोरिदुतोः स्थानेऽचिपरतः संहितायां विषये यथासंख्यं यकारवकारावादेशौ भवतः' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अग्नायि' 'पटावुदकम्' इत्युदाहरणम्।

**सप्तमाध्यायः चतुर्थः पादः**

**समः सुटि सः। (७/४/१)**

सरस्वतीकण्ठाभरणस्य सप्तमाध्यायस्य चतुर्थपादस्य प्रथमं सूत्रं भवति समः सुटि सः। इदं सूत्रं पाणिनीये 'समः सुटि'[385] इत्येव वर्तते। तत्र 'संपुस्कानां सो वक्तव्यः' इति वार्तिकं

---

384 पा.सू.८/२/१०८

385 पा.सू.८/३/५

प्रयुक्तं वर्तते। सम्पुस्कानां (सम्,पुम्,कान् एतेषां शब्दानां) विषये विसर्गस्य नित्यसकारादेशार्थमिदं वार्तिकं प्रयुक्तम्। किन्तु भोजदेवेन 'समः सुटि' इति पाणिनीयसूत्रस्य तथा अस्य वार्तिकस्य च मेलनेन 'समः सुटि सः' इति सूत्रं प्रयुक्तम्। सिद्धान्तकौमुद्यां 'समो रुः स्यात् सुटि' इति सूत्रार्थः उक्तः। अर्थात् 'सम्' उपसर्गस्य मकारस्य 'सुटागमे' परे रु आदेशः भवतीति। किन्तु दण्डनाथेन हृदयहारिण्यां रु आदेशस्य स्थाने अनेन सूत्रेण सकारान्तादेशो विधीयते। तत्र सूत्रार्थः एवमुच्यते समित्येतस्य पदस्य सुटि परतः संहितायां विषये सकार अन्तादेशो भवति। सकारात् पूर्वस्य तु वर्णस्य पक्षे अनुनासिकादेशः पक्षान्तरेऽनुस्वारागमः परो विधास्यते हृदयहारिण्याम्। संस्कर्ता, संस्कर्तुं, संस्कर्तुम् इत्यादीन्युदाहरणानि।

पाणिनीयसूत्राधारेण 'सम् कर्ता' इत्यवस्थायां 'सम्परिभ्यां करोतौभूषणे'[386] इति सूत्रेण 'सुटागमे' अनुबन्धलोपे 'सम् स् कर्ता' इति जाते 'समः सुटि' इति सूत्रेण 'समः' मकारस्य 'रेफादेशे' 'सर् स् कर्ता' इति जाते 'अत्रानुनासिकः पूर्वस्य तु वा'[387] इति अनुनासिके 'अनुनासिकात्परोऽनुस्वारः'[388] इति 'अनुस्वारे' च 'संर् स् कर्ता' इति जाते ‘सम्पुम्कानां सो वक्तव्यः’ इति सकारे 'संस् स् कर्ता' इति जाते 'समो वा लोपमेके' इति सकारलोपे 'संस्कर्ता' इति रूपम्। अत्र 'समः सुटि सः' इति भोजसूत्रेण 'रु' इत्यस्य स्थाने सकारो विधीयते। एवं साक्षात्सकारविधानेन 'खरवसानयोर्विसर्जनीयः', 'विसर्जनीयस्य सः' इति द्वयोः सूत्रयोः प्रवृत्तिरेव नास्ति इति लाघवमस्ति।

---

386 पा.सू.६/१/१३७

387 पा.सू.८/३/२

388 पा.सू.८/३/४

**पुमोऽख्याञि खय्यम्परे । (७/४/२)**

इदं सूत्रं पाणिनीये 'पुमः खय्यम्परे'[389] इत्येव दृश्यते। रुः इत्यादेशः अनेन विधीयते। अम्परे खयि पुम्शब्दस्य रुः स्यात् इति कौमुद्यामस्य सूत्रार्थः उच्यते। पुम्शब्दस्य 'रु' स्यादित्येव कौमुद्यामुक्तः। किन्तु 'रु' आदेशः कुत्र भवितव्य इति दण्डनाथेन स्पष्टिक्रियते। 'पुमित्येतस्य पदस्य ख्यञोऽन्यस्मिन् खयि अम्परे परतः रोऽन्तादेशो भवतीति' हृदयहारिण्यां सूत्रार्थः। कुण्डं हसति, वनं याति इत्यादीन्युदाहरणानि।

**नश्छव्यप्रशानः । (७/४/३)**

इदं सूत्रं पाणिनीये 'नश्छव्यप्रशान् '[390] इत्येव उक्तं वर्तते। तत्र रुः आदेशः अनेन विधीयते। 'अम्परे छवि नकारान्तस्य पदस्य रुः स्यान्न तु प्रशान्शब्दस्य' इति कौमुद्यां सूत्रार्थः उक्तः। किन्तु दण्डनाथेन 'नकारान्तस्य पदस्य प्रशान् वर्जितस्य छव्यव्परे परतः सकार अन्तादेशो भवतीति' सूत्रार्थः उच्यते। हृदयहारिण्यां 'सकार' अन्तादेशविधायकमिदं सूत्रम्। 'भवाँश्छादयन्ति', 'भवांश्छादयति', 'भवाँष्ठकारेण', 'भवांष्ठकारेण', 'भवाँस्थुटति', 'भवांस्थुटति', 'भवाँश्चिनोति', 'भवांश्चिनोति', 'भवाँष्टीकते', 'भवांष्टीकते', 'भवाँस्तरति', 'भवांस्तरति' इत्यादीनि उदाहरणानि। अत्र पूर्वस्य त्वनुनासिकानुस्वारौ भवतः।

---

389 पा.सू.८/३/६

390 पा.सू.८/३/७

**कानः कानि। (७/४/४)**

इदं पाणिनीये 'कानाम्रेडिते'[391] इति प्रयुक्तं वर्तते। 'कान्नकारस्य रुः स्यादाम्रेडिते परे' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। रुत्वविधायकमिदं सूत्रम्। पाणिनिना 'आम्रेडितं भर्त्सने'[392] इति सूत्रमस्ति। तेन वाक्यादेः आमन्त्रितस्य इति भर्त्सने द्विर्वचनमुक्तं तत्र आम्रेडितं प्लवते। यदि 'कानाम्रेडिते' इति पाणिनीयसूत्रं स्वीक्रियते तर्हि तत्र 'आम्रेडितं' किमिति अन्वेष्टव्यमिति धिया भोजदेवेन 'कानः कानि' इति सूत्रं प्रयुक्तं स्यात्। भोजदेवः आम्रेडितसंज्ञापि नोक्ता। हृदयहारिणीव्याख्याने सकारोऽन्तादेशविधायकमिदं सूत्रमिति ज्ञायते। 'कानित्येतस्य कानित्येतस्मिन्नेव परतः सकार अन्तादेशो भवति' इति अस्य सूत्रार्थः। अर्थात् कानः कान् प्रत्यये सकारोऽन्तादेशः इति सूत्रादेव स्पष्टम्। काँस्कान्, कांस्कान् इत्युदाहरणे। अत्र पूर्वस्य त्वनुनासिकानुस्वारौ भवतः।

**नॄनः पेरो वा । (७/४/५)**

'नॄन्पे'[393] इत्येव इदं सूत्रं पाणिनिना प्रयुक्तम्। नॄनित्यस्य रुः स्याद्वा पकारे परे इति अस्य सूत्रार्थः कौमुद्यामुच्यते। भोजेन सूत्रे एव नॄनः पेपरे अर्थात् पकारे परे रो वा स्यात् इति स्पष्टीक्रियते। नॄनः रेफादेशः कुत्र भवतीति दण्डनाथः पुनरपि स्पष्टीकरोति, संहितायामिति। ' पदस्य पकारे परतः संहितायां रोफादेशो भवतीति' सूत्रार्थः हृदयहारिण्यां दृश्यते। नॄँ पाहि, नॄं

---

391 पा.सू.८/३/१२

392 पा.सू.८/२/९५

393 पा.सू.८/३/२०

पाहि, नॄन् पाहि इत्यादीन्युदाहरणानि। अत्र पूर्वस्य त्वनुनासिकानुस्वारौ भवतः।

**अत्रानुनासिकः पूर्वस्य। (७/४/६) अन्यस्मात्परोऽनुस्वारः। (७/४/७)**

तत्र प्रथमे सूत्रे 'तु वा' इत्यपि पाणिनीये दृश्यते। तत्र 'अत्रानुनासिकः पूर्वस्य तु वा'[394] इति सूत्रं प्रयुक्तम्। एवं द्वितीयं 'अनुनासिकात्परोऽनुस्वारः'[395] इति च उक्तम्। पूर्वेण अनुनासिकादेशः तथा परेण अनुस्वारादेशश्च विधीयते। पाणिनीये इमे द्वे सूत्रे प्रयुक्ते एव पुमः 'खय्यम्परे', 'नश्छव्यप्रशान्', 'कानाम्रेडिते' इत्येतानि सूत्राणि प्रयुक्तानि। तस्मात् तेषु सूत्रेषु इमे अनुवर्तेते । किन्तु हृदयहारिण्यां 'पुमः खय्यम्परे', 'नश्छव्यप्रशान्', 'कानाम्रेडिते' इति सूत्राण्युक्त्वा इमे सूत्रे प्रतिपाद्येते इत्यस्मात् 'अत्र अनुनासिकानुस्वारौ भवतः' इति एकैकस्मिन् सूत्रे पृथक्कथनं कृतम्। कौमुद्यां रुत्वप्रकरणे इदं सूत्रं वर्तते इत्यस्मात् 'अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्' इति , 'अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात्' इति च सूत्रार्थः तत्र दृश्यते। अत्र हृदयहारिण्यां केवलं 'रुत्वं' न 'सकार' अन्तादेशस्यापि प्रसक्तिरस्तीत्यनेन दण्डनाथेन रुप्रकरणे इत्यपेक्ष्य अनुक्रान्ते प्रकरणे इत्युक्तम्। एवम् 'अनुक्रान्ते प्रकरणे आदेशात् पूर्वस्य वर्णस्य अनुनासिक आदेशो वा भवति' इति, 'यस्मिन् पक्षेऽनुनासिको विहितस्तस्मादन्यत्र पक्षे अस्म्त्पूर्वस्मात् परोऽनुस्वारागमो भवति' इति च द्वयोः सूत्रार्थः हृदयहारिण्यामुच्यते।

---

394 पा.सू.८/३/२

395 पा.सू.८/३/४

**हलि मः। (७/४/८)**

पाणिनीये प्रयुक्तस्य 'मोऽनुस्वारः'[396] इति सूत्रस्य प्रवृत्तिः भोजदेवेनात्र कृता वर्तते। 'मान्तस्य पदस्यानुस्वारः स्याद्धलि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। अत्र दण्डनाथेन सूत्रार्थे किञ्चिदपि स्पष्टीकर्तुं संहितायां विषये इति संयोज्य 'मकारान्तस्य पदस्य हलि परतः संहितायां विषये अनुस्वरोऽन्तादेशो भवतीति' उच्यते। कुण्डं हसति, वनं याति इत्याद्युदाहरणे।

**नश्चापदान्तस्य झलि। (७/४/९)**

पाणिनिप्रयुक्तवदेव[397] इदं सूत्रमत्रापि प्रयुज्यते। द्वयोरपि अनुस्वारोऽन्तादेश अनेन विधीयते। पयांसि, वयांसि, सर्पींषी, धनूंषी इत्यादीन्युदाहरणानि।

**राजि समो मः क्वौ । (७/४/१०)**

पाणिनिना इदं सूत्रं 'मो राजि समः क्वौ'[398] इति प्रतिपादितम्। 'क्विबन्ते राजते परे समो मस्य म एव स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। अर्थात् 'सम् ' उपसर्गपूर्वक 'राज् धातोः' 'क्विप् ' प्रत्यये परे 'सम् ' इत्यस्य मकारस्य 'मकार' आदेश एव भवति। हृदयहारिण्यां दण्डनाथेन समानरूपेणैव अस्य सूत्रार्थः उक्तः। यथा 'क्विप्रत्यये परे राजतौ परतः समो मकारस्य मकार आदेशो भवति' इति। सम्राट् सम्राज् इत्येते उदाहरणे। अत्रोक्तयोः सम्राट् इत्युदाहरणं कौमुद्यामपि दृश्यते।

---

396 पा.सू.८/३/२३

397 पा.सू. ८/३/२४

398 पा.सू.८/३/२५

**हेमनयवलपरतो वा । (७/४/११)**

अष्टाध्याय्यां 'हे मपरे वा'[399] इत्येव सूत्रं दृश्यते। तत्र कात्यायनेन 'यवलपरे यवलावेति' इति वार्तिकं प्रयुक्तम्। द्वयोः सूत्रवार्तिकयोः मेलनेन भोजदेवेन इदं सूत्रं प्रतिपादितम्। विकल्पेन मकार आदेशः द्वित्रापि विधीयते। 'हकारे मकारादिपरे परतः पदान्तस्य स्थाने ते मकारादय आदेशाः यथासंख्यं वा भवन्ति' इति सूत्रार्थः हृदयहारिण्यां वर्तते। किम् ह्मलयति, किं ह्वलयति, किम् ह्रुते, किं ह्रुते किम् ह्लः, किं ह्लः, किम् ह्वलयति, किं ह्वलयति इत्याद्युदाहरणानि। किम् ह्मलयति, किं ह्वलयति इत्युदाहरणद्वयं कौमुद्यामपि दृश्यते।

**ङ्णोः कुक्टुकौ शरि । (७/४/१२)**

इदं सूत्रं पाणिनीये 'ङ्णोः कुक्टुक् शरि'[400] इत्येव प्रयुक्तं वर्तते। 'ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि' इति तत्र सूत्रार्थः। हृदयहारिण्यां दण्डनाथेन 'ङकारान्तस्य णकारान्तस्य च पदस्य संहितायां विषये शरि परतो यथासंख्यं कुक् टुक् इत्येतावागमौ वा भवतः' इति सूत्रार्थः उच्यते। 'प्राक्च्छेते', 'प्राङ् शेते', (झयः पदान्तारिति छत्वं) 'प्राक् कृङे', 'प्राङ् क्षण्डे', 'प्राङ् क्षष्ठः', 'प्राङ् षष्ठः', 'प्राङ्क् साये', 'प्राङ् साये', 'सुगुण्च्छेते', 'सुगुण् शेते', 'वणट्वण्डे', 'वण्षण्डे' इत्यादीनि उदाहरणानि।

---

399 पा.सू.८/३/२६

400 पा.सू.८/३/२८

**सः डसोऽच्युतो धुट् (७/४/१३)**

इदं सूत्रं पाणिनीये 'डः सि धुट्'[401] इत्येव अस्ति। धुडागमः अनेन विधीयते। 'डात्परस्य सस्य धुड्वा स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उच्यते। पाणिनिप्रयुक्ते 'डःसि धुट् ' इत्यत्र 'ङः' इति पञ्चमाविभक्तौ विद्यते 'सि' इति सप्तम्यां च। एवं चेत् 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[402] 'तस्मादित्युत्तरस्य'[403] पूर्वस्य इति सूत्रद्वयस्य प्रसङ्गे 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इत्यनेन पञ्चमीनिमित्तकं कार्यं स्वीकृत्य 'सि' इत्यनेन निर्दिष्टस्य सकारस्य स्थानित्वं सिध्यति। तस्मात् 'धुडागमः' टित्वात् सकारात् पूर्वं भवति। दण्डनाथेन उपर्युक्तस्यास्य सन्देहस्यावसरः सूत्रेणैव परिह्वियते। सूत्रार्थे पञ्चमीनिर्देशात्परस्य सकारस्य धुडागमः इति स्पष्टीक्रियते। सकारान्तात् पदात् परस्याश्च्युतेः सम्बन्धिनः सकारस्य वा धुडागमो भवति इति हृदयहारिण्यां व्यक्तं सूत्रार्थमुक्त्वा पुनरपि स्पष्टीक्रियते च। श्वलिट् साये श्वलिट्त्साये इत्युदाहरणम्।

**नश्च। (७/४/१४)**

इदं पाणिनीयसूत्रं तद्वदेव[404] भोजेन स्वीकृतं वर्तते। 'नकारान्तात्सस्य धुड्वा स्यात्' इति कौमुद्यामस्य सूत्रार्थः। हदयहारिण्यां 'नकारान्ताद् पदात् परस्य सकारस्यारव्युतोश्चुतेः धुडागमो वा भवतीति' सूत्रार्थः दण्डनाथेनोच्यते। भवान्त्साये, भवान्साये इत्युदाहरणम्। सूत्रार्थे प्रयुक्तस्य अच्युतशब्दस्य प्रयोजनमेवमुच्यते भवान् श्च्योतति इति। हृदयहारिण्याम् अच्यतेः इति

---

401 पा.सू.८/३/२९

402 पा.सू.१/१/६६

403 पा.सू.१/१/६७

404 पा.सू.८/३/३०

पदं विहाय धुडागमः उक्तः। किन्तु अच्युतशब्दस्य ग्रहणं पाणिनिना न कृतम्।

**शि तुक्। (७/४/१५)**

पाणिनिप्रयुक्तसूत्रमेव भोजदेवः अत्रापि स्वीक्रियते। 'शि तुक्'[405] इत्येव तत्र सूत्रं प्रयुक्तम्। 'नस्य पदान्तस्य शे परे तुग्वा स्यात्' कौमुद्यामस्य सूत्रार्थः उक्तः। एवमेव 'नकारान्तस्य पदस्य शकारे परतस्तुगागमो वा भवति' इति दण्डनाथेन सूत्रार्थः उच्यते। भवान् शेते, भवान्च्छेते इत्युदाहरणम्।

**मय उञो वोऽचि । (७/४/१६)**

'मय उञो वो वा'[406] इति पाणिनीयं सूत्रम्। 'मयः परस्य उञो वो वा स्यादचि' इति कौमुद्यामस्य सूत्रार्थः। 'अच्परे मय् वर्णात् परस्य उञः विकल्पेन वकारादेशः' अनेन विधीयते। 'मय उञो वोऽचि' इति सूत्रे एव भोजदेवेन अच्परत्वात् इति स्पष्टीकृतम्। 'मयः परस्य उञो निपातस्य स्थानेऽचि परतो वकारादेशो वा भवतीति' हृदयहारिण्यां सूत्रार्थः उक्तः। कौमुद्यपेक्षया दण्डनाथेन सूत्रार्थे निपातस्य स्थाने इति प्रयुक्तं वर्तते। 'आङ्वर्जः एकोऽच् निपातः' भवति। अत्र 'उञ्' इत्यत्र 'उ' एव शिष्यते, तत्तु आङ्वर्जः च भवति। तस्मात् तस्य स्थाने इत्यर्थः दण्डनाथेन स्पष्टमुच्यते। किम्वावपनम्, किमु आवपनम् इत्युदाहरणम्।

---

405 पा.सू.८/३/३१

406 पा.सू.८/३/३३

**ङमो ह्रस्वाद् द्वे । (७/४/१७)**

पाणिनिना 'ङमो ह्रस्वादचि ङमुण्नित्यम्'[407] इति सूत्रमुक्तम्। ङम् इत्यनेन ङ, ण, न इति वर्णाः गृह्यन्ते। पाणिनिना ङमुडागमः अनेन विधीयते। 'ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उच्यते। अर्थात् ह्रस्वस्वरात् परः पदान्ते विद्यमानः यः 'ङ्', 'ण्', 'न्' वर्णाः तस्मात् परस्य अच् वर्णस्य संहितायां यथासंख्यं 'ङुट्' 'णुट्' 'नुट्' आगमः भवति। किन्तु भोजदेवेन सूत्रे एव 'ङमुड्' इत्यस्य 'द्वे' इति प्रयुक्तम्। हृदयहारिण्यां दण्डनाथेन तत् स्पष्टीक्रियते 'ह्रस्वात्परस्य पदान्ते वर्तमानस्य ङमः स्थाने अच् परतः संहितायां विषये द्वे भवतः' इति सूत्रार्थः उक्तः। अत्र ङमुडागमः न, विद्यमान ङमः दित्वमुच्यते। पाणिनीये ङमुडागमः टित्वात् आद्यावयवत्वेनागच्छति। किन्त्वत्र एतादृशपृथग्निर्देशः नास्ति। यत्र 'ङ', 'न', 'ण' वर्णाः वर्तन्ते तत्रैव द्वे 'ङ् ङ्', 'न् न्', 'ण् ण्' इति भवति। कुङ्ङास्ते, सुगण्णेस्ते, पचन्नास्ते इत्यादीन्युदाहरणानि।

**ढो ढे लोपोऽपदादौ । (७/४/१८)**

पाणिनिना इदं सूत्रं 'ढो ढे लोपः'[408] इत्युच्यते। 'ढस्य लोपः स्याड्ढे परे' इति कौमुद्यामस्य सूत्रार्थः। भोजदेवेन सूत्रे 'अपदादौ' इति प्रयुक्तम्। दण्डनाथेन स्पष्टीक्रियते 'ढकारस्यापदादौ ढकारे परतो लोपो भवतीति'। न पदादौ अपदादौ। पदादौ विद्यमानस्य

---

407 पा.सू.८/३/३२

408 पा.सू.८/३/१३

ढकारस्य लोपाभावार्थं अपदादौ इति सूत्रे प्रयुक्तं स्यात्। लीढं, मीढं, गूढम् इत्यादीन्युदाहरणानि।

**रो रि । (७/४/१९)**

पाणिनिना प्रयुक्तमिदं सूत्रं[409] तद्वदेव भोजदेवेनापि स्वीकृतं वर्तते। कौमुद्यामस्य सूत्रार्थः एवं भवति यत् 'रेफस्य रेफे परे लोपः स्यात्' इति। किन्तु दण्डनाथेन 'पदसम्बन्धिनो रेफस्य रेफे परतो लोपो भवति' इति सूत्रार्थः उच्यते। अत्र पदसम्बन्धिनः रेफस्यैव लोपः इति दण्डनाथेन स्पष्टीक्रियते। अजर्घाः, अपास्याः इत्येते उदाहरणे।

**विरामे विसर्जनीयः । (७/४/२०) खरि । (७/४/२१)**

पाणिनिना 'खरवसानयोर्विसर्जनीयः'[410] इति सूत्रं प्रयुक्तम्। अस्य 'खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते' इति कौमुद्यामस्य सूत्रार्थः। 'विरामे विसर्जनीयः' इति सूत्रस्य अनन्तरं 'खरि' इति सूत्रं भोजदेवेन उक्तं वर्तते। पाणिनिना 'विरामोऽवसानम्'[411] इति सूत्रेण अवसानसंज्ञा उक्ता। 'वर्णानामभावोऽवसानसंज्ञः' स्यादित्यस्य सूत्रार्थः। तत्र पाणिनि प्रयुक्तवत् 'अवसानसंज्ञा' न विद्यते इत्यस्मात् सूत्रं 'विरामे विसर्जनीयः', 'खरि' इति च विभक्तं स्यात्। दण्डनाथेन 'विरतिर्विरामः, तत्र विषये रेफान्तस्य पदस्य विसर्जनीयोऽन्तादेशो भवतीति'

409 पा.सू.८/३/१४

410 पा.सू.८/३/१५

411 पा.सू.१/४/११०

सूत्रार्थः उक्तः। 'वृक्षः', 'पुनः', 'गीः', 'धूः' इत्यादीन्युदाहरणानि। 'खरि' इति सूत्रे दण्डनाथेन 'अविरामार्थ आरम्भः' इति उक्तं वर्तते। 'खरि परतो रेफान्तस्य पदस्य विसर्जनीयोऽन्तादेशो भवतीति' तत्र सूत्रार्थः। 'कः खनति', 'पुरुषः पचति', 'कः करोति', 'कः फलति', 'कः शेते', 'कः षण्डः', 'कः साधुः' इत्यादीन्युदाहरणानि।

**शर्परे। (७/४/२२)**

पाणिनिना 'शर्परे विसर्जनीयः'[412] इति सूत्रं प्रयुक्तम्। 'शर्परे खरि विसर्जनीयस्य विसर्जनीयः न त्वन्यत्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं 'कुप्वोᳲ कᳲ पौ च'[413] इति सूत्रस्यापवादसूत्रत्वेन उच्यते। अनेन प्राप्तौ जिह्वामूलीयोपध्मानीयो बाधित्वा विसर्जनीयस्य विसर्ग एव भवतीति 'शर्परे विसर्जनीयः' इति सूत्रेण पाणिनिना सूच्यते। दण्डनाथेन विसर्जनीयस्य विसर्गादेशो न रेफस्य विसर्गादेशः अनेन उच्यते। हृदयहारिण्यां अस्य सूत्रार्थः 'शर्परे खरि परतः पदान्तस्य रेफस्य विसर्जनीय एव भवति' इत्यस्ति। तदुक्त्वा दण्डनाथेन 'कुप्वोᳲ क ᳲ पाविति' च न भवतीत्युच्यते। तस्मात् स्पष्टं भवति अत्रापि 'कुप्वोᳲ कᳲ पौ' इति 'खरि' इति सूत्रस्यापवादसूत्रत्वेन उच्यते इति। 'पुरुषः त्सरुः', 'कः वासः' 'क्षौमम्', 'अद्भिः प्सातम् ' इत्यादीन्युदाहरणानि।

---

412 पा.सू. ८/३/३५

413 .पा.सू ८/३/३७

**ख्याञि। (७/४/२३)**

अनेन सूत्रेण 'रेफस्य विसर्जनीयः' विधीयते। अस्य सूत्रार्थः दण्डनाथेन 'ख्याञि परतः पदान्तरेफस्य विसर्जनीय एव भवती'त्युच्यते। कः ख्यातः, नमः ख्यात्रे इत्येते उदाहरणे। अस्य सूत्रस्य प्रवृत्तिः पाणिनिना 'खरवसानयोर्विसर्जनीयः'[414] इति सूत्रेण कृता।

**रोः सुपि । (७/४/२४)**

पाणिनिना प्रयुक्तस्य अस्य[415] सूत्रस्य तद्वदेवस्वीकारः भोजदेवेन कृतः। द्वयोरपि रेफस्य विसर्जनीयादेशो विधीयते। 'सप्तमीबहुवचने परे रोरेव विसर्जनीयो नान्यरेफस्य' इति कौमुद्यामस्य सूत्रार्थः उक्तः। तद्वत् 'रोरेव सम्बन्धिनो रेफस्य सुपि परतो विसर्जनीयादेशो भवतीति' दण्डनाथेन सूत्रार्थः उक्तः। 'पयःसु', 'सर्पिः षु', 'आशिःषु' इत्येतानि उदाहरणानि।

**अवर्णभोभगो अघोपूर्वस्य लोपो हशि। (७/४/२५)**

पाणिनिना इदं सूत्रं 'भोभगो अघो अपूर्वस्य योऽशि'[416] इत्युक्तम्। सिद्धान्तकौमुद्यां रोः यादेशः अनेनोच्यते। तदुच्यते 'एतत्पूर्वस्य रोर्यादेशः स्यादशि परे' इति सूत्रार्थेन। किन्तु हृदयहारिण्यां अनेन लोपो विधीयते। 'अवर्ण भोभगो अघो इत्येवं पूर्वस्य रोर्हशि परतो लोपो भवति' इति सूत्रार्थः उक्तः दण्डनाथेन। 'अवर्ण भोभगो अघो इत्येवं पूर्वस्य रोः हशि परे लोपः

---

414 पा.सू.८/३/१५

415 पा.सू.८/३/१६

416 पा.सू.८/३/१७

इत्यस्मात् भोभगो अघो इति वर्णादन्यत्र हशि परे रोः लोपः' इत्यर्थं सिध्यति। 'ब्राह्मणा हसन्ति', 'ब्राह्मणा वसन्ति', 'ब्राह्मणा भजन्ति' इत्यादीन्युदाहरणानि।

**उञि (७/४/२६)**

पाणिनीये इदं सूत्रं 'उञि च पदे'[417] इति प्रयुक्तम्। 'अपूर्वयोः पदान्तयोर्यवयोर्लोप उञि पदे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। किन्तु हृदयहारिण्यां 'रोर्लोपः' अनेन विधीयते। 'उञि निपाते परतो अवर्णभोभगो अघोपूर्वस्य रोर्लोपो भवति' इति दण्डनाथेन तत्र सूत्रार्थः उक्तः। 'स उगत', 'भगो उ एहि', 'अघो उ एहि' इत्यादीनि उदाहरणानि।

**अचीषत्सृष्टतरो यश्च (७/४/२७) आदीषत्सृष्टश्च (७/४/२८)**

सूत्रद्वयमिदं पाणिनीये न दृश्यते इत्यस्मात् भोजेन नूतनतया प्रतिपादितं भवेत्। 'अवर्ण भो भगो अघो इत्येवं पूर्वस्य रोरचि परतः ईषत्स्पृष्टतरो यकारश्च शब्दात् लोपश्च भवति' इति दण्डनाथेन 'अचीषत्सृष्टतरो यश्च' इत्यस्य सूत्रार्थः उक्तः। 'क इह'/'कयिह', 'ब्राह्मणा अत्र' /'ब्राह्मणायत्र', 'भो अत्र' /'भोयत्र', 'भगो इह' /'भगोयिह' इत्येतानि उदाहरणानि। एवमेवं 'अवर्णात्परस्य रोः स्थाने अचि परत ईषत्स्पृष्टो यकारश्च शब्दात् ईषत्स्पृष्टतरलोपौ च भवतः' इति 'आदीषत्सृष्टश्च' इत्यस्य च सूत्रार्थः हृदयहारिण्यामुक्तः । 'कयास्ते'/'कयास्ते'/'क आस्ते', 'ब्राह्मणायिह'/ 'ब्राह्मणायिह'/'ब्राह्मणा इह' इत्युदाहरणे। सूत्रे 'आदीषत्' इति भोजेनोक्त्वा पुनः दण्डनाथः 'अदितिवचनं भो भगो अघो इत्येतेषां निवृत्यर्थम्' इति व्याख्याने प्रतिपादयति।

---

417 पा.सू.८/३/२१

सूत्रे आकारः प्रयुक्तः, किन्तु व्याख्याने अदित्येवास्ति। तत्कदाचित् ह्रस्वग्रहणार्थं स्यात्।

पूर्वोक्तसूत्रैः रोर्हशि परतो लोपो भोजेन विधीयते इत्यस्मात् 'कयिह' इत्याद्यैकरूपमेव प्रप्नोति। तत्र यादेशरूपसिध्यर्थं इदं सूत्रद्वयं प्रतिपादितम्। अनेन यकारस्य लोपमपि भवति इत्युक्तवा 'क इह' इत्यादिरूपाणां साधूकरणं कृतम्। रोर्यादेशविधानेन पाणिनिना तत्रैव रूपद्वयं साधितम्। अत्र भोजदेवेन तदर्थं सूत्रद्वयस्य प्रयोगः कृतः इति गौरवमायाति।

**व्योश्च ते (७/४/२९)**

अस्य सूत्रस्य सूत्रार्थः दण्डनाथेन एवमुच्यते अवर्णात्परौ यौ वकारयकारौ तदन्तस्याचिपरस्तेः ईषत्स्पृष्टेषत्स्पृष्टतरलोपा अन्तादेशा भवन्ति। 'पटविह', 'पटविह', 'पट इह', 'असाविन्द्रः', 'असाविन्द्रः', 'असा इन्द्रः', 'तयिह', 'तयिह', 'त इह', 'तस्मायासनं', 'तस्मायासनं', 'तस्मायासनं', 'तस्मा आसनम्' इत्युदाहरणानि। 'व्योर्लघूप्रयत्नतरः शाकटायनस्य'[418] इति पाणिनीयसूत्रमस्ति। पाणिनिः पूर्वाचार्याणां नामनिरदेशपूर्वकं तेषां मतं उपस्थाप्यते। किन्तु भोजदेवेन एवं न कृतम्।

**छविः सः (७/४/३०)**

'नश्छव्यप्रशान्'[419] इति पाणिनीयसूत्रस्याधरेण भोजेनोक्तमिदं सूत्रम्। 'अम्परे छवि नान्तस्य पदस्य रुः, न तु प्रशान्शब्दस्य' इति कौमुद्यामस्य सूत्रार्थः। तत्र रुविधायकं सूत्रं दण्डनाथेन सकारविधायकं कृतम्। दण्डनाथेन हृदयहारिण्यामस्य सूत्रार्थः एवमुच्यते 'छवि

---

418 पा.सू.८/३/१८

419 पा.सू.८/३/७

परतः पदान्तरेफस्य विसर्जनीयापवादः सकारो भवति' इति। 'कश्छादयति', 'पुनश्छिनत्ति', 'कष्ठकारेण', 'कस्थुटति', 'कश्चिनोति', 'कष्टीकते', 'कस्तनोति' इत्युदाहरणानि।

**वा शरि। (७/४/३१) खर्परे लोपः। (७/४/३२)**

'वा शरि'[420] इति सूत्रं पाणिनिना तद्वदेव प्रयुक्तं वर्तते। 'शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्' इति अस्य सूत्रार्थः कौमुद्यामस्ति। किन्तु हृदयहारिणीकारः अनेन सूत्रेण विकल्पेन सकारोऽन्तादेशः विधीयते। तत्र सूत्रार्थो एवमुच्यते 'शरि परतः पदान्तस्य रेफस्य सकारोऽन्तादेशो वा भवति' इति। 'कः शेते'/'कश्शेते', 'कः षण्डः'/'कष्षण्डः', 'कः साधुः'/'कस्साधुः' इत्युदाहरणानि।

'वा शरि' इति सूत्रव्याख्यानावसरे 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति वार्तिकमुक्तम्। तं वर्तिकं भोजदेवेन सूत्रत्वेनोच्यते अत्र। 'खर्परे शरि परतः पदान्तस्य रोफस्य लोपो वा भवतीति' दण्डनाथेन सूत्रार्थः उक्तः। 'चक्षुश्श्च्योतति'/'चक्षुः श्च्योतति'/'चक्षुश् श्च्योतति', 'कष्ठीवति'/'कः ष्ठीवति'/ 'कष्ठीवति', 'चक्षुस्पन्दते'/'चक्षुः स्पन्दते'/'चक्षुस्स्पन्दते' इत्यादीनि उदाहरणानि। कात्यायनेन 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति वार्तिकेन यदि 'शर् ' वर्णादनन्तरमव्यवहितरूपेण 'खर् 'वर्णः वर्तते तर्हि प्रक्रियायां विकल्पेन विसर्गलोपः अपि भवति इत्युच्यते। कात्यायनेनोक्तः विसर्गलोपः भोजेन रेफलोपत्वेन स्वीकृतम्।

---

[420] पा.सू.८/३/३६

**कुप्वोᳲ कᳲ पौ खरि । (७/४/३३)**

पाणिनिना 'कुप्वोᳲ कᳲ पौ च'[421] इति उक्तं सूत्रं भोजेन 'कुप्वोᳲ कᳲ पौ खरि' इत्युच्यते। 'कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः' इति कौमुद्यामस्य सूत्रार्थः दृश्यते। 'कवर्गे पवर्गे च परतः खरि परतः पदान्तस्य रेफस्य स्थाने यथासंख्यं जिह्वामूलूयोपध्मानीयावादेशौ वा भवतः' इति दण्डनाथेन सूत्रार्थः उक्तः। 'कः करोति', 'वृक्षः फलति', इत्येते उदाहरणे। पाणिनिना विसर्गात्परं विद्यमानौ कवर्गपवर्गौ जिह्वामूलीयोपध्मानीयौ भवतः इति कथने दण्डनाथः जिह्वामूलीयोपध्मानीयौ आदेशौ भवतः इत्युच्यते।

**पाशप्कल्पप्केष्वनव्ययस्य सः (७/४/३४)**

पाणिनिना 'सोऽपदादौ'[422] इति सूत्रं प्रयुक्तम्। अस्य सूत्रव्याख्याने कात्यायनेन 'पाशकल्पककाम्येष्विति वाच्यम् ' इति वार्तिकमुच्यते। पदान्ते विद्यमानस्य विसर्गस्य पाश-कल्प-क-काम्य एतेषु प्रत्ययेषु परेषु सकारादेशसिध्यर्थमिदं प्रयुक्तम्। इदं वार्तिकमत्र भोजदेवः सूत्रत्वेनात्र स्वीकृतम्। अस्य सूत्रस्य सूत्रार्थः दण्डनाथेन एवमुच्यते यत् 'अनव्ययस्य रेफस्य पाशप् कल्पप्केषु प्रत्ययेषु पवर्गकवर्गादिषु परतः सकारादेशो वा भवति' इति। 'पयःपाशं'/'पयस्पाशं', 'पयः कल्पं'/'पयस्कल्पम्', 'पयः कं'/'पयस्कम्' इत्यादीनि

[421] पा.सू.८/३/३७

[422] पा.सू.८/३/३८

उदाहरणानि। पाणिनीये 'सोऽपदादौ' इति सूत्रेण इदं कार्यं प्रतिपादितम्। तस्य सूत्रस्य वार्तिके 'पाशकल्पककाम्येष्विति वाच्यम्', 'अनव्ययस्येति वाच्यम्' इति च वार्तिकद्वयमुच्यते। इमे वार्तिके भोजेन सूत्रत्वेन परिवर्तिते स्याताम्।

**रोः काम्यचि (७/४/३५)**

'सोऽपदादौ'[423] इत्यस्य व्याख्याने 'काम्ये रोरेवेति वाच्यम् ' इति वार्तिकमुच्यते। एतस्मात् वार्तिकात् अस्य सूत्रस्य उत्पत्तिः भोजेन कृता भवेत् । 'अनव्ययसम्बन्धिनो रेफस्य रोरेव काम्यचि प्रत्यये परतः सकारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'पयस्काम्यति', 'यशस्काम्यति' इत्येते उदाहरणे। उदाहरणान्युक्त्वा सूत्रे विद्यमानस्यैकैकस्या-वयवस्य प्रयोजनमुच्यते दण्डनाथेन।

**तेष्विणः षः। (७/४/३६)**

पाणिनिना इदं सूत्रं 'इणः षः'[424] इत्येव प्रतिपादितम्। 'इणः परस्य विसर्गस्य षकारः स्यात्पूर्वविषये' इति अस्य सूत्रार्थः कौमुद्याम् उच्यते। दण्डनाथेन इण उत्तरस्य तेषु रेफस्य पाशप्कल्पककाम्येषु परतः षकारादेषशो भवतीत्युच्यते। 'सर्पिष्पाशम्', 'यजुष्पाशम्', 'सर्पिष्कल्पम्', 'यजुष्कल्पम्', 'सर्पिष्कं', 'यजुष्कं', 'सर्पिष्काम्यति', 'यजुष्काम्यति' इत्यादीनि उदाहरणानि। 'सर्पिष्पाशम्', 'सर्पिष्कल्पम्', 'सर्पिष्कं', 'सर्पिष्काम्यति' इत्येतानि उदाहरणानि कौमुद्यामपि दृश्यते।

---

423 पा.सू.८/३/३८

424 पा.सू.८/३/३९

**निर्दुराविश्चतुष्पादुर्बहिषाम् (७/४/३७), सुचो वा (७/४/३८)**

षकारादेशो एताभ्यां विधीयते। 'निरादीनां सम्बन्धिनो रेफस्य कुप्वोः परतः षकारादेशो भवति' इति दण्डनाथेन हृदयहारिण्यां 'निर्दुराविश्चतुष्पादुर्बहिषाम् ' इत्यस्य सूत्रार्थं उक्त्वा पक्षान्तरे तु यथाप्राप्तो जिह्वामूलीयो उपध्मानीयो विसर्जनीयश्चेति इत्युक्त्वम्। 'द्विष्करोति' /'द्विᳲ करोति'/'द्विः करोति', 'चतुष्पचति'/'चतुᳲ पचति'/'चतुःपचति' इत्यादीनि उदाहरणानि। 'सुजन्तानां सम्बन्धिनो रेफस्य कुप्वोः परतः षकारादेशो भवति पक्षान्तरे तु यथाप्राप्तौ जिह्वामूलीयोपध्मानीयौ विसर्जनीयश्चेति' इति 'सुचो वा' इति सूत्रस्य सूत्रार्थः हृदयहारिण्यां दण्डनाथेनोक्तः। पूर्वोक्तानि 'द्विष्करोति'/'द्विᳲ करोति'/'द्विः करोति', 'चतुष्पचति'/' चतुᳲ पचति'/'चतुःपचति' इत्यादीनि उदाहरणानि एव अत्रापि दणडनाथेनोक्तानि। पाणिनिना इमानि कार्याणि 'द्विस्त्रिश्चतुरिति कृत्वोर्थे'[425] इति सूत्रेण प्रतिपादितम्। षकोरादेश एव अनेनापि विधीयते। 'कृत्वोऽर्थे वर्तमानानामेषां विसर्गस्य षकारो वा स्यात् कुप्वोः' इति कौमुद्यामस्य सूत्रार्थः उच्यते। पाणिनिना एकस्मिन् सूत्रे प्रतिपादितं भोजेन निरादीनां, सुजनतानां च सम्बन्धिनः पृथक् प्रतिपादितम्।

**इसुसोर्व्यपेक्षायाम् (७/४/३९)**

पाणिनीये 'इसुसोः सामर्थ्ये'[426] इति सूत्रं प्रतिपादितम्। 'एतयोर्विसर्गस्य षः स्याद्वा

425 पा.सू.८/३/४३

426 पा.सू.८/३/४४

कुप्वोः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। अर्थात् इस् , उस् प्रत्यययोः विसर्गस्य कवर्गे पवर्गे च परे सामर्थ्ये विकल्पेन षकारादेशः भवति इति सूत्रेण प्रतिपाद्यते। 'इसन्तस्योसन्तस्य च यो रेफस्तस्य कवर्गे पवर्गे च परतो व्यपेक्षायां सामर्थ्ये षकारादेशो वा भवति' इति हृदयहारिण्यामस्य सूत्रार्थः दण्डनाथेनोक्तः। 'सर्पिष्करोति'/'सर्पिः करोति', 'सर्पिष्पिबति'/'सर्पिः पिबति', 'धनुष्खण्डयति'/'धनुः खण्डयति', 'यजुष्फलति'/'यजुः फलति' इत्यादीनि उदाहरणानि।

**नाक्रियैकाधिकरणे (७/४/४०)**

'इसन्तस्य उसन्तस्य च यो रेफस्तस्य क्रियापदवर्जितसमानाधिकरणपदस्थे कवर्गे च खरि परतो व्यपेक्षायां षकारादेशो न भवति' इति हृदयहारिण्यामस्यार्थः उक्तः। अनेन सूत्रेण पूर्वेण प्राप्तस्य षकारस्य प्रतिषेधः दण्डनाथेन उच्यते। 'सर्पिः कपालम्', 'यजुः पोतकम् ' इत्येते उदाहरणे। पाणिनिना इदं सूत्रं न प्रयुक्तं वर्तते।

**नित्यं समासेऽनुत्तरपदस्थस्य (७/४/४१) , अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्विनव्ययस्य (७/४/४२)**

पाणिनिना प्रयुक्तमिमे सूत्रे भोजेन तद्वदेव स्वीकृतम्। नित्यं समासेऽनुत्तरपदस्थस्य इत्यस्य इसुसोर्विसर्गस्यानुत्तरपदस्थस्य नित्यं षः स्यात् कुप्वोः परयोः इति कौमुद्यां 'नित्यं समासेऽनुत्तरपदस्थस्य' इत्यस्य सूत्रार्थः उक्तः। एवं 'इसन्तस्योसन्तस्य च रेफस्यानुत्तरपदस्थस्य समासे खरि कवर्गे पवर्गे च परतो नित्यं षकारादेशो भवतीति' हृदयहारिण्यां नित्यं

समासेऽनुत्तरपदस्थस्य इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'सर्पिष्कुम्भः', 'सर्पिष्पानं', 'धनुष्खण्डं', 'यजुष्पवम् ' इत्यादीनि उदाहरणानि। तद्वत् अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य इत्यस्य 'अकाराद् परस्यानव्ययस्य सम्बन्धिनो रेफस्यानुत्तरपदस्थस्य कृकम्यादिस्थे कवर्गे पवर्गे च परतः सकारादेशो भवतीति' सूत्रार्थः हृदयहारिण्यामुक्तः।

**अधः शिरसोः पदे (७/४/४३)**

पाणिनिना इदं सूत्रं 'अधः शिरसी पदे'[427] इति प्रतिपादितम्। एतयोर्विसर्गस्य सादेशः स्यात्पदशब्दे परे इति अस्य सूत्रार्थः कौमुद्यामुच्यते। सकारादेशविधायकस्यास्य सूत्रस्य सूत्रार्थः हृदयहारिण्यामेवमुच्यते 'अधस् शिरस् इत्येतयोः सम्बन्धिनो रेफस्य समासेऽनुत्तरपदस्थस्य पदशब्दे परतः सकारादेशो भवति' इति। 'अधस्पदम् ' इत्युदाहरणम्। इदमुदाहरणं कौमुद्यामपि दृश्यते।

**नमस्फुरसोर्गत्योः (७/४/४४)**

पाणिनिना इदं सूत्रं 'नमस्फुरसोर्गत्योः'[428] इति प्रतिपादितम्। 'गतिसंज्ञयोरनयो-र्विसर्गस्य सः कुप्वोः परयोः' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। इदमपि सकारादेशकविधायकं सूत्रं भवति। 'नमस् पुरसित्येतयोर्गतिसंज्ञकयोः सम्बन्धिनो रेफस्य खरि कवर्गे पवर्गे च परतः सकारादेशो भवती'त्यस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'नमस्कृत्य', 'नमस्करोति', 'पुरस्कृत्य',

---

427 पा.सू.८/३/४७

428 पा.सू.८/३/४०

'पुरस्करोति' इत्यादीनि उदाहरणानि। पुरस्करोति इति उदाहरणं कौमुद्यामपि दृश्यते।

**तिरसो वा । (७/४/४५)**

पाणिनिना 'तिरसोऽन्यतरस्याम्'[429] इति उक्तं सूत्रं भोजदेवेन तिरसो वा इति प्रतिपादितम्। विकल्पेन सकारादेशो द्वयोरपि विधीयते। 'तिरसः सो वा स्यात् कुप्वोः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'गतिसंज्ञकस्य तिरसः सम्बन्धिनो रेफस्य कुप्वोः परतः सकारादेशो वा भवति' इति सूत्रार्थः दण्डनाथेनोक्तः। 'तिरस्कृत्य'/'तिरः कृत्य', 'तिरस्करोति'/'तिरः करोति' इत्यादीनि उदाहरणानि।

**कस्ककौतस्कुतशुनस्कर्णसद्यस्कालसाद्यस्कभास्कराहस्करायस्करायस्कान्तायस्कुण्डतमस्काण्डमेतस्पिण्डभ्रातुष्पुत्रादयः(७/४/४६), सर्पिष्कुण्डिकाधनुष्कपालबहिष्पूलयजुष्पात्रेषूत्तरपदस्थस्यापि (७/४/४७)**

पाणिनिना 'कस्कादिषु च'[430] इति सूत्रं प्रतिपादितम्। 'एष्विण उत्तरस्य विसर्गस्य षः स्यादन्यत्र तु सः' इति कौमुद्यामस्य सूत्रार्थः। पाणिनिना गणपाठे स्वीकृते कस्कादीन् १८ शब्दान् प्रयोक्तुं कस्कादिषु च इति सरलतया सूत्रं प्रयुक्तम्। किन्तु भोजदेवः गणपाठः न स्वीकृतः। तस्मात् कस्कादिगणस्थान् अष्टादशान् शब्दान् उच्चार्य कस्ककौतस्कुतशुनस्कर्णसद्यस्कालसाद्यस्कभास्कराहस्करायस्करायस्कान्तायस्कुण्डतमस्काण्डमेतस्पिण्डभ्रातुष्पु

---

429 पा.सू.८/३/४२

430 पा.सू.८/३/४८

त्रादयः, सर्पिष्कुण्डिकाधनुष्कपालबहिष्पूलयजुष्पात्रेषूत्तरपदस्थस्यापि इति सूत्रद्वये इमानि कार्याणि उक्तानि। भोजवत् दण्डनाथोऽपि गणपाठः न स्वीकृतः। तस्मात् 'कस्कादयः शब्दाः कुप्वोः परतो रेफस्य यथायोगं कृतसत्वषत्वाः साधवो भवन्ति' इति कस्ककौतस्कुतशुन-स्कर्णसद्यस्कालसाद्यस्कभास्कराहस्करायस्करायस्कान्तायस्कुण्डतमस्काण्डमेतस्पिण्डभ्रातुष्पुत्रा दयः इत्यस्य सूत्रार्थः तथा सर्पिष्कुण्डिकादिषु कुप्वोः परतो रेफस्य कृत्वषत्वस्योत्तरपदस्थस्यापि षकारादेशो भवति इति सर्पिष्कुण्डिकाधनुष्कपालबहिष्पूलय जुष्पात्रेषूत्तरपदस्थस्यापि इत्यस्य सूत्रार्थः च हृदयहारिण्यामुच्यते। प्रथमे कृतसत्वषत्वानां साधूकरणं द्वितीये कृतषत्वस्योत्तरपद-स्थस्यापि षकारादेशश्च पृथग्विहितमित्यस्मात् सूत्रद्वयं प्रतिपादितमत्र। 'कुतः कुतः आगतः कौतस्कुतः' इति प्रथमस्य 'सर्पिष्कुण्डिका', 'परमसर्पिष्कुण्डिका', 'धनुष्कपालः', 'परमधनुष्क-पालः', 'बहिष्पूलः', 'परमबहिष्पूलः', 'यजुष्पात्रम्', 'परमयजुष्पात्रम् ' इत्यादीनि द्वितीयसूत्रस्य चोदाहरणानि तत्र दत्तानि।

**इण्कुभ्यामपदान्तस्यादेशप्रत्ययस्य सष्पः (७/४/४८)**

'इण्कोः'[431] इति पाणिनीयसूत्रं भोजदेवेन एवमुक्तम्। 'इण् ' इति प्रत्याहारेण 'इ' तः 'लण् ' इत्यस्य 'ण् ' पर्यान्तानां वर्णानां ग्रहणम्। 'कु' इत्यनेन कवर्गः च सूच्यते। 'इणः कवर्गाच्च परे य आदेशः सकारः प्रत्ययस्य चावयवोऽपदान्तस्य तस्य षकार आदेशो भवति इति' दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'सिषेद्धा', 'चिचीषति', 'चिकीषति', 'गीर्षु', 'धूर्षु',

431 पा.सू.८/३/५७

'वाक्षु', 'त्वक्षु' इत्यादीनि उदाहरणानि।

**नुम्विसर्जनीयशर्व्यवायेऽपि (७/४/४९)**

पाणिनिना प्रयुक्तमिदं सूत्रं[432] तद्वदेव भोजेनापि स्वीकृतम्। एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात् इति कौमुद्यामस्य सूत्रार्थः। 'नुमा विसर्जनीयेन शरा च व्यवधानेऽपि इणः कवर्गाच्च पदान्तस्यादेशस्य प्रत्ययसम्बन्धिनश्च सकारस्य षकारादेशो भवति' इति अस्य सूत्रार्थः दण्डनाथेन उक्तः। 'सर्पींषी', 'धनूंषी', 'हविःषु', 'हविष्षु', 'यजुः षु', 'यजुष्षु' इत्यादीनि उदाहरणानि।

**शासिवसिघसीनां च (७/४/५०)**

पाणिनिना प्रयुक्तमिदं[433] सूत्रम्। षकारादेशो अनेन विधीयते। 'इण्कुभ्यां परस्य सस्य षः स्यादिति' कौमुद्यामस्य सूत्रार्थः उक्तः। 'शास्यादीनां सम्बन्धिनः सकारस्येणः कवर्गाश्च परस्य षकार आदेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'शिष्टः', 'शिष्कः', 'अशिषत्', 'अशिषतां', 'उषितः', 'जक्षतुः', 'जक्षितवान् ' इत्यादीनि उदाहरणानि।

**स्तौतिणीनामेवास्विदिस्वदिसहीनां षण्यभ्यासात् (७/४/५१)**

पाणिनिना इदं सूत्रं 'स्तौतिण्योरेव षण्यभ्यासात् '[434] इत्युक्तम्। 'अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात्षभूते सनि नान्यस्य' इति कौमुद्यामस्य सूत्रार्थः उक्तः।

---

432 पा.सू.८/३/५८

433 पा.सू.८/३/६०

434 पा.सू.८/३/६१

'स्तौतेर्ण्यन्तानां च स्विदिस्वदिसहिवर्जितानां सम्बन्धिनः सकारस्याभ्यासादिण उत्तरस्य(सष) भूते परतः षकारादेशो भवति' इति अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुक्तः। 'तुष्टूपति', 'सिषेवयिषति', 'सुष्वापयिषति', 'सिसाहयिषति' इत्यादीनि उदाहरणानि। 'तुष्टूपति', 'सुष्वापयिषति' इति उदाहरणद्वयं कौमुद्यामपि दृश्यते।

**उपसर्गात् सुनोति सुवति स्यतिस्तौतिस्तौभतीनाम् (७/४/५२) स्थासेनिसेधसिचसञ्जां च। (७/४/५३)**

द्वयमपि सकारस्य षकारादेशविधायकं सूत्रं भवति। 'उपसर्गस्थादिणः परस्य सुनोत्यादिसम्बन्धिनः सकारस्य षकारादेशो' भवति इति उपसर्गात् 'सुनोति सुवति स्यतिस्तौतिस्तौभतीनाम्' इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'अभिषुणोति' इत्युदाहरणम्। 'स्थासेनिसेधसिचसञ्जां च इत्यस्य उपसर्गस्थादिणः परस्य स्थादिसम्बन्धिनः सकारस्य षकारादेशो भवतीत्यस्य' सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुच्यते। 'अधिष्ठास्यति' 'अभिषेणयति' इत्येते उदाहरणे। सूत्रद्वयमिदं पाणिनिना 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौ-तिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्'[435] इति उच्यते। उपसर्गस्थान्नि मित्तादेषां सस्य षः स्यात् इति अस्य सूत्रार्थः कौमुद्यामुच्यते।

**सदेरप्रतेः। (७/४/५४)**

पाणिनिना सदिरप्रतेः इति सूत्रमुक्तम्। सकारस्य षकारादेशविधायकमिदं सूत्रम्। अस्य सूत्रस्याधारेण भोजेनोक्तेनानेन सूत्रेणापि सकारस्य शकारादेशः विधीयते। प्रतिवर्जितादुपसर्गात्

---

435 पा.सू.८/३/६५

परस्य सदेर्धातोः सकारस्य षकारे भवतीति अस्य सूत्रार्थः हृदयहारिण्यामुच्यते। 'निषीदति', 'विषादयति', 'अप्रतेरिति', 'प्रतिसीदति' इत्यादीनि उदाहरणानि।

**स्तम्भेः(७/४/५५)**

सकारस्य षकारादेशविधायकमिदं सूत्रम्। पाणिनिना 'स्तम्भेः'[436] इति सकारस्य मूर्धन्यादेशविधायकं सूत्रमुक्तम्। तदेव भोजदेवेनात्र स्वीकृतम्। 'उपसर्गादिणउत्तरस्य स्तम्भेः सकारस्य षकारो भवति' इति दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'विष्टभ्नाति', 'प्रतिष्टभ्नाति' इत्येते उदाहरणे। 'प्रतिष्टभ्नाति' इति उदाहरणं कौमुद्यामपि दृश्यते।

**अवादौर्जित्यालम्बनाविदूर्येषु। (७/४/५६)**

पाणिनिना इदं सूत्रं 'अवाच्चालम्बनाविदूर्ययोः'[437] इत्युक्तम्। 'अवशब्दातुपसर्गादुत्तरस्य स्तम्भेः सकारस्य मूर्धन्यः आदेशो भवति आलम्बनेऽर्थे आविदूर्ये च' इति कौमुद्यामस्य सूत्रार्थः उक्तः। एवमेव 'अवादुपसर्गादुत्तरस्य स्तम्भेः सकारस्यौर्जित्यालम्बनाविदूर्येषु गम्यमानेषु षकारो भवतीति' दण्डनाथेन हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'और्जित्यं बलवत्ता अहो वृषलस्यावष्टम्भः', 'अवष्टब्धो रिपुः शूलेन' इत्यादीनि उदाहरणानि।

**वेश्च स्वनो भोजने (७/४/५७)**

पाणिनिना इदमेव[438] सूत्रं प्रतिपादितम्। सकारस्य षकारादेशविधायकं तत्सूत्रं

---

436 पा.सू.८/३/६७

437 पा.सू.८/३/६८

438 पा.सू.८/३/६९

भोजदेवेनापि स्वीकृतम्। कौमुद्यां 'व्यवाभ्यां स्वनतेः सस्य षः स्याद्भोजने' इति सूत्रार्थः उक्तः। दण्डनाथेन 'वि इत्येतस्मादवाच्चोपसर्गात् परस्य भोजनेऽर्थे वर्तमानस्य स्वनतेः सकारस्य षकारो भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। 'विष्णवति', 'अवष्वणति' इत्येते उदाहरणे।

**परिनिविभ्यः सेवसिवुसहसुटाम्। (७/४/५८) स्तुस्वञ्जिसिवादीनां वाड्व्यवाये। (७/४/५९) परिनिविभ्यः सयसितयोः। (७/४/६२)**

पाणिनिना 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्'[439] 'सिवादीनां वाऽड्व्यवायेऽपि'[440] इति सूत्रद्वयमुक्तम्। 'परिनिविभ्यः परेषामेषां सस्य षः स्यात् ' इति कौमुद्यां परिनिविभ्यः सेवसिवुसहसुटाम् इत्यस्य सूत्रार्थः उक्तः। एवं 'स्तुस्वञ्जिसिवादीनां वाड्व्यवाये' इत्यस्य सूत्रार्थः कौमुद्यां 'परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि' इत्युच्यते। दण्डनाथेन 'परिनिविभ्यः सेवसिवुसहसुटाम् ' इत्यस्य 'परिनिविभ्यः परेषां सेवादीनां धातूनां सुटश्च सकारस्य षकारो भवति'। 'परिषेवते', 'निषेवते', 'परिषीव्यति', 'निषीव्यति', 'विषीव्यति', 'परिषहते', 'निषहते', 'विषहते', 'परिष्करोति' इत्येतानि उदाहरणानि। एवं 'स्तुस्वञ्जिसिवादीनां वाड्व्यवाये इत्यस्य स्तौतिस्वञ्ज्योः सिवादीनां च सकारस्य परिनिविभ्यः परस्याडागमेन व्यवधाने षकारो वा भवति' इति सूत्रार्थः च दण्डनाथेनोक्तः। 'पर्यष्टौत् ' 'पर्यस्तौत् ' 'न्यष्टौत् ' 'न्यस्तौत् ' 'व्यस्तौत् ' इत्यादीन्युदाहरणानि। 'परिनिविभ्यः सयसितयोः

439 पा.सू.८/३/७०

440 पा.सू.८/३/७१

इत्यस्य परिनिविभ्यः उपसर्गेभ्यः परयोःसयसितयोः सकारस्य षकारादेशो भवतीति' दण्डनाथेन सूत्रार्थः उक्तः। 'परिषयः', 'निषयः', 'विषयः', 'परिषितः', 'निषितः', 'विषितः' इत्येतानि उदाहरणानि।

**नित्यं सुनोत्यादीनामासेवात्।** (७/४/६०)

पाणिनिना 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्'[441] इति सूत्रमुच्यते। उपसर्गनिमित्तादेषां सस्य षः स्यादिति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेन सूत्रे 'उपसर्गात् ' इति प्रयोगः न कृतः चेदपि दण्डनाथेन उपसर्गात्सुनोत्यादिभिर्योगैः इति प्रतिपादितम्। 'परिनिविभ्यः सेवैति यावत् यत् षत्वं यथास्वमुक्तं तदड्व्यवायेऽपि भवतीति' दण्डनाथेनास्य सूत्रार्थः उक्तः। 'अभ्यषुणोत्', 'पर्यषुणोत्', 'पर्यष्यत्', 'अभ्यष्टौत्', 'अभ्यस्तोभवत्', 'अध्यष्ठात्', 'अभ्यषेणयत्', 'प्रत्यषेधयत्', 'अभ्यषिञ्चत्', 'अभ्यषजत्', 'प्रत्यष्वजत', 'न्यषीदत् ' इत्येतानि उदाहरणानि।

**स्थादीनामभ्यासेनाभ्यासस्य च।** (७/४/६१)

पाणिनिना 'स्थाऽऽदिष्वभ्यासेन चाभ्यासस्य'[442] इति सूत्रमुक्तम्। 'प्राक् सितात् स्थादिष्वभ्यासेन व्यवायेऽपि षत्वं स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। किन्तु 'दण्डनाथेन स्वमुपसर्गात् परस्य स्थादीनां सकारस्याड्व्यवधाने अभ्यासस्य व्यवधाने अभ्याससम्बन्धिनश्च

---

441 पा.सू.८/३/६५

442 पा.सू.८/३/६४

षकारो भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'अधितष्ठौ', 'अभिषिषेणयिषति', 'प्रतिषिषेधिषति' इत्युदाहरणानि।

**निरभ्यनुभ्यश्च स्यन्दतेरप्राणिषु वा (७/४/६३)**

पाणिनिना 'अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु'[443] इति सूत्रमुक्तम्। अनेन सकारस्य षकारादेशो विधीयते। 'एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। दण्डनाथेन 'निरादिभ्यः पर्यादिभ्यश्चोपसर्गेभ्यः परस्याप्राणिकर्तृकेर्थे वर्तमानस्य स्यन्देः सकारस्य षकारादेशो वा भवति' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'निःष्ययन्दते तैलम्'/'निःस्यन्दते तैलम्', 'अभिष्यन्दते' / 'अभिसिन्दते', 'अनुष्यन्दते' / 'अनुस्यन्दते' इत्येतानि उदाहरणानि।

**वेःस्कन्देरनिष्ठायाम्। (७/३/६४)**

पाणिनिना वेः 'स्कन्देरनिष्ठायाम्'[444] इति सूत्रमुक्तम्। विकल्पेन षत्वविधायकं सूत्रमिदम्। वेरुपसर्गात्परस्य स्कन्देः सकारस्य निष्ठायामन्यस्मिन् प्रत्यये परतः षकारादेशो वा भवतीति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'विष्कन्ता' /'विस्कन्ता' इत्युदाहरणम्।

---

443 पा.सू.८/३/७२

444 पा.सू.८/३/७३

**परिस्कन्दः प्राच्येषु। (७/३/६५)**

पाणिनिना 'परिस्कन्दः प्राच्यभरतेषु'[445] इति सूत्रमुक्तम्। पूर्वेण मूर्धन्ये प्राप्ते तदाभावो निपात्यते कौमुद्यामस्य सूत्रार्थः उक्तः। 'प्राच्यविषये प्रयोगे परेरुत्तरस्य स्कन्देरच्प्रत्ययान्तस्य षत्वाभावो निपात्यते' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'परिस्कन्दतीति परिस्कन्दः' इत्युदाहरणम्।

**स्फुरस्फुलोर्निर्निविभ्यः। (७/३/६६)**

अस्य वृत्त्युदाहरणानि हृदयहारिण्यां न दृश्यते। पाणिनिना 'स्फुरतिस्फुलत्यो-र्निर्निविभ्यः'[446] इति सूत्रमुक्तम्। कौमुद्यां विकल्पेन षत्वविधायकमिदं सूत्रम्। तस्मात् हृदयहारिण्यामपि इदं षत्वविधायकं स्यात्।

**समासेऽङ्गुलिभीरुभ्यां सङ्गस्थानयोः। (७/४/६७)**

पाणिनिना 'समासेऽङ्गुलेः सङ्गः भीरोः स्थानम्'[447] इति सूत्रद्वयमुक्तम्। 'समासेऽङ्गुलेः सङ्गः' इत्यस्य सूत्रार्थः 'अङ्गुलिशब्दात्सङ्गस्य सस्य मूर्धन्यः स्यात्समासे' इति कौमुद्यामुच्यते। एवं 'भीरोः स्थानम् ' इत्यस्य 'भीरुशब्दात् स्थानस्य सस्य मूर्धन्यः स्यात्समासे' इति सूत्रार्थः च कौमुद्यामुच्यते। अनयोः द्वयोः पाणिनीयसूत्रयोः मेलनेन भोजेनेदं सूत्रमुक्तम्।

---

445 पा.सू. ८/३/७५

446 पा.सू.८/३/७६

447 पा.सू.८/३/८२

'अङ्गुलिभीरुशब्दाभ्यामुत्तरयोर्यथासंख्यं सङ्गस्थानयोः सकारस्य समासे षकारो भवति' इति दण्डनाथेन हृदयहारिण्यां सूत्रार्थः उक्तः। 'अङ्गुलीनां सङ्गः' 'अङ्गुलिषङ्गः'। 'भीरूनां स्थानं' 'भीरुष्ठानम्' इत्युदाहरणे।

**अग्नेः स्तुतः। (७/४/६८) दीर्घात् सोमस्य। (७/४/६९)**

पाणिनिना 'अग्नेः स्तुत्स्तोमसोमाः'[448] इति सूत्रमुक्तम्। अग्नेः परेषामेषां सस्य षः स्यात्समासे इति अस्य सूत्रार्थः कौमुद्यामुच्यते। इदं सूत्रं विभज्य भोजेन प्रतिपादितम् - 'अग्नेः स्तुतः दीर्घात्' 'सोमस्य' इति। 'अग्निशब्दात् स्तुतः सकारस्य समासे षकारादेशो भवति' इति अग्नेः स्तुत इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। अग्निष्टुत् इत्युदाहरणम्। अग्नीषोमौ अग्नेः सोमवरुणयोः इति ककारः इति दण्डनाथेनोच्यते। सरस्वतीकण्ठाभरणे भोजदेवेन 'अग्नेः सोम-वरुणयोरीत्' इति सूत्रेण सोमवरुण इत्येतयोः अग्नेः ईकारादेशे दीर्घात् सोमस्य इति अनेन सूत्रेण षत्वे 'अग्नीषोमौ' इति रूपसिद्धिः इत्यर्थः। तत्र दीर्घात् सोमस्य इति सूत्रव्याख्याने -'अग्नीषोमौ - अग्नेः सोमवरुणयोः इति ककारः' इत्यत्र 'अग्नेः सोमवरुणयोः'' 'इतीकारः' इति स्यात्।

**ज्योतिरायुर्भ्यां च स्तोमस्य। (७/४/७०)**

पाणिनिना 'ज्योतिरायुषः स्तोमः'[449] इति सूत्रमुक्तम्। आभ्यां स्तोमस्य सस्य मूर्धन्यः स्यात्समासे इति कौमुद्यामस्यसूत्रार्थः उक्तः। दण्डनाथेन 'ज्योतिरायुश्शब्दाभ्यां चकारादग्नेश्च

---

448 पा.सू.८/३/८२

449 पा.सू.८/३/८३

परस्य स्तोमसम्बन्धिनः सकारस्य समासे षकारादेशो भवति इति सूत्रार्थः' उच्यते। 'ज्योतिष्टोमः', 'आयुष्टोमः' इत्युदाहरणे।

**मातृपितृभ्यां स्वसुः। (७/४/७१)**

पाणिनिना 'मातृपितृभ्याम स्वसा'[450] इति सूत्रमुच्यते। आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे इति अस्य सूत्रार्थः कौमुद्यामुच्यते। मातृपितृभ्यामुत्तरस्य स्वसुः सकारस्य समासे षकारादेशो भवतीति दण्डनाथेन सूत्रार्थः उक्तः। 'मातृष्वसा', 'पितृष्वसा' इत्येते उदाहरणे।

**मातुः पितृभ्यां वा। (७/४/७२)**

पाणिनिना 'मातुः पितृभ्यामन्यतरस्याम्'[451] इति सूत्रमुक्तम्। 'आभ्यां स्वसुः सस्य षो वा स्यात्समासे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'मातुर् पितुर् शब्दाभ्यां परस्य स्वसृ शब्दसकारस्य समासे षकारादेशो वा भवति' इति दण्डनाथेन हृदयहारिण्यां सूत्रार्थः उक्तः। 'मातुःष्वसा', 'पितुःष्वसा' इत्युदाहरणे। षकारादेशाभावे 'मातुःस्वसा', 'पितुःस्वसा' इति च।

**अभिनिष्टानो वर्णे। (७/४/७३)**

पाणिनिना 'अभिनिसः स्तनः शब्दसंज्ञायाम्'[452] इति सूत्रमुक्तम्। अस्मात् स्तनेः सस्य मूर्धन्यः इति अस्य सूत्रार्थः कौमुद्यामुच्यते। 'अभिनिसित्येतस्मात् परस्य स्तानशब्दसम्बन्धिनः सकारवर्णेऽभिधेये षकारो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'अभिनिष्टानो वर्ण'

---

450 पा.सू.८/३/५६

451 पा.सू.८/३/८५

452 पा.सू.८/३/८६

इत्युदाहरणम्।

**प्रादुरुपसर्गेभ्योऽस्तेर्यच् परस्य। (७/४/७४)**

पाणिनिना 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः'[453] इति सूत्रं प्रतिपादितम्। 'उपसर्गेऽणः प्रादुसश्च परस्यातेः सस्य षः स्यारद्यकासेऽचि च परे' इति कौमुद्यामस्य सूत्रार्थः उक्तः। इदं सूत्रं भोजदेवेनात्र स्वीकृतम्। 'प्रादुश्शब्दादुपसर्गेभ्यश्च परस्यास्तेः सकारस्य यकारादावजादौ च प्रत्यये परतः षकारादेशो भवति' इति दण्डनाथेन हृदयहारिण्यां सूत्रार्थः उक्तः। 'प्रादुःष्यात्', 'अभिष्यात्', 'प्रादुषन्ति', 'अभिषन्ति' इत्यादीनि उदाहरणानि।

**सुविनिर्दुभ्यः समसूत्योः। (७/४/७५) स्वपेरपः। (७/४/७६)**

पाणिनिना 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः'[454] इति सूत्रमुक्तम्। 'एभ्यः सुप्यादेः सस्य षः स्यात्' इति अस्य सूत्रार्थः कौमुद्यां दृश्यते। पाणिनीयमिदं सूत्रं भोजदेवेनसूत्रद्वयेऽत्र स्वीकृतम्। 'सुविनिर्दुभ्यः समसूत्योः' इत्यस्य 'स्वादिभ्य उपसर्गेभ्यः परयोः समसूतिशब्दयोः सकारस्य षकारो भवतीति' हृदयहारिण्यां सूत्रार्थः उक्तः। 'सुषमं', 'विषमं', 'निःषमं', 'दुःषमं', 'सुषूतिः', 'विषूतिः', 'दुःषूतिः' इत्युदाहरणानि। 'सुविनिर्दुभ्यः उपसर्गेभ्यः परस्य स्वपेः सकारस्य षकारादेशो भवति' इति 'स्वपेरपः' इत्यस्य सूत्रार्थः च दण्डनाथेनोक्तः। 'सुषुप्तः', 'विषुप्तः', 'निःषुप्तः', 'दुःषुप्त' इत्यादीनि उदाहरणानि।

---

453 पा.सू.८/३/८७

454 पा.सू.८/३/८८

**नद्याः स्नस्य कौशले (७/४/७७) नेः स्नातस्य च । (७/४/७८)**

पाणिनिना 'निनदीभ्यां स्नातेः कौशले'[455] इति सूत्रमुक्तम्। भोजदेवेन इदं सूत्रं द्विधा प्रयुक्तम्। आभ्यां स्नातेः सस्य षः स्यात्कौशले गम्ये इति अस्य सूत्रार्थः कौमुद्यामुक्तः। नदीशब्दात् परस्य स्नशब्दसकारस्य षकारादेशो भवतीति नद्याः स्नस्य कौशले इत्यस्य अर्थः हृदयहारिण्यां दण्डनाथेनोक्तः। 'नद्यां स्नाति नदीष्णः' (प्रतारणे कुशलः) इत्युदाहरणम्। नेरुपसर्गात्परस्य स्नातशब्दस्य च सकारस्य कौशले गम्यमाने षकारादेशो भवति 'नेः स्नातस्य' इत्यस्य अर्थः हृदयहारिण्यां दण्डनाथेनोक्तः। 'निष्णातः' कटकरणे कुशल इत्यर्थः। नीति निष्कस्य वचस्तस्य न मन्यसे कौशले इत्येव निस्नातः।

**प्रतेः सूत्रे (७/४/७९)**

पाणिनिना सूत्रं 'प्रतिष्णातम् '[456] इति सूत्रमुच्यते। 'प्रतेः स्नातेः षत्वम् ' इति अस्य अर्थः कौमुद्यां दृश्यते। अस्य सूत्रस्वीकारेण भोजेन प्रतिपादितं भवति इदं सूत्रम्। 'प्रतेरुपसर्गात्परस्य स्नातशब्दसम्बन्धिनः सकारस्य सूत्रेऽभिधेये षकारादेशो भवति' इति अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुच्यते। 'प्रतिष्णातं' सूत्रम् इति उदाहरणम्।

**प्रष्ठोऽग्रगामिनि। (७/४/८०)**

पाणिनिना प्रष्ठोऽग्रगामिनि[457] इत्येव सूत्रमुक्तम्। प्रस्थस्य कप्रत्ययान्तस्य

---

455 पा.सू.८/३/८९

456 पा.सू.८/३/९०

457 पा.सू.८/३/९२

सकारस्याग्रगामिन्यभिधेये षत्वं निपात्यते इति अस्य सूत्रार्थः हृदयहारिण्यामुच्यते। 'प्रतिष्ठत' इति 'प्रष्ठः' इत्युदाहरणम्।

**वृक्षासनयोर्विष्टरः। (७/४/८१)**

पाणिनिना वृक्षासनयोर्विष्टरः[458] इत्येव सूत्रमुक्तम्। अनयोर्विपूर्वस्य स्त्रः षत्वं निपात्यते इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। वेरुपसर्गात् परस्य स्तरशब्दस्य सकारस्य वृक्षे आसने चाभिधेये षत्वंनिपात्यते। 'विष्टरो वृक्षः', 'विष्टर आसनम् ' इत्येते उदाहरणे।

**छन्दो नाम्नि विष्टारः। (७/४/८२)**

पाणिनिना 'छन्दोनाम्नि च'[459] इति सूत्रमुच्यते। विपूर्वात्स्तृणातेर्घञन्तस्य सस्य षत्वं स्याच्छन्दोनाम्नि इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिनिना 'वृक्षासनयोर्विष्टरः'[460] इति सूत्रमुक्त्वा 'छन्दोनाम्नि च'[461] इत्येव सूत्रमुक्तम्। विष्टरः इति पदं पुनः न प्रयुक्तम्। द्वितीयसूत्रे तदनुवर्तते। किन्तु भोजदेवेन 'वृक्षासनयोर्विष्टरः'[462] इत्युक्त्वा 'छन्दो नाम्नि विष्टारः'[463] इत्यत्र विष्टरपदं पुनरपि प्रयुक्तम्। अत्र अनुवृत्तिः नास्ति। 'वेरुपसर्गात्परस्य छन्दोनामावयवस्य स्तारशब्दस्य षकारादेशो निपात्यते' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'विष्टारपङ्क्तिः

---

458 पा.सू.८/३/९३

459 पा.सू.८/३/९४

460 पा.सू.८/३/९३

461 पा.सू.८/३/९४

462 ७/४/८१

463 ७/४/८२

छन्दः', 'विष्टारो बृहतीछन्दः' इत्येते उदाहरणे।

**गवियुधिभ्यां स्थिरस्य (७/४/८३)**

पाणिनिना 'गवियुधिभ्यां स्थिरः'[464] इति सूत्रमुक्तम्। 'आभ्यां स्थिरस्य सस्य षः स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। दण्डनाथेन हृदयहारिण्याम् 'आभ्यां परस्य स्थिरशब्दसकारस्य नाम्नि विषये षकारादेशो भवति' इत्यस्य सूत्रार्थः उक्तः। अत्र दण्डनाथेन 'नाम्नि विषये' इति सूत्रार्थे उच्यते। कौमुद्याम् अत्र संज्ञायाम् इति सप्तमीसमासः इति व्यख्याने उक्तम्। 'गविष्ठिरः', 'युधिष्ठिरः' इत्येते उदाहरणे।

**कपेः स्थलस्य गोत्रे (७/४/८४)**

पाणिनिना 'कपिष्ठलो गोत्रे'[465] इति सूत्रमुक्तम्। तन्निपातनसूत्रस्वीकारेण भोजेनेदं सूत्रं प्रतिपादितम्। ‘कपिशब्दात्परस्य स्थलशब्दसकारस्य गोत्रविषये षकारादेशो भवतीति’ अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुच्यते। 'कापिष्ठलः पुत्रः' इत्युदाहरणम्।

**विकुशमिपरिभ्यः। (७/४/८५)**

पाणिनिना 'विकुशमिपरिभ्यः स्थलम् '[466] इति सूत्रमुक्तम्। 'एभ्यः स्थलस्य सस्य षः स्यात् ' इति अस्य अर्थः कौमुद्यामुक्तः। स्थलशब्दं विना विकुशमिपरिभ्यः इत्येव भोजेनोक्तं सूत्रम्। 'व्यादिभ्यः परस्य स्थलशब्दसकारस्य षकारादेशो भवतीति' अस्य सूत्रार्थः

---

464 पा.सू.८/३/९५

465 पा.सू.८/३/९१

466 पा.सू.८/३/९६

दण्डनाथेनोच्यते। 'विगतं वीनां पक्षिणां वा स्थलं विष्ठलम् ' 'कुत्सितं कोः पृथिव्याः वा स्थलं कुष्ठलम् ' 'शमीनां स्थलं शमिष्ठलम्' इत्यादीनि उदाहरणानि।

**अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिबर्हिरग्निपरमेदिविभ्यस्थस्य।** (७/४/८६)

**अपदुस्सुवनिभ्यः स्थोः ।** (७/४/८७)

पाणिनिना 'अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिदिव्यग्निभ्यः स्थः'[467] इति सूत्रमुक्तम्। इदं सूत्रं किञ्चित् भेदेन सूत्रद्वयेन भोजदेवेनात्र स्वीकृतः। एतेभ्यः शब्देभ्यः उत्तरस्य स्थशब्दसकारस्य षकारो अनेन विधीयते। 'अम्बादिभ्यः परस्य स्थशब्दसकारस्य षकारादेशो भवति' इति 'अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जि-पुञ्जिबर्हिरग्निपरमेदिविभ्यस्थस्य' इत्यस्य अर्थः हृदयहारिण्यामुच्यते। 'अम्बष्ठः', 'आम्बष्ठः', 'गोष्ठः', 'भूमिष्ठः', 'सव्येष्ठः', 'अपष्ठः', 'द्विष्ठः', 'त्रिष्ठः', 'कुष्ठः', 'शङ्कुष्ठः', 'अंगुष्ठः', 'मञ्जिष्ठः', 'पुञ्जिष्ठः', 'बर्हिष्ठः', 'अग्निष्ठः', 'परमेष्ठः', 'दिविष्ठः' इत्येतानि उदाहरणानि। 'अपदुस्सुवनिभ्यः स्थोः' इत्यस्य सूत्रार्थः हृदयहारिण्यां अपादिभ्यः परस्य स्थुशब्दसम्बन्धिनः सकारस्य षकारादेशो भवतीति दण्डनाथेनोच्यते। 'अपष्ठु', 'दुष्ठु', 'सुष्ठु', 'वनिष्ठु' इत्येतानि उदाहरणानि।

**सव्येष्टृपरमेष्ठिनौ सूतब्रह्मणोः।** (७/४/८८)

'अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिदिव्यग्निभ्यः स्थः' इति

467 पा.सू.८/३/९७

सूत्रव्याख्याने काशिकायां 'स्थास्थिनृणाम् इति वक्तव्यम्' इत्युच्यते। तदत्र भोजदेवेन सूत्रत्वनोक्तम्। दण्डनाथेन अस्य निपातनसूत्रस्य अर्थः एतौ शब्दौ यथासंख्यं सूतब्रह्मणोरभिधेययोः कृतषत्वौ निपात्यते इत्युक्तम्।

**एत्यकोः संज्ञायाम् ।** (७/४/८९)

पाणिनिना एतिसंज्ञायामगात् इति सूत्रमुक्तम्। सस्य मूर्धन्यः अनेन विधीयते। अचेर्गान्निमित्तादुत्तरस्य एकारे परतः संज्ञायां विषये षकारादेशो भवतीति हृदयहारिण्यामस्य अर्थः उच्यते। 'हरिषेणः', 'मानषेणः' इत्येते उदाहरणे।

**नक्षत्रादितो वा।** (७/४/९०)

पाणिनिना 'नक्षत्राद्वा'[468] इति सूत्रं उच्यते। 'एति सस्य संज्ञायामगकारान्मूर्धन्यो वा' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। अस्य सूत्रस्वीकारेण भोजेनेदं सूत्रमुक्तम्। 'नक्षत्रवाचिन इकारान्तात् परस्य सकारस्य एकारे परतः संज्ञायां विषये सकारादेशो वा भवतीति' अस्य सूत्रार्थः दण्डनाथेनोक्तः। रोहिणिषेणः रेवतिषेणः इत्युदाहरणे। षत्वाभावे 'रोहिणिसेनः', 'रेवतिसेनः' इति च।

**त्वतल्तस्त्यप्रत्ययेष्वदीर्घात्** (७/४/९१) **तरप्तमपोरतिङः।** (७/४/९२)

पाणिनिना 'ह्रस्वात् तादौ तद्धिते'[469] इति सूत्रं प्रतिपादितम्। ह्रस्वादिणः परस्य सस्य

---

468 पा.सू.८/३/१००

469 पा.सू. ८/३/१०१

षः स्यात्तादौ तद्धिते इति अस्य सूत्रार्थः कौमुद्यामुक्तः। अस्य सूत्रस्य स्वीकारेण भोजेनेदं सूत्रद्वयमुक्तम्। अत्र प्रथमसूत्रे भोजदेवेन 'तद्धिते' इति पदस्यापेक्षया तद्धितप्रत्ययाः सूत्रे स्वीकृताः। एवं 'ह्रस्वात्' इति पदस्य स्थाने 'अदीर्घात् ' इति च भोजेन प्रयुक्तम्। 'त्वादिप्रत्ययेषु परतः अदीर्घादिण उत्तरस्य सकारस्य षकारादेशो भवति' इति 'त्वतल्तस्त्यप्तयेष्वदीर्घात्' इत्यस्य दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'सर्पिष्टं', 'यजुष्टं', 'सर्पिष्टा', 'यजुष्टा', 'सर्पिष्टो', 'यजुष्टः', 'आविष्ट्यः', 'निष्ट्यः' इत्यादीनि उदाहरणानि। 'तरप्तमपोरतिङः' इत्यस्य 'अदीर्घादिणः परस्य तिङ सम्बन्धिनः सकारस्य तरप्तमपोः परतः षकारादेशो भवति' इति सूत्रार्थः। 'सर्पिष्टरं', 'सर्पिष्टमं', 'यजुष्टरं', 'यजुष्टमम् ' इत्यादीनि उदाहरणानि।

**निसस्तितपतावनासेवायाम्। (७/४/९३)**

पाणिनिना 'निसस्तपतावनासेवने'[470] इति सूत्रमुक्तम्। निसः सकारस्य षः स्यात् तपतौ परतोऽनासेवनेऽर्थे इति अनेन सूत्रेण प्रतिपाद्यते। 'निसः सम्बन्धिनः सकारस्य तकारादौ तपतौ परतोऽनासेवायां विषये षकारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'निष्टपति सुवर्णम् ' इत्युदाहरणम्।

**सुदुनिर्भ्यः सामसेधसन्धेः। (७/४/९४)**

सकारस्य षकारादेशविधायकमिदं सूत्रम्। सुदुर्निरित्येतेभ्यः परस्य सामादिसम्बन्धिनः सकारस्य षकारादेशो भवति इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। समाहारेणेतरेषां

---

470 पा.सू.८/३/१०२

निर्द्देशाद्यथासंख्यं न भवति। 'सुषाम', 'दुष्षाम', 'निष्षाम', 'सुषेधः', 'दुष्षेधः', 'सुषन्धिः', 'निःषन्धिः' इत्येतानि उदाहरणानि।

**नौषेधिकागौरिषक्थप्रतिष्णिकादुन्दुभिषेवणतुराषाडादयः। (७/४/९५)**

नौषाधिकादीनां शब्दानां कृतषत्वसाधूकरणार्थमिदं सूत्रमुक्तम्। नौषेधिकादयः शब्दाः कृतषत्वाः साधवो भवन्ति। 'नैषेधिका', 'गौरिक्थः', 'प्रतिष्णिका', 'दुन्दुभिषेवणं', 'तुराषाट्' आदिशब्दात् 'जलाषाट्' 'ऋताषाडादयो' भवन्ति।

**न सात्पदाद्योः। (७/४/९६)**

पाणिनिना 'सात्पदाद्योः'[471] इति सूत्रमुक्तम्। 'सस्य षत्वं न स्यात्' इति अस्य सूत्रार्थः कौमुद्याम् उच्यते। पाणिनीयसूत्रे 'न' इति पदं अप्रयुक्तम्। किन्तु भोजदेवेन 'न' इति संयोज्य सूत्रमुक्तम्। 'सात्प्रत्ययसम्बन्धिनः पदादेश्च सकारस्य षकारादेशो न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। अग्निसात्सम्पद्यते दधि सिञ्चति 'दधिसेक्', 'दधिसेच् ' इत्येतानि उदाहरणानि।

**सिचो यङि। (७/४/९७)**

पाणिनिना 'सिचो यङि'[472] इत्येवमुक्तमिदम् सूत्रम्। 'सिचः सस्य षो न स्याद्यङि' इति

---

471 पा.सू.८/३/१०९

472 पा.सू.८/३/११२

अस्य सूत्रार्थः कौमुद्यामुक्तः। 'सिञ्चतेः सकारस्य यङि प्रत्यये परतः षकारो न भवति' इति हृदयहारिण्याम् अस्य सूत्रार्थः उक्तः।

**सेधतेर्गतौ। (७/४/९८)**

पाणिनिना 'सेधतेर्गतौ'[473] इति प्रयुक्तं सूत्रमेव भोजदेवेनात्र स्वीकृतम्। 'गत्यर्थस्य सेधतेः षत्वं न स्यात् ' इति कौमुद्यामस्य सूत्रार्थः कृतः। हृदयहारिण्यां 'गतौ वर्तमानस्य सेधतेः सकारस्य षकारो न भवति' इति अस्य सूत्रार्थः प्रयुक्तः। 'अभिसेधति' इत्युदाहरणम्।

**निप्रतिभ्यां स्तब्धस्य। (७/४/९९)**

पाणिनिना 'प्रतिस्तब्धनिस्तब्धौ च'[474] इति सूत्रं प्रयुक्तम्। अत्र षत्वं न स्यात् इति कौमुद्यामुच्यते। 'निप्रतिभ्यां परस्य स्तब्धसम्बन्धिनः सकारस्य षकारो न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'निस्तब्धः', 'प्रतिस्तब्धः' इत्युदाहरणे।

**सहेरोद्वतः। (७/४/१००)**

पाणिनिना 'सोढः'[475] इति सूत्रं प्रयुक्तम्। 'सोढ्रूपस्य सहेः सस्य षत्वं न स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'ओकारवतः सहेः सम्बन्धिनः सकारस्य षकारो न भवति इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'परिसोढः', 'परिसोढव्यं, 'विसोढः' 'विसोढव्यः' इत्येतानि उदाहरणानि।

---

473 ८/३/११३

474 पा.सू.८/३/११४

475 पा.सू.८/३/११५

**उपसर्गात् स्तम्भुसिवुसहां चङि। (७/४/१०१)**

पाणिनिना 'स्तम्भुसिवुसहां चङि'[476] इति सूत्रं प्रयुक्तम्। 'उपसर्गस्थान्निमित्तादेषां सस्य षो न स्याच्चङि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। अत्र सूत्रे 'उपसर्गात् ' इति नास्ति चेदपि सूत्रार्थे वर्तते। भोजदेवेन सूत्रे एव 'उपसर्गात् ' इति प्रयुक्तम्। 'उपसर्गास्थान्निमित्ता-दुत्तरस्य स्तम्भुसिवुसहां सकारस्य षत्वं चङि प्रत्यये परतो न भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। अभ्यस्तस्तम्भत् परिसीषिवत् पर्यसीषहत् इत्यादीनि उदाहरणानि।

**सुनोतेः स्यसनोः। (७/४/१०२)**

पाणिनिना 'सुनोतेः स्यसनोः'[477] इत्येव सूत्रमुच्यते। 'स्ये सनि च परे सुञः षो न स्यात्' इति कौमुद्यामस्यार्थः उक्तः। 'सुनोतेः सकारस्य स्ये सनि च प्रत्यये परतः षकारो न भवति' इति दण्डनाथेन हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अभिसेष्यति', 'पर्यसोष्यत् ' इत्युदाहरणे।

**सदिष्वञ्ज्योः परस्य लिटि । (७/४/१०३)**

पाणिनिना 'सदेः परस्य लिटि'[478] इति सूत्रमुच्यते। 'सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'सीष्वञ्ज्योः परस्य सकारस्य लिटि परतः षत्वं न भवतीति' दण्डनाथेन हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'विषसाद', 'परिषस्वजे' इत्येते उदाहरणे।

---

476 पा.सू.८/३/११६

477 पा.सू.८/३/११७

478 पा.सू.८/३/११८

**धातोरिणः षीध्वंलुङ्लिटां धोः ढः। (७/४/१०४)**

पाणिनिना इणः 'षीध्वंलुङ्लिटां धोऽङ्गात् '[479] इति सूत्रं प्रयुक्तम्। इण्णन्तादङ्गात्परेषां षीध्वंलुङलिटां धस्य मूर्धन्यः स्यात् इति कौमुद्यामस्य सूत्रार्थः उक्तः। दण्डनाथेनास्य सूत्रार्थः किञ्चिदपि लाघवेनोक्तम्। कौमुद्यामुक्ते सूत्रार्थे धकारस्य मूर्धन्यः काः इति चिन्तनीयः। तत्स्पष्टीकरोति दण्डनाथेन यथा 'इणन्ताद्धातोः परेषां षीध्वं लुङ्लिटां सम्बन्धिनो धकारस्य ढकारादेशो भवति' इतिऽ। 'कृषीध्वम् ' 'अदीढ्वम् ' 'अधूढ्वम् ' इत्यादीनि उदाहरणानि।

**इटो वा । (७/४/१०५)**

पाणिनिना 'विभाषेटः'[480] इति सूत्रं प्रयुक्तम्। इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात् इति कौमुद्यामस्य सूत्रार्थः उक्तः। दण्डनाथेन इणन्ताद्धातोः परस्मादिटः परेषां षीध्वं सम्बन्धिनो धकारस्य ढकारो वा भवति इति सूत्रार्थः उक्तः। 'ग्रहीषीढ्वं'/'ग्रहीषीध्वं', 'लविषीढ्वं'/'लविषीध्वं', 'अग्रहीढ्वं'/'अग्रहीध्वं', 'अलविढ्वं'/ 'अलविध्वं', 'जगृहिढ्वे'/'जगृहिध्वे', 'उपदिदीविढ्वे'/'उपदिदीविध्वे', 'लुलुविढ्वे'/'लुलुविध्वे' इत्यादीन्युदाहरणानि।

**रष्टृभ्यो व्यवहितस्यापि समानपदे नो णः। (७/४/१०६)**

पाणिनिना 'रषाभ्यां नो णः समानपदे'[481] इति सूत्रमुक्तम्। 'एकपदस्थाभ्यां

---

479 पा.सू.८/३/७८

480 पा.सू.८/३/७९

481 पा.सू.८/४/१

रेफषकाराभ्यां परस्य नस्य णः स्यात् ' इति कौमुद्यामस्यार्थः उक्तः। 'रेफषकारऋवर्णेभ्यः परस्य व्यवहितस्याव्यवहितस्य च नकारस्य णकारादेशो भवति तौ चेन्निमित्तानिमित्तिनौ समान एकस्मिन् पदे भवतः' इति अस्य अर्थः दण्डनाथेनोक्तः। दण्डनाथः सूत्रार्थे 'ऋवर्णेभ्यः परस्य' इत्यपि योजितम्। 'चतुर्णां', 'पूष्णः', 'नृणाम्', 'अम्बरेण', 'वृषेण', 'समातृकेण', 'अर्केण', 'दर्पेण', 'धर्मेण', 'आर्येण', 'सर्वेण', 'अर्हेण', 'उरस्केण', 'बृंहणम् ' इत्यादीनि उदाहरणानि।

**पूर्वपदेभ्यः संज्ञायामनृगयनादीनाम्। (७/४/१०७)**

पाणिनिना 'पूर्वपदात् संज्ञायामगः'[482] इति सूत्रमुक्तम्। 'पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गकारव्यवधाने' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'पूर्वपदस्थेभ्यो रष्टृभ्यः सामर्थ्यादुत्तरपदस्थस्य नकारस्य संज्ञायां विषये ऋगयनादीन् वर्जयित्वा णकार आदेशो भवति' इति अस्य अर्थः दण्डनाथेनोक्तः। 'द्रुणसः', 'खरणसः', 'खरणाः', 'खुरणाः', 'शूर्पणखा', 'चन्द्रणखा', 'हरिवाहणः', 'नरवाहणः' इत्यादीनि उदाहरणानि।

**नसः। (७/४/१०८)**

नकारस्य णकारादेशविधायकमिदं सूत्रम्। पूर्वपदस्थान्निमित्तादुत्तरस्य नसो नकारस्य णकारो भवति इति अस्य अर्थः दण्डनाथेनोक्तः। 'खरणाः', 'खुरणाः', 'प्रणसंमुखं', इत्यादीनि उदाहरणानि।

---

482 पा.सू.८/४/३

**अग्रग्रामाभ्यां नियः। (७/४/१०९)**

'क्षुभ्नादिषु च'[483] इति पाणिनीयसूत्रव्याख्याने कात्यायनेन एकं वार्तिकमुच्यते 'अग्रग्रामाभ्यां नयतेर्णो वाच्यः' इति। अस्य वार्तिकस्वीकारेण भोजेनेदं सूत्रमुक्तम्। 'अग्रग्राम्भ्यां पूर्वपदाभ्यामुत्तरस्य नियो नकारस्य णकारादेशो भवति' इति अस्य अर्थः दण्डनाथेनोक्तः। 'अग्रणीः', 'ग्रामणीः' इत्येते उदाहरणे।

**पुरगामिश्रकासिद्धकाशारिकाकोटराभ्यौवनस्य। (७/४/११०)**

पाणिनिना 'वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः'[484] इति सूत्रमुक्तम्। 'वनशब्दस्योत्तरपदस्य एभ्य एव णत्वमिति' कौमुद्यामस्य सूत्रार्थः उक्तः। 'पुरगादिभ्यः पूर्वपदेभ्यः परस्य वनसम्बन्धिनो नकारस्य संज्ञायां णकारो भवति' इति हृदयहीहारिण्यां सूत्रार्थः उक्तः। 'पुरगावणं', 'मिश्रकावणं', 'सिध्रकावणं', 'शारिकावणं', 'कोटरावणम्' इत्यादीनि उदाहरणानि।

**प्रनिरन्तरग्रेशरेक्षुप्लक्षाम्रकार्श्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि। (७/४/१११)**

पाणिनिना 'प्रनिरन्तः शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि' इति सूत्रमुक्तम्। एभ्यो वनस्य णत्वं स्यादिति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'प्रादिभ्यः परस्य वनशब्दनकारस्यासंज्ञायां संज्ञायां च णकारो भवतीति' हृदयहारिण्याम् अस्य सूत्रार्थः उक्तः।

---

483 पा.सू.८/४/३९

484 पा.सू.८/४/४

'प्रवणं', 'निर्वणम्', 'अन्तर्वणम्', 'अग्रेवणम् ' इत्यादीन्युदाहरणानि।

**अनिरिकातिमिरचीरिकाकमरेभ्योद्वित्र्यज्भ्य ओषधिवृक्षेभ्यो वा। (७/४/११२)**

पाणिनिना 'विभाषौषधिवनस्पतिभ्यः'[485] इति सूत्रमुक्तम्। 'एभ्यो वनस्य णत्वं वा स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'ओषधिवृक्षवाचिभ्यो द्व्यज्भ्यस्त्र्यज्भ्यश्चेरिकादि-वर्जितेभ्यः परस्य वनसम्बन्धिनो नकारस्य पूर्वपदस्थेभ्योरष्टभ्यः परस्य णकारो वा भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'दूर्वावणं'/'दूर्वावनम्', 'करवीरवणं'/'करवीरवनं', 'शिरीषवणं'/'शिरीषवनं' इत्यादीनि उदाहरणानि।

**अह्नस्यादन्तात्। (७/४/११३)**

पाणिनिना 'अह्नोऽदन्तात् '[486] इति सूत्रमुक्तम्। 'अदन्तपूर्वपदस्थाद्रेफात्परस्याह्नादेशस्य नस्य णः स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिनिना 'अह्नः' इति प्रयुक्ते भोजः 'अह्नस्य' इति प्रयुक्तं वर्तते। 'रेफादिमतोऽकारान्तात् पूर्वपदादुत्तरस्याह्नशब्दसम्बन्धिनो नकारस्य णकारो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'पूर्वाह्णः', 'अपराह्णः' इत्युदाहरणे।

**त्रिचतुर्भ्यां वयसि हायनस्य । (७/४/११४)**

'दामहायनान्ताच्च'[487] इति पाणिनीयसूत्रव्याख्याने कौमुद्यां कात्यायनेन 'त्रिचतुर्भ्यां

---

485 पा.सू.८/४/६

486 .पा.सू ८/४/७

487 पा.सू.४/१/२७

हायनस्य णत्वं वाच्यम्', 'वयोवाचकस्यैव हायनस्य ङीप् णत्वं चेष्यते' इति वार्तिकद्वयमुच्यते। तत् द्वयं सम्मिल्ल्य भोजदेवेनात्र सूत्ररूपेण प्रतिपादितम्। 'त्रिचतुर्भ्यामुत्तरस्य हायनशब्दसम्बन्धिनो नकारस्य वयसि गम्यमाने णकारो भवतीति' अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'त्रिहायणो वत्सः', 'त्रिहायणी बडवा', 'चतुर्हायणो वत्सः', 'चतुर्हायणी बडवा' इत्युदाहरणानि।

**आहिताद्वाहनस्य। (७/४/११५)**

पाणिनिना 'वाहनमाहितात्'[488] इति सूत्रं प्रतिपादितम्। 'आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेनास्मिन् सूत्रे किञ्चित् परिवर्तनं कृत्वा, अर्थात् 'आहितात् ' इति पदं आदौ प्रयुज्य 'वाहनस्य' इति वाहनमिति प्रयुज्य च 'आहिताद्वाहनस्य' इति सूत्रमुक्तम्। हृदयहारिण्याम-स्यार्थः 'आधीयत इत्याहितं वोढव्यमुच्यते, तद्वाचिनो रेफादिमतः पूर्वपदात्परस्य वाहनशब्दस-म्बन्धिनो नकारस्य णकारादेशो भवति' इति। 'इक्षुवाहणं', 'शरवाहणम्' इत्युदाहरणे।

**पानस्य देशे। (७/४/११६)**

पाणिनिना इदं सूत्रं 'पानं देशे'[489] इति प्रयुक्तम्। 'पूर्वपदस्थान्निमित्तात्परस्य पानस्य नस्य णत्वं स्याद्देशे गम्ये' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। पाणिनिना 'पानमिति' प्रयुक्तं पदं

---

488 पा.सू.८/४/८

489 पा.सू.८/४/९

भोजदेवेन 'पानस्य' इति कृतम्। 'पूर्वपदादुत्तरस्य पानशब्दनकारस्य देशे गम्यमाने णकारादेशो भवति' इति हृदयहारिण्यामस्यार्थः। 'क्षीरपाणाः', 'सुरपाणाः' इत्येते उदाहरणे।

**वा भावकरणयोः। (७/४/११७)**

'वा भावकरणयोः'[490] इत्येव पाणिनिना इदं सूत्रं प्रतिपादितम्। 'भावे करणे च यः पानशब्दस्तत्सम्बन्धिनो नकारस्य पूर्वपदस्थेभ्यो रषृभ्यः परसिय णकारादेशो वा भवतीति' अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। 'क्षीरपाणं वर्तते', 'क्षीरपानं', 'क्षीरपाणं भोजनम्' इति उदाहरणम्।

**गिरिचक्रादिभ्यो नदीनितम्बादीनाम्। (७/४/११८)**

'वा भावकरणयोः' इति पाणिनीयसूत्रव्याख्याने कात्यायनेन 'गिरिनद्यादीनां वा' इति वार्तिकमुक्तम्। तत् वार्तिकं भोजदेवेन सूत्रत्वेनात्र स्वीकृतम्। 'गिरिचक्रादिभ्यो रेफादिमद्भ्यः उत्तरेषां नदीनितम्बादीनां नकारस्य णकारो वा भवतीति' अस्य सूत्रार्थः दण्डनाथेन हृदयहारिण्यामुक्तः। 'गिरिणदी', 'गिरिणितम्बः', 'चक्रणदी', 'चक्रणितम्बा' इत्युदाहरणानि। णत्वाभावे 'गिरिनदी', 'गिरिनितम्बः', 'चक्रनदी', 'चक्रनितम्बा' इति च।

**उत्तरपदान्तस्यायुवाह्नः। (७/४/११९)**

पाणिनिना 'प्रातिपदिकान्तनुम्विभक्तिषु च'[491] इति सूत्रमुक्तम्। प्रातिपदिकाः अन्ते

---

[490] पा.सू.८/४/१०

[491] पा.सू.८/४/११

येषां ते प्रातिपदिकान्ताः । 'पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'उत्तरपदान्तस्यायुवाह्वः' इत्यस्य सूत्रार्थः दण्डनाथेनेवमुच्यते 'यत् पूर्वपदस्थेभ्यो रषृभ्यः परस्योत्तरपदान्तस्य युवन्नहन् सम्बन्धिनोऽन्यस्य नकारस्य णकारो वा भवति' इति। 'व्रीहिवापिणौ', 'माषवापिणौ', 'व्रीहिवापिणी', 'माषवापिणी' इत्युदाहरणानि। णत्वाभावे 'व्रीहिवापिनौ', 'माषवापिनौ', 'व्रीहिवापिनी', 'माषवापिनी' इति च।

**नुंसुपोरपक्वात्।** (७/४/१२०)

'प्रातिपदिकान्तनुम्विभक्तिषु च' इति पाणिनीयसूत्रव्याख्याने कौमुद्यां 'उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वम्' इति वार्तिकं कात्यायनेनोच्यते। भोजदेवः तदत्र सूत्रत्वेन स्वीकरेति। पूर्वपदस्थेभ्यो रषृभ्यः परस्य नुमः सुपश्च सम्बन्धिनः नकारस्य णकारादेशो वा भवति, न चेत् पक्वशब्दादुत्तरपदात् परौ नुं सुपौ भवतः। 'व्रीहिवापाणि'/'व्रीहिवापानि', 'माषवापाणि'/'माषवापानि', 'प्रहिण्वन्'/'प्रहिन्वन्', 'व्रीहिवापेण'/'व्रीहिवापेन', 'व्रीहिवा-पाणां'/'व्रीहिवापानां' इत्यादीनि उदाहरणानि।

**नित्यमेकाच्युत्तरपदे।** (७/४/१२१)

पाणिनिना 'एकाजुत्तरपदे णः'[492] इति सूत्रं प्रतिपादितम्। 'एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तानुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। अत्र सूत्रार्थे प्रयुक्तं नित्यपदं भोजदेवेन सूत्रे प्रतिपादितम्।

---

492 पा.सू.८/४/१२

'पूर्वपदस्थेभ्यो रषृभ्यः परस्योत्तरपदान्तस्य नुमः सुप्सम्बन्धिनश्च नकारस्य एकाच्युत्तरपदे नित्यं णकारादेशो भवतीति' हृदयहारिण्यामस्य अर्थः उक्तः। 'वृत्रहणौ', 'क्षीरपाणि', 'क्षीरपेण', 'यूषपाणाम् ' इत्येतानि उदाहरणानि।

**कुमति च ।** (७/४/१२२)

पाणिनिना 'कुमति च'[493] इत्येव सूत्रमुच्यते। 'कवर्गवत्युत्तरपदे प्राग्वत्' इति कौमुद्यामस्यार्थः उक्तः। 'कवर्गवति चोत्तरपदे पूर्वपदस्थेभ्यो रषृभ्यः परस्योत्तरपदान्तस्य नुमः सम्बन्धिनश्च नकारस्य णकारादेशो भवतीति' दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'स्वर्गकामिणौ' 'वृषगामिणौ' इत्येते उदाहरणे।

**उपसर्गाद्दुरो णोपदेशस्य।** (७/४/१२३)

पाणिनिना 'उपसर्गादसमासेऽपि णोपदेशस्य'[494] इति सूत्रमुच्यते। 'उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेऽपि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। पाणिनिना 'असमासेऽपि' इति सूत्रे प्रयुक्ते भोजदेवेन 'दुरो' इति पदं प्रयुक्तम्। एवं दण्डनाथेन 'दुरोऽन्यो य उपसर्गस्तत्स्थाद्रेफादेर्निमित्तात् परस्य णकारोपदेशस्य धातोः सम्बन्धिनो नकारस्य णकारादेशो भवति' इति सूत्रार्थः हृदयहारिण्यामुक्तः। प्रणमति परिणमति इत्येते उदाहरणे।

493 पा.सू.८/४/१३

494 पा.सू.८/४/१४

**हिनुमीनानाम्। (७/४/१२४)**

पाणिनिना 'हिनुमीना'[495] इति सूत्रमुक्तम्। 'उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। 'हिनुमीना' इति पाणिनीयसूत्रस्य स्थाने भोजदेवः 'हिनुमीनानाम् ' इति सूत्रं प्रतिपादयति। 'दुर्वर्जितोपसर्गस्थाद्रेफादेर्निमित्तात् परेषां हिनु मीन आनि इत्येतेषां नकारस्य णकारादेशो भवति' इति सूत्रार्थः दण्डनाथेनोक्तः। पूर्वसूत्रादत्र सूत्रार्थे 'दुर्वा' इति पदमनुवर्तते। 'प्रहिणोति', 'प्रमीणाति', 'प्रयाणि', 'प्रवयाणि' इत्येतानि उदाहरणानि। 'आनि' इत्यस्य प्रतिपादनं पाणिनिना अस्मिन् सूत्रे न कृतम्। तत् वक्तुं 'आनि लोट् '[496] इति सूत्रं पाणिनिना प्रयुक्तम्। भोजदेवः द्वयोः पाणिनीयसूत्रयोजनेनेदं सूत्रमुक्तम्।

**नेर्गदनदपतपददाधामाङ्स्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। (७/४/१२५)**

पाणिनिना 'नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यति-चिनोतिदेग्धिषु च'[497] इति सूत्रमुक्तम्। 'उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्यात् गदादिषु' इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिन्युक्ते सूत्रे 'घु' इत्यस्य स्थाने 'दाधा' इति प्रयुक्तं भोजदेवेन। पाणिनिना 'दाधा घ्वदाप्'[498] इति सूत्रेण 'दाधा' इत्यनयोः द्वयोः 'घु'संज्ञा उक्ता। भोजमते

---

495 पा.सू.८/४/१५

496 पा.सू.८/४/१६

497 पा.सू.८/४/१७

498 पा.सू.१/१/२०

'घु'संज्ञाभावात् 'दाधा' इति प्रयुक्तम्। 'दुर्वर्जितोपसर्गस्थाद्रेफादेर्निमित्तादुत्तरस्य नेरुपसर्गस्य सम्बन्धिनो नकारस्य पदादिषु धातुषु परतो णकारोपदेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'प्रणिणदति', 'प्रणिनदति', 'प्रणिपतति', 'परिणिपद्यते', 'प्रणिददाति', 'प्रणिदयते', 'प्रणिद्यति' इत्यादीनि उदाहरणानि।

**वान्यत्र कखादावषान्त उपदेशे। (७/४/१२६)**

पाणिनिना 'शेषे विभाषाऽकखादावषान्त उपदेशे'[499] इति सूत्रमुच्यते। 'उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः। पाणिनिना प्रयुक्तविभाषाशब्दस्य स्थाने भोजेन 'वान्यत्र' इति प्रयुक्तं वर्तते। 'गदादिभ्योऽन्यस्मिन् धातावुपदेशे अककारखकारादावष कारान्तेपरतोऽदुर उपसर्गाद्रेफादिमतः परस्य नेर्नकारस्य णकारादेशो वा भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'प्रणिपचति', 'प्रणिभिनत्ति', इत्येते उदाहरणे। णत्वाभावे 'प्रनिपचति' इति च।

**परेरनितेः। (७/४/१२७)**

पाणिनिना 'अनितेः'[500] इति सूत्रमुक्तम्। 'उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्' इति अस्य अर्थः कौमुद्यामुच्यते। 'अनितेः' इति पाणिनीयसूत्रेण साकं 'परेः' इत्यपि

---

499 पा.सू.८/४/१८

500 पा.सू.८/४/१९

योजयित्वा भोजदेवेनोक्तम्। 'परेरुपसर्गात् परस्यानितेर्धातोर्नकारस्य णकारादेशो वा भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। णकारादेशः कुत्र भवितव्यः इति स्पष्टं वक्तुं 'परेरुपसर्गात् परस्यानितेर्धातोर्नकारस्य' इति दण्डनाथेनोच्यते। 'पर्यणिति' इत्युदाहरणम्। णत्वाभावे 'पर्यनिति' इति च।

**अन्ते च। (७/४/१२८)**

पाणिनिना 'अन्तः'[501] इत्येव सूत्रं प्रतिपादितम्। 'पदान्तस्यानितेर्नस्य णत्वं स्यादुपसर्गस्थान्निमित्तात्परश्चेत् ' इति अस्यार्थः कौमुद्यामुक्तः। भोजदेवेनेदं सूत्रं 'अन्ते च' इति परिवर्तितम्। 'अदुर उपसर्गाद्रेफादिमतः परस्यानितेः पदस्यान्ते च वर्तमानस्य नकारस्य णकारादेशो वा भवतीति' अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'हे प्राण्' 'प्राणिति' इत्येते उदाहरणे। णत्वाभावे 'हे प्रान्' 'प्रानिति' इति च। 'हे प्राण् ' इत्युदाहरणं कौमुद्यामपि दृश्यते।

**द्वयोर्द्विरुक्तस्य। (७/४/१२९)**

पाणिनिना इदं सूत्रं 'उभौ साभ्यासस्य'[502] इत्युक्तम्। 'साभ्यासस्यानितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति' इति कौमुद्यामस्यार्थः उक्तः। भोजदेवेन 'द्वयोर्द्विरुक्तस्य' इत्युक्तसूत्रस्य सूत्रार्थः 'अदुर उपसर्गाद्रेफादिमतः परस्यानितेर्द्विरुक्तस्य द्वयोर्नकारयोः प्रत्येकं णकारादेशो भवति' इत्युच्यते। 'प्राणिणिषति', 'पराणिणत्' 'प्राणिणत्' इत्येतानि उदाहरणानि। एषु 'प्राणिणत्' इत्युदाहरणं कौमुद्यां च दृश्यते।

---

501 पा.सू.८/४/२०

502 पा.सू.८/४/२१

**हन्तेः। (७/४/१३०)**

पाणिनिना इदं सूत्रं 'हन्तेरत्पूर्वस्य'[503] इत्युक्तम्। 'उपसर्गास्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं नान्यस्य' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजदेवेन पाणिनीयसूत्रात् 'अत्पूर्वस्य' इति परित्यज्य 'हन्तेः' इत्येवोक्तम्। 'अदुर उपसर्गाद्रेफादिमतः परस्य हन्तेर्नकारस्य णकारादेशो भवति' इति अस्यार्थः दण्डनाथेनोक्तः। 'प्रहण्यते', 'प्रहणनं', 'प्रघ्नन्ति', 'प्राधानीत्या' इत्यादीन्युदाहरणानि। एषु उदाहरणेषु 'प्रघ्नन्ति' इति कौमुद्यां च दृश्यते।

**वमोर्वा। (७/४/१३१)**

पाणिनिना 'वमोर्वा (पा.सू.८/४/२३) इत्येवमेवेदं सूत्रं प्रयुक्तम्। 'उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्वमयोः परयोः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'अदुर उपसर्गात् परस्य हन्तेर्नकारस्य वकारमकारयोः परतो णकारादेशो वा भवति' इति दण्डनाथेन अस्य सूत्रार्थः उक्तः। 'प्रहण्मि', 'प्रहण्वः', 'प्राहण्वहे', 'प्राहण्महे', इत्यादीनि उदाहरणानि। णत्वाभावे 'प्रहन्मि', 'प्रहन्वः', 'प्राहन्वहे', 'प्राहन्महे' इति च। अत्रोक्तं 'प्रहण्मि', 'प्रहण्वः' इत्युदाहरणद्वयं कौमुद्यामपि दृश्यते।

**अन्तरोऽयनस्य चादेशे। (७/४/१३२)**

पाणिनिना 'अन्तरदेशे'[504], 'अयनं च'[505] इति सूत्रद्वयेण प्रतिपादितं कार्यं

---

503 पा.सू.८/४/२२

504 पा.सू.८/४/२४

505 पा.सू.८/४/२५

भोजदेवेनानेन प्रतिपाद्यते। 'अन्तः शब्दाद्धन्तेर्नस्य णः स्यात् इति अन्तरदेशे इत्यस्य, अयनस्य णोऽन्तः शब्दात्परस्य' इति 'अयनं च' इत्यस्य च अर्थः कौमुद्यामुक्तः। 'अन्तः शब्दादुपसर्गात् परस्यायनशब्दस्य हन्तेश्च नकारस्यादेशे विषये णकारादेशो भवति' इति अस्यार्थः दण्डनाथेनोक्तः। 'अन्तरयणं वर्तते अन्तर्हणनम्', 'अन्तर्हण्यते' इत्यादीन्युदाहरणानि। अत्र उक्तेषु उदाहरणेषु अन्तर्हणनम् इति अन्तरदेशे इत्यस्य अन्तरयणम् इति अयनं च इति सूत्रस्य च कौमुदीव्याख्याने दृश्यते।

**अचो निष्ठायाः। (७/४/१३३) निर्विण्णः। (७/४/१३४)**

पाणिनिना इदं सूत्रं 'कृत्यचः'[506] इति प्रतिपादितम्। 'उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्' इति अस्यार्थः कौमुद्यामुच्यते। भोजदेवेनेदं सूत्रम् 'अचो निष्ठायाः' इति प्रतिपादितम्। 'अदुर उपसर्गाद्रेफादिमतः परस्याजन्ताद्धातोरुत्तरस्य निष्ठा नकारस्य णकारो भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'प्रहाणः', 'प्रहाणवान्', 'प्रहीणः', 'प्रहीणवान्', 'प्रगूणः', 'प्रगूणवान्', इत्युदाहरणानि दण्डनाथेन तत्रोक्तानि। 'कृत्यचः' इति सूत्रव्याख्याने कौमुद्यां 'निर्विण्णस्योपसंख्यानम् ' इति वार्तिकं कात्यायनेनोच्यते। भोजदेवेन वार्तिकमिदमत्र 'निर्विण्णः' इति सूत्रेणोक्तम्। 'निर्विण्ण इति निरिपूर्वाद्विदेः सत्तालाभविचारार्थात् परस्य क्तसम्बन्धिनो नकारस्य णकारो निपात्यते' इति दण्डनाथेन अस्य सूत्रस्य व्याख्याने उक्तम्। 'निर्विण्णः' इत्युदाहरणम्।

---

506 पा.सू.८/४/२९

**अनमानेन्यन्यनीयरामख्याञः। (७/४/१३५)**

'कृत्यचः' इति सूत्रस्य काशिकाव्याख्याने 'अन', 'मान', 'अनीय', 'अनि', निष्ठादेश एते 'णत्वं' प्रयोजयन्ति इत्युच्यते। तद्वाक्यं भोजदेवेन सूत्रत्वेनात्र प्रतिपादयति। 'अदुर उपसर्गाद्रेफादिमतः परस्य ख्याञ्वर्जितात् पराजन्ताद्धातोरुत्तरस्य निष्ठानकारस्य णकारादेशो भवति' इति हृदयहारिण्यामस्य सूत्रार्थः उच्यते। 'प्रयाणं', 'प्रवपणं', 'प्रवहणं', 'प्रयायमाणं', 'पर्यायिणौ', 'अप्रयाणिः', 'प्रयाणीयं', 'प्रवहणीयं', 'परिवहणीयम्' इत्यादीनि उदाहरणानि।

**णेर्वा। (७/४/१३६)**

पाणिनिना 'णेर्विभाषा'[507] इति इदं सूत्रं प्रतिपादितम्। 'उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्तस्थस्य नस्य णो वा स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। भोजेनेदं सूत्रं 'णेर्वा' इत्येवोच्यते। 'अदुर उपसर्गाद्रेफादिमतः परस्य ण्यन्ताद्धातोर्विहितानां अन मान इति अनि अनीयर् इत्येतेषां नकारस्य णकारादेशो वा भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'प्रयापणम्'/'प्रयापनम्', 'प्रयाप्यमाणः'/'प्रयाप्यमानः', 'प्रयामिणौ'/'प्रयामिनौ', अप्रयापणिः' /'अप्रयापनिः' 'प्रयापणीयम्'/'प्रयापनीयम्' इत्यादीनि उदाहरणानि। एतेषु 'प्रयापणीयम्'/ 'प्रयापनीयम् ' इत्युदाहरणं कौमुद्यामपि दृश्यते।

**हलादेरिजुपधात्। (७/४/१३७)**

पाणिनिना 'हलश्च इजुपधात् '[508] इति सूत्रं प्रयुक्तम्। 'हलादेरिजुपधात्कृन्नस्याचः परस्य

---

507 पा.सू.८/४/३०

508 पा.सू.८/४/३१

णो वा स्यात् ' इति कौमुद्यामस्य सूत्रार्थः उक्तः। भोजेनेदं सूत्रं 'हलादेरिजुपधात् ' इत्युक्तम्। 'अदुर उपसर्गाद्रेफादिमतः परो यो हलादिरिजुपधो धातुस्तातः परेषामनमानेन्यन्यनीयरां नकारस्य णकारादेशो वा भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'प्रमेहणं'/'प्रमेहनं', 'प्रकोपणं'/'प्रकोपनं', 'प्रगुप्यमाणः'/'प्रगुप्यमानः', 'प्रकोपिणौ'/'प्रकोपिनौ', 'अप्रकोपणिः' /'अप्रकोपनिः', 'प्रकोपणीयं'/'प्रकोपनीयम्' इत्यादीन्युदाहरणानि। अत्रोक्तेषु उदाहरणेषु 'प्रकोपणीयं'/'प्रकोपनीयम् ' इत्युदाहरणं कौमुद्यामपि दृश्यते।

**नुमिजादेर्हलः। (७/४/१३८)**

पाणिनिना 'इजादेः सनुमः'[509] इति सूत्रं प्रयुक्तम्। 'सनुमश्चेद्भवति तर्हि इजादेर्हलन्ताद्विहितो यः कृत्तस्थस्यैव' इति कौमुद्यामस्यार्थः उक्तः। इदं सूत्रं भोजदेवेन 'नुमिजादेर्हलः' इत्युक्तम्। 'अदुर उपसर्गाद्रेफादिमतः परस्य नुमि सतीजादेरेव हलन्ताद्धातोः परेषामनमानेन्यनीयरां नकारस्य णकारादेशो' भवति इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'प्रेङ्खणं', 'प्रेङ्खमाणः', 'प्रेङ्खिणौ', 'अप्रेङ्खणिः', 'प्रेङ्खणीयम्' इत्यादीनि उदाहरणानि। एतेषु उदाहरणेषु 'प्रेङ्खणीयम्' इति कौमुद्यामस्ति।

**वा निंसनिंक्षनिन्दाम्। (७/४/१३९)**

पाणिनिना 'वा निंसनिक्षनिन्दाम्'[510] इत्येव सूत्रमुच्यते। एषां नस्य णो वा स्यात् कृति

---

509 पा.सू.८/४/३२

510 पा.सू.८/४/३३

परे इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'अदुर उपसर्गाद्रिफादिमतः परस्य निंसादीनां नकारस्य णकारादेशो वा भवति णोपदेशत्वान्नित्ये प्राप्ते विकल्पः' इति दण्डनाथेनास्य अर्थः उक्तः। 'प्रणिंसनं'/'प्रनिंसनं', 'प्रणिक्षणं'/'प्रनिक्षणं', 'प्रणिन्दनं'/'प्रनिन्दनम्' इत्यादीनि उदाहरणानि। कौमुद्यां 'प्रणिंसितव्यं'/'प्रनिंसितव्यम्' इति उदाहरणं दृश्यते। दण्डनाथेनोक्तोदाहरणानि काशिकायां दृश्यते च।

**न भाभूपूञ्कमिगमिप्यायीवेपां णेश्च। (७/४/१४०)**

पाणिनिना इदं सूत्रं 'न भाभूपूकमिगमिप्यायीवेपाम् '[511] इत्युक्तम्। 'एभ्यः कृन्नस्य णो न' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। 'न भाभूपूञ्कमिगमिप्यायीवेपां णेश्च' इति भोजदेवेनेदं सूत्रमुक्तम्। 'अदुर उपसर्गाद्रिफादिमतः  परेषां भादीनां ण्यन्तानामण्यन्तानां च सम्बन्धिनां नकारस्य णकारादेशो न भवतीति' दण्डनाथेनास्य सूत्रार्थः उक्तः। 'प्रभानं', 'प्रभायमानं', 'प्रभायिनौ', 'अप्रभानि', 'प्रभानीयं', 'प्रभवनं', 'प्रभूयमानं', 'प्रपवनं', 'प्रपूयमानम् ' इत्यादीनि उदाहरणानि। एतेषु 'प्रभानीयम् ' इत्युदाहरणं कौमुद्यामपि दृश्यते।

**षात् पदे। (७/४/१४१)**

पाणिनिना इदं सूत्रं 'षात् पदान्तात् '[512] इत्युक्तम्। 'नस्य णो वा स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। इदं सूत्रं 'षात् पदे' इत्येव भोजेनोक्तम्। 'पदे परतो यः

---

511 पा.सू.८/४/३४

512 पा.सू.८/४/३५

षकारस्तस्मिन्निमित्तात् परस्य नकारस्य णकारादेशो भवतीति' सूत्रार्थः दण्डनादेथेनोक्तः। 'निष्पानं', 'सर्पिष्पानं', 'यजुष्पानम्' इत्यादीनि उदाहरणानि। अत्रोक्तेषु 'निष्पानम्' इत्युदाहरणं कौमुद्यामपि दृश्यते।

**नशेः ष्कः। (७/४/१४२)**

पाणिनिना इदं सूत्रं 'नशेः षान्तस्य' इत्युक्तम्। 'णत्वं न स्यात् ' इति अस्य अर्थः कौमुद्यामुच्यते। 'षान्तस्य' इति स्थाने 'ष्कः' इति पदं भोजदेवेन प्रयुक्तं वर्तते। 'षकारान्तस्य ककारान्तस्य च सम्बन्धिनः नशेर्नकारस्य णकारादेशो न भवति' इति सूत्रस्यास्य अर्थः दण्डनाथेनोक्तः। 'प्रनष्टः', 'प्रनङ्क्ष्यति' इत्येते उदाहरणे। पाणिनिना षकारान्तस्य सम्बन्धिनः नशेः कार्यमेव प्रतिपादितम्। किन्तु भोजदेवेन ककारान्तस्य च योजितम्। दण्डनाथेनोक्ते उदाहरणे कौमुद्यां न दृश्यते।

**पदान्तस्य। (७/४/१४३)**

इदं सूत्रं पाणिनिना 'पदान्तस्य'[513] इत्येव प्रतिपादितम्। 'पदान्तस्य नस्य णत्वं न स्यात्' इति अस्य सूत्रार्थः कौमुद्यां दृश्यते। 'पदान्तस्य नकारस्य णकारादेशो न भवतीति' दण्डनाथः कौमुदीसमानं सूत्रार्थमुक्तम्। 'नरान्', 'पुरुषान्' इत्येते उदाहरणे।

---

513 पा.सू.८/४/३७

**चुटुतुलशर्व्यवाये। (७/४/१४४) अतद्धितपरानाङा पदेन। (७/४/१४५)**

'पदव्यवायेऽपि'[514] इति इदं सूत्रं पाणिनिना उक्तम्। 'पदेन व्यवधानेऽपि णत्वं न स्यात्' इति अस्य सूत्रार्थः कौमुद्यामुच्यते। कीदृशेन पदेन इति स्पष्टीकरणाय भोजदेवेन 'चुटुतुलशर्व्यवाये' इति सूत्रं परिवर्तितम्। 'चवर्गेण टवर्गेण तवर्गेण लकारेण शर्भिश्च निमित्तैरषृभिः सह व्यवधाने णकारादेशो न भवतीति' दण्डनाथेन अस्य अर्थः उक्तः। 'अर्चना', 'मूर्छना', 'अर्जुनं', 'झर्झुनं', 'किरीटेन', 'कर्मठेन', 'मृडेन', 'दृढेन', 'कर्णेन', 'धूर्तेन', 'तीर्थेन', 'नर्देन', 'क्रोधेन', 'प्रियध्वना', 'विरलेन', 'राशिना', 'रसेन' इत्यादीनि उदाहरणानि। कौमुद्यामस्य सूत्रव्याख्याने कात्ययनेन एकं वार्तिकमुच्यते 'अतद्धित इति वाच्यम्' इति। तत्वार्तिकमत्र भोजदेवः सूत्रत्वेनोच्यते। 'तद्धितपरमाङं च वर्जयित्वा अन्येन पदेन निमित्तनिमित्तिनोर्व्यवधाने णकारो न भवति' इति अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'प्रावनद्धम् पर्यवनद्धम् च' 'तुरङ्गयोगेन व्रीहिकुम्भवापेन माषकुम्भवापेन इत्यादीनि उदाहरणानि।

**हन्तेर्घेण। (७/४/१४६)**

हन्तेः सम्बन्धिना घकारेण निमित्तन्मित्तिनोर्व्यवधाने णकारो न भवति। स्रुघ्नं, शत्रुघ्नं, वृत्रघ्नं वृत्रघ्ने। पूर्वपदस्थेभ्यः संज्ञायामनृगयनादीनाम् इति प्राप्ते प्रतिषेधः। घेणेति किं । वृत्रहणौ हन्तेरिति किं अर्घेण।

---

514 पा.सू.८/४/३८

**क्षुभ्नातितृन्पोत्याचार्यभोगिनाचार्यानीसर्वनामनृनमनानाम्। (७/४/१४७) नृतेर्यङि। (७/४/१४८) नृतनर्तननटननद्धनदीनगरनिवेशनिवासाग्न्यनूपनन्दिनन्दननहननदनादीनाम्। (७/४/१४९)**

पाणिनिना इदं सूत्रं 'क्षुभ्नादिषु च'[515] इत्युक्तम्। 'एषु णत्वं न स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'क्षुभ्नादीन् ' सर्वानुच्चार्य भोजेन 'क्षुभ्नादिषु च' इति सूत्रस्थाने सूत्रत्रयं प्रयुक्तम्। 'क्षुभ्नादीनां नकारस्य रषृभ्यः परस्य णकारो न भवति' इति क्षुभ्नातितृन्पोत्याचार्यभोगिनाचार्यानी-सर्वनामनृनमनानाम् इत्यस्य सूत्रार्थः दण्डनाथेनास्य उक्तः। 'क्षुभ्नाति', 'क्षुभ्नीतः', 'तृप्नोति', 'आचार्यभोगीनः', 'आचार्यानी' इत्यादीनि उदाहरणानि।

'नृतिर्यङि प्रयोजयन्ति' इति गणपाठे अस्ति। 'नृतेर्धातोर्यङि नकारस्य णकारादेशो न भवति' 'नरीनृत्यते', 'नरीनर्तयन्नर्तिरनरीनृत्यतीति रषृभ्यो व्यवहितस्यापि समानपदे नो ण इति प्राप्ते प्रतिषेधः इति नृतेर्यङि' इत्यस्य सूत्रार्थः दण्डनाथेनास्य उक्तः। 'रेफादेः पूर्वपदस्थान्नि-मित्तादुत्तरस्य नृत्तादीनां नकारस्य णकारादेशो न भवति इति नृतनर्तननटननद्धनदीनगरनिवेशनि-वासाग्न्यनूपनन्दिनन्दननहननदनादीनाम्' इत्यस्य सूत्रार्थः दण्डनाथेनोक्तः। 'परिनृत्तं' परिनर्त्तनं ग्रामनटः', 'शरनद्धः शरनदी गिरिनगरं', 'परनिवेशः' 'श्रीनिवासः' 'शराग्निः' 'दर्भानूपः' 'हरिनन्दी' 'हरिनन्दनः' 'गिरिनहनम्' इत्यादीनि उदाहरणानि।

---

515 पा.सू.८/४/३९

**स्तोः श्चुष्टुभ्यां तौ । (७/४/१५०)**

पाणिनिना 'स्तोः श्चुना श्चुः'[516] 'ष्टुना ष्टुः'[517] इति सूत्रद्वयमुच्यते। 'सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः' इति, 'स्तोः ष्टुना योगे ष्टुः स्यात् ' इति च यथाक्रमम् अनयोः सूत्रार्थः कौमुद्यामुक्तः। एतयोः द्वयोः सूत्रयोः मेलनेन भोजेनेदं सूत्रमुक्तम्। 'सकारस्य तवर्गस्य शकारचवर्गाभ्यां षकारटवर्गाभ्यां च सन्नियोगे तौ शकारचवर्गौ षकारटवर्गौ च यथासंख्यमान्तरतम्येनादेशौ भवतः' इति दण्डनाथेनास्यार्थः हृदयहारिण्यामुक्तः। 'वृक्षश्शेते', 'वृक्षश्चिनोति', 'वृक्षश्छादयति', 'अग्निचिच्छेते', 'सोमसुच्चिनोति', 'अग्निचिच्छेते', 'तज्जयति', 'लज्जयते', 'भवाञ्जयति', 'भवाञ्झोषयति', 'भवाञ्ञकारेण', 'प्रशाञ्चरति', 'प्रशाञ्छिनत्ति', 'कष्षण्डिकः', 'कष्टीकते', 'कष्टकारेण', 'तट्टीकते', 'तड्डुकारेण', 'अड्डुति', 'तड्ढौकते', 'भवाण्डीनः', 'भवाण्ढौकते', 'भवाण्ढकारेण' इत्यादीनि उदाहरणानि।

**न पदान्तट्टोरनाम्नवतिनगरीणाम्। (७/४/१५१)**

पाणिनिना 'न पदान्ताट्टोरनाम्'[518] इति इदं सूत्रं प्रतिपादितम्। अनामिति लुप्तषष्ठीकं पदम्। 'पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात् ' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। अनेन सूत्रेण साकं 'नवतिनगरीणाम्' इत्यपि योजयित्वा भोजदेवेन सूत्रमुक्तम्। 'पदस्यान्ते वर्तमानात्

---

516 पा.सू.८/४/४०

517 पा.सू८/४/४१

518 पा.सू.८/४/४२

टवर्गात्परस्य नाम्ननवतिनगरीसम्बन्धवर्जितस्य स्तोः ष्टुत्वं न भवतीति' दण्डनाथः सूत्रार्थमुक्तम्। 'मधुलिड्वाये', 'मधुलिड्वरति', 'मधुद्विट्दुनोति', 'मधुलिट्धुनुते', 'मधुलिट्धुनोति', 'मधुलिट्ध्वम्' इत्यादीनि उदाहरणानि।

**तोः षि। (७/४/१५२)**

'तोः षि'[519] इत्येवेदं सूत्रं पाणिनिना उक्तम्। 'तवर्गस्य षकारे परे न ष्टुत्वम्' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। 'तद्वदेव तवर्गस्य षकारे परतः टवर्गादेशो न भवतीति' दण्डनाथेन हृदयहारिण्यामस्य सूत्रार्थः उक्तः। 'अग्निचित्षण्डे', 'भवान्षण्डे' इत्येते उदाहरणे।

**शात्। (७/४/१५३)**

पाणिनिना 'शात्'[520] इत्येवेदं सूत्रं प्रतिपादितम्। 'शात्परस्य तवर्गस्य श्चुत्वं न' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'शकारात्परस्य तवर्गस्य चुत्वं न भवति' इति दण्डनाथेनास्य अर्थः उक्तः। 'अश्नाति', 'विश्नः', 'प्रश्नः' इत्यादीनि उदाहरणानि। 'विश्नः', 'प्रश्नः' इत्येते उदाहरणे कौमुद्यामपि उक्तः।

**पदान्तस्य यरोञमिञां वा। (७/४/१५४) प्रत्यये। (७/४/१५५)**

पाणिनिना इदं सूत्रं 'यरोऽनुनासिकेऽनुनासिको वा'[521] इत्युक्तम्। 'यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्' इति कौमुद्यामस्य सूत्रार्थः उक्तः।

---

519 पा.सू.८/४/४३

520 पा.सू.८/४/४४

521 पा.सू.८/४/४५

अनुनासिकपदस्य स्थाने 'ञमिञां' इति भोजदेवेन उच्यते। ञमित्यनेन ञमङणनम् इत्येतेषां ग्रहणं 'न ञमिञः' 'अञमिञः', तेषाम् 'अञमिञाम् ' । तस्मात् भोजदेवः प्रत्याहारान् स्वीकरोति इति ज्ञायते। 'पदान्तस्य यरः अञमिञां वा इति पदच्छेदयुक्तस्यास्य सूत्रार्थः दण्डनाथेन पदान्तस्य यरः स्थाने ञमि परतो ञमादेशो वा भवति' इति दण्डनाथेन सूत्रार्थो उच्यते। 'वाङ्ञकारः'/'वाग्ञकारः', 'वाङ्मधुरा'/'वाग्मधुरा', 'वाङ्ङ्वते'/'वाग्ङ्वते', 'तन्नयनं'/'तद्नयनं', 'त्रिष्टुम्नयति'/'त्रिष्टुभ्नयति' इत्यादीनि उदाहरणानि।

अस्य सूत्रस्य कौमुदीव्याख्याने 'प्रत्यये भाषायां नित्यम् ' इति वार्तिकं कात्यायनेन उक्तम्। तद्वार्तिकं भोजेनात्र 'प्रत्यये' इति सूत्ररूपेण स्वीकृतम्। 'ञमादौ प्रत्यये परतः पदान्ते वर्तमानस्य यरः स्थाने ञमादेशो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'वाङ्मयं', 'वाङ्मात्रम्' इत्येते उदाहरणे।

**अचो रहाभ्यां द्वे। (७/४/१५६)**

अस्य सूत्रस्य व्याख्यानं हृदयहारिण्याम् 'अचः परौ यौ रेफहकारौ' इत्येव दृश्यते। तदनन्तरकार्याणि नष्टानि जातानि। तथापि पाणिनिना 'अचो रहाभ्यां द्वे'[522] इत्येव सूत्रमुच्यते। 'अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः' इति कौमुद्यामस्य सूत्रार्थः उक्तः। 'हर्य्यनुभवः', 'नह्य्यस्ति' इत्येते उदाहरणे कौमुद्यामुच्यते। तस्मादत्रापि अनेन भोजसूत्रेण यरः विकल्पेन द्वे स्यात्।

---

[522] पा.सू.८/४/४६

इतः आरभ्य 'एकाहलवसानयोरदीर्घात्' , 'यणो मयः', 'शरः खयः', 'न पुत्रस्यदि', 'पुत्रादिनोराक्रोशे', 'शचोऽचिरात्', 'झलां जश् झशि', 'चर्खरि', 'वा विरामे', 'अणोऽप्रगृह्यस्यानुनासिकः', 'अनुस्वारस्य ययि यम्' इत्येतेषाम् एकादशसूत्राणां व्याख्या हृदयहारिण्यां न दृश्यते।

**पदान्ताभ्यासयोर्वा । (७/४/१५७)**

पाणिनिना 'वा पदान्तस्य'[523] इत्युक्तमिदं सूत्रं भोजदेवेन 'पदान्ताभ्यासयोर्वा' इत्युक्तम्। कौमुद्यां 'पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात् ' इति सूत्रार्थे उक्ते दण्डनाथेन 'पदान्तस्याभ्याससम्बन्धिनः अनुस्वारस्य ययि परतो निमित्तप्रत्यासन्नतरोऽनुनासिको यमादेशो वा भवति' इति सूत्रार्थः उक्तः। 'संयन्ता'/'सँयन्ता', 'संवत्सरः'/'सँवत्सरः', 'तल्लोकं'/'तँलोकं', 'त्वङ्करोषि'/'त्वँकरोषि', 'त्वञ्चरसि'/'त्वँचरसि', 'त्वण्टीकसे'/'त्वँटीकसे', 'त्वन्तरसि'/'त्वंतरसि', 'त्वम्पचसि'/'त्वंपचसि', 'किन्नराः'/'किंनराः', 'चङ्क्रम्यते'/'चँक्रम्यते', 'चञ्चूर्यते'/'चंचूर्यते', 'तन्तन्यते'/'तंतन्यते', 'पम्फुल्यते'/'पंफुल्यते', 'यय्यँम्यते'/'यंयम्यते' इत्यादीनि उदाहरणानि। तेषु 'संयन्ता'/'सँयन्ता', 'संवत्सरः'/'सँवत्सरः', 'त्वङ्करोषि'/'त्वँकरोषि' इत्येतानि उदाहरणानि कौमुद्यामप्यस्ति।

**तोर्लि। (७/४/१५८)**

पाणिनिना 'तोर्लि'[524] इत्येवेदं सूत्रं प्रयुक्तम्। 'तवर्गस्य लकारे परे परसवर्णः' इति

523 पा.सू.८/४/५९

524 पा.सू.८/४/६०

अस्यार्थः कौमुद्यामुक्तः। 'तवर्गस्य पदान्तस्य लकारे परतस्तत्प्रत्यासन्नतरोऽयमादेशो भवतीति' दण्डनाथः अस्यार्थः हृदयहारिण्यामुक्तः। 'अग्निचिल्लुनाति', 'विद्युल्लेखा', 'दृषल्लिख्यते', 'भवाँल्लिखति' इत्येतानि उदाहरणानि।

**उदः सः स्थास्तम्भोर्लोपः। (७/४/१५९) रोगे स्कन्देः। (७/४/१६०)**

पाणिनिना 'उदः स्थास्तम्भोः पूर्वस्य'[525] इति इदं सूत्रमुक्तम्। 'उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् ' इति अस्यार्थः कौमुद्यामुच्यते। किन्तु भोजदेवेन सूत्रे 'पूर्वस्य' इत्यस्य 'लोपः' इति कृत्वा सूत्रमुक्तम्। 'उद उत्तरस्य स्थास्तम्भोः सम्बन्धिनः सकारस्य लोपो भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। 'उत्थानम्', 'उत्तम्भिता' इत्येते उदाहरणे।

अत्र पाणिनीयसूत्रवशात् 'उद् स्थानम् ' इति स्थिते 'खरि च'[526] इति सूत्रेण दकारस्य तकारे 'उत् स्थानम्' इति जाते 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रेण सकारस्य पूर्वसवर्णे 'थकारे', 'उत् थ्थानम् ' इति जाते 'झरो झरि सवर्णे'[527] इति सूत्रेण थकारस्य विकल्पेन लोपे 'उत्थानम्' इति रूपम्। लोपाभावे 'उत्थ्थानम्' इति च। अत्र भोजमते पूर्वसवर्ण इति न सकारलोपः विहितः। तस्मात् 'उत् स्थानम्' इति स्थिते सकारलोपे उत्थानम् इति रूपम् प्राप्नोति।

---

525 पा.सू.८/४/६१

526 पा.सू.८/४/५५

527 पा.सू.८/४/६५

अस्य सूत्रस्य कौमुदीव्याख्याने कात्यायनेन 'उदः पूर्वसवर्णत्वे स्कन्देः छन्दसि उपसङ्ख्यानम्', 'रोगे चेति वक्तव्यम्' इति वार्तिकद्वयं प्रतिपादितम्। अनयोः द्वयोः वार्तिकयोः मेलनेन भोजेन रोगे स्कन्देः इति सूत्रं प्रयुक्तम्। अनेनापि पूर्वसवर्णापेक्षया सकारस्य लोपः विहितः। 'उदः परस्य स्कन्देः सकारस्य लोपो भवति इति' अस्य सूत्रार्थः दण्डनाथेनोक्तः। 'उत्कन्दको रोगः' इत्युदाहरणम्।

**हलो यमां यमि वा। (७/४/१६१)**

अस्य व्याख्यानं हृदयहारिण्यां न दृश्यते। तत् कदाचित् नष्टं भवेत्। तथापि पाणिनिना इदं सूत्रं 'हलो यमां यमि लोपः'[528] इति प्रतिपादितम्। हलः परस्य यमो लोपः स्याद्वा यमि इति कौमुद्यामस्य सूत्रार्थः उक्तः। लोपः इति पदस्य स्थाने भोजदेवेन वा इति प्रयुक्तम्। पूर्वसूत्रेणोक्तः लोपः अत्र वा भवतीत्याशयः तस्मात् भवेत् इत्यस्मात् लोप पदस्यस्थाने वा इति प्रयुक्तम् स्यात्। पाणिनिना पूर्वसूत्रेण पूर्वसवर्णः उक्तः इत्यस्मात् लोपः इति पृथगुक्तं स्यात्।

**झरां झरि सवर्णे च। (७/४/१६२)**

पाणिनिना इदं सूत्रं 'झरो झरि सवर्णे'[529] इति प्रतिपादितम्। 'हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। भोजेनेदं सूत्रं 'च' इत्यपि संयोज्य उक्तम्। अत्रापि लोपः इति ज्ञापनार्थं भोजदेवेन च इति योजितं भवेत्। 'हलः परेषां झरां झरि

---

528 पा.सू.८/४/६४

529 पा.सू.८/४/६५

सवर्णे परतो लोपो वा भवति' इति दण्डनाथेनास्य सूत्रार्थः उक्तः। प्रत्तमिति त्रयस्तकाराः, मध्यमस्य वा लोपो भवति पुत्तः, 'प्रत्तं मरुत्तः' इति चत्वारस्तकाराः, मध्यमयोर्वा लोपो भवति 'मरुत्तः' 'मरुत्तः' इत्यादीनि उदाहरणानि।

**जशो हो झष्। (७/४/१६३)**

इदं सूत्रं पाणिनिना 'झलां जश् झशि'[530] इति प्रतिपादितम्। 'जश् ' इत्यनेन 'ज', 'ब', 'ग', 'ड', 'द', इत्येतेषां ग्रहणम्। 'झश् ' इति प्रत्याहारे 'झ', 'भ', 'घ', 'ढ', 'ध', 'ज', 'ब', 'ग', 'ड', 'द' इति वर्णाः आगच्छन्ति। 'झल् ' इत्यनेन 'झभञ् ' इत्यस्य झकारादारभ्य 'हल् ' पर्यान्ताः वर्णाः गृह्यन्ते। 'झलां जश् परे झश् आदेशः भवतीति' अनेनोच्यते। किन्तु 'जशो हो झष् ' इति सूत्रेण 'जश उत्तरस्य हस्य स्थाने यथासंख्यं झषो वा भवन्ति' इति दण्डनाथेनोच्यते। पाणिनिना 'झश्' वर्णान् उक्ते भोजेन 'झष्' एव उच्यते। 'वाग्घसति'/'वाग्हसति', 'अज्झलौ'/'अज्हलौ', 'षड्ढलानि'/'षड्हलानि', 'तद्धितं'/'तद्हितं', 'त्रिष्टुब्भसति'/'त्रिष्टुब्हसति' इत्येतानि उदाहरणानि।

**चयः शश्छोऽमि। (७/४/१६४)**

पाणिनिना 'चयः शश्छोऽमि' इति सूत्रं 'शश्छोऽटि'[531] इत्युक्तम्। 'पदान्ताज्झयः परस्य शस्य छो वा स्यादटि' इति अस्य सूत्रार्थः कौमुद्यामुक्तः। पाणिनिवत् भोजदेवेनापि अनेन सूत्रेण

---

530 पा.सू.८/४/५३

531 पा.सू.८/४/६३

विकल्पेन छकारादेशो विधीयते। 'चयः परस्य शस्य स्थाने अमि परतः छकारादेशो वा भवति' इति अस्य सूत्रार्थः दण्डनाथेनोच्यते। 'प्रक्छूरः'/'प्राक्शूरः','षड्छ्यामा'/'षड्श्यामा', 'तच्छेते'/'तत्शेते', 'त्रिष्टुप्छूयते'/'त्रिष्टुप्श्रूयते', 'वाक्छ्लक्ष्णः'/'वाक्श्लक्ष्णः', 'तच्छ्लोकः'/ 'तत्श्लोकः' इत्यादीनि उदाहरणानि।

**शरि द्वितीयः। (७/४/१६५)**

'शरि द्वितीयः' इति सूत्रे 'चयः शश्छोऽमि' इति पूर्वसूत्राद् 'चय' इति पञ्चम्यन्तमनुवृत्तम् , तत् षष्ठ्यन्ततया विपरिणम्यते। चयः स्थाने शरि परतो द्वितीया अन्तरतमा वा भवति इति सूत्रार्थः तत्र दण्डनाथेनोक्तः। 'तच्छोभनम्'/'तत्शोभनम्' इत्युदाहरणम्। 'ङ्णोः कुक्टुक्शरि' इति पाणिनीयसूत्रव्याख्याने 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्'[532] इति वार्तिकमुक्तम्। तत्सूत्रं भोजदेवेन सूत्रत्वोत्रोक्तम्।

**उत्तरस्य प्राक्षुयथापूर्वमुपदेशदर्शनादिष्टसिद्धिः। (७/४/१६६)**

सूत्रत्वेन इदं हृदयहारिण्यां न दृश्यते। शरि द्वितीया इति सूत्रस्य व्याख्याने इदं प्रतिपादितम्। बहुलं छन्दसि इत्यत आरभ्य यदित उत्तरमनुक्रमिष्यामस्तस्य संज्ञाप्रत्ययविधानादेः पूर्वे वा मध्ये पूर्वोपदिष्टसंज्ञाद्युद्देशानतिक्रमेणोपदेशोऽत्र द्रष्टव्यः इति तत्र व्याख्याने उक्तम्।

---

532 वा.५०२३

# उपसंहारः उपनिर्देशाश्च।

पाणिनेः अनन्तरमागतेषु वैयाकरणसम्प्रदायेषु भोजव्याकरणं सविशेषस्थानमर्हति। भोजदेवेन विरचितः व्याकरणग्रन्थः भवति सरस्वतीकण्ठाभरणम्। तस्य बहूनि व्याख्यानानि सन्ति चेदपि दण्डनाथेन विरचिता 'हृदयहारिणी' एव उपलब्धा। तत्तु षष्ठाध्यायपर्यन्तमेव प्रकाशितम्। सप्तमाध्यायस्य हस्तलेखा अडयार् ग्रन्थशालायाः, पर्णलेखा तिरुवनन्तपुरात् मानुस्क्रिप्ट् ग्रन्थशालायाः च प्राप्ता। अष्टमाध्यायस्य हृदयहारिणीव्याख्यानं न प्राप्तं च।

'भोजव्याकरणे हृदयहारिणीव्याख्यानस्य वैशिष्ट्यम्' इत्यस्मिन् गवेषणप्रबन्धे पञ्चाध्यायाः सन्ति। 'भोजचरितं योगदानञ्च' इति प्रथमे अध्याये भोजराजस्य कालः, चरितं, संस्कृतभाषाभिरुचिः, रचनादयश्च प्रतिपाद्यन्ते। इतरशास्त्रनिपुणस्य तस्य कालः एकादशशत-कस्य पूर्वार्धः इति अनुमीयते। भोजदेवः विदुषाम् अत्यधिकमादरं कृतवानिति तस्य चरितात् ज्ञायते। भोजविरचितानां पञ्चाशतधिककृतीनां नामानि अस्मिन्नध्याये दत्तानि वर्तन्ते।

सरस्वतीकण्ठाभरणनामकं ग्रन्थद्वयं भोजदेवेन विरचितम्। तौ व्याकरणशास्त्र-प्रतिपादकः अलङ्कारशास्त्रप्रतिपादकश्च भवतः। 'भोजव्याकरणस्य सामान्यपरिचयः' इति द्वितीये अध्याये व्याकरणशास्त्रप्रतिपादितस्य सरस्वतीकण्ठाभरणस्य परिचयः कृतः। सरस्वतीकण्ठाभरणे पाणिनिवत् अष्टौ अध्यायाः, प्रत्यध्यायं चत्वारः पादाः च सन्ति। एवं

भोजव्याकरणे आहत्य ३२ पादेषु ६४३१ सूत्राणि वर्तन्ते। अष्टाध्याय्याः सूत्रसंख्यायाः द्विगुणिता भवतीयम्। तत्र मुख्यं कारणं भवति भोजदेवः गणपाठं न स्वीकरोति इति। तस्मात् गणस्थानां सम्पूर्णानां शब्दानां योजनेन सूत्राणि प्रयुक्तानि इत्यस्मात् तानि सूत्राणि दीर्घतां यान्ति। पाणिनिना एकेन सूत्रेण उक्तं कार्यं साधयितुं भोजदेवेन कुत्रचित् सप्ताधिकानि सूत्राणि प्रयुक्तानि। यथा 'अश्वपत्यादिभ्यश्च' इति पाणिनीयसूत्रं भोजदेवः अश्वपत्यादिगणस्थान् सम्पूर्णान् शब्दानुच्चार्य 'अश्वशतधनगणराष्ट्रकूलगृहपशुधान्यधर्मधन्वन्सभा- प्राणसेनाक्षेत्रादि-पूर्वादण्' इति कृतवान्। पाणिनीयपठने गणपाठः पृथक् पठनीयः। भोजव्याकरणे गणपरिचयं सूत्रादेव प्राप्नोति। सरस्वतीकण्ठाभरणस्य प्रथमं सूत्रं भवति 'सिद्धिः क्रियादेः लोकात्' इति। इदं सूत्रं पाणिनीये न दृश्यते। किन्तु 'सिद्धे शब्दार्थसम्बन्धे' इति कात्यायनकृतं वार्त्तिकमस्ति। जैनेन्द्रव्याकरणस्य प्रथमसूत्रं भवति 'सिद्धिरनेकान्तात्' इति। अनयोः सूत्रवार्त्तिकयोः प्रभावेण इदं सूत्रमुक्तं स्यात्। भाष्यवचनान्यपि सूत्रत्वेन प्रतिपादितानि। यथा पाणिनिना 'भूवादयो धातवः' इत्युक्तस्य सूत्रस्य व्याख्यानावसरे महाभाष्ये 'क्रियावाचिनो धातुः' तथा 'भाववचनो धातुः' इति पतञ्जलिना उक्तम्। भोजेन इदं सूत्रं 'भूवादिः क्रियावचनो धातुः' इत्युक्तम्। एवं पाणिनीयस्य परिष्करणार्थमागतानां भाष्यवार्त्तिकानि भोजदेवेन सूत्रत्वेन स्वीकृतानि।। पाणिनिना अष्टाध्याय्यां यत्र यत्र संज्ञाः प्रतिपादिताः ताः भोजदेवेन सरस्वतीकण्ठाभरणे प्रथमाध्याये एव सन्निवेशिताः। तथापि पाणिनीये संज्ञात्वेन अनुक्तानां कारकतद्धितादीनां संज्ञात्वेन प्रतिपादनं भोजव्याकरणस्य प्रथमाध्याये द्रष्टुं शक्यते। पाणिनिना प्रयुक्ताः सर्वाः संज्ञाः भोजदेवेन न स्वीक्रियन्ते। पाणिनिना कर्मकरणसम्प्रदायादिबह्व्यः संज्ञाः तत्तत् प्रकरणे

एव उक्ताः। किन्तु भोजदेवेन संज्ञाप्रकरणे एव सर्वासां संज्ञानां प्रतिपादनं कृतम्। तासां संज्ञानामध्ययनेन अस्माभिः ज्ञायते यत् पाणिनीयप्रयुक्तानां 'सर्वनामस्थान', 'अपृक्त', 'नदी', 'घि' 'आम्रेडितम्' इत्यादीनां संज्ञानाम् उल्लेखनं भोजेन न कृतं वर्तते इति। एतासां संज्ञानामभावेन पाणिनीयप्रयुक्तकार्याणि भोजेन  सूत्रेणैव साधितम् । तत्रैकमुदाहरणं भवति 'कानाम्रेडिते' इति सूत्रस्थाने 'कानः कानि' इति भोजेनोक्तं सूत्रम्। पाणिनीयव्याकरणस्या-धारेणैव भोजदेवेन सूत्राणि कृतानि चेदपि सूत्रेषु कुत्रचित् भेदाः दृश्यन्ते। यथा 'आदेः परस्य' इति सूत्रं 'परस्यादेः' इत्युक्तम्। एवं प्रकारेण अष्टाध्याय्याः कांश्चन भेदान् प्रदर्श्य सरस्वतीकण्ठा-भरणस्य परिचयः द्वितीये अध्याये कृतः।

'सरस्वतीकण्ठाभरणस्य व्याख्याकाराः' इति भवति तृतीयोऽध्यायः। भोजव्याकरणस्य 'सोपज्ञा व्याख्या', कृष्णलीलाशुकमुनिना कृता 'पुरुषकारः' इति व्याख्या, 'पदसिन्धुसेतु' इति व्याख्या, दण्डनाथकृता 'हृदयहारिणी' इति व्याख्या, गुजरातीभाषया लिखिता डाँ नारायण मा कासारे महाभागेन विरचिता अष्टमाध्यायस्य व्याख्या इति बह्व्यः व्याख्याः सन्ति चेदपि अष्टमाध्यायस्य व्याख्या तथा  हृदयहारिणीव्याख्या एव उपलब्धा। सरस्वतीकण्ठाभरणस्य व्याख्यानेषु दण्डनाथनारायणेन विरचिता भवति हृयहारिणीव्याख्या। अस्याः व्याख्यायाः षष्ठाध्यायपर्यन्तमेव चतुर्षु भागेषु प्रसिद्धीकृतम्। प्रथमभागः द्वितीयभागः तृतीयभागश्च के.साम्बशिवशास्त्रिणः सम्पादनेन अनन्तशयने महोन्नतमहामहिमश्रीचित्रावतारमहाराजशासनेन राजकीयमुद्रणयन्त्रालये तदध्यक्षेण मुद्रयित्वा १९३५, १९३७, १९३८ वर्षयोः प्रकाशितम्।

प्रथमभागे प्रथमाध्यायः, द्वितीयभागे द्वितीयाध्यायश्च अन्तर्भवति। तृतीयभागे तृतीयचतुर्था-वध्यायौ स्तः। १९४८ तमे ट्रिवेन्ड्रम् सर्वकारीयमुद्रणालयात् वि.ए.रामस्वामिशास्त्रिणः सम्पादनेन प्रकाशिते चतुर्थभागे पञ्चमषष्ठाध्यायौ स्तः।

हृदयहारिणीव्याख्यायाः सप्तमाध्यायोऽप्रकाशितः भवति। तस्य हस्तलेखा अडयार्ग्रन्थशालायाः प्राप्तः। तत्र २४२ पुटानि सन्ति। हृदयहारिण्याः सप्तमाध्याययुक्ता पर्णलेखा अनन्तपुर्याः मानुस्क्रिप्ट् ग्रन्थशालायाः प्राप्ता। तत्र सप्तमाध्यायप्रतिपादकानि ४४ पर्णानि सन्ति। सा पर्णलेखा अनन्तपुर्याः राजभवनात् ग्रन्थशालां प्रति नीता। तस्याः पर्णलेखायाः आधारेणैव षष्ठाध्यायपर्यन्तम् अनन्तपुर्याः के. साम्बशिवशास्त्रिणः तथा वि.ए.रामस्वमिशास्त्रिणः सम्पादनेन प्रसिद्धीकृतम्। सप्तमाध्यायस्य मुद्रणाय श्रम कृत इति पर्णलेखायाः पठनेन स्पष्टं ज्ञायते। तत्र केषुचन पर्णेषु 'end of the first /second /third forum' इति दृश्यते। मुद्रितस्य पर्णस्यैव शोधनार्थम् एवं लिखतीति कार्यकर्तॄणां वाक्यात् ज्ञायते। षष्टाध्यायस्य मुद्रणं १९४८ तमे वर्षे आसीत्। तत्समीपे एव कदाचित् षष्ठाध्यायस्य सम्पादकेनैव सप्तमाध्यायस्य मुद्रणाय प्रयत्नः कृतः स्यात्। परन्तु तस्य प्रसिद्धीकरणं येनकेनापि कारणेन नाभवत्।

हृदयहारिण्याम् अध्यायानां विवेकः इत्यस्ति पञ्चमोऽध्यायः। भोजदेवेन पाणिनिवत् चतुर्दशसमाम्नायः स्वीकृतः। किन्तु दण्डनाथेन 'हयवरट् लण्' इति द्वयोः मेलनेन 'हयवरलण्' इति प्रतिपादितम्। पूर्वाचार्यैः वर्णसमाम्नाये कृतेन परिष्कारेण सः प्रभावितः स्यात्।

भोजव्याकरणात् हृदयहारिण्यां कुत्रचित् भेदाः दृश्यन्ते। भोजव्याकरणे प्रथमाध्यायस्य प्रथमपादे 'प्राङ्ण्वुलः कृत्याः' इति सूत्रं प्रतिपादयति। तत्तु दण्डनाथेन 'कृत्याः प्राङ्ण्वुलः' इत्येव उक्तम्। 'निपातोऽव्ययम्' इति भोजसूत्रं हृदयहारिण्यां 'तेऽव्ययम्' इत्येव अस्ति। कुत्रचित् दण्डनाथेन व्याख्यानलाघवार्थं सूत्राणां मेलनं कृतम्। दण्डनाथेन 'सल्लिटौ च' 'लिङाशिषि' इति द्वयोः भोजसूत्रयोः मेलनं कृत्वा 'वर्ज्यं नीभ्यां सन्लिटौ च लिङाशिषि' इति सूत्रमुक्तम्। हृदयहारिण्यां निसो देशे[1], वा भ्रष्टकपिष्टलाभ्याम्[2] तध्वम्भाविनो वा[3] सर्वधातुभ्यो मनिन्[4] राशौ वा[5] इत्यादीनि बहूनि नूतनसूत्राणि दण्डनाथेन प्रयुक्तानि। एवं सूत्रेषु सूत्रसंख्यायां दृश्यमानाः भेदाः चतुर्थे अध्याये उच्यन्ते।

हस्तलिखितपाठस्याध्ययनम् इति पञ्चमे अध्याये भोजव्याकरणस्य सप्तमाध्यायस्य हृदयहारिणीव्याख्यानमेव स्वीकृतम्। पाणिनीयसूत्राणामध्ययनाय बहूनि व्याख्यानानि द्रष्टुं शक्यते। किन्तु भोजव्याकरणाध्ययने आश्रयणाय संस्कृते हृदयहारिणी एव उपलब्धा। तत्तु षष्ठाध्यायपर्यन्तमेव प्रकाशितम्। तस्मात् अप्रकाशितस्य सप्तमाध्यायस्य चयनं कृतम्। भोजव्याकरणस्य सप्तमाध्याये आहत्य ६१९ सूत्राणि सन्ति। किन्तु ६०२ सूत्राण्येव हृदयहारिणीव्याख्यानस्य सप्तमाध्याये द्रष्टुं शक्यते। केषाञ्चन सूत्राणां व्याख्यानं हृदयहारिण्यां

---

1 हृ.हा.१/४/६९

2 हृ.हा.४/१/१९७

3 हृ.हा.२/४/१२६

4 हृ.हा.२/४/२

5 हृ.हा.२/४/६९

न दृश्यते इत्यस्मात् सूत्रसंख्या परिवर्तिता। सप्तमाध्यायस्य प्रथमं सूत्रं भवति 'मृजेर्वृद्धिः' इति। पाणिन्युक्तसूत्राण्याश्रित्य भोजदेवेन सूत्राणि प्रयुक्तानि चेदपि सूत्रवृत्त्यां कुत्रचित् दण्डनाथेन परिवर्तनानि कृतानि। कुत्रचित् दण्डनाथेन भोजसूत्राणां लाघवं कृतम्। पाणिनिना 'समः सुटि', 'पुमः खय्यम्परे', 'नश्छव्यप्रशान्', 'कानाम्रेडिते', इत्यादिभिः सूत्रैः रु इत्यादेशः विधीयते। तेषामाधारेण लिखितानि समः 'सुटि सः', 'पुमो ख्याञि खय्यम्परे', 'नश्छव्यप्रशानः', 'कानः कानि' इत्येतानि। दण्डनाथेन प्रक्रियालाघवार्थम् एतैः सूत्रैः सकारादेशो विहितः। यथा पाणिनीयसूत्राधारेण 'सम् कर्ता' इत्यवस्थायां 'सम्परिभ्यां करोतौ भूषणे'[6] इति सूत्रेण 'सुडागमे' अनुबन्धलोपे 'सम् स् कर्ता' इति जाते 'समः सुटि' इति सूत्रेण 'समः' मकारस्य 'रेफादेशे' 'सर् स् कर्ता' इति जाते 'अत्रानुनासिकः पूर्वस्य तु वा'[7] इति अनुनासिके 'अनुनासिकात्परोऽनुस्वारः'[8] इति 'अनुस्वारे' च 'संर् स् कर्ता' इति जाते ‘सम्पुम्कानां सो वक्तव्यः’ इति सकारे 'संस् स् कर्ता' इति जाते 'समो वा लोपमेके' इति सकारलोपे 'संस्कर्ता' इति रूपम्। अत्र 'समः सुटि सः' इति सूत्रेण दण्डनाथः 'रु' इत्यस्य स्थाने सकारो विधीयते। एवं साक्षात्सकारविधानेन 'खरवसानयोर्विसर्जनीयः', 'विसर्जनीयस्य सः' इति द्वयोः सूत्रयोः प्रवृत्तिरेव नास्ति इति लाघवमस्ति। 'समः सुटि' इति पाणिनीयसूत्रे भोजदेवः सः इत्यपि योजितवान्। तेनैव सकारादेशो अनेन विधीयते इति स्पष्टमस्ति। तथापि व्याख्यानतो विशेषप्रतिपत्तिः सम्भवति। तदनन्तरसूत्रैः अपि सकारादेशः विहितः इति हृदयहारिण्या एव अवगन्तुं शक्यते।

6 पा.सू.६/१/१३७

7 पा.सू.८/३/२

8 पा.सू.८/३/४

भोजोक्तसूत्राणां लाघवाय दण्डनाथेन प्रयत्नः कृतः इति व्याख्यानात् स्पष्टं भवति। यथा 'ङसोऽच्युतो धुड्' इत्यनेन विधायकं 'धुट्' कुत्र भवेत् इति सन्देहस्यावसरं विना सूत्रार्थे पञ्चमीनिर्देशात्परस्य सकारस्य इति स्पष्टीक्रियते। एवमेव 'कुटादीनामञ्णिति' इति सूत्रेण दण्डनाथेन गुणवृद्धिनिषेधः कृतः। पाणिनिना 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति सूत्रेण 'ञ्णितः प्रत्ययाः ङितः स्युः' इत्युक्तम्। ङिदित्यनेन 'क्ङिति च' इत्यस्य प्रयोजनं गुणवृद्धिनिषेध एव। दण्डनाथेन 'ञ्णितः प्रत्ययाः ङितः स्युः' इति कथनापेक्षया 'गुणवृद्धिनिषेधः' उक्तः इत्यस्मात् गुणवृद्धिनिषेधार्थमन्यत्सूत्रं नाश्रयणीयम्। एवं प्रकारेण सूत्रान्तराणामाश्रयणं विना कार्याणि स्पष्टीकर्तुं दण्डनाथः परिश्रमं कृतवान्।

हृदयहारिण्याः अयं सप्तमाध्यायः पिपठिषूनां तावदुपकारकं भवेत् इति मन्ये। अत्र मया केवलं व्याख्यानस्यास्य परिचयो दत्तः। एकैकस्यापि सूत्रस्य व्याख्याने विशेषपठनावसरोऽत्र वर्तते। पूर्ववर्त्तिणां प्रत्येकं सूत्रप्रतिपादनं कथमिति दृष्ट्वा दण्डनाथेनोक्तकार्याणां स्पष्टीकरणं कर्तुं शक्यते। तादृशमहत्त्वपूर्णपठनार्थमयं प्रबन्धः मार्गदर्शको भवितव्यः इति प्रार्थयामि।

# सहायकग्रन्थाः।

**संस्कृतग्रन्थाः।**

अमरकोशः - अमरसिंहः, भानुजिदीक्षितः, व्याख्यासुधा/रामाश्रमीलव्याख्योपेतः, पण्डित शिवदत्तदाधिमथः(संस्कर्ता), चौखम्बासंस्कृतप्रतिष्ठान्, दिल्ली, 2007

अष्टाध्यायीसूत्रपाठः - पाणिनिः, आचार्य सत्यनारायणशास्त्रि खान्दुरि(संस्कर्ता), कृष्णदास् अक्कादमी, वाराणसी, 2001

अष्टाध्यायीसूत्रपाठः - पाणिनेः अष्टाध्यायी, प्रकरणनिर्देशसमेता डा.पुष्पादीक्षित् संस्कृतभारती, नवदिल्ली, 2006

अष्टाध्यायी- पाणिनिः, प्रो.गोपालदत्तपाण्डेयः, चौखम्बासुरभारतीप्रकाशन् , वाराणसी, 2016

उणादिकोशः- (पञ्चपाद्युणादि सूत्रवृत्तिः),सं. प्रो.वि.मुरलीधरशर्मा,राष्ट्रियविदायापीठम्, तिरुप्पतिः,2004

उणादिकोशः-युधिष्ठिरमीमांसकः,शिक्षासमाजकल्याणमन्त्रालयः, 1974

काशिकावृत्तिसारः-(भागः१,२), पण्डित भलबद्रप्रसाद त्रिपाठी, राष्ट्रियसंस्कृतसंस्थान्, नवदिल्ली,1992

काव्यप्रकाशः-श्रीमम्मटाचार्यः,नागेश्वरीटीका, सं.श्रीहरिशङ्करशर्मा,चौखम्बा प्रकाशन्, वाराणसी-2010

धातुपाठः-सं.प्रो.जे.एल.शास्त्री, मोत्तिलाल् बनारसीदास, देहली, 1984

नामलिङ्गानुशासनम्- अमरकोशोद्धणडनाथटीकासंवलितं, क्षीरस्वमी, कृष्णाजीगोविन्द ओखा, पूनै, 1913

निरुक्तम्-यास्कप्रणीतं(निघण्डुसहितम्),विद्यामार्ताण्ड,पं.सीतारामशास्त्री,परिमलपब्लिशर्स, दिल्ली

निरुक्तम्, यास्कप्रणीतम्, सं.एम्.एम्.पं.मुकुन्दझा, चौखम्बा संस्कृतप्रतिष्ठान्, नवदिल्ली,2002

परिभाषेन्दुशेखरः-नागेशभट्टः, सं.श्रीपादसत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुप्पतिः, 2004

पाणिनीयव्याकरणमहाभाष्यम्- पतञ्जलिप्रणीतं, सं.श्रीभार्गवशास्त्री, चौखम्बासंस्कृतप्रतिष्ठानं, दिल्ली, 2004

प्रक्रियासर्वस्वम्-नारायणभट्टपादः, के.पी. नारायणपिषारोटि (संपादकः),गुरुवायूर् देवस्वम्, तृश्शूर्, 1998.

भोजप्रबन्धः-पण्डितवल्लालविरचितः,सं.डा.देवर्षिसनाढ्य शास्त्री, चौखम्बा अमरभारती प्रकाशन्, वाराणसी,1979

भोजप्रबन्धः-पण्डितवल्लालविरचितः,सं.श्रीगङ्गाविष्णुः,लक्ष्मीवेङ्कटेश्वरमुद्रणालयः, कल्याण, मुंबई, 1963

वाचस्पत्यम्-श्री तारानाथतर्कवाचस्पतिः,चौखम्बा सानस्क्रिट् सीरीज,वाराणसी-1991

वैयाकरणभूषणसारः- कौण्डभट्टः, (काशिका-दर्पणसंवलितः), सं. नन्दिकिशोरशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी,2009

वैयाकरणसिद्धान्तकौमुदी- भट्टोजिदीक्षितः, सं.गोपालदत्तपाण्डेयः, चौखम्बा विद्याभवन्, वाराणसी,2004

वैयाकरणसिद्धान्तकौमुदी- (वासुदेवदीक्षिता बालमनोरमाटीका), भट्टोजिदीक्षितः, सं.गोपालदत्तपाण्डेयः, चौखम्बा विद्याभवन्, वाराणसी,2007

शब्दकल्पद्रुमः- राजाराधाकान्तदेवः, नागपब्लिशर्, जवहर्नगर्, दिल्ली, 1988

सरस्वतीकण्ठाभरण-वैदिकव्याकरणम् (अष्टमोऽध्यायः)-भोजदेवः सं.डा.नारायण म. कसारा, राष्ट्रिय वेदविद्या प्रतिष्ठान, नवदिल्ली,1992

सङ्गणकदृष्ट्या शृङ्गप्रकाशस्य नाट्यविषयकाध्यायनामध्ययनम्, डॉं.नारायणदासः, राष्ट्रियस्स्कृतसंस्थान् न्यू देहली,2005

सरस्वतीकण्ठाभरणम् (नारायणदण्डनाथकृता हृदयहारिणीव्याख्या) प्रथमो भागः, भोजदेवः, सं. साम्बशिवशास्त्री, राजकीयमुद्रणालयं, तिरुवनन्तपुरम्, 1935

सरस्वतीकण्ठाभरणम् (नारायणदण्डनाथकृता हृदयहारिणीव्याख्या) द्वितीयो भागः, भोजदेवः, सं. साम्बशिवशास्त्री, राजकीयमुद्रणालयं, तिरुवनन्तपुरम्, 1938

सरस्वतीकण्ठाभरणम् (नारायणदण्डनाथकृता हृदयहारिणीव्याख्या) तृतीयो भागः, भोजदेवः, सं. साम्बशिवशास्त्री, राजकीयमुद्रणालयं, तिरुवनन्तपुरम्, 1938

सरस्वतीकण्ठाभरणम् (नारायणदण्डनाथकृता हृदयहारिणीव्याख्या) चतुर्थो भागः, भोजदेवः, सं. रामस्वामिशास्त्री, राजकीयमुद्रणालयं, तिरुवनन्तपुरम्, 1948

सरस्वतीकण्ठाभरणम्, भोजदेवः, सं.टि.आर् चिन्तामणिः, मद्रपुरीयविश्वविद्यालयः, 1938

संस्कृतसाहित्येतिहासः,सं.आचार्य लोकमणि दाहालः,चौखम्बा कृष्णदास अकादमी, वाराणसी,2011

**हिन्दिग्रन्थाः।**

निरुक्त और उणादी की शब्दनिष्पत्तियां-डाँ. किरण्मयी,बाँकेबीहारी प्रकाशन, वजीरपुरा रोट, आग्रा, 2006

सरस्वतीकण्ठाभरण एक समीक्षात्मक अध्ययन,डाँ. विश्वनाथ गो.शास्तरी, परिमल पब्लिकेशन्स, दिल्ली, 1996

सरस्वतीकण्ठाभरण के भ्रष्टपाठः सत्पाठ निर्धारण, सं.डाँ.रामचन्द्र, परिमल पब्लिकेशन्स, दिल्ली, 2011

सरस्वतीकण्ठाभरण और सिद्धान्तकौमुदी का साङ्गोपाङ्ग विवेचन, सं. डॉ.रामचन्द्र, परिमल पब्लिकेशन्स, दिल्ली, 2010

संस्कृत व्याकरणशास्त्र का इतिहास (प्रथमभाग), युधिष्ठिर मीमांसक, बहलागढ, हरियाना, 2004

राजा भोज का रचना विश्व, डॉ.भगवतीलाल राजपुरोहित, पब्लिकेशन स्कीम, जयपूर, 1990

**आङ्गलेयग्रन्थाः।**

A short history of Sanskrit literature, T.K. Ramachandra Aiyar, R.S. Vadhyar & Sons Booksellers & Publishers, Palakkad,2014

Bhoja's Srngara Prakasa, Dr. V. Raghavan, Srikrishnapuram Street, Madras, 1978

Bhoja's contribution to technical literature Dr. V. Ragavan, Centre for performing arts, Chennai,2006

Bhojaprabandhah, Prof. Vachaspati Upadhyaya, Sri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha, New Delhi.

Bhoja Paramara and his times, Dr. Mahesh Singh, Bharatiya Vidya Prakasan, Varanasi, 1984.

Panini A Survey of Research, Cardona George, MLBD, Delhi, 1980.

The Unadisutras In Various Recensions (PartVI), The Unadisutras Of Bhoja With The Vrtti of Dandanatha Narayana

The Unadisutras of the Katantra School With the Vrtti of Durgasimha, T.R.Chintamani, University of Madras, 1934.

# अष्टाध्यायीसरस्वतीकण्ठाभरणयोः सूत्रसंख्याभेदः ।

| | अष्टाध्यायीसूत्रसंख्या | सरस्वतीकण्ठाभरणसूत्रसंख्या |
|---|---|---|
| प्रथमोऽध्यायः | | |
| प्रथमपादः | ७५ | २१२ |
| द्वितीयपादः | ७३ | १३५ |
| तृतीयपादः | ९३ | २३१ |
| चतुर्थपादः | ११० | २७७ |
| द्वितीयोऽध्यायः | | |
| प्रथमपादः | ७२ | ३४८ |
| द्वितीयपादः | ३८ | २५५ |
| तृतीयपादः | ७३ | १९१ |
| चतुर्थपादः | ८५ | २८३ |
| तृतीयोऽध्यायः | | |
| प्रथमपादः | १५० | ३०४ |
| द्वितीयपादः | १८८ | १६१ |
| तृतीयपादः | १७६ | १४८ |
| चतुर्थपादः | ११७ | १३५ |
| चतुर्थोऽध्यायः | | |
| प्रथमपादः | १७८ | २१२ |
| द्वितीयपादः | १४५ | १४७ |
| तृतीयपादः | १६८ | २६९ |
| चतुर्थपादः | १४४ | २०७ |
| पञ्चमोऽध्यायः | | |
| प्रथमपादः | १३६ | १८० |
| द्वितीयपादः | १४० | २२४ |

| | | |
|---|---|---|
| तृतीयपादः | ११९ | १५६ |
| चतुर्थपादः | १६० | १८९ |
| षष्ठोऽध्यायः | | |
| प्रथमपादः | २२३ | १७५ |
| द्वितीयपादः | १९९ | १८० |
| तृतीयपादः | १३९ | १८३ |
| चतुर्थपादः | १७५ | १९२ |
| सप्तमोऽध्यायः | | |
| प्रथमपादः | १०३ | १४० |
| द्वितीयपादः | ११८ | १५१ |
| तृतीयपादः | १२० | १५० |
| चतुर्थपादः | ९७ | १७८ |
| अष्टमोऽध्यायः | | |
| प्रथमपादः | ७४ | १७४ |
| द्वितीयपादः | १०८ | १४९ |
| तृतीयपादः | ११९ | २६३ |
| चतुर्थपादः | ६८ | २३२ |
| आहत्य | ३९८३ | ६४३१ |

# सरस्वतीकण्ठाभरणस्य हृदयहारिणीव्याख्यायाः सूत्रसंख्याभेदः ।

| | सरस्वतीकण्ठाभरणसूत्रसंख्या | हृदयहारिणीसूत्रसंख्या |
|---|---|---|
| प्रथमोऽध्यायः | | |
| प्रथमपादः | २१२ | २११ |
| द्वितीयपादः | १३५ | १३४ |
| तृतीयपादः | २३१ | २३० |
| चतुर्थपादः | २७७ | २७८ |
| द्वितीयोऽध्यायः | | |
| प्रथमपादः | ३४८ | ३४८ |
| द्वितीयपादः | २५५ | २५५ |
| तृतीयपादः | १९१ | १९० |
| चतुर्थपादः | २८३ | २८५ |
| तृतीयोऽध्यायः | | |
| प्रथमपादः | ३०४ | ३०७ |
| द्वितीयपादः | १६१ | १६४ |
| तृतीयपादः | १४८ | १५० |
| चतुर्थपादः | १३५ | १३५ |
| चतुर्थोऽध्यायः | | |
| प्रथमपादः | २१२ | २१२ |
| द्वितीयपादः | १४७ | १५२ |
| तृतीयपादः | २६९ | २७२ |
| चतुर्थपादः | २०७ | २०८ |
| पञ्चमोऽध्यायः | | |
| प्रथमपादः | १८० | १८२ |
| द्वितीयपादः | २२४ | २२७ |

| | | |
|---|---|---|
| तृतीयपादः | १५६ | १५७ |
| चतुर्थपादः | १८९ | १८९ |
| षष्ठोऽध्यायः | | |
| प्रथमपादः | १७५ | १७५ |
| द्वितीयपादः | १८० | १८५ |
| तृतीयपादः | १८३ | १८१ |
| चतुर्थपादः | १९२ | १९२ |
| सप्तमोऽध्यायः | | |
| प्रथमपादः | १४० | १३८ |
| द्वितीयपादः | १५१ | १४८ |
| तृतीयपादः | १५० | १५० |
| चतुर्थपादः | १७८ | १६६ |

# हृदयहारिण्याः प्रतिपाद्यविषयाः ।

## सप्तमोऽध्यायः
## प्रथमः पादः ।

### वृद्धिविधायकानि सूत्राणि ।

| क्रम संख्या | सूत्रसंख्या | सूत्रम् | उदाहरणानि |
|---|---|---|---|
| १ | ७/१/१ | मृजेर्वृद्धिः (इकोवृद्धिः) | मार्ष्टि, मार्ष्टा, मार्ष्टव्यम्, मार्जिता |
| २ | ७/१/३ | अजागृणिश्वीनाम् सिचि परस्मैपदेषु (इकोवृद्धिः) | अकार्षीत्, अचैषीत्, अनैषीत्, अस्तावीत्, अलावीत् |
| ३ | ७/१/४ | हलोऽचः(अलः वृद्धिः) | अपाक्षीत्, अधाक्षीत्, अभैक्षीत्, अरौत्सीत्, अताप्सीत् |
| ४ | ७/१/८ | व्रजवदर्लान्नित्यम् | व्याख्या अपूर्णा |
| ५ | ७/१/९ | ञ्णिति (उपधावृद्धिः) | पाचकः |
| ६ | ७/१/१० | अचः(अचः वृद्धिः) | चायः - चायकः, नायः - नायकः, भावः - भावकः, कारः -कारकः |
| ७ | ७/१/११ | किति च तद्धितेऽचामादेः (अचः वृद्धिः) | नाडायनः, ऐतिकायनः, रैवतिकः, रौहिणेयः, गार्ग्यः दाक्षिः, वासिष्ठः |
| ८ | ७/१/१२ | केकयमित्रयुप्रलयानां यादेरियश्च(अचः वृद्धिः) | कैकेयः, मैत्रेयः, प्रालेयम् |
| ९ | ७/१/१८ | न णचः (ऐजागमाभावे, आदिवृद्धिः) | व्यावक्रोशी, व्यावलेखी, व्यावचर्ची, व्यावहासी |
| १० | ७/१/१९ | स्वागतस्वध्वरखङ्गव्यङ्गव्यड- | स्वागतिकः, स्वाध्वारिकः, |

| क्रम संख्या | सूत्रसंख्या | सूत्रम् | उदाहरणानि |
|---|---|---|---|
| | | व्यवहारव्यायामानाम् (ऐजागमाभावे, आदिवृद्धिः) | स्वाङ्गिकः, व्याङ्गिः, व्याडिः,व्यावहारिकः, व्यायामिका |
| ११ | ७/१/२० | श्वादेरिति (ऐजागमाभावे, आदिवृद्धिः) | श्वाभस्त्रिः, श्वागणिकः, श्वायूथिकः, |
| १२ | ७/१/२१ | इञः (ऐजागमाभावे, आदिवृद्धिः) | श्वाभस्त्रम्, श्वाकर्णम् |
| १३ | ७/१/२४ | गुरुलघुसंहतपदार्थोर्ध्व-मुहूर्तादीनाम् उत्तरपदस्य (उत्तरपदवृद्धिः) | गुरुलाघवम्, संहतपादार्थम्, ऊर्ध्वमौहूर्त्तिकः |
| १४ | ७/१/२५ | अवयवादृतोः (उत्तरपदवृद्धिः) | पूर्ववार्षिकः, अपरवार्षिकः |
| १५ | ७/१/२६ | सुसर्वार्धेभ्यो जनपदस्य (उत्तरपदवृद्धिः) | सुपाञ्चालकः, सर्वपाञ्चालकः, अर्धपाञ्चालकः सुमागाधकः सर्वमागधकः अर्धमागधकः |
| १६ | ७/१/२७ | अमन्द्राणां दिशः (उत्तरपदवृद्धिः) | पूर्वपाञ्चालकः, अपरपाञ्चालकः |
| १७ | ७/१/२८ | प्राचां ग्रामनगराणाम् (उत्तरपदवृद्धिः) | पूर्वकार्ष्णमृत्तिकः पूर्वकान्यकुब्ज, अपरकान्यकुब्जः |
| १८ | ७/१/२९ | संख्याधिकाभ्यां संख्यायाः (उत्तरपदवृद्धिः) | द्विषाष्टिकः, द्विसाप्ततिकः, अधिकषाष्टिकः, अधिकसाप्ततिकः |
| १९ | ७/१/३० | संवत्सरपरिमाणस्याशाण-कुलिजस्यासंज्ञायाम् (उत्तरपदवृद्धिः) | द्विसांवत्सरिकः, त्रिसांवत्सरिकः, अधिकसांवत्सरिकः |
| २० | ७/१/३१ | वर्षस्याभाविनि (उत्तरपदवृद्धिः) | द्विवार्षिकः, अधिकवार्षिकः |

| क्रम संख्या | सूत्रसंख्या | सूत्रम् | उदाहरणानि |
|---|---|---|---|
| २१ | ७/१/३२ | जाते प्रोष्ठभद्राभ्यां पदस्य (उत्तरपदवृद्धिः) | प्रोष्ठपादः, भद्रपादः |
| २२ | ७/१/३३ | हृद्भगसिन्धोः पूर्वपदस्य च (पूर्वोत्तरपदवृद्धिः) | सौहार्द्यम् |
| २३ | ७/१/३४ | अनोः शतिकहोडसंवरणर-हत्संवत्सराणाम् (पूर्वोत्तरपदवृद्धिः) | आनुशातिकम्, आनुहौडिकः, आनुसांवरणिकम्, आनुराहतिः, आनुसांवत्सरिकम् |
| २४ | ७/१/३५ | कुरोः कतपञ्चालयोः (पूर्वोत्तरपदवृद्धिः) | कौरुकात्यः, कौरुपाञ्चालः |
| २५ | ७/१/३६ | अधेर्देवभूतयोः (पूर्वोत्तरपदवृद्धिः) | आधिदैविकम्, आधिभौतिकम् |
| २६ | ७/१/३७ | इहपराभ्यां लोकस्य (पूर्वोत्तरपदवृद्धिः) | ऐहलौकिकम्, पारलौकिकम् |
| २७ | ७/१/३८ | सर्वाद्भूमिपुरुषयोश्च (पूर्वोत्तरपदवृद्धिः) | सार्वभौमः, सार्वपौरुषम्, सार्वलौकिकः |
| २८ | ७/१/३९ | अस्याद्धस्यहेत्योः (पूर्वोत्तरपदवृद्धिः) | आस्यहैतिकम्, |
| २९ | ७/१/४० | वध्योगप्रयोगाभिगमागारवेणु-परस्त्रीपुष्करसदुदकशुद्धसूत्रनड-चतुर्विद्यासिहत्याशातकुम्भसुखशयनादीनां च (पूर्वोत्तरपदवृद्धिः) | व्याख्या not clear |
| ३० | ७/१/४१ | राजपुरुषपरिमण्डलप्रतिभूसर्वदेवानां ष्यञि (पूर्वोत्तरपदवृद्धिः) | राजपौरुष्यम्, पारिमाण्डल्यम्, प्रातिश्राव्यम्, सार्ववैद्यम् |
| ३१ | ७/१/४२ | प्राचां नगरान्तस्य (पूर्वोत्तरपदवृद्धिः) | सौह्मनागरः, पौण्ड्रनागरः |
| ३२ | ७/१/४३ | देवतानां द्वन्द्वे सूक्तहविषोः (पूर्वोत्तरपदवृद्धिः) | आग्नावैष्णवम्, ऐन्द्रापौष्णः, आग्निमारुतम्, आग्निवारुणीम् |

| क्रम संख्या | सूत्रसंख्या | सूत्रम् | उदाहरणानि |
|---|---|---|---|
| ३३ | ७/१/४५ | अर्धात्परिमाणस्य पूर्वस्य तु वा (उत्तरपदवृद्धिः पूर्वपदस्य विकल्पेन वृद्धिः) | अर्धद्रौणिकम् / आर्धद्रौणिकम्, अर्धकौडविकम् / आर्धकौडविकम् |
| ३४ | ७/१/४७ | प्राद्वाहनस्यढे (उत्तरपदवृद्धिः पूर्वपदस्य विकल्पेन वृद्धिः) | प्रवाहणेयः/प्रावाहणेयः |
| ३५ | ७/१/४८ | ढस्य च (उत्तरपदवृद्धिः पूर्वपदस्य विकल्पेन वृद्धिः) | प्रावाहणेयिः /प्रवाहणेयिः, प्रावाहणेयकम् / प्रवाहणेयकम् |
| ३६ | ७/१/४९ | नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् (उत्तरपदवृद्धिः पूर्वपदस्य विकल्पेन वृद्धिः) | अशौचम् /आशौचम्, अनैश्वर्यम् /आनैश्वर्यम्, अक्षेत्रज्ञम् /आक्षेत्रज्ञम्, अकौशलम् /आकौशलम् अनैपुण्यम् /आनैपुण्यम् |
| ३७ | ७/१/५० | यथातथयथापुरयोः पर्यायेण (कदाचित्पूर्वपदस्य कदाचिदुत्तरपदस्य वृद्धिः) | अायथातथ्यम् / अयाथातथ्यम्, आयथापुर्यम् / अयाथापुर्यम् |

**विकल्पेन वृद्धिविधायकानि, वृद्धिनिषेधकानि च सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/१/२ | ऋतोऽचि वा (वृद्धिविकल्पः) | परिमार्जन्ति /परिमृजन्ति परिमार्जन्तु /परिमृजन्तु |
| २ | ७/१/५ | नेटि (वृद्धिनिषेधः) | अदेवीत्, अकोषीत् |
| ३ | ७/१/६ | वोर्णोः (वृद्धिविकल्पः) | प्रौर्णावीत् /पौर्णवीत् |
| ४ | ७/१/७ | हलादेरह्यन्तक्षणश्वसेदितोऽत उपधायाः (वृद्धिविकल्पः) | अकर्णीत् /अकार्णीत् अरणीत् /अराणीत् |
| ५ | ७/१/१३ | देवीकाशिंशपादीर्घसत्रश्रेयसां तत्प्राप्तावात् (वृद्धिप्रसङ्गे आकारादेशः) | दाविकमुदकम्, पूर्वदाविकः |
| ६ | ७/१/१४ | वहीनरस्यैत् (वृद्धिप्रसङ्गे अच एकादेशः) | वैहीनरिः |

| | | | |
|---|---|---|---|
| ७ | ७/१/१५ | य्वः पदान्तात्प्रागैच् (वृद्धिप्रसङ्गे यकारवकारयोः ऐकारौकारादेशः) | वैयाकरणः, नैयायिकः, सौवग्रामिकः, सौवश्वः |
| ८ | ७/१/१६ | द्वारस्वरस्वस्तिस्वादुमृदुव्यल्क-शश्वन्स्फ्यकृतस्वस्वाध्यायस्वग्रामाणाम् (वृद्धिनिषेधः, ऐजागमः) | दौवारिकः, सौवरः, सौवः |
| ९ | ७/१/१७ | न्यग्रोधस्य केवलस्य (वृद्धिनिषेधः, ऐजागमः) | नैयग्रोधश्चमसः |
| १० | ७/१/४४ | नेन्द्रस्य परस्य (वृद्धिनिषेधः) | आग्नेन्द्रम्, सौमेन्द्रम् |
| ११ | ७/१/४६ | नातः (उत्तरपदवृद्धिनिषेधः पूर्वपदवृद्धिविकल्पः) | भार्या / भार्यः |
| १२ | ७/१/५३ | नमस्सेटोवृद्धिखम्यमिकम्याचमः (वृद्धिनिषेधः) | अशमि, अतमि, शमकः, तमकः |
| १३ | ७/१/५४ | उद्यमोपरमौ (वृद्धिनिषेधः) | उद्यमः, उपरमः |
| १४ | ७/१/५५ | जनिवन्ध्योः (वृद्धिनिषेधः) | अजनि, जनकः, अजनकः, अवधि, वधकः, वधः, वधिः |
| १५ | ७/१/५६ | विश्रमेर्वा (वृद्धिविकल्पः) | व्यश्रमि/व्यश्रामि, विश्रमः / विश्रामः |
| १६ | ७/१/५७ | णल्युत्तमे (वृद्धिविकल्पः) | अहं पपच /अहं पपाच, अहं ममद /अहं ममाद |

**आगमसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/१/२२ | पदान्तस्यानिति वा (विकल्पेन ऐजागमः) | श्वापदम् / शौवापदम् |
| २ | ७/१/२३ | न्यङ्कोश्च(विकल्पेन ऐजागमः) | Vyakhya not clear |
| ३ | ७/१/५२ | आतो युक् चिण् कृतोः (युगागमः) | |

| | | | |
|---|---|---|---|
| ४ | ७/१/५८ | ऋह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (पुगागमः) | अर्पयति, ह्रेपयति, व्लेपयति, रेपयति, क्नोपयति, क्ष्मापयति, दापयति, कापयति, अध्यापयति |
| ५ | ७/१/५९ | शाच्छासाह्वाव्यावेपां युक् (युगागमः) | निशाययति, अवछाययति, अवसाययति, ह्वाययति, संख्याययति, वाययति, पाययति, |
| ६ | ७/१/६० | वो विधूनने जुक् (जुगागमः) | उपवाजयति |
| ७ | ७/१/६१ | धूञ्प्रीञोर्नुक् (नुगागमः) | धूनयति, प्रीणयति, |
| ८ | ७/१/६२ | लियस्नेहद्रवीकरणे वा (विकल्पेन नुगागमः) | विलीनयति /विलाययति |
| ९ | ७/१/६३ | लो लुक् (विकल्पेन लुगागमः) | विलालयति / विलापयति |
| १० | ७/१/६४ | पातेः(लुगागमः) | पालयति |
| ११ | ७/१/६५ | भियो हेतुभये षुक् (षुगागमः) | मुण्डो भीषयते, जटिलो भीषयते |
| १२ | ७/१/१३७ | सृजिदृशोर्झल्यं गुणवृद्धिप्रसङ्गे (आमागमः) | स्रष्टा, स्रष्टम्, द्रष्टा, अद्राक्षीत् |
| १३ | ७/१/१३८ | स्पृशमृशकृशतृपदृपसृपां वा (विकल्पेन अमागमः) | स्पृष्टा/स्पर्ष्टा, मृष्टा/मर्ष्टा, कृष्टा/कर्ष्टा, तृप्ता/तर्प्ता, दृप्ता/दर्प्ता, सृप्ता/सर्प्ता |

**आदेशसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/१/५१ | हनस्तोऽचिण्णलोः(तकारादेशः) | घातयति, घातः |
| २ | ७/१/६६ | स्फायो वः (वकारादेशः) | स्फावयति |
| ३ | ७/१/६७ | शब्देरगतौ तः (तकारादेशः) | शातयति |
| ४ | ७/१/६८ | रुहेः पो वा (विकल्पेन पकारोऽन्तादेशः) | रोपयति / रोहयति |
| ५ | ७/१/७८ | उत्र्ह्रत् (विकल्पेन ऋकारादेशः) | अचीकृतत् /अचिकीर्तत्, अवीवृतत् / अववर्तत् |
| ६ | ७/१/७९ | घ्र इत् (विकल्पेन इकारादेशः) | अजिघ्रिपत् /अजिघ्रपत् |
| ७ | ७/१/८० | स्थः (इकारादेशः) | अतिष्ठिपत्, अतिष्ठिपताम् |
| ८ | ७/१/८१ | पिबः पीप्यः साभ्यासस्य (पीप्यादेशः) | अपीप्यत्, अपीप्यताम् |
| ९ | ७/१/८२ | देङो दिगि लिटि (दिग्यादेशः) | अवदिग्ये, अवदिग्याते, अवदिग्यिरे |
| १० | ७/१/८४ | प्रत्ययस्तात् कात्पूर्वस्यात इदाप्यसुपः(इकारादेशः) | कारिका (व्याख्या अपूर्णा) |
| ११ | ७/१/८५ | मामकनरकयोश्च (इकारादेशः) | मामिका, नरिका |
| १२ | ७/१/८६ | अधातुत्यक्त्यप्यकाभ्या-माप्स्थानस्य वा (विकल्पेन इकारादेशः) | इभ्यका/इभ्यिका, क्षत्रियिका/क्षत्रियका, चटकिका/चटकका, मूषिकिका/ मूषिकका |
| १३ | ७/१/८७ | भस्त्रैषाजाज्ञाद्वास्वानाम् (विकल्पेन इकारादेशः) | अभस्त्रका /अभस्त्रिका, एषका |

| | | | |
|---|---|---|---|
| | | | / एषिका, अजका /अजिका, अनजका / अनजिका, ज्ञका / ज्ञिका, अज्ञका /अज्ञिका, द्वके /द्विके, स्वका /स्विका, अस्वका /अस्विका |
| १४ | ७/१/८८ | अभाषितपुंस्कादा च (विकल्पेन आकार /इकारादेशः) | खट्वा,खट्वाका, खट्विका, खट्वका, अखट्वा, अखट्वाका, अखट्विका, अखट्वका |
| १५ | ७/१/८९ | वर्तकाशकुनौ (विकल्पेन इकारादेशः) | वर्तका शकुनिः/ वर्तिका शकुनिः |
| १६ | ७/१/९० | सूतकापत्रकावृन्दारकाः (विकल्पेन इकारादेशः) | सूतका / सूतिका, पुत्रका / पुत्रिका, वृन्दारका /वृन्दारिका |
| १७ | ७/१/९८ | चजोः कुघिण्यतोः (कवर्गान्तादेशः) | घिति-पाकः, त्यागः णिति - पाक्यम्, भाग्यम् |
| १८ | ७/१/९९ | न्यङ्गिमस्जिभ्रस्जीनामौ (कवर्गादेशः) | व्यतिषङ्गः, अनुषङ्गः, न्यङ्कुः |
| १९ | ७/१/१०० | तञ्चिवञ्चोरकि (कवर्गादेशः) | तक्रम्, वक्रम् |
| २० | ७/१/१०१ | पचेर्दूरादिभ्यो णे (कवर्गादेशः) | दूरेपाकः, दूरेपाका, दूरेपाकुः, क्षणेपाकः, क्षणेपाकुः |
| २१ | ७/१/१०२ | कपोतोलूकश्वमां-सेभ्योऽणि(कवर्गादेशः) | कपोतपाकः, उलूकपाकः, श्वपाकः, मांसपाकः |
| २२ | ७/१/१०३ | उचः के गुणश्च | न्योकः संरुतः, |

| | | | |
|---|---|---|---|
| | | (कवर्गादेशः को गुणश्च) | न्योकः वृक्षः |
| २३ | ७/१/१०४ | शुचिरुच्योर्घञि (कवर्गादेशः) | शोकः, रोकः |
| २४ | ७/१/१०५ | मिहेर्हस्याचि संज्ञायाम् (कवर्गादेशः) | मेघः, घनः |
| २५ | ७/१/१०६ | वहेः संप्रसारणं चानुपर्गस्य (कवर्गादेशः) | ओघः प्रवाहः |
| २६ | ७/१/१०७ | दहेर्न्यवाभ्यां घञि (कवर्गादेशः) | निदाघः, अवदाघः |
| २७ | ७/१/१०८ | अर्हः(कवर्गादेशः) | अर्घः |
| २८ | ७/१/१०९ | हन्तेर्ञ्णिति(कवर्गादेशः) | घातुकः, घातयति |
| २९ | ७/१/११० | उपधालोपे च (कवर्गादेशः) | घ्नन्ति, अघ्नन्, स्वघ्नः |
| ३० | ७/१/१११ | द्वित्वहेतौ(कवर्गादेशः) | जिघांसति, जङ्घन्यतेः, जघनिथ |
| ३१ | ७/१/११२ | हेरचङि(कवर्गादेशः) | प्रजिघाय, प्रजिघीषति, प्रजेघीयते |
| ३२ | ७/१/११३ | सन्लिटोर्जेः(कवर्गादेशः) | जिगीषति, जिगाय, विजिग्ये |
| ३३ | ७/१/१२४ | रुहेर्विन्यग्भ्यां क्विबचोर्धः (धकारादेशः) | न्यग्रोधः |
| ३४ | ७/१/१३१ | इषुगमियमां छः (शकारान्तादेशः) | इच्छति, व्यतीच्छति, गच्छति, सङ्गच्छते, आयच्छति, आयच्छते |
| ३५ | ७/१/१३२ | प्राघ्राध्मास्थाम्नादाण्द्दृश्यर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः(पिबादयादेशाः) | पिबति, उत्पिबः, जिघ्रति, उज्जिघ्रः, उद्धमः, तिष्ठति, उत्तिष्ठमानः, आमनति, |

| | | | |
|---|---|---|---|
| | | | आमनमानः, प्रयच्छति, सम्प्रयच्छमानः, पश्यति, उत्पश्य, ऋच्छति, समृच्छमानः, शीयते, शीयमानः |
| ३६ | ७/१/१३३ | सर्वेर्धावो वेगितायां गतौ (धावादेशः) | धावति |
| ३७ | ७/१/१३४ | ज्ञाजनोर्जा (जादेशः) | जानाति, जानीते, जानानः, जायते, जायमानः, |
| ३८ | ७/१/१३६ | मिदेरेत् (एकारादेशः) | मेद्यति, मेद्यतः |

**ह्रस्वविधायकानिसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/१/६९ | मितां ह्रस्वः | घटयति, व्यथयति, ज्वरयति, हिडयति, जनयति, रमयति |
| २ | ७/१/७० | चिण्णमुलोदीर्घश्च (विकल्पः) | अघाटि / अघटि<br>घाटं घाटं /घटं घटं<br>अशामि / अशमि<br>शामं शामं /शमं शमं |
| ३ | ७/१/७१ | छादेर्घेऽद्व्याद्युपसर्गस्य | उरच्छदः, दन्तछदः, प्रच्छदः, परिछदः |
| ४ | ७/१/७२ | इस्मन्त्रन्क्विषु | छदि, छद्म, छत्रम्, उपच्छत् |
| ५ | ७/१/७३ | चङ्युपधायाः | अचीकरत्, अपीपचत् |
| ६ | ७/१/७४ | णेश्च | परिवादकः |
| ७ | ७/१/७६ | भ्राजभासभाषदीपजीव-मीलपीडां वा (विकल्पः) | अबभ्राजत् / अबिभ्रजत्<br>अबभासत् / अबीभसत्<br>अबभाषत् /अबीभषत्<br>अदिदीपत् / अदीदिपत्<br>अजिजीवत् /अजीजिवत्<br>अमिमीलत् /अमीमिलत् |

| | | | |
|---|---|---|---|
| | | | अपिपीडत् / अपीपिडत् |
| ८ | ७/१/७७ | कणवणभणश्रणलपह्वेञां च (विकल्पः) | अचीकणत् /अचकाणत् अवीवणत् / अववाणत्<br>अबीभणत् / अबभाणत् अशिश्रणत् / अशश्राणत् अलीलपत् / अललापत् अजूहवत् / अजुहावत् |
| ९ | ७/१/८३ | ह्लादेः ह्लत् क्तिन्निष्ठयोः | व्याख्या अपूर्णा |
| १० | ७/१/१३५ | ष्वादीनां ह्रस्वः | पुनाति, लुनाति, स्तृणाति |

**दीर्घविधायकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/१/१२८ | शमामष्टानां श्ये दीर्घः | शाम्यति, ताम्यति, दाम्यति, श्राम्यति, भ्राम्यति, क्षाम्यति, क्लाम्यति, माद्यति |
| २ | ७/१/१२९ | ष्ठिवुक्लम्वाचमां शिद्विकरणे | ष्ठावति, क्लामति |
| ३ | ७/१/१३० | क्लमः परस्मैपदेषु | क्रामति, आक्रमति |

**निषेधसूत्राणि**

| | | | |
|---|---|---|---|
| १ | | न णचः(ऐजागमनिषेधः) | व्यवलेखी, व्यावचर्ची, व्यावहासी |
| २ | ७/१/१९ | स्वागतस्वधरस्वङ्गः (ऐजागमनिषेधः) | स्वागतिकः, स्वाध्वरिकः, स्वाङअगिकः, व्याङ्गिः, व्याडिः,व्यावहारिकः |
| ३ | ७/१/२० | श्वादेरिति (ऐजागमनिषेधः) | श्वारविकः, श्वगणिकः,श्वायूथिकः |
| ४ | ७/१/७५ | नाग्लोपि शास्तृदिताम् (ह्रस्वःनिषेधः) | अमृष्टवान्, अन्वनुलोमत्, आख्यातवान्, अरराजत् |
| ५ | ७/१/९१ | न यत्तत्यकानाम् (इत्वम्) | यका, सका, यकामधीमहे, तकां पचामहे, उपत्यका, अधित्यका |

| | | | |
|---|---|---|---|
| ६ | ७/१/९२ | आशिषि (इत्वम्) | जीवका, जीविताम्, नन्दका, नन्दताम् |
| ७ | ७/१/९३ | उत्तरपदलोपे (इत्वम्) | अनुकम्पिता देवदत्ता, देवदत्तका यज्ञका |
| ८ | ७/१/९४ | क्षिपकाध्रुवकाधुवकालहका-चरकाचटकेष्टकैडकैरकाकरका-बकालकादण्डकापिप्पकाकन्य-कामेनकादीनाम् (इत्वम्) | क्षिपका, ध्रुवका, धुवका, लहका,चरका, चटका, इष्टका, एडका, एरका, करका, अवका, अलका, दण्डका, पिप्पका, कन्यका, मेनका |
| ९ | ७/१/९५ | तारका ज्योतिषि (इत्वम्) | तारका |
| १० | ७/१/९६ | वर्णका तान्तवे (इत्वम्) | वर्णका |
| ११ | ७/१/९७ | अष्टका पितृदेवत्ये (इत्वम्) | अष्टका |
| १२ | ७/१/११४ | चेर्वा(विकल्पेन कुत्वम्) | चिकीर्षति/चिचीषति, चिकाय/चिचाय, चिक्ये/चिच्ये |
| १३ | ७/१/११५ | न क्वाद्यजिव्रज्यादेः निष्ठायां सेटः (कुत्वम्) | उत्कोचः, उत्कोच्यम्, कूजः, कूज्यम्, खर्ज्यः, खर्ज्यम्, गर्जः, गर्ज्यम्, उदाजः, समाजः, परिव्राजः, परिव्राज्यम् |
| ११ | ७/१/११६ | भुजन्युब्जौ बाहूपतापयोः (कुत्वनिषेधः, गुणाभावश्च) | भुजः, न्युब्जः |
| १२ | ७/१/११७ | वञ्चेर्गतौ (कुत्वम्) | वञ्च्यम्, गम्यम् |
| १३ | ७/१/११८ | प्रयाजानूयाजोपांशुयाज-पत्नीसंयाजर्तुयाजा यज्ञाङ्गे (कुत्वम्) | प्रयाजाः, उपांशुयाजाः, पत्नीसंयाजाः, ऋतुयाजः |
| १४ | ७/१/११९ | ण्य आवश्यके (कुत्वम्) | अवश्यवाच्यम्, अवश्यरेच्यम्, अवश्यभाज्यम् |
| १५ | ७/१/१२० | प्रवचयजत्यजाम् (कुत्वम्) | प्रवाच्यम्, याज्यम्, त्याज्यम् |
| १६ | ७/१/१२१ | वचोऽशब्दसंज्ञायाम् (कुत्वम्) | वाच्यम् |
| १७ | ७/१/१२२ | निप्राभ्यां युजः शक्ये (कुत्वम्) | नियोज्यः, प्रयोज्यः |
| १८ | ७/१/१२३ | भोज्यमन्ने (कुत्वम्) | भोज्यमन्नम्, भोज्यः यवागुः |

**लोपविधायकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/१/१२५ | ओतो लोपः श्यनि | द्यो अवद्यति, शोभ्यति, छो अवछ्यति, सो अवस्यति |
| २ | ७/१/१२६ | क्सस्याचि (धकारादेशश्च) | अधुक्षाताम्, अधुक्षाथाम्, अधिक्षाताम्, अधिक्षाथाम् |
| ३ | ७/१/१२७ | लुग्वादुहदिहलिहगुहिभ्य आत्मनेपदे दन्त्ये (विकल्पेन) | अदुग्ध, अधुक्षथाः, अदिग्ध, अधिक्षत, अलीढ, अलिक्षत |

# सप्तमोऽध्यायः।

## द्वितीयपादः

**गुणविधायकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/२/१ | सार्वधातुकार्धधातुकयोः | जयति, भवति, तरति, तनोति |
| २ | ७/२/२ | जुस्पुकोः | अविभयुः, अजुहवुः, ऐयरुः, अजागरुः, हेपयति, क्नोपयति, अर्पयति |
| ३ | ७/२/३ | जागुरक्स्काने किति | जागरितः, जागरितवान्, जागर्यते, जागर्यात् |
| ४ | ७/२/४ | अचिण्णलिञिणिति | जागरः, जागरकः, |
| ५ | ७/२/५ | लघोरुपधायाः | वेत्ति, दोग्धि, ननर्त |
| ६ | ७/२/१३ | ऊर्णोर्वा(विकल्पेन) | प्रोर्णुविता/प्रोर्णविता |
| ७ | ७/२/१६ | उदुपधस्य शब्वतो भावादिकर्मणोर्वा (विकल्पः) | द्युतितम् / द्योतितम् प्रद्युतितः / प्रद्योतितः मुदितम् /मोदितम् प्रमुदितः / प्रमोदितः |
| ८ | ७/२/१८ | ऋततृषमृषकृशां वा (विकल्पेन) | ऋतित्वा/अर्तित्वा, तृषित्वा/तर्षित्वा, मृषित्वा/मर्षित्वा, कृशित्वा/कर्शित्वा |
| ९ | ७/२/१९ | रलोर्हलादेरिदुदुपधस्य सनि च(विकल्पेन) | लिखित्वा/लेखित्वा, लिलिखिषति/लिलेखिषति, द्युतित्वा /द्योतित्वा, दिद्युतिषते / दिद्योतिषते |
| १० | ७/२/४६ | इदुतोर्गुणः | हे अग्ने, हे वायो,हे बुद्धे, हे धेनो, हे वारे, |

| | | | |
|---|---|---|---|
| | | | हे त्रपो |
| ११ | ७/२/४७ | जसि च | अग्नय, वायवः, बुद्धयः, धेनवः |
| १२ | ७/२/४८ | ङित्यसख्युः | अग्नये, अग्नेरागच्छति, अग्नेः स्वम् , वायवे, वायोरागच्छति, वायोः स्वम् |
| १३ | ७/२/४९ | पत्युस्समास एव | बृहस्पतये, बृहस्पतेरागच्छति, बृहस्पतेः स्वम् |
| १४ | ७/२/५० | स्त्रियां वा | बुद्धये, बुद्ध्यै, धेनवे, धेन्वै, बुद्धेः, बुद्ध्याः, धेनोः, धेन्वा, शुचये, शुच्यै, पटवे, पट्व्यै |
| १५ | ७/२/६१ | ऋतो ङिसुटोर्गुणः | पितरि, पितरौ, पितरः, पितरं. पितरौ, मातरि, मातरौ, मातरः, मातरं, मातरौ |
| १६ | ७/२/६२ | संयोगादेर्लिटि | सस्मरतुः, सस्मरुः, सस्वरतुः, सस्वरुः |
| १७ | ७/२/६३ | ऋद्दच्छृणाम् | विचकरतुः, विचकरुः, आनर्च्छे, आनर्च्छतु, आनर्च्छुः |
| १८ | ७/२/६४ | श्रृद्दप्रां ह्रस्वश्च | विशश्रतुः, विशश्रुः, विशशरतुः, विशशरुः, विदद्रतुः, विदद्रुः, विददरतुः, विददरुः, निपप्रतुः,निपप्रुः, निपपरतुः, निपपरुः |
| १९ | ७/२/६५ | ऋद्दशोऽङि | आरत्, आरताम्, असरत्, असरताम्, अजरत्, अजरताम्, अदर्शत्, अदर्शताम्। |
| २० | ७/२/८० | असुद्वंयोगाद्यर्त्योर्गुणः | स्मर्यते, स्मर्यात्, स्वर्यते, स्वर्यात्, |
| २१ | ७/२/८१ | यङि च | सास्मर्यते, सास्वर्यते, आरार्यते |
| २२ | ७/२/१२८ | निजिविजिविषां गुणः श्लौ | नेनेक्ति, नेनिक्ते, वेवेक्ति, वेविक्ते, वेवेष्टि, वेविष्टे |
| २३ | ७/२/१३३ | गुणो यङ् लुकोः | चेचीयते, लोलूयते, बेभिद्यते, बोभुज्यते, वेण्यः, लोलुपः, बोभवीति, रोरवीति |

**आगमसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/२/३० | तृणह इम् (इमागमः) | तृणेति, तृणेक्षि, तृणेह्मि |
| २ | ७/२/३१ | ब्रुवोरनहेरीट् (ईडागमः) | ब्रवीति, ब्रवीषि, ब्रवीमि |
| ३ | ७/२/३३ | अभ्वस्तिसिज्भ्यामपृक्तस्य | आसीत्, आसीः, अकार्षीत्, अकार्षीः |

| | | | |
|---|---|---|---|
| | | (ईडागमः) | |
| ४ | ७/२/३४ | रुदिस्वपिश्वस्यनिजाक्षिभ्योऽट् च (ईडागमः आडागमश्च) | अरोदत्, अरोदीत्, अस्वपत्, अस्वपीत्, अश्वसत्, अश्वसीत्, प्राणात्, प्राणीत्, अजक्षत्, अजक्षीत् |
| ५ | ७/२/३५ | अदः(ईडागमः) | अत्ति, अत्सि |
| ६ | ७/२/५१ | स्त्रीयूभ्यां चाट् (आडागमः) | कुमार्यै, कुमार्याः, कुमार्यात्, लक्ष्म्यै, लक्ष्म्याः, लक्ष्म्याम्,वध्वै, वध्वाः, वध्वाम्, बुद्ध्यै, बुद्ध्याः, बुदध्याम् |
| ७ | ७/२/५२ | इयुवुस्थानाभ्यामस्त्रियां वा (विकल्पेन आडागमः) | श्रियै, श्रिये, श्रियः, श्रियाः, श्रियाम्, श्रियि, भ्रुवै, भ्रुवे, भ्रुवाः, भ्रुवः, भ्रुवाम्, भ्रुवि |
| ८ | ७/२/५३ | याडापः(याडागमः) | खद्वायै, खद्वायाः, खद्वायाम्, |
| ९ | ७/२/५४ | सर्वनाम्नः स्याडच्च (आडागमः, आकारान्तादेशश्च) | सर्वस्यै, सर्वस्याः, सर्वस्याम्, विश्वस्यै, विश्वस्याः, विश्वस्याम् |
| १० | ७/२/५५ | द्वितीयातृतीयाभ्यां वा (आडागमः) | द्वितीयस्यै, द्वितीयायै, द्वितीयस्याः, द्वितीयायाः, द्वितीयस्याम्, द्वितीयायाम्, तृतीयस्यै, तृतीयायै, तृतीयस्याः, तृतीयीयाः, तृतीयस्याम्, तृतीयायाम् |
| ११ | ७/२/६७ | असुपतवचां थुक्पुतुमः (थुक्पुडागमः) | आस्थत्, आस्थताम्, पर्यास्थत, अपप्तत्, अपप्तताम्, अवोचत्, अवोचताम् |
| १२ | ७/२/८९ | वृषाश्वयोर्मैथुनेच्छायां सुक् (सुगागमः) | वृषस्यति गौः,अश्वस्यति |
| १३ | ७/२/१२५ | तस्मान्नुडनेकहलः (नुडागमः) | अर्च, आनर्च, आनर्चतुः, आनञ्ज, आनञ्जतुः |
| १४ | ७/२/१२६ | ऋमदश्नोत्योश्च (नुडागमः) | आनृधतुः, आनृधुः, आनृजे, आनृजाते, व्यानशे, व्यानशाते |
| १५ | ७/२/१३५ | नीग्वञ्चुस्रन्सुध्वन्सुभ्रन्सुक- | अपूर्णा व्याख्या |

| | | | |
|---|---|---|---|
| | | सपतपद्स्कन्दाम् (नीगागमः) | |
| १६ | ७/२/१३६ | नुगतो ञमन्तस्य (नुगागमः) | जङ्गम्यते, जङ्गमीति, तन्तन्यते, तन्तनीति, बंभण्यते, बंभणीति |
| १७ | ७/२/१३७ | जपजभदहदशभञ्जपसाम् (नुगागमः) | जञ्जप्यते, जञ्जपीति, दन्दह्यते, दन्दहीति, दन्दभ्यते, दन्दभीति, बंभज्यते, बंभजीति, पम्पस्यते, पम्पसीति |
| १८ | ७/२/१३८ | चरफलोः (नुगागमः) | चञ्चूर्यते, चञ्चुरीति, पंफुल्यते, पंफुलीति |
| १९ | ७/२/१४१ | रीगृत्वतः(रीगागमः) | दरीदृश्यते, दरीदृशीति, परीपृच्छ्यते, परीपृच्छति |
| २० | ७/२/१४२ | रुग्रिकौ च लुकि | नरिनर्ति, नरीनर्ति, मर्मृजः, मरीमृजः |

**आदेशसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/२/२७ | हल्यनुंश्नोरुत औत् (औकारोऽन्तादेशः) | यौति, रौति |
| २ | ७/२/२८ | वेर्णोः (विकल्पेन उकारादेशः) | प्रोर्णोति |
| ३ | ७/२/३६ | अत आद्यञि (आकारादेशः) | भवामि, पचामि, पचावः, करिष्यामि, करिष्यावः |
| ४ | ७/२/३७ | सुपि च (आकारादेशः) | वृक्षाय, वृक्षाभ्याम् |
| ५ | ७/२/३८ | बहुवचने झल्येत् (ऐदादेशः) | वृक्षेभ्यः, वृक्षेषु, अमीभिः, विश्वेषां |
| ६ | ७/२/३९ | ओसि च (ऐदादेशः) | वृक्षयोः स्वम्, वृक्षयोर्निधेहि |
| ७ | ७/२/४० | टि च दीर्घापः (ऐदादेशः) | खट्वा, खट्वयोः, बहुराजया, बहुराजयोः |
| ८ | ७/२/४१ | संबुद्धौ च (ऐदादेशः) | हे खट्वे, हे बहुराजे, हे कारीषगन्ध्ये |

| | | | |
|---|---|---|---|
| ९ | ७/२/४५ | मातुर्मातच्पुत्रे श्लाघ्ये (मातजादेशः) | हे गार्गीमात, हे वात्सीमात |
| १० | ७/२/५६ | ङेरामाडादिभ्ः (ङेरामादेशः) | कुमार्याम्, ब्रह्मबन्ध्वाम्, बुद्ध्याम्, धेन्वाम्, श्रियाम्, भ्रुवाम्, रषद्वायाम्, सर्वस्याम् |
| ११ | ७/२/५७ | नियः (ङेरामादेशः) | नियाम्, परमनियाम्, ग्रामण्याम्, सेनान्याम् |
| १२ | ७/२/५८ | सखिपतिभ्यामौत् (ङेरामादेशः) | सख्यौपत्यौ |
| १३ | ७/२/५९ | इदुद्भ्यामेङोच्चेङः (अकारादेशः) | अग्नौ, वायौ, वध्वौ, धेनौ |
| १४ | ७/२/६६ | श्वयतेरत् (अकारोऽन्तादेशः) | अश्वत्, अश्वताम् |
| १५ | ७/२/७१ | शीङ एत्सार्वधातुके (एतादेशः) | शेते, शयाते, शेरते, शयानः |
| १६ | ७/२/७२ | अयङिय क्ङिति (अयङियङादेशः) | शय्यते, शाशय्यते, संशय्य |
| १७ | ७/२/७७ | रीङृतः | पित्रीकरोति, पित्रीभवति, पित्रीस्यात्, पित्रीयते, चेक्रीयते, जह्रीयते |
| १८ | ७/२/७८ | रिङ्के (रिङादेशः) | न्याप्रियते, आद्रियते, आध्रियते |
| १९ | ७/२/७९ | यागाशीर्लिङोर्ये (रिङन्तादेशः) | क्रियते, ह्रियते, क्रियास्ताम् |
| २० | ७/२/८२ | हनो घ्नी हिंसायाम् (घ्न्यादेशः) | जेघ्नीयते |
| २१ | ७/२/८३ | ई घ्राध्मोः (ईकारोऽन्तादेशः) | जेघ्रीयते, देध्मीयते |
| २२ | ७/२/८४ | अस्य च्वावनव्ययस्य (ईकारोऽन्तादेशः) | शुक्लीकरोति, शुक्लीभवति, शुक्लीस्यात्, खद्वीकरोति, खद्वीभवति, खद्वीस्यात् |

| | | | |
|---|---|---|---|
| २३ | ७/२/८५ | क्यचि च (ईकारोऽन्तादेशः) | पुत्रीयति, खट्वीयति |
| २४ | ७/२/८८ | उदकस्योदन् पिपासायाम् (उदनादेशः) | उदन्यति |
| २५ | ७/२/९० | दोसोमास्थामित् तिकिति (इदन्तादेशः) | निर्दितः, निर्दितवान् |
| २६ | ७/२/९१ | छाशोर्वा (इदन्तादेशः) | अवच्छितः, अवच्छितवान्, अवच्छातवान्, निशितः, निशितवान्, निशातः, निशातवान् |
| २७ | ७/२/९२ | संशितो व्रते (इत्वं निपात्यते) | संशितव्रतः |
| २८ | ७/२/९३ | दधातेर्हिः (हिरादेशः) | विहितः, विहितवान्, हित्वा |
| २९ | ७/२/९४ | जहातेः क्त्वि (हिरादेशः) | हित्वा तूष्टं वनं गतः। |
| ३० | ७/२/९५ | दो दत् (ददादेशः) | दत्तः, दत्तवान्, दत्त्वा, दत्तिः, दत्रिमम् |
| ३१ | ७/२/९६ | उपसर्गादचस्तः (तकारोऽन्तादेशः) | प्रत्तः, प्रत्तवान्, परीत्तः, परीतवान्, परितिमम्, अवत्तः, अवत्तवान्, अवत्तिः |
| ३२ | ७/२/९७ | सुविन्यवानुभ्यः क्ते वा (विकल्पेन तकारोऽन्तादेशः) | सूत्तम् / सुदत्तम्, वीत्तम् / विदत्तम्, नीत्तम् / निदत्तम्, अवत्तम् / अवदत्तम्, अनूत्तम् / अनुदत्तम् |
| ३३ | ७/२/९८ | प्रादादिकर्मणि (विकल्पेन तकारोऽन्तादेशः) | प्रत्तः / प्रदत्तः |
| ३४ | ७/२/९९ | मरुतश्च (तकारोऽन्तादेशः) | मरुत्तः |
| ३५ | ७/२/१०० | अपो भि (तकारोऽन्तादेशः) | अद्भिः, अद्भ्यः |
| ३६ | ७/२/१०१ | सः स्यार्धधातुके (तकारोऽन्तादेशः) | वत्स्यति, अवात्सीत्, वत्सीष्ट, विवत्स्यति, जिघत्स्यति |
| ३७ | ७/२/१०२ | ताससोर्ह एति (हकारादेशः) | कर्ताहे, व्यतिहे |
| ३८ | ७/२/१०५ | योऽचि (यकारोऽन्तादेशः) | आदीध्यै, आषेव्यै, आदीध्यनम्, आषेव्यनम्, आदीध्यकः, आषेव्यकः |

| | | | |
|---|---|---|---|
| ३९ | ७/२/१०६ | मीमारभलभशकपतपपदधामच इस्सिसनि (इसादेशः) | निमित्सति, मित्सते, प्रमित्सति, अपमित्सते, आरिप्सते, लिप्सते, शिक्षति, पित्सति, पित्सते, दित्सति, दित्सते, दीदासति, धित्सति, |
| ४० | ७/२/१०७ | राधो हिंसायाम् (इसादेशः) | प्रतिरित्सति, अवरित्सति |
| ४१ | ७/२/१०८ | ऋधापोरीत् (ईदादेशः) | ईर्प्सति, ईप्सति |
| ४२ | ७/२/१०९ | ज्ञपेरनन्त्यस्य (ईदादेशः) | ज्ञीप्सति |
| ४३ | ७/२/११० | दम्भ इच्च (ईदादेशः विकल्पः) | धिप्सति / धीप्सति |
| ४४ | ७/२/१११ | मुचेः कर्मकर्तयोर्द्वा (विकल्पेन ओदादेशः) | मोक्षते वत्सः, स्वयमेव मुमुक्षते |
| ४५ | ७/२/११५ | खयां चयः (खयः स्थाने अन्तरतमश्चयादेशः) | चिच्छद, पफाल |
| ४६ | ७/२/११६ | झषां जशः (जशादेशः) | जझार, बभार, जघास, डुढौके, दध्यौ |
| ४७ | ७/२/११७ | कुहोश्चुः (चवर्गादेशः) | चकार, चखान, जगाम, जघास, जुहवो, जुहोति |
| ४८ | ७/२/११९ | उरत् (अकारोऽन्तादेशः) | चकार, जगार |
| ४९ | ७/२/१२७ | भुवोऽत् (अकारोऽन्तादेशः) | बभूव, बभूवतुः, अनुबभूव |
| ५० | ७/२/१२९ | ऋपृॄॄभृहाङ्गाङामित् (इकारोऽन्तादेशः) | इयर्ति, पिपर्ति, बिभर्ति, जिहीते, मिमीते, |
| ५१ | ७/२/१३० | सन्यतः (इकारोऽन्तादेशः) | पिपक्षति, तिष्ठासति, पिपासति, प्रतीषिषति, |
| ५२ | ७/२/१३१ | ओः पुयणूज्यपरे (इकारोऽन्तादेशः) | पिपविषति, पिपावयिषति, बिभावयिषति, यियविषति, यियावयिषति, रिरावयिषति, लिलावयिषति, जिजावयिषति |
| ५३ | ७/२/१३२ | श्रुस्रुद्रुप्रुप्लुच्यूनां वा (इकारोऽन्तादेशः) | शिश्रावयिषति/ शुश्रावयिषति, सिस्रावयिषति/ सुस्रावयिषति दिद्रावयिषति/ दुद्रावयिषति, |

| | | | |
|---|---|---|---|
| | | | पिप्रावयिषति/ पुप्रावयिषति, पिप्लावयिषति/ पुप्लावयिषति चिच्यावयिषति/ चुच्यावयिषति |
| ५४ | ७/२/१३९ | उत्परस्यातः (उदादेशः) | चञ्चूर्यते, चञ्चूरीति, पंफुल्यते, पंफुलीति |
| ५५ | ७/२/१४० | ति च (उदादेशः) | चूर्तिः, प्रफुल्लिः,प्रफुल्लाः |
| ५६ | ७/२/१४६ | स्मृद्दृत्वरप्रथम्रदस्तृस्पशामत् (अकारोऽन्तादेशः) | असस्मरत्, अददरत्, अतत्वरत्, अपप्रथत्, अमम्रदत्, अतस्तरत्, अपस्पशत् |
| ५७ | ७/२/१४७ | वेष्टिचेष्ट्योर्वा (विकल्पेन अकारोऽन्तादेशः) | अववेष्टत् / अविवेष्टत् अचचेष्टत् /अचिचेष्टत् |
| ५८ | ७/२/१४८ | ई च गणः (विकल्पेन अकारोऽन्तादेशः) | अजीगणत् /अजगणत् |

## ह्रस्वविधायकानि सूत्राणि

| | | | |
|---|---|---|---|
| १ | ७/२/४२ | अम्बार्थामण्डलेकानां ह्रस्वः | हे अम्ब, हे अक्क, हे अल्ल, हे अत्त |
| २ | ७/२/४३ | स्त्र्याख्येदूतेऽनियुवः | हे कुमारि, हे गौरि, हे लक्ष्मि, हे तन्त्रि, हे बह्मबन्धु |
| ३ | ७/२/४४ | स्त्रियाः | हे स्त्रि |
| ४ | ७/२/६८ | के तद्धितेऽणो ह्रस्वः | खट्वका,कीलालपका, कुमारिका, ब्रह्मबन्धुका |
| ५ | ७/२/७० | आपो वा (विकल्पः) | बहुरवट्वकः, बहुरवट्वाकः, बहुमालकः, बहुमालाकः |
| ६ | ७/२/७४ | लिङीणः | उदियात्, उदियास्ताम्, उदियासुः |
| ७ | ७/२/१२० | ह्रस्वः | पपौ, निनाय, लुलाव, सिसेकिषते, लुलोकिषते |

**दीर्घविधायकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/२/७५ | दीर्घोऽकृत्सार्वधातुके | भृशायते, सिधीयति, मधूयति, चीयते, स्तूयते, चेचीयते, चीयात्, सूयात् |
| २ | ७/२/७६ | च्वौ च | शुचीकरोति, शुचीभवति, |
| ३ | ७/२/१२३ | दीर्घोऽपितीणः | ईयतुः, ईयुः |
| ४ | ७/२/१२४ | अत आदेः | आटतुः, आटुः, आर, आरतुः |
| ५ | ७/२/१३४ | दीर्घोऽनागमस्य | पापच्यते, पापचीति, जाज्वल्यते, जाज्वलीति |
| ६ | ७/२/१४५ | दीर्घो लघोः | अपीपचत्, अबीभवत् |

**सम्प्रसारणसूत्राणि**

| | | | |
|---|---|---|---|
| २ | ७/२/१२२ | व्यथो लिटि | विन्यथे, विन्यथाते |
| १ | ७/२/१२१ | द्युतिस्वाप्योः संप्रसारण-मभ्यासनिमित्तानन्तर्ये | विदिद्युते, विदिद्योतिषते, व्यदिद्युतत्, तुष्वापयिषति |

**निषेधसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/२/६ | नाभ्यस्तस्याचि सार्वधातुके (गुणः) | नेनिजानि, अनेनिजम् |
| २ | ७/२/७ | अपिति (गुणः) | स्तुतः, स्तुवन्ति, बिभृतः, बिभ्रति, वित्तः, विदन्ति, दुग्धः, दुहन्ति |
| ३ | ७/२/८ | अनाम्लित्यजागुः (गुणः) | जिग्यतुः, जिग्ये, जुहुवतुः, चक्रतुः, वितुदतुः, दुदुहतुः |
| ४ | ७/२/९ | क्ङिति (गुणः) | जितं, जीयते, हूयते, क्रियते, भिद्यते, बेभिद्यते, अबिभयन्, अशिषः, अपुषन् |
| ५ | ७/२/१० | यङ्यक्क्यलोपे वृद्धिश्चातिङि (गुणवृद्धिः) | चेज्यः, नेन्यः, लोलुवः |
| ६ | ७/२/११ | कुटादीनामञ्णिति (गुणः) | उत्कटिता, उत्पुटिता, नुविता, धुविता, न्यनुवीत्, न्यधुवीत् |
| ७ | ७/२/१२ | विज इटि (गुणः) | उद्विजिता, उद्विजितुम् |

| | | | |
|---|---|---|---|
| ८ | ७/२/१४ | निष्ठायामशीङ्स्विदि-<br>मिदिस्विदिधृषः (गुणः) | विदितः, विदितवान्, रुषितः,<br>रुषितवान्, तृषितः, तृषितवान् |
| ९ | ७/२/१५ | मृषेरक्षमायाम् (गुणः) | अपमृषितम् |
| १० | ७/२/१७ | मृडमृदगुधकुषक्लि-<br>शवदवसलुचाम् (गुणः) | मृडित्वा, मृदित्वा, गुधित्वा, कुषित्वा,<br>क्लिशित्वा, उदित्वा, उषित्वा, लुचित्वा |
| ११ | ७/२/२० | रुदविदमुषग्रहाम् (गुणः) | रुदित्वा, रुरुदिषति<br>विदित्वा, विविदिषति<br>मुदित्वा, मुमुदिषति |
| १२ | ७/२/२१ | सन्यनिटि (गुणः) | चिचीषति, चिकीर्षति, बिभित्सति,<br>बुभूत्सते, विवृत्सति |
| १३ | ७/२/२२ | लिङ्चिोरुपधायाः(गुणः) | भित्सीष्ट, भुत्सीष्ट, सृक्षीष्ट, अभित्त,<br>अबुद्ध, असृक्षताम् |
| १४ | ७/२/२३ | उश्च(गुणः) | कृषीष्ट, हृषीष्ट, |
| १५ | ७/२/२४ | सिचि दाधास्थामिच्च(गुणः) | अदित, अदिषाताम्, अधीत,<br>अधिषाताम्, उपास्थिष्ट, उपास्थिषताम् |
| १६ | ७/२/२५ | गाड ईस्ये च(गुणः) | व्याख्या न दृश्यते |
| १७ | ७/२/२६ | भूसुवोरनभ्यस्तयोस्तङि<br>पिति(गुणः) | अभूत्, अभूः, सुवै, सुवावहै |
| १८ | ७/२/२९ | नैकालि(उत्) | प्रोर्णोत्, प्रोर्णोः |
| १९ | ७/२/६० | टोऽस्त्रियां ना (आकारादेशः) | अग्निना, वायुना, प्रियसखिना, नरपतिना |
| २० | ७/२/६९ | न क्वापि (हृस्वः) | बहुकीलालपाकः, बहुकुमारिकः,<br>बहुवधूकः |
| २१ | ७/२/७३ | उपसर्गादूहो ह्रस्वश्च (हृस्वः) | समुह्यते, समुह्यात्, समुह्यगतः |
| २२ | ७/२/८६ | न क्षुध्यशनस्य (ईकारादेशः) | अशनायति |
| २३ | ७/२/८७ | धनस्य तृष्णायाम्<br>(ईकारादेशः) | धनायति |
| २४ | ७/२/११८ | न कवतेर्यङि (अत्वम्) | को कूयते, कूकवीति, कवते |

## लोपविधायकानि सूत्राणि

| | | | |
|---|---|---|---|
| १ | ७/२/१०३ | रसोर्लोपः (सकारलोपः) | कर्तारौ, कर्तारः, कर्तासि |
| २ | ७/२/१०४ | यीवर्णयोर्दीधीवेव्योः (अन्त्यस्य लोपः) | आदीध्यते, आवेव्यते, आदीध्यगतः, आवेष्यगतः, आदीधिता, आवेविता, आदीधीत, आवेवीत |

## अप्रयोगविधायकानि सूत्राणि

| | | | |
|---|---|---|---|
| १ | ७/२/११५ | इषादिष्वप्रयोगोऽभ्यासस्य | |
| २ | ७/२/११६ | हलोऽनादेः | विवक्षति, जाजाय्यते |
| ३ | ७/२/११७ | खयि खरः | उचिच्छिषति, चुश्चोतिषति, चिख्खलिषति, तुष्टूषति, तिष्ठासति,पिस्पन्दिषते, पुस्फूर्जिषति |

## सनीवकार्यविधायकानि सूत्राणि

| | | | |
|---|---|---|---|
| १ | ७/२/१४३ | सन्वल्लघुनि णौ चङ्यनम्लोपे | अचीकरत्, अपीपचत् |
| २ | ७/२/१४४ | णेश्च | वादितवन्तं, प्रयोजितवान् |

## सप्तमोऽध्यायः ।

## तृतीयपादः

## द्वित्वविधायकानि सूत्राणि

| | | | |
|---|---|---|---|
| १ | ७/३/१ | पदस्य वीप्सायां द्वे | वृक्षं वृक्षं सिञ्चति,ग्रामो ग्रामो रमणीयः, पुरुषः पुरुषोऽभिरूपः, ग्रामे ग्रामे पानीयं, गृहे गृहे लूखाः |
| २ | ७/३/२ | सगतेश्चाभीक्ष्ण्ये | पुनः पुनः प्रपचति, प्रपचति प्रपचति, अधीते अधीते, पचति पचति, वर्धते वर्धते |

| | | | |
|---|---|---|---|
| ३ | ७/३/३ | त्त्वाणमुलोः | भुक्त्वा भुक्त्वा व्रजति, भोजं भोजं व्रजति |
| ४ | ७/३/४ | क्रियासमभिहारे लोटः | लुनीहि लुनीहि |
| ५ | ७/३/५ | आनुपूर्व्ये | मूले मूले स्थूलाः, अग्रे अग्रे सूक्ष्माः, ज्येष्ठं ज्येष्ठं प्रवेशाय, कनिष्ठं कनिष्ठमाशय |
| ६ | ७/३/६ | अनेकावधारणे | माषं माषं देहि, द्वौ द्वौ देहि, त्रीन् त्रीन् देहि |
| ७ | ७/३/७ | डाच्यव्यक्तानुकरणे | पट पटा करोति |
| ८ | ७/३/८ | डतरडतमयोः समानां स्त्रीभावप्रश्ने | कतराः कतरा अनयोराढ्यता कतमा कतमा अनयोराढ्यता कतराः कतरा एषामेषामाढ्यता कतमा कतमा एषामेषामाढ्यता यतरा यतरा एषां विभूतिः ततरा ततरा कथ्यताम् |
| ९ | ७/३/९ | पूर्वप्रथमयोरर्थातिशये वा (विकल्पेन) | पूर्वं पूर्वं पुष्यति पूर्वतरं पुष्यति प्रथमं प्रथमं पच्यन्ते प्रथमतरं पच्यन्ते |
| १० | ७/३/१० | वर्जने परेरसमासे | परिपरित्रिगर्तेभ्यो वृष्टो देवः |
| ११ | ७/३/११ | अधोऽध्युपरीणां सामीप्ये | अधोऽधो ग्रामम् उपर्युपरि ग्रामम् |
| १२ | ७/३/१२ | वाक्यादेरामन्त्रितस्यासूय सम्मतिकोपकुत्सनभर्तसनेषु | अभिरूप अभिरूपकरिक्तं आभिरूप्यकम्, माणवक माणवक शोभनः खल्वसि, अविनीतक अविनीतक इदानीमास्यसि जाल्म, शक्तिके शक्तिके रिक्ताते शक्तिः चौर चौर चौराण्य  चौराण्य घातयिष्यामि |
| १३ | ७/३/१४ | आबाधे पुंवच्च | गतगतः नष्टनष्टा गतगताः नष्टनष्टाः |
| १४ | ७/३/१५ | प्रकारे गुणवचनस्य वा (विकल्पेन) | शुक्लशुक्लः पटः शुक्लशुक्लं रूपम् पटुः पटुः पटुपट्वी |
| १५ | ७/३/१६ | अकृच्छ्रे प्रियसुखयोः (विकल्पेन) | प्रियप्रियेण ददाति प्रियेण ददाति, सुखसुखेनददाति |
| १६ | ७/३/१७ | अन्यस्य क्रियायाः सातत्ये | अन्ये चान्ये च जायन्ते अन्यस्य चान्यस्य प्रादुर्भावः अन्यान्यप्रादुर्भावः |

| | | | |
|---|---|---|---|
| १७ | ७/३/२५ | वाक्यस्यापि सम्भ्रमे यावद्बोधम् | अहिरहि बुध्यस्व बुध्यस्व बुध्यस्व हस्त्यागच्छति हस्त्यागच्छति लघु पलायध्वं लघु पलायध्वम् |

**आदेशसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/३/२० | एषामपुंस्यां सुपो वा (आमित्यादेशः) | इतरेतरां भोजयतः, इतरेतरं भोजयतः इतरेतरेण भोजयतः परस्परां भोजयतः परस्परं भोजयतः  अन्योन्यं भोजयतः अन्योन्यां भोजयतः |
| २ | ७/३/२७ | युष्मदस्मदोर्लुग्वि-भक्त्यन्तयोर्वस्नसौ वा (विकल्पेन वस् नस् इत्येतावादेशौ) | ग्रामो वोऽरक्षत्, जनपदोऽनोऽरक्षत्, ग्रामो युष्मान् रक्षतु, जनपदोऽस्मान् रक्षतु, ग्रामो वो दीयते, जनपदो वो दीयते, ग्रामो युष्मभ्यं  दीयते ग्रामोऽस्मभ्यं दीयते ग्रामो वः स्वां जनपदो नः स्वम् ग्रामो युष्माकं स्वं जनपदोऽस्माकं स्वां |
| ३ | ७/३/२८ | द्विवचनस्य वां नावौ (वां नौ इत्यादेशौ) | ग्रामो वां रक्षतु, जनपदौ नौ रक्षतु, ग्रामो युवां रक्षतु, जनपद आवां रक्षतु ग्रामो वां दीयते जनपदौ नौ दीयते ग्रामो युष्मभ्यं दीयते ग्रामोऽस्मभ्यं दीयते ग्रामो वां स्वम् जनपदो नौ स्वम् ग्रामो युवयोः स्वम् जनपद आवयोः स्वम् |
| ४ | ७/३/२९ | तेमयावेकवचनस्य (विकल्पेन ते मे इत्येतावादेशौ) | ग्रामस्ते दीयते / ग्रामस्तुभ्यं दीयते, ग्रामो मे दीयते / ग्रामो मह्यं दीयते |

| | | | |
|---|---|---|---|
| ५ | ७/३/३० | त्वामौ द्वितीयायाः<br>(त्वा मा इत्यादेशौ) | ग्रामस्त्वा रक्षतु जनपदो मा रक्षतु ग्रमस्त्वां रक्षतु जनपदो मां रक्षतु |
| ६ | ७/३/३१ | वस्नसादयो नित्यमन्वादेशे | यूयं विनीतास्तद्वो देवा रक्षन्तु आवां शीलवन्तौ तन्नौ देवा रक्षन्तु |
| ७ | ७/३/३१ | सपूर्वात् प्रथमान्ताद्वा<br>(वस् नस् आदेशौ) | यूयं विनीतास्तद्देवा वो रक्षन्तु तद् देवा युष्मान् रक्षन्तु वयं विनीतास्तद् देवा नो रक्षन्तु तद्देवा अस्मान् रक्षन्तु |
| ८ | ७/३/४६ | अमात्तदुपधाच्च मतोर्वः<br>(वकारादेशः) | वृक्षान् , खट्वान् पयस्वान् वस्वान् किम्वान् इदम्वान् लक्ष्मीवान् |
| ९ | ७/३/४७ | झयः(वकारादेशः) | समिद्वान्, कुमुद्वान्, विद्युत्वान्, तटित्वान् |
| १० | ७/३/४८ | संज्ञायाम्(वकारादेशः) | अहीवती, कपीवती, मणीवती, मुनीवती |
| ११ | ७/३/५४ | कृपोरोलोऽकृपणकृपाणकर्पट-<br>कृपीटकर्परकर्पूरकृपादीनाम् | क्लृप्तः, क्लृप्तवान्, चिक्लृप्सति, अचीक्लृपत्, कल्पिता, कल्पा |
| १२ | ७/३/५५ | उपसर्गस्यायतौ(रेफस्य लकारादेशः) | प्लायते पलायते पल्ययते निलयते |
| १३ | ७/३/५६ | ग्रो यङि (रेफस्य लकारादेशः) | गर्हितः निर्गमति |
| १४ | ७/३/५७ | अचि वा (रेफस्य विकल्पेन लकारादेशः) | निगरणं निगलनं निगारकः निगालकः |
| १५ | ७/३/५८ | परेर्घाङ्क्योगेषु (रेफस्य विकल्पेन लकारादेशः) | परिघः पलिघः पर्यङ्कः पल्यङ्कःपरियोगः पलियोगः |
| १६ | ७/३/५९ | कपिरिकातिप्पिरिकाङ्गुरिकरोम-<br>पुरुषतरुणसरिरारम्मूरकरीर-<br>कर्ममुकुरपांसुररेरवारिक्षादीनाम्<br>(रेफस्य विकल्पेन लकारादेशः) | कपिरिका कपिलिका तिप्पिरिका तिप्पिलिका अङ्गुरी अङ्गुली रोमः लोमः पुरुषः पुलुषः तरुणः तलुनः सरिरं सलिलं अरम् अलम् मूरं मूलम् करीरं कलीलं कर्म कल्म मुकुरं मुकुलं पांसुरः |

| | | | |
|---|---|---|---|
| | | | पांसुलः रेखा लेखा लिक्षा रिक्षा |
| १७ | ७/३/६० | इरातर्परकरभशरभकारवार-रघुगरदीनामर्थभेदे (रेफस्य विकल्पेन लकारादेशः) | इरा इला तर्परः तल्पलः करभः कलभः शरभः शलभः कारः कालः वारः वालः रघुः लघुः गरः गलः |
| १८ | ७/३/६१ | असंयुक्तानादेर्डः (डकारस्य विकल्पेन लकारादेशः) | वडभी वलभी चूडा चूला इडा इला व्याडः व्यालः पुरोडाशः पुरोलाशः षोडश षोलश |
| १९ | ७/३/६२ | जपादीनां पो वः (पकारस्य विकल्पेन वकारादेशः) | जपः  जवः<br>कपलः  कवलः<br>कपाटः  कवाटः<br>परापतः परावतः पारापारः<br>पारावारः अपाची अवाची<br>विष्टपम् विष्टवम् त्रिविष्टपम्<br>त्रिविष्टवम् |
| २० | ७/३/७४ | चोः कुः(चवर्गस्य कवर्गादेशः) | वक्ता वक्ष्यति वाक् त्यक्त्वा त्यजति |
| २१ | ७/३/७५ | हो ढः (हकारस्य सकारादेशः) | लेढा सोढा वोढा मधुलिट् तुराषाट् |
| २२ | ७/३/७६ | दादे र्धातोर्घः (हकारस्य घकारादेशः) | दग्ध्वा काष्ठधक् गोधुक् काष्ठधुक्भ्यां गोधुग्भ्याम् |
| २३ | ७/३/७७ | वा दुहमुहष्णुहष्णिहाम् (हकारस्य विकल्पेन घकारादेशः) | द्रोग्धा द्रोढा मित्रध्रुक् मित्रध्रुट् मित्रध्रुग्भ्याम् मित्रध्रुड्भ्याम् मोग्धा मोढा स्नोग्धा स्नोढा स्नेग्धा स्नेढा |
| २४ | ७/३/७८ | न हाहोर्धतौ (हकारस्य धकारतकारादेशौ) | नद्धा नत्स्यति उपानत् उपानद्भ्याम् |
| २५ | ७/३/७९ | व्रश्चभ्रस्जसृजमृजयजराज-भ्राजपरिव्राजछशां षः (षकारोऽन्तादेशः) | व्रश्च व्रष्टा मूलवृट् भ्रस्ज भ्रष्टा धाना भृट् सृज् स्रष्टा रज्जुसृट् मृज् मार्ष्टा कंसपरिमृट् यज् यष्टा उपयट् राज् सम्राट् सम्राड्भ्यां |

| | | | |
|---|---|---|---|
| | | | भ्राज् विभ्राट् विभ्राट्भ्यां |
| २६ | ७/३/८० | झष एकाचः स्ध्वीर्बशो भष् (भषादेशः) | बुध भोत्स्यते अभुध्वम् अर्थभुत् गुह निघोक्ष्यते न्यघुड्वम् पर्णघुट् दुहः धोक्ष्यते अधुग्ध्वम् गोधुक् |
| २७ | ७/३/८१ | धाञस्तथोश्च(भषादेशः) | धत्ते धत्थः धत्से धध्वे |
| २८ | ७/३/८२ | झषस्तथोर्धोऽधः(तथोः धकारादेशः) | लब्ध्वा अलब्ध अलब्धाः अदुग्ध अदुग्धाः लेढा अलीढ अलीढाः अबुद्ध अबुद्धाः |
| २९ | ७/३/८३ | षढोः कः सि (षढोः ककारादेशः) | पिष्- पेक्ष्यति पिपक्षति अद्राक्षीत् अयाक्षीत् ढस्य-लेक्ष्यति लिलिक्ष्यति अलिक्षत् लिलेक्ष्यति |
| ३० | ७/३/८४ | रदाभ्यां निष्ठातो दश्च नः (निष्ठातकारस्य नकारादेशः) | पूर्णः पूर्णवान् तीर्णः तीर्णवान् भिन्नः भिन्नवान् |
| ३१ | ७/३/८५ | यण् संयोगादेरातः (निष्ठातकारस्य नकारादेशः) | स्त्यानवान् निद्राणः निद्राणवान् |
| ३२ | ७/३/८६ | ऋल्वादिभ्यः क्तिनश्च (निष्ठातकारस्य नकारादेशः) | तीर्णः तीर्णिः गीर्णिः पूर्णिः |
| ३३ | ७/३/८७ | पूञो नाशे (निष्ठातकारस्य नकारादेशः) | पूनापवादः***** |
| ३४ | ७/३/८८ | दुग्वोरुच(निष्ठातकारस्य नकारादेशः) | दूनः दूनवान् गूनः गूनवान् |
| ३५ | ७/३/८९ | सेर्ग्रासेकर्मकर्तरि (निष्ठातकारस्य नकारादेशः) | सितो ग्रासः स्वयमेव |
| ३६ | ७/३/९० | ओदितः (निष्ठातकारस्य नकारादेशः) | नजी नग्नः नग्नवान् भज्जो भग्नः भग्नवान् |
| ३७ | ७/३/९१ | सूयत्यादिभ्यो नवभ्यः (निष्ठातकारस्य नकारादेशः) | प्रसूनः प्रसूनवान् दूनः दूनवान् दीनः दीनवान् धीनः धीनवान् मीनः मीनवान् रीणः रीणवान् लीनः लीनवान् डीनः डीनवान् |

| | | | |
|---|---|---|---|
| | | | व्रीणः व्रीणवान् |
| ३८ | ७/३/९२ | क्षोः क्षी च (निष्ठातकारस्य नकारादेशः धातोः क्षी च) | क्षीणः क्षीणवान् |
| ३९ | ७/३/९३ | वा भावाकोशदैन्येषु (विकल्पेन निष्ठातकारस्य नकारादेशःधातोः क्षी च) | क्षितमनेन क्षीणमनेन क्षितायुर्जल्मः क्षीणायुर्जल्मः क्षितस्तपस्वी क्षीणस्तपस्वी |
| ४० | ७/३/९४ | भ्योऽस्पर्शे (निष्ठातकारस्य नकारादेशः) | शीनं घृतम् शीनं भदः |
| ४१ | ७/३/९५ | अञ्चोऽनपादाने (निष्ठातकारस्य नकारादेशः) | समक्नौ शकुनेः |
| ४२ | ७/३/९६ | दिवोऽविजिगीषायाम् (निष्ठातकारस्य नकारादेशः) | आद्यूनः परिद्यूनः |
| ४३ | ७/३/९७ | अवाते निर्वाणः (निष्ठातकारस्य नकारादेशः) | निर्वाणो भिक्षुः निर्वाणोऽग्निः |
| ४४ | ७/३/९८ | ऋणमाधमर्ण्ये (निष्ठातकारस्य नकारादेशः) | ऋणं ददाति ऋणं धारयति |
| ४५ | ७/३/९९ | ह्रीघावोन्दनुदविनत्तिभ्यो वा (निष्ठातकारस्य नकारादेशः) | ह्रीणः ह्रीणवान् ह्रीतः ह्रीतवान् घ्राणः घ्राणवान् घ्रातः घ्रातवान् त्राणः त्राणवान् त्रातः त्रातवान् समुन्नः समुन्नवान् समुत्तः समुत्तवान् नुन्नः नुन्नवान् नुत्तः नुत्तवान् वित्तः वित्तवान् |
| ४६ | ७/३/१०० | प्रस्त्यो मः (निष्ठातकारस्य विकल्पेन मकारादेशः) | प्रस्तीमः प्रस्तीमवान् प्रस्तीतः प्रस्तीतवान् |
| ४७ | ७/३/१०१ | क्षायो नित्यम् (निष्ठातकारस्य मकारादेशः) | क्षामः क्षामवान् |
| ४८ | ७/३/१०२ | शुषः कः ((निष्ठातकारस्य ककारादेशः) | शुष्कः शुष्कवान् |
| ४९ | ७/३/१०३ | पचो वः (निष्ठातकारस्य | पक्वः पक्ववान् |

| | | | |
|---|---|---|---|
| | | वकारादेशः) | |
| ५० | ७/३/१०४ | फलेरनुपसर्गाल्लः (निष्ठातकारस्य लकारादेशः) | फुल्लः फुल्लवान् |
| ५१ | ७/३/१०५ | समुद्भ्यां च (निष्ठातकारस्य लकारादेशः) | सम्फुल्लः सम्फुल्लवान् उत्फुल्लः उत्फुल्लवान् |
| ५२ | ७/३/११० | झलां जशोऽन्ते (झलां जशादेशः) | त्रिष्टुवत्र मधुलिडत्र क्षुदत्र वागत्र |
| ५३ | ७/३/१११ | क्विन् दृशोः कुः (दृशेः कवर्गादेशः) | घृतस्पृक् प्राक् देवद्रयङ् ऋत्विक् दिक् स्रक् अन्यादृक् तादृक् |
| ५४ | ७/३/११२ | नशेर्वा(नशेः विकल्पेन कवर्गादेशः) | जीवनक् जीवनट् जीवनग्भ्यां जीवनड्भ्यां |
| ५५ | ७/३/११३ | मोनौ म्वोश्च (नकारादेशः) | प्रशान् प्रतान् |
| ५६ | ७/३/११४ | ससजुषो रुः(सजुषः रुः आदेशः) | अग्निरत्र वायुरत्र |
| ५७ | ७/३/११५ | अह्नः (अहन् इत्यस्य रु आदेशः) | दीर्घाहा निदाघः हे दीर्घाहोऽत्र |
| ५८ | ७/३/११६ | लुक्यरेफे रः | अहरधीते अहरेति |
| ५९ | ७/३/११७ | प्रचेतसो राजनि वा | प्रचेता राजन् प्रचेतो राजन् |
| ६० | ७/३/११८ | अहर्गिरादीनां पत्यादिषु | अहर्पतिः अहः पतिः गीर्पतिः गीष्पतिः धूर्पतिः धूः पतिः |
| ६१ | ७/३/१२० | स्रन्सुध्वन्स्वनडुहां दः(दकारादेशः) | उरवास्रत् पर्णध्वत् वहनडुत् |
| ६२ | ७/३/१२१ | वसोः सः (दकारोऽन्तादेशः) | विद्वत् कुलं विद्वद्भ्यां विद्वत्ता पपिवत्कुलम् पपिवद्भ्याम् पपिवत्ता |
| ६३ | ७/३/१२२ | तिपि (दकारोऽन्तादेशः) | अचकात् भवान् अन्वशाद् भवान् |
| ६४ | ७/३/१२३ | सिपि वा (दकारोऽन्तादेशः) | अचकात्वम् अचकारत्वम् अन्वशात्वम् अन्वशात्त्वम् |
| ६५ | ७/३/१२४ | दोरुः | अभिनत्त्वम् अभिनस्त्वम् |
| ६६ | ७/३/१२८ | अदसोऽत्वे दादुदोमः | अमुं अमू अमून् |
| ६७ | ७/३/१२९ | अद्रौ वा | अदमु यङ् अमुङ् अमु मुयङ् अदद्य्रङ् |
| ६८ | ७/३/१३० | एत ईद् बहुवचने | अमी अमीभिः अमीभ्यः |

| | | | |
|---|---|---|---|
| | | | अमीषाम् अमीषु |
| ६९ | ७/३/१४८ | प्लुता वै च इदुतौ | ऐत्यति कायनः औत्यपगवः |
| ७० | ७/३/१४९ | एचोऽप्रगृह्यस्य प्रश्नान्ताभिपूजितं विचारप्रत्यभिवादेष्वादिदुत्परः पदान्ते | अगम त्य पूर्वाण्य ग्रामा त्य अग्निभूतात्य३ पटात्य ३ |
| ७१ | ७/३/१५० | तयोर्य्वावचिसंहितायाम् (यकारवकारादेशौ) | अग्मायि पटावुदकम् अग्नाण्य यत्र पटाव |

**निपातनसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/३/२१ | यथास्वे यथायथम् (अम्भावो निपात्यते) | यथायथं |
| २ | ७/३/२२ | द्वन्द्वं रहस्यमर्यादावचनव्युत्क्र-मणयज्ञपात्रप्रयोगेषु (इकारस्यम्भावः, उत्तरस्यात्वं सुपेंभावश्च) | द्वन्द्वं मन्त्रयन्ते, द्वन्द्वं मिथुना जायन्ते, द्वन्द्वं व्युत्क्रान्ताः, द्वन्द्वं यज्ञपात्राणि  युनक्ति |
| ३ | ७/३/२३ | अत्यन्तसहचरिते लोकविज्ञाते (द्वन्द्वं निपात्यते) | द्वन्द्वं नारदपर्वतौ द्वन्द्वं रामलक्ष्मणौ द्वन्द्वं बलभद्रवासुदेवौ |
| ४ | ७/३/२४ | द्वन्द्वः कलहयुग्मसमासादिषु (द्वन्द्वं निपात्यते) | द्वन्द्वः कलहः द्वन्द्वं युद्धम् द्वन्द्वं युग्मम् द्वन्द्वः समासः |
| ५ | ७/३/४९ | अष्ठीवच्चक्रीवत्कक्षीव-द्रुमण्वच्चर्मण्वत्यः | अष्ठीवान्, चक्रीवान् |
| ६ | ७/३/५० | उदन्वानुदधौ च | उदन्वान् घटः,उदन्वान् मेघः |
| ७ | ७/३/५१ | राजन्वान् सौराज्ये | राजन्वान् देशः, राजन्वती पृथिवी, राजन्वत्यः प्रजाः |
| ८ | ७/३/१०६ | क्षीबकृशपरिकृशोल्लाघाः | क्षीबः परिकृशः कृशः उल्लाघः |
| ९ | ७/३/१०८ | वित्तो धनप्रतीतयोः | विद्यते लभ्यत इति वित्तं धनं,  विद्यते |

| | | | |
|---|---|---|---|
| | | | उपलभ्यतेऽसाविति वित्तः प्रतीतः प्रसिद्धः |
| १० | ७/३/१०९ | भित्तम् शकलम् | भित्तं |
| ११ | ७/३/११९ | उषर्बुधः | उषसि बुध्यते उषर्बुधोऽग्निः |

**एकवद्भावविधायकानिसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/३/१८ | एकवच्चेतरस्य व्यतीहारे | इतरेतरं भोजयतः इतरेतरेण भोजयति |
| २ | ७/३/१९ | परान्ययोः सुक् च (सुगागमश्च) | परस्परं भोजयतः परस्परं भोजयन्ति परस्परेण भोजयतः परस्परेण भोजयन्ति अन्योन्यं भोजयतः अन्योन्यं भोजयन्ति अन्योन्येन भोजयतः अन्योन्येन भोजयन्ति |

**निषेधसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/३/२६ | पदादपादादौ समानवाक्ये (वस् नस् निषेधः) | |
| २ | ७/३/३३ | न च वाहाहैव योगे (वस् नस् निषेधः) | ग्रामो युष्मांश्च रक्षतु ग्रामोऽस्मांश्च रक्षतु ग्रमो युष्मान् वा रक्षतु ग्रामोऽस्मान् वा रक्षतु ग्रामो युष्मान् ह रक्षतु ग्रामोऽस्मान् ह रक्षतु ग्रमो युष्मानेन रक्षतु ग्रामोऽस्मानेन रक्षतु |
| ३ | ७/३/३४ | दृश्यर्थैरनालोकने (वस्नस्निषेधः) | ग्रामो युष्मान् समीक्ष्यागतः, ग्रामोऽस्मान् समीक्ष्यागतः, ग्रामो युवामवेक्षागतः, ग्राम आवामवेक्षागतः, ग्रामस्त्वामवेक्षते, ग्रामो मामवेक्षते, ग्रामो युष्मभ्यं दीयमानमुत्पश्यति, ग्रामोऽस्मभ्यं दीयमानमुत्पश्यति, ग्रामो युवाभ्यां दीयमानं निरूपयति, ग्रम आवाभ्यां दीयमानं निरूपयति, ग्रामस्तुभ्यं दीयमानं निध्यापयति, |

| | | | |
|---|---|---|---|
| | | | ग्रामो मह्यं दीयमानं निध्यापयति, ग्रामो युष्माकं स्वं समुपलक्षयति, ग्रामो अस्माकं स्वं समुपलक्षयति, ग्रामो युवयोः स्वं सम्पश्यति, ग्राम आवयोः स्वं सम्पश्यति, ग्रामस्तव कार्यमालोचयति, ग्रामो मम कार्यमालोचयति |
| ४ | ७/३/३५ | आमन्त्रितं पूर्वमसद्वत् | हे ब्राह्मणाः! युष्मान् रक्षतु ग्रामः, हे ब्राह्मणाः! अस्मान् रक्षतु ग्रामः, हे ब्राह्मणाः! युष्मभ्यं दीयते, हे ब्राह्मणाः! अस्मभ्यं दीयते |
| ५ | ७/३/३६ | न समानाधिकरणे सामान्यवचनम् | माणवक! जटिलक! त्वा रक्षन्तु देवाः, माणवक!जटिलक! ते रोचते मोदकः, माणवक! जटिलक! ते स्वमेवमित्यादि |
| ६ | ७/३/३७ | जस् वा (असद्वद्वा) | ब्राह्मणाः शरण्याः, अस्मानयो ब्राह्मणाः शरण्याः |
| ७ | ७/३/३८ | पूर्वत्रासिद्धम् | अमुष्यै, अमुष्मात्, अमुष्य, अमुष्मिन् |
| ८ | ७/३/३९ | न लोपः सुपि | राजभ्यां, राजभ्यः, राजसु, राजभिः |
| ९ | ७/३/४० | न नि मुः | अमुना |
| १० | ७/३/४१ | सिज् लोप एकादेशे | अलावीत् |
| ११ | ७/३/४२ | षठनोर्निष्ठादेशः | वृक्णः, वृक्णवान् |
| १२ | ७/३/४३ | प्लुतविकारश्छे तुकि | अग्ना३च्छात्रम्, पटाण्य ३च्छत्रम् |
| १३ | ७/३/४४ | धुटिश्चुत्वम्(वृत्तिरपूर्णम्) | अभति अभति गवाभति |
| १४ | ७/३/४५ | दित्वे परसवर्णः | सय् यन्ता, सव् वत्सरः तल् ल्लोकम् |
| १५ | ७/३/५२ | न यवोर्मिदल्मिभूमितिमि-कृमिक्रुञ्चाद्राक्षाध्राक्षावासो हरित् गरुत् ककुज्ज्योतिष्मद्रोमद्भ्यः। (वकारादेशनिषेधः) | यवमान् ऊर्मिवान् भूमिवान् तिमिमान् कृमिमान् क्रुञ्चमान् द्राक्षामान् ध्राक्षामान् वासोमान् |

| | | | |
|---|---|---|---|
| १६ | ७/३/५३ | कान्तिशिम्बिहरिचार्विक्षुमधु-बन्ध्विन्दुबिन्दुद्रुवस्वंशुश्रू-हनुसानुभान्वादिभ्यश्च (वकारादेश निषेधः) | कान्तिमती, शिम्बिमती, हरिमती, चारुमती, इक्षुमती, मधुमती, बन्धुमती, इन्दुमती, बिन्दुमती, द्रुममती, वसुमती, अंशुमती, श्रुमती, हनुमान्, सानुमती, भानुमती |
| १५ | ७/३/१०७ | न पृमूर्च्छिमदिरव्याध्या-देवत्राभ्यः (नकारादेश निषेधः) | पूर्तः पूर्तवान् मत्तः मत्तवान् |

**लोपविधायकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/३/१३ | एकस्य सुब्लुक् | एकैकमक्षरं पठति एषामेकैकस्मै देहि |
| २ | ७/३/६३ | प्रातिपदिकस्यानह्नो नो लोपः | राजाच्चः वृत्रहा वाग्मी राजपुरुषः राजकाम्यति |
| 3 | ७/३/६४ | क्ये | राजीयति राजीयते चर्मायति चर्मायते |
| ४ | ७/३/६५ | न सम्बुद्धौ | हे चर्म हे चर्मन् हे दाम हे दामन् |
| ५ | ७/३/६६ | सुपि वलि तद्वत् | राजभ्यां, राजत्वं, राजकल्पः, द्युद्भ्यां, द्युमान्, द्युकल्पः |
| ६ | ७/३/६७ | संयोगस्य | कुर्वन् कृतवान् गोमान् अनड्वान् श्रेयान् |
| ७ | ७/३/६८ | रात् सः(सकारलोपः) | पितुः मातुः |
| ८ | ७/३/६९ | धि सङि | चकाधि आशाध्वम् अलविध्वम् अलविद्वम् |
| ९ | ७/३/७० | इट ईटि | अस्तावीत् |
| १० | ७/३/७१ | झलो झलि | अभौस्ताम् अभैत्त अभित्थाः |
| ११ | ७/३/७२ | ह्रस्वाद्धातोः | आहत आहथाः अादित आदिथाः अाकृत आकृथाः |
| १२ | ७/३/७३ | स्कोः संयोगाद्योरन्ते च | ओलस्जी नग्नः ननवान् साधुलक् मस्ज मग्नः मग्नवान् साधुमक् कक्ष् तष्टम् तष्टवान् तष्टनत् |

**दीर्घविधायकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/३/१२५ | धातोर्वोरनचीको दीर्घः | गीः धूः आशीः समूः शीष्म धूष्मआस्तीणम् प्रस्तीर्णम् चिकीर्षति वुवूर्षति दीव्यति सीव्यति |

**दीर्घनिषेधकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/३/१२६ | नाभ्यासकुरच्छराम् | रिर्यतुः रिर्युः संवियुः संविव्यतुः ण्युः कुर्यात् कुर्युः छुर्यात् छुर्युः |
| २ | ७/३/१२७ | यि तद्धिते | धुरं वहति धुर्यः धुरि साधुर्धुर्यः |

**प्लुतविधायकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/३/१३१ | वाक्यस्य टेः प्लुतः | देवदत्त इति |
| २ | ७/३/१३२ | दूराद्धूते | तद् दूरम् आगच्छ भो माणव देवदत्त! आगच्छ भो माणव! |
| ३ | ७/३/१३३ | हैहे प्रयोगे हैहयोः | है देवदत्त! आगच्छ , आगच्छ है देवदत्त! आगच्छ हे देवदत्त! आगच्छ देवदत्त हे! |
| ४ | ७/३/१३४ | गुरोरेकैकस्यानृतो वा (विकल्पेन प्लुतः) | आगच्छ देवदत्त! देवदत्त! आगच्छ देवदत्त! आगच्छ भो क्लृप्तशित्य |
| ५ | ७/३/१३५ | अस्त्रीशूद्रप्रत्यभिवादे नामगोत्रयोः | अभिवादये देवदत्तोऽहं अभिवादये गार्ग्योऽहं |
| ६ | ७/३/१३६ | भो राजन्यविशां वा (विकल्पेन प्लुतः) | अभिवादये देवदत्तोऽहं भोः |
| ७ | ७/३/१३७ | पृष्टप्रतिवचने हेः (विकल्पेन प्लुतः) | अकार्षीः कटं देवदत्त |
| ८ | ७/३/१३८ | निगृह्यानुयोगे (विकल्पेन प्लुतः) | अद्य श्राद्धमित्यात्थ, अद्यामावास्येत्यात्थ, अमावास्येत्यात्थ |
| ९ | ७/३/१३९ | भर्त्सनेऽङ्गयुक्तं तिङाकांक्षम् | अङ्गकूजत्य इदानीं ज्ञास्यसि जाल्म अङ्गकूज इदानीं ज्ञास्यसि जाल्म |

| | | | |
|---|---|---|---|
| १० | ७/३/१४० | द्विस्त्रिरुक्तं पर्यायेण | चौरत्य चौर चौर चौर चौर चौर चौर घातयिष्यामि |
| ११ | ७/३/१४१ | सम्मत्यसूयाकोपकुत्सनेषु पूर्वम् | माणवक माणवक अभिरूपक अभिरूपक शोभनः खल्वसि |
| १२ | ७/३/१४२ | विचारे | अहिर्नु त्य रज्जुर्नु स्थाणुर्नुत्य/अहिर्नु पुरुषो नु |
| १३ | ७/३/१४३ | प्रतिश्रुतौ | भो देवदत्त किमात्थत्य किमात्थ |
| १४ | ७/३/१४४ | अभिपूजिते | शोभनः खल्वसि माणवकत्य शोभनः खल्वसि माणवक |
| १५ | ७/३/१४५ | चिदित्युपमार्थे प्रयुज्यमाने | अग्निचिद् भाया त्य अग्निचित् भायात् राजचित् ब्रूया त्य राजचिद् ब्रूया |
| १६ | ७/३/१४६ | क्षियाशीः प्रैषेषु तिङाकांक्षम् | स्वयं ह रथेन याति त्य उपाध्यायं पदातिं गमयति स्वयं ह रथे न याति |
| १७ | ७/३/१४७ | अनन्त्यस्यापि प्रश्नाख्यानयोः | अगमः त्य पूर्वात्यन् ग्रामात्यन् अगमः पूर्वान् ग्रामान् देवदत्त अगमं त्य पूर्वात्यन् ग्रामात्यन् भोत्यः अगमं पूर्वान् ग्रामान् भोः |

## सप्तमोऽध्यायः।

## चतुर्थः पादः

**आदेशः विधायकानि सूत्राणि।**

| | | | |
|---|---|---|---|
| १ | ७/४/१ | समः सुटि सः (सकार अन्तादेशः) | संस्कर्ता, संस्कर्तुं, संस्कर्तुम् |
| २ | ७/४/२ | पुमोऽख्याञि खय्यम्परे (रोऽन्तादेशः) | कुण्डं हसति, वनं याति |
| ३ | ७/४/३ | नश्छव्यप्रशानः (सकार अन्तादेशः) | भवाँश्छादयन्ति, भवांश्छादयति, भवाँष्ठकारेण, भवांष्ठकारेण, भवाँस्थुटति, भवांस्थुटति, भवाँश्चिनोति, भवांश्चिनोति, भवाँष्टीकते, |

| | | | |
|---|---|---|---|
| | | | भवांष्टीकते, भवाँस्तरति, भवांस्तरति |
| ४ | ७/४/४ | कानः कानि (सकार अन्तादेशः) | काँस्कान्, कांस्कान् |
| ५ | ७/४/५ | नॄनः पेरो वा (रेफादेशः) | नॄँः पाहि, नॄंः पाहि, नॄन् पाहि |
| ६ | ७/४/६ | अत्रानुनासिकः पूर्वस्य (अनुनासिकादेशः) | भवाँश्चिनोति, भवांश्चिनोति, |
| ७ | ७/४/७ | अन्यस्मात्परोऽनुस्वारः (अनुस्वारादेशः) | भवाँश्चिनोति, भवांश्चिनोति, |
| ८ | ७/४/८ | हलि मः (अनुस्वारोऽन्तादेशः) | कुण्डं हसति, वनं याति |
| ९ | ७/४/९ | नश्चापदान्तस्य झलि। (अनुस्वारोऽन्तादेशः) | पयांसि, वयांसि, सर्पींषी, धनूंषी |
| १० | ७/४/१० | राजि समो मः क्वौ (मकारादेशः) | सम्राट्, सम्राज् |
| ११ | ७/४/११ | हेमनयवलपरतो वा (विकल्पेन मकारादेशः) | किम् ह्मलयति/ किं ह्मलयति<br>किम् ह्नुते/ किं ह्नुते<br>किम् ह्यः/ किं ह्यः<br>किम् ह्वलयति/ किं ह्वलयति<br>किम् ह्लादयति/ किं ह्लादयति |
| १२ | ७/४/१६ | मय उञो वोऽचि (विकल्पेन वकारादेशः) | किम्वावपनम् / किमु आवपनम् |
| १३ | ७/४/२० | विरामे विसर्जनीयः (रेफस्य विसर्जनीयोऽन्तादेशः) | वृक्षः, पुनः, गीः, धूः |
| १४ | ७/४/२१ | खरि(रेफस्य विसर्जनीयोऽन्तादेशः) | कः खनति, पुरुषः पचति, कः करोति, कः फलति, कः शेते, कः षण्डः, कः साधुः |

| | | | |
|---|---|---|---|
| १५ | ७/४/२२ | शर्परे (रेफस्य विसर्जनीय) | पुरुषः त्सरुः, कः वासः क्षौमम् , अद्भिः प्सातम् |
| १६ | ७/४/२३ | ख्याञि (रेफस्य विसर्जनीय) | कः ख्यातः, नमः ख्यात्रे |
| १७ | ७/४/२४ | रोः सुपि (रेफस्य विसर्जनीय) | पयःसु, सर्पिः षु, आशिःषु |
| १८ | ७/४/३० | छविः सः (रेफस्य सकारादेशः) | कश्छादयति पुनश्छिनत्ति कष्ठकारेण कस्थुटति कश्चिनोति कष्ठीकते कस्तनोति |
| १९ | ७/४/३१ | वा शरि (रेफस्य विकल्पेन सकारादेशः) | कः शेते कश्शेते कःषण्डः कष्षण्डः कः साधुः कस्साधुः |
| २० | ७/४/३३ | कुप्वोः कपौ खरि (रेफस्य जिह्वामूलीयोपध्मानीयादेशौ) | कः करोति वृक्षः फलति |
| २१ | ७/४/३४ | पाशप् कल्पप् केष्वनव्ययस्य सः (रेफस्य विकल्पेन सकारादेशः) | पयः पाशं पयस्पाशं पयः कल्पम् पयस्कल्पम् पयः कं पयस्कम् |
| २२ | ७/४/३५ | रोः काम्यचि (रेफस्य सकारादेशः) | पयस्काम्यति यशस्काम्यति |
| २३ | ७/४/३६ | तेष्विणः षः (रेफस्य षकारादेशः) | सर्पिष्पाशम् यजुष्पाशम् सर्पिष्कल्पम् यजुष्कल्पम् सर्पिष्कम् यजुष्कम् सर्पिष्काम्यति यजुष्काम्यति |
| २४ | ७/४/३७ | निर्दुराविश्चतुष्प्रादुर्बहिषाम् (रेफस्य षकारादेशः) | द्विष्करोति द्वि=करोति द्विःकरोति चतुष्पचति चतु=पचति चतुः पचति |
| २५ | ७/४/३८ | सुचो वा (रेफस्य विकल्पेन षकारादेशः) | द्विष्करोति द्वि=करोति द्विःकरोति चतुष्पचति चतु=पचति चतुः पचति |
| २६ | ७/४/३९ | इसुसोर्व्यपेक्षायाम् (रेफस्य विकल्पेन | सर्पिष्करोति सर्पिः करोति |

| | | | |
|---|---|---|---|
| | | षकारादेशः) | सर्पिष् पिबति सर्पिः पिबति धनुष्खण्डयति धनुः खण्डयति यजुष्फलति यजुः फलति |
| २७ | ७/४/४१ | नित्यं समासेऽनुत्तरपदस्थस्य (रेफस्य षकारादेशः) | सर्पिष्कुम्भः सर्पिष्पानम् धनुष्खण्डम् यजुष्पवम् |
| २८ | ७/४/४२ | अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्विनव्यय स्य (रेफस्य सकारादेशः) | अयस्कृतम् अयस्कारः अयस्कामः अयस्कसः अयस्कुम्भः पयस्पात्रम् |
| २९ | ७/४/४३ | अधः शिरसोः पदे(रेफस्य सकारादेशः) | अधस्पदम् शिरस्पदम् |
| ३० | ७/४/४४ | नमस्पुरसोर्गत्योः (रेफस्य सकारादेशः) | नमस्कृत्य नमस्करोति पुरस्कृत्य पुरस्करोति |
| ३१ | ७/४/४५ | तिरसो वा (रेफस्य विकल्पेन सकारादेशः) | तिरस्कृत्य तिरःकृत्य तिरस्करोति तिरः करोति |
| ३२ | ७/४/४६ | कस्ककौतस्कुतशुनस्कर्ण-सद्यस्कालसाद्यस्कभास्करा-हस्करायस्करायस्कान्तायस्कुण्ड-तमस्काण्डमेतस्पिण्डभ्रातुष्पुत्रादयः (रेफस्य षकारादेशः) | कस्कः कौतस्कुतः शुनस्कर्णः सद्यस्कालः सद्यस्क्रीतः साद्यस्क्रः भास्करः अहस्करः अयस्करः अयस्कुण्डम् तमस्काण्डम् मेदस्पिण्डम् भ्रातुष्पुत्रः |
| ३३ | ७/४/४७ | सर्पिष्कुण्डिकाधनुष्कपाल-बहिष्पूलयजूष्पात्रेषूत्तर-पदस्थस्यापि(रेफस्य षकारादेशः) | सर्पिष्कुण्डिका परमसर्पिष्कुण्डिका धनुष्कपालः परमधनुष्कपालम् बहिष्पूलः परमबहिष्पूलः यजुष्पात्रम् परमयजुष्पात्रम् |
| ३४ | ७/४/४८ | इण्कुभ्यामपदान्तस्या-देशप्रत्ययस्य सष्पः | चिचीषति चिकीर्षति गीर्षु धूर्षु वाक्षु त्वक्षु इयक्षति |

| | | | |
|---|---|---|---|
| | | (सकारस्य षकारादेशः) | जिघृक्षति |
| ३५ | ७/४/४९ | नुम्विसर्जनीय शर्व्यवायेऽपि (सकारस्य षकारादेशः) | सर्पींषि धनूंषि हविःषु हविष्षु यजुःषु यजुष्षु |
| ३६ | ७/४/५० | शसिवसिघसीनां च (सकारस्य षकारादेशः) | शिष्टः शिष्कः अशिषत् अशिषतां उषितः जक्षतुः जक्षिवान् |
| ३७ | ७/४/५१ | स्तौतिणीनामेवास्वि-दिस्वदिसहीनां षण्यभ्यासात् (सकारस्य षकारादेशः) | तुष्टूषति सिषेवयिषति सुष्वापयिषति |
| ३८ | ७/४/५२ | उपसर्गात् सुनोतिसुवतिस्य-तिस्तौतिस्तौभतीनाम् (सकारस्य षकारादेशः) | अभिषुणोति |
| ३९ | ७/४/५३ | स्थासेनिसेधसिचसञ्जस्वञ्जां च (सकारस्य षकारादेशः) | अधिष्ठास्यति अभिषेणयति प्रतिषेधति |
| ४० | ७/४/५४ | सादेरप्रतेः (सकारस्य षकारादेशः) | निषीदति विषादयति |
| ४१ | ७/४/५५ | स्तम्भेः (सकारस्य षकारादेशः) | विष्टश्नाति प्रतिष्टश्नाति |
| ४२ | ७/४/५६ | अवादौर्जित्यालम्बनाविदूर्येषु (सकारस्य षकारादेशः) | और्जित्यं बलवत्ता, अहो वृषलस्यावष्टम्भः, अवष्टब्धो रिपुः शूलेन |
| ४३ | ७/४/५७ | वेश्च स्वनो भोजने (सकारस्य षकारादेशः) | विष्णवति अवष्वणति |
| ४४ | ७/४/५८ | परिनिविश्यः सेवसिवुसहसुटाम् (सकारस्य षकारादेशः) | परिषेवते निषेवते परिषीव्यति निषीव्यति विषीव्यति परिषहते निषहते विषहते परिष्करोति |
| ४५ | ७/४/५९ | स्तुस्वञ्जिसिवादीनां वाङ्व्यवाये (सकारस्य विकल्पेन षकारादेशः) | पर्यष्टौत् पर्यस्तौत् न्यष्टौत् न्यस्तौत् व्यष्टौत् व्यस्तौत् पर्यष्वजत पर्यस्वजत न्यष्वजत न्यस्वजत |

| | | | |
|---|---|---|---|
| | | | व्यष्वजत व्यस्वजत पर्यषीव्यत् पर्यसीव्यत् न्यषीव्यत् न्यसीव्यत् व्यषीव्यत् व्यसीव्यत् पर्यषहत पर्यसहत न्यषहत न्यसहत व्यषहत व्यसहत पर्यष्करोत् पर्यस्करोत् |
| ४६ | ७/४/६० | नित्यं सुनोत्यादीनामासेवात् (सकारस्य षकारादेशः) | अभ्यषुणोत् पर्यषुवत् पर्यष्यत् अभ्यष्टौत् अभ्यस्तोभत् अध्यष्ठात् अभ्यषेणयत् प्रत्यषेधयत् अभ्यषिञ्चत् अभ्यषजत् प्रत्यष्वजत न्यषीदत् व्यष्टश्नात् अवाष्वणत् पर्यषेवत |
| ४७ | ७/४/६१ | स्थादीनामभ्यासेनाभ्यासस्य च (सकारस्य षकारादेशः) | अधितष्ठौ अभिषिषेणयिषति प्रतिषिषेधिषति |
| ४८ | ७/४/६२ | परिनिविभ्यः सयसितयोः (सकारस्य षकारादेशः) | परिषयः निषयः विषयः परिषितः निषितः विषितः |
| ४९ | ७/४/६३ | निरभ्यनुभ्यश्च स्यन्दतेरप्राणिषु वा (सकारस्य विकल्पेन षकारादेशः) | निःष्यन्दते तैलम् निःस्यन्दते तैलम् अभिष्यन्दते अभिस्यन्दते अनुष्यन्दते अनुस्यन्दते |
| ५० | ७/४/६४ | वेः स्कन्देरनिष्ठायाम् (सकारस्य विकल्पेन षकारादेशः) | विष्कन्ता विस्कन्ता विस्कन्तुम् |
| ५१ | ७/४/६७ | समासेऽङ्गुलिभीरुभ्यां सङ्गस्थानयोः (सकारस्य षकारादेशः) | अङ्गुलीनां सङ्गः अङ्गुलिषङ्गः, भीरूनां स्थानं भीरुष्ठानम् |
| ५२ | ७/४/६८ | अग्नेः स्तुतः (सकारस्य | अग्निष्टुत् |

| | | | |
|---|---|---|---|
| | | षकारादेशः) | |
| ५३ | ७/४/७० | ज्योतिरायुर्भ्यां च स्तोमस्य (सकारस्य षकारादेशः) | ज्योतिष्टोमः आयुष्टोमः अग्निष्टोमः |
| ५४ | ७/४/७१ | मातृपितृभ्यां स्वसुः (सकारस्य षकारादेशः) | मातृष्वसा पितृष्वसा |
| ५५ | ७/४/७२ | मातुः पितृभ्यां वा (सकारस्य विकल्पेन षकारादेशः) | मातुःष्वसा मातुःस्वसा पितुःष्वसा पितुः स्वसा |
| ५६ | ७/४/७३ | अभिनिष्टाने वर्णे (सकारस्य षकारादेशः) | अभिनिष्ठानो वर्णः |
| ५७ | ७/४/७४ | प्रादुरुपसर्गेभ्योऽस्तेर्यच् परस्य (सकारस्य षकारादेशः) | प्रादुःष्यात् अभिष्यात् प्रादुष्षन्ति अभिषन्ति |
| ५८ | ७/४/७५ | सुविनिर्दुभ्यः समसूत्योः (सकारस्य षकारादेशः) | सुषमं विषमं निःषमं दुःषमं सुषूतिः विषूतिः दुःषूतिः |
| ५९ | ७/४/७६ | स्वपेरपः(सकारस्य षकारादेशः) | सुषुप्तः विषुप्तः निःषुप्तः दुष्षुप्तः |
| ६० | ७/४/७७ | नद्याः स्नस्य कौशले (सकारस्य षकारादेशः) | नद्यां स्नाति नदीष्णः |
| ६१ | ७/४/७८ | नेः स्नातस्य च (सकारस्य षकारादेशः) | निष्णातः |
| ६२ | ७/४/७९ | प्रतेः सूत्रे (सकारस्य षकारादेशः) | प्रतिष्णातं सूत्रं |
| ६३ | ७/४/८० | प्रष्ठोऽग्रगामिनि (सकारस्य षकारादेशः) | प्रतिष्ठत इति प्रष्ठः |
| ६४ | ७/४/८१ | वृक्षासनयोर्विष्टरः (सकारस्य षकारादेशः) | विष्टरो वृक्षः विष्टर आसनं |
| ६५ | ७/४/८२ | छन्दोनाम्नि विष्टारः (सकारस्य षकारादेशः) | विष्टारपङ्क्तिः छन्दः विष्टारो |
| ६६ | ७//४/८३ | गवियुधिभ्यां स्थिरस्य | गविष्ठिरः युधिष्ठिरः |

| | | | |
|---|---|---|---|
| ६७ | ७/४/८४ | कपेः स्थलस्य गोत्रे (सकारस्य षकारादेशः) | कापिष्ठलो पुत्रः |
| ६८ | ७/४/८५ | विकुशमिपरिभ्यः (सकारस्य षकारादेशः) | विष्ठलम् कुष्ठलम् शमिष्ठलम् |
| ६९ | ७/४/८६ | अम्बाम्बगोभूमिसव्याप-द्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जि-बहिरग्निपरमेदिविभ्यस्थस्य (सकारस्य षकारादेशः) | अम्बष्ठः आम्बष्ठः गोष्ठः भूमिष्ठः सव्येष्ठः अपष्ठः द्विष्ठः त्रिष्ठः कुष्ठः शेकुष्ठः शङ्कुष्ठः अंगुष्ठः मञ्जिष्ठः पुञ्जिष्ठः बहिर्ष्ठः अग्निष्ठः परमेष्ठः दिविष्ठः |
| ७० | ७/४/८७ | अपदुस्सुवनिभ्यः स्थोः (सकारस्य षकारादेशः) | अपष्ठु दुष्ठु सुष्ठु वनिष्ठु |
| ७१ | ७/४/८९ | एत्यकोः संज्ञायाम् (षकारादेशः) | हरिषेणः मानषेणः |
| ७२ | ७/४/९० | नक्षत्रादितो वा (सकारादेशः) | रोहिणिषेणः/रोहिणिसेनः, रेवतिषेणः/रेवतिसेनः |
| ७३ | ७/४/९१ | त्वतलतस्त्यप्तयेष्वदीर्घात् (सकारस्य षकारादेशः) | सर्पिष्टं यजुष्टं सर्पिष्टा यजुष्टा सर्पिष्टो यजुष्टः आविष्ट्यः निष्ट्यः |
| ७४ | ७/४/९२ | तरप्तमपोरतिङः (सकारस्य षकारादेशः) | सर्पिष्टरं सर्पिष्टमं यजुष्टरं यजुष्टमं |
| ७५ | ७/४/९३ | निसस्तितपतावनासेवायाम् (सकारस्य षकारादेशः) | निष्टपति सुवर्णम् |
| ७६ | ७/४/९४ | सुदुनिर्भ्यः सामसेधसन्धेः (सकारस्य षकारादेशः) | सुषाम दुष्षाम निष्षाम सुषेधः दुष्षेधः सुषन्धिः निःषन्धिः |
| ७७ | ७/४/१०४ | धातोरिणः षीध्वं लुङ् लिटां धो ढः (धकारस्य ढकारादेशः) | कृषीढ्वम् अदीढ्वम् अधूढ्वम् |
| ७८ | ७/४/१०५ | इटो वा (धकारस्य | ग्रहीषीढ्वम् ग्रहीषीध्वम् |

| | | | |
|---|---|---|---|
| | | विकल्पेन ढकारादेशः) | लविषीढ्वं लविषीध्वम् अग्रहीध्वं अग्रहीढ्वम् अलविढ्वम् अलविध्वं जगृहिढ्वे जगृहिध्वे उपदिदीविढ्वे उपदिदीविध्वे लुलुविढ्वे लुलुविध्वे |
| ७९ | ७/४/१०६ | रष्टृभ्यो व्यवहितस्यापि समानपदे नो णः (नकारस्य णकारादेशः) | चतुर्णां पूष्णः नृणाम् अम्बरेण वृषेण समातृकेण अर्केण अर्घेण दर्पेण धर्मेण आर्येण सर्वेण उरस्केण बृंहणम् |
| ८० | ७/४/१०७ | पूर्वपदेभ्यः संज्ञायामनृगयनादीनाम् (नकारस्य णकारादेशः) | द्रुणसः खरणसः खरणाः खुरणाः शूर्पणखा चन्द्रणखा हरिवाहणः नरवाहणः |
| ८१ | ७/४/१०८ | नसः (नकारस्य णकारादेशः) | खरणाः खुरणाः |
| ८२ | ७/४/१०९ | अग्रग्रामाभ्यां नियः (नकारस्य णकारादेशः) | अग्रणीः ग्रामणीः |
| ८३ | ७/४/११० | पुरगार्मिश्रकासिद्धकाशारिका कोटराभ्यौ वनस्य | पुरगावणं मिश्रकावणं सिध्रकावणं शारिकावणं कोटरावणं |
| ८४ | ७/४/१११ | प्रनिरन्तरग्रेशरेक्षुप्लक्षाम्रकार्भ्य-खदिरपीयूक्षाभ्योऽसंज्ञायामपि (नकारस्य णकारादेशः) | प्रणवं निर्वणम् अन्तर्वणम् अग्रेवणम् |
| ८५ | ७/४/११२ | अनिरिकातिमिरचीरिकाकर्मरेभ्यो द्वित्र्यज्भ्य ओषधिवृक्षेभ्यो वा (नकारस्य विकल्पेन णकारादेशः) | दूर्वावणं / दूर्वावनम् करवीरवणं/करवीरवनम् शिरीषवणं /शिरीषवनं |
| ८६ | ७/४/११३ | अह्नस्यादन्तात् (नकारस्य णकारादेशः) | पूर्वाह्णः अपराह्णः |
| ८७ | ७/४/११४ | त्रिचतुर्भ्यां वयसि हायनस्य | त्रिहायणो वत्सः त्रिहायणी |

| | | | |
|---|---|---|---|
| | | (नकारस्य णकारादेशः) | बडवा चतुर्हायणो वत्सः चतुर्हायणी बडवा |
| ८८ | ७/४/११५ | आहिताद्वाहनस्य (नकारस्य णकारादेशः) | इक्षुवाहणं शररवाहणम् |
| ८९ | ७/४/११६ | पानस्य देशे (नकारस्य णकारादेशः) | क्षीरं क्षीरपाणाः सुरपाणाः |
| ९० | ७/४/११७ | वा भावकरणयोः (नकारस्य विकल्पेन णकारादेशः) | क्षीरपाणं क्षीरपानं |
| ९१ | ७/४/११८ | गिरिचक्रादिभ्यो नदीनितम्बादीनाम् (नकारस्य विकल्पेन णकारादेशः) | गिरिणदी गिरिनदी गिरिणितम्बः गिरिनितम्बः चक्रणदी चक्रनदी चक्रणितम्बा चक्रनितम्बा |
| ९२ | ७/४/११९ | उत्तरपदान्तस्यायुवाह्नः (नकारस्य विकल्पेन णकारादेशः) | व्रीहिवापिणौ व्रीहिवापिनौ माषवापिणौ माषवापिनौ व्रीहिवापिणी कुले व्रीहिवापिनी कुले माषवापिणी माषवापिनी |
| ९३ | ७/४/१२० | नुंसुपोरपक्वात् (नकारस्य विकल्पेन णकारादेशः) | व्रीहिवापाणि व्रीहिवापानि माषवापाणि माषवापानि प्रहिण्वन् प्रहिन्वन् व्रीहिवापेण व्रीहिवापेन व्रीहिवापाणां व्रीहिवापानां |
| ९४ | ७/४/१२१ | नित्यमेकाच्युत्तरपदे (नकारस्य णकारादेशः) | वृत्रहणौ क्षीरपाणि क्षीरपेण यूषपाणाम् |
| ९५ | ७/४/१२२ | कुमति च (नकारस्य णकारादेशः) | स्वर्गकामिणौ वृषगामिणौ गुरुमुखेन पूर्वमेघाणां |
| ९६ | ७/४/१२३ | उपसर्गाद्बुरो णोपदेशस्य (नकारस्य णकारादेशः) | प्रणमति परिणमति |
| ९७ | ७/४/१२४ | हिनुमीनानाम् (नकारस्य णकारादेशः) | प्रहिणोति प्रमीणाति प्रयाणि प्रवयाणि |

| | | | |
|---|---|---|---|
| ९८ | ७/४/१२५ | नेर्गदनदपतपददाधामाङ्स्यति-<br>हन्तियातिवातिद्रातिप्सातिव-<br>पतिवहतिशाम्यतिचिनोतिदेग्धिषु च<br>(नकारस्य विकल्पेन णकारादेशः) | प्रणिणदति प्रणिनदति<br>प्रणिपतति परिणिपद्यते<br>प्रणिददाति प्रणिद्यते<br>प्रणिद्यति प्रणियच्छति<br>प्रणिदधाति प्रणिधयति<br>प्रणिमिमीते परिणिमिमीते<br>परिणिमयते प्रणिष्यति<br>प्रणिहन्ति प्रणियाति<br>प्रणिवाति प्रणिद्राति<br>प्रणिप्साति प्रणिवपति<br>प्रणिवहति प्रणिशाम्यति<br>प्रणिचिनोति प्रणिदिग्धे |
| ९९ | ७/४/१२६ | वान्यत्र करवादावषान्त उपदेशे<br>(नकारस्य विकल्पेन णकारादेशः) | प्रणिपचति प्रनिपचति<br>प्रणिभिनत्ति |
| १०० | ७/४/१२<br>७ | परेरनितेः (नकारस्य<br>विकल्पेन णकारादेशः) | पर्यणिति / पर्यनिति |
| १०१ | ७/४/१२८ | अन्ते च (नकारस्य<br>विकल्पेन णकारादेशः) | प्राणिति / प्रानिति हे<br>प्राण् हे प्रान् |
| १०२ | ७/४/१२९ | द्वयोर्द्विरुक्तस्य (नकारयोः<br>विकल्पेन णकारादेशः) | प्राणिणिषति प्राणिणत्<br>पराणिणत् |
| १०३ | ७/४/१३० | हन्तेः (नकारस्य णकारादेशः) | प्रहण्यते प्रहणनं प्रघ्नन्ति |
| १०४ | ७/४/१३१ | वमो र्वा (नकारस्य<br>विकल्पेन णकारादेशः) | प्रहण्मि प्रहन्मि प्रहण्वः<br>प्रहन्वः |
| १०५ | ७/४/१३२ | अन्तरोऽयनस्य चादेशे<br>(नकारस्य णकारादेशः) | अन्तरयणम् अन्तर्हणनम्<br>अन्तर्हण्यते |
| १०६ | ७/४/१३३ | अचो निष्ठायाः<br>(नकारस्य णकारादेशः) | प्रहाणः प्रहाणवान्<br>प्रहीणः प्रहीणवान् प्रग्लूणः<br>प्रगूणवान् |
| १०<br>७ | ७/४/१३४ | निर्विण्णः (नकारस्य<br>विकल्पेन णकारादेशः) | निर्विण्णः |

| | | | |
|---|---|---|---|
| १०८ | ७/४/१३५ | अनमानेन्यन्यनीयरामख्यात्रः (नकारस्य विकल्पेन णकारादेशः) | प्रयाणम् प्रवपणम् प्रवहणम् प्रयायमाणम् पर्यायिणौ अप्रयाणिः प्रयाणीयम् परिवहणीयम् |
| १०९ | ७/४/१३६ | णे र्वा (नकारस्य विकल्पेन णकारादेशः) | प्रयापणम्/प्रयापनम् प्रयाप्यमाणः/प्रयाप्यमानः प्रयामिणौ /प्रयामिनौ अप्रयापणिः/अप्रयापनिः प्रयापणीयम्/ प्रयापनीयम् |
| ११० | ७/४/१३ ७ | हलादेरिजुपधात् (नकारस्य विकल्पेन णकारादेशः) | प्रमेहणं / प्रमेहनं प्रकोपणं / प्रकोपनं प्रगुप्यमाणः / प्रगुप्यमानः प्रकोपिणौ /प्रकोपिनौ अप्रकोपणिः/अप्रकोपनिः प्रकोपणीयम्/प्रकोपनीय म् |
| १११ | ७/४/१३८ | नुमिजादेर्हलः(नकारस्य णकारादेशः) | प्रेङ्खणां प्रेङ्खमाणः प्रेङ्खिणौ अप्रेङ्खिणिः प्रेङ्खणीयम् |
| ११२ | ७/४/१३९ | वा निंसनिक्षनिन्दाम् (नकारस्य विकल्पेन णकारादेशः) | प्रहिंसनम् प्रनिंसनम् प्रणिक्षणं प्रनिक्षणं प्रणिन्दनम् प्रनिन्दनम् |
| ११३ | ७/४/१५० | स्तोः श्चुष्टुभ्यां तौ | वृक्षश्शेते वृक्षश्चिनोति वृक्षश्छादयति |
| ११४ | ७/४/१५४ | पदान्तस्य यरोञमिञं वा (विकल्पेन ञमादेशः) | वाङ्ञकारः /वाग्ञकारः वाङ्मधुरा /वाग्मधुरा वाङ्ङ्वते/ वाग्ङ्वते तन्नयनं/ तद्नयनं त्रिष्टुम्नयति /त्रिष्टुभ्नयति |
| ११५ | ७/४/१५५ | प्रत्यये (ञमादेशः) | वाङ्मयं वाङ्मात्रम् षण्णां |

| | | | |
|---|---|---|---|
| ११६ | ७/४/१५<br>७ | पदान्ताभ्यासयोर्वा<br>(विकल्पेन यमादेशः) | संयन्ता/सय्यन्ता<br>संवत्सरः/सव्वँसरः<br>तंलोकं/तल्लौँकं<br>त्वं करोषि/ त्वङ्करोषि<br>त्वं चरसि / त्वञ्चरसि<br>त्वं टीकसे /त्वण्टीकसे<br>त्वं तरसि / त्वन्तरसि<br>त्वं पचसि /त्वम्पचसि<br>किंनराः /किन्नराः<br>चंक्रम्यते / चङ्क्रम्यते<br>चंचूर्यते / चञ्चूर्यते<br>तं तन्यते / तन्तन्यते<br>पं फुल्यते / पम्फुल्यते<br>यं यम्यते /यय्यँम्यते |
| ११७ | ७/४/१५८ | तोर्लि (यमादेशः) | अग्निचिल्लुनाति<br>विद्युल्लेखा दृषल्लिख्यते<br>भवाँल्लिखति |
| ११८ | ७/४/१६३ | जशो हो झष् (हस्य<br>विकल्पेन झषादेशः) | वाग्घसति / वाग्हसति<br>अज्झलौ / अज् हलौ<br>षड्ढलानि / षड् हलानि<br>तद्धितं / तद् हितं<br>त्रिष्टुब्भसति / त्रिष्टुब्हसति |
| ११९ | ७/४/१६४ | चयः शश्छोऽमि (शस्य<br>विकल्पेन छकारादेशः) | प्राक्छूरः /प्राक्श्वरः<br>षड्छ्यामा /षड्श्यामा<br>तच्छेते /तत्शेते<br>त्रिष्टुप्छूयते/ त्रिष्टुप्श्रूयते<br>वाक्च्छ्लक्ष्णः /वाक्श्लक्ष्णः<br>तच्छ्लोकः/तत्श्लोकः |

**आगमसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/४/१२ | ङ्णोः कुक्टुकौ शरि (विकल्पेन कुक्टुकागमः) | प्राक्च्छेते, प्राङ् शेते, प्राक् कृडे़, प्राङ् क्षण्डे, प्राङ् क्षष्ठः, प्राङ् षष्ठः, प्राङ्क् साये, प्राङ् साये, सुगुण्च्छेते, सुगुण् शेते, वणद्वण्डे, वण्षण्डे |
| २ | ७/४/१३ | सः ङसोश्च्युतो धुट् (विकल्पेन धुडागमः) | श्वलिट् साये श्वलिट्त्साये |
| ३ | ७/४/१४ | नश्च (विकल्पेन धुडागमः) | भवान्त्साये, भवान्साये |
| ४ | ७/४/१५ | शि तुक् (तुगागमः) | भवान् शेते, भवान्च्छेते |
| ५ | ७/४/१७ | ङमो ह्स्वाद् द्वे (ङ्, न्, ण्, इति द्वे /आगमः) | कुङ्ङास्ते, सुगण्णेस्ते, पचन्नास्ते |

**लोपविधायकानि सूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/४/१८ | ढो ढे लोपोऽपदादौ (ढकारलोपः) | लीढं, मीढं, गूढम् |
| २ | ७/४/१९ | रो रि (रेफस्य लोपः) | अजर्घाः, अपास्याः |
| ३ | ७/४/२५ | अवर्णभोभगो अघोपूर्वस्य लोपो हशि। (रोः लोपः) | ब्राह्मणा हसन्ति,ब्राह्मणा वसन्ति, ब्राह्मणा भजन्ति |
| ४ | ७/४/२६ | उञि (रोर्लोपः) | स उ गतः, भगो उ एहि, अघो उ एहि |
| ५ | ७/४/२७ | अचीषत्स्पृष्टतरो यश्च (रोर्लोपः) | क इह, कयिह, ब्राह्मणा अत्र, ब्राह्मणायत्र, भो अत्र, भोयत्र, भगो इह, भगोयिह |
| ६ | ७/४/२८ | आदीषत्स्पृष्टश्च ( | कयास्ते कयास्ते क आस्ते ब्राह्मणायिह ब्राह्मणायिह ब्राह्मणा इह |
| ७ | ७/४/२९ | व्योश्च ते | पटविह पटविह पट इह |
| ८ | ७/४/३२ | खर्परे लोपः(रेफलोपः) | चक्षुश्श्योतति चक्षुः श्च्योतति चक्षुश्श्च्योतति कष्ठीवति कः ष्ठीवति कष्ठीवति |

| | | | |
|---|---|---|---|
| | | | चक्षुस्पन्दते चक्षुः स्पन्दते चक्षुस्स्पन्दते |
| ९ | ७/४/१५९ | उदः सः स्थास्तम्भोर्लोपः (सकारलोपः) | उत्थानम् उत्तम्भिता |
| १० | ७/४/१६० | रोगे स्कन्देः (सकारलोपः) | उत्कन्दको रोगः |
| ११ | ७/४/१६१ | हलो यमां यमि वा...................... | ........ |
| १२ | ७/४/१६२ | झरां झरि सवर्णे च | प्रत्तमिति त्रयस्तकाराः |

**निषेधसूत्राणि**

| | | | |
|---|---|---|---|
| १ | ७/४/४० | नाक्रियैकाधिकरणे (रेफस्य षकारादेश निषेधः) | सर्पिः कपालम् यजुः पीतकम् |
| २ | ७/४/९६ | न सात्पदाद्योः (सकारस्य षकारादेश निषेधः ) | दधिसेक् दधिसेचौ बहुसेक् बहुसेचौ |
| ३ | ७/४/९७ | सिचो यङि (सकारस्य षकारादेश निषेधः ) | सेसिच्यते अभिसेसिच्यते |
| ४ | ७/४/९८ | सेधतेर्गतौ (सकारस्य षकारादेश निषेधः ) | अभिसेधति अभिसेधयति अभिसिसेधिषति |
| ५ | ७/४/९९ | निप्रतिभ्यां स्तब्धस्य (सकारस्य षकारादेश निषेधः ) | निस्तब्धः प्रतिस्तब्धः |
| ६ | ७/४/१०० | सहेरोद्वतः (सकारस्य षकारादेश निषेधः ) | परिसोढःपरिसोढव्यं |
| ७ | ७/४/१०१ | उपसर्गात्स्तम्भुसिवुसहां चङि (सकारस्य षकारादेश निषेधः ) | अभ्यतस्तमभत् पर्यसीषिवत् पर्यसीषहत् |
| ८ | ७/४/१०२ | सुनोतेः स्यसनोः (सकारस्य षकारादेश निषेधः ) | अभिसेष्यति पर्यसोष्यत् |
| ९ | ७/४/१०३ | सदिष्वञ्जोः परस्य लिटि (सकारस्य षकारादेश निषेधः ) | विषसाद परिषस्वजे |
| १० | ७/४/१४० | न भाभूपूङ्कमिगमिप्यायीवेपां णेश्च (नकारस्य णकारादेशनिषेधः) | प्रभानं प्रभायमानम् प्रभायिनौ अप्रभानि प्रभानीयं प्रभवनं |

| | | | |
|---|---|---|---|
| | | | प्रभूयमानं प्रपवनं प्रपूयमानं |
| ११ | ७/४/१४१ | षात् पदे (नकारस्य णकारादेशनिषेधः) | निष्पानम् सर्पिष्पानम् यजुष्पानम् |
| १२ | ७/४/१४२ | नशेः ष्कः (नकारस्य णकारादेशनिषेधः) | प्रनष्टः प्रनङ्क्ष्यति |
| १३ | ७/४/१४३ | पदान्तस्य (नकारस्य णकारादेशनिषेधः) | नरान् पुरुषान् |
| १४ | ७/४/१४४ | चुटुतुलशर्व्यवाये (णकारादेशनिषेधः) | अर्चना मूर्छना अर्जुनं झर्झनम् किरीटेन कर्मठेन मृडेन दृढेन कर्णेन धूर्तेन तीर्थेन नर्देन क्रोधेन प्रियाध्वना विरलेन राशिना रसेन |
| १५ | ७/४/१४५ | अतद्धितपरानाङा पदेन (णकारादेशनिषेधः) | प्रावनद्धम् पर्यवनद्धम् |
| १६ | ७/४/१४६ | हन्तेर्घेण (णकारादेशनिषेधः) | स्रुघ्नं शत्रुघ्नम् वृत्रघ्नम् वृत्रघ्ने |
| १७ | ७/४/१४७ | क्षुभ्नातितृप्नोत्याचार्यभोगीनाचार्या-नीसर्वनामनृनमनानाम् (णकारादेशनिषेधः) | क्षुभ्नाति, क्षुभ्नीतः तृप्नोति आचार्यभोगीनः आचार्यानी |
| १८ | ७/४/१४८ | नृतेर्यङि (नकारस्य णकारादेशनिषेधः) | नरीनृत्यते |
| १९ | ७/४/१४९ | नृत्तनर्तननटननद्धनदीनगरनिवेश-निवासाग्न्यनूपनन्दिनन्दन-नहननद्रादीनाम् (नकारस्य णकारादेशनिषेधः) | परिनृत्तं परिनर्त्तनं ग्रामनटः शरनद्धः शरनदी |
| २० | ७/४/१५१ | न पदान्तट्टोरनाम्नवतिनगरीणाम् (स्तोः ष्टुत्व निषेधः) | मधुलिड्डाये मधुलिट् तरति मधुड्विट् दुनोति मधुलिट् धुनुते मधुलिट् धुनोति मधुलिट्ध्वम् |
| २१ | ७/४/१५२ | तोः षि (टवर्गादेशनिषेधः) | अग्निचित्षण्डे भवान्षण्डे |
| २२ | ७/४/१५३ | शात् (श्चुत्वनिषेधः) | अश्नाति विश्नः प्रश्नः |

## निपातनसूत्राणि


| | | | |
|---|---|---|---|
| १ | ७/४/६५ | परिस्कन्दः प्राच्येषु(षत्वाभावो निपात्यते) | परिस्कन्दः, |
| २ | ७/४/८८ | सव्येष्टृपरमेष्ठिनौ सूतब्रहामणोः (षत्वं निपात्यते) | सन्येष्ठा |

## व्याख्यारहितसूत्राणि

| | | | |
|---|---|---|---|
| १ | ७/४/६६ | स्फुरस्फुलोर्निर्निविभ्यः | |
| २ | ७/२/६९ | दीर्घात् सोमस्य (वृत्युदाहरणानि न दृश्यन्ते) | |



हृदयहारिण्याः पर्णलेखा।


॥ हृदयहारिणी ॥

(रासरस्वतीकण्ठाभरणव्याख्या)

॥ दशग्रन्थनारायणभट्टविरचिता ॥

63728

अथ सप्तमोऽध्यायः (प्रथमः पादः)

मृजेर्वृद्धिः।

मृजेः अकारस्य अस्थेर्धातोः परस्यादेरिकारादेशो परतो वृद्धिर्भवति मार्ष्टि मार्ष्टि मार्ष्टव्यम् मार्जिता इत्येव मृज्यते मृष्टः॥

ऋतोऽचिवा।

मृजेः ऋकारस्याजादौ प्रत्यये परे वृद्धिर्वा भवति परिमृजन्ति परिमार्जन्ति परिमृजन्तु परिमार्जन्तु अत इति किं मार्ज्यति अचीति किं मृष्टः मृजः॥

हृदयहारिण्याः हस्तलेखा।

# हृदयहारिणी

## (सरस्वतीकण्ठाभरणव्याख्या)

दण्डनाथनारायणभट्टविरचिता ।।

## अथ सप्तमोऽध्यायः । (प्रथमःपादः । )

अक्षरमात्रस्वरहीनं व्यजनपंक्तिविवर्जितरेफसाधुभिरेव मम क्षपितव्यां कोऽत्र न मुह्यति शास्त्रसमुद्रे ।

### मृजेर्वृद्धिः ।

मृजेः अकारस्य असेर्धातोः परस्यादेरिकारादेशो परतो वृद्धिर्भवति । मार्ष्टि, मार्ष्टा, मार्ष्टव्यम्, मार्जिता इत्येव । मृज्यते, मृष्टः ।

### ऋतोऽचिवा ।

मृजेः ऋकारस्याजादौ प्रत्यये परे वृद्धिर्वा भवति । परिमृजन्ति, परिमार्जन्ति, परिमृजन्तु,परिमार्जन्तु । ऋत इति किं । ममार्ज, मार्जयति । अचीति किं । मृष्टः,मृजः ।

### अजागृणिश्वीनां सिचि परस्मैपदेषु ।

परस्मैपदपरे सिचि परतः इगन्तायाः जागृणिश्विवर्जिता या प्रकृतेर्वृद्धिर्भवति आन्तरतम्यात् । अकार्षीत् , अचैषीत्, अनैषीत्, अस्तावीत्, अलावीत् । अजागृणिश्वीनामिति किम् अजागरीत्, औनयीत्, अध्वनयीत्, मेलयीत्, आर्दयीत्, लोलयति, ध्यनयत्येलयत्पर्दयितिभ्य इति छान्दसश्वङ्गतिषेध अश्वयीत् न्यनु वीदित्यत्र तु तदादित्वाद्वृद्धि प्रतिषेधो भवति । परस्मैपदेष्विति किम् । अचोऽष्ट अम्लोऽष्ट ।

### हलोऽच ।

परस्मैपदपरे सिचि परतो हलन्तायाः प्रकृतेर्योल्तस्य वृद्धिर्भवति । अपाक्षीत् अधाक्षीत् अभैत्सीत् अरौत्सीत् अताप्सीत् । हल्जातेराश्रयणादनेकहल्व्यवधानेऽपि । अराङ्क्षीत् असाक्षीत् उदवोढाम् उदवोढमिति वहेः सिचोसधपरीवस्लोपतत्वधत्वढत्वढलोपानामसिद्धत्वात् पूर्वं हलन्तलक्षणाकारस्य वृद्धिः क्रियते ततो ढलोपनिमित्तमाकारस्यौत्वं तस्मिन् कृते सकृत् कृतत्वात् पुनर्वृद्धिर्नभवति । परस्मैपदेष्वित्येव अभित्त अरुद्ध ।

### नेटि ।

इडादौ सिचि परस्मैपदे परे परतो हलन्ताया प्रकृतेरचोवृद्धिर्नभवति । अदेवीत् अकोषीत् । हल इत्येव । अलावीत् ।

### वोर्णोः ।

उर्णोतेरिडादौ सिचि परस्मैपदपरे परतो वृद्धिर्भवति । प्रौर्णावीत् प्रौणवीत् । परस्मैपदेष्वित्येव । प्रौर्णविष्ट प्रौणुविष्ट ।

**हलादेरह्म्यन्तक्षणश्वसेदितोऽत उपधायाः।**

हलादे प्रकृतेर्हान्तमान्तयान्तक्षणश्वसेदित् वर्जिताया इडादौ परस्मैपदपरे सिचि परतोकारस्योपधाया(पूर्वं हलन्तलक्षणकारस्य वृद्धिः क्रियते ततो टलोपनिमित्तं) वृद्धिर्वा भवति। अकर्णीत् अकार्णीत्। अरणीत् अराणीत्। हलादेरिति किम्। मात्र(वगे)अरकीत्। अत इति किम्। अकोषीत्। उपधाया इति किम्। अरक्षीत्। अवधीत्। इटीत्येव अप्राक्षीत्।

**व्रजवदर्लान्नित्यम्।**

व्रज वद इत्येतयोर्लकारान्तानां रेफान्तानां च प्रकृतेः सिचि इडादौ सिचि परस्मै....................

र्लानीति किम्। माभावानटीत्। अत इत्येव। न्यमीलीत्। उपधाया इत्येव। अखल्लीत्।

**ञ्णिति।**

ञिति णिति प्रत्यये परतः प्रकृतेरकारस्योपधाया वृद्धिर्भवति। पाक त्याग अपाचि पाचक। अत इत्येव। भोग भोजयति।

**अचः।**

ञिति णिति प्रत्यये परतोऽजन्तायाः प्रकृतेरन्त्यस्याचो वृद्धिर्भवति। प्रापयति। चायः चायक नायः नायकः भावः भावकः कारः कारकः।

**किति च तद्धितेऽचामादेः।**

किति चकारात् ञ्णिति च तद्धिते प्रत्यये परतः प्रकृतेरचां मध्ये य आदिरच् तस्य वृद्धिर्भवति। फक् नाडायनः ऐतिकायनः। ठक् रैवतिकः। ढक् रौहिणेयः। यञ् गार्ग्यः। इञ् दाक्षिः। णिति वासिष्ठः। एष्विति किम्। अश्वत्थामा। तद्धित इति किम्। आयते। अचामिति वचनाद् हलादेरपि भवति।

**केकयमित्रयुप्रलयानां यादेरियश्च।**

केकयादीनां किति ञिति णिति तद्धिते परतो यादेः शब्दरूपस्येयादेशश्चकारादचामादेरचोवृद्धिश्च भवति। केकयस्यापत्यं क्षत्रियादण् कैकेयः। मित्रयुशब्दात् प्राग्दितादण् मैत्रेयः। प्रलयादागतं प्राग्दितादण् प्रालेयम्। एष इति किम्। केकयत्वं मित्रयुत्वं प्रलयत्वम्।

**देविकाशिंशपादीर्घसत्रश्रेयसान्तात्प्राप्तावात् ।**

देविकादीनां तद्धिते किति ञिति णिति चाचामादेरचस्तत्प्राप्तौ वृद्धिप्रसङ्गे आकारादेशो भवति। देविकायां भवं दाविकमुदकम्। पूर्वदैविकानामप्राचः ग्रामः तत्र भवः। पूर्वदेविकानाम प्राचांग्रामस्तत्र

भवः पूर्वदाविकः। शिंशपायां विकारः शांशपश्चमसः। पूर्वशिंशपा नाम प्राचांग्रामस्तत्र भवः पूर्वशांशपः। दीर्घसत्रे भवं दार्घसत्रम्। श्रेयोऽधिकृत्य कृतं श्रायसम्। तत्प्राप्ताविति किम्। सुदेविकायां भवः सौदेविकः। अप्रकृतीनामपि देविकादीनां पूर्वोत्तरपदभूतानां वृद्धिप्रसङ्गे यथा स्यादिति तत्प्राप्तिग्रहणम्। तद्धित इत्येव। देविकामिच्छति देविकी।

### वहीनरस्यैत् ।

'वहीनरशब्दस्य किति ञिति णिति च परतोऽचामादेरच एकादेशो भवति। वहीनरस्यापत्यं वैहीनरिः। इत्युदाहरणम्। वहीनरस्यैव वृद्ध्या सिद्धमिति चेत् वाहीनरस्य वाहीनरादिर्माभूदिति वाच्यम्।

### य्वः पदान्तात् प्रागैच् ।

किति ञ्णिति च तद्धिते परतो प्रकृतेरतत्प्राप्तौ वृद्धिप्रसङ्गे इवर्णोवर्णयो स्थाने यौ यकार वकारौ पदान्तौ ताभ्यां पूर्वं यथासंख्यमैकारौकारौ भवतः। व्याकरणमधीते वैयाकरणः। नैयायिकः। सौवऽग्रामिलः। स्वेश्वस्यायं सौवश्वः। द्वे अन्येस्खलितरूपे कर्मणि अध्ययने वृत्तेर्यस्य द्वैन्यिकः। पूर्वन्यामिको इञो नाम प्राक्षुग्राम। तत्र भवः पूर्वनैयामिकः। य्वम् इति किम्। द्वैमातुर सौवर्णेयः। पदान्तादिति किम्। यत इमे छात्रा याताः तत्प्राप्ताविति किम्। दध्यश्वस्यापत्यं दाध्यश्विः माध्वश्विः। अत्रेदुतोरनादित्वात् वृद्धिप्राप्तिर्नास्ति। द्व्याशीतिक इत्यादौ संख्यायाः संवत्सरसंख्ययो इत्युत्तरपदवृद्धौ यकारस्य स्थानिन इकारस्य वृद्धिप्रसङ्गे नास्ति। वृद्धिपदावत् पश्चादयमैजागम तेन तद्धितस्याज्वृद्धिहेतुत्वात्। नेतुत्वांद्धवादीनाम्।

### द्वारस्वरस्वरितस्वादुमृदुव्यल्कशश्वन्स्फ्यकृतस्वस्वाध्यायस्वग्रामाणाम् ।

द्वारादीनां तद्धिते किति ञिति णिति प्रत्यये परतो य्वाः समीपस्यातो वृद्धिप्राप्तौ तयोः पूर्वावैजागमो भवतः' इति अस्य सूत्रार्थः हृदयहारिण्यामुक्तः। द्वारे नियुक्तःदौवारिकः। स्वरमधिकृत्य कृतो सौरवः। स्वर्भवः सौवः। अव्ययस्यानाराच्छश्वतोसिति टिलोपः। स्वस्तीत्याह सौवस्तिकः। अव्युत्पन्नोऽयं सुपूर्वस्यानुपूर्वेणैव सिद्धम्। स्वादुमृदुन इदं सौवादुमृदवम्। व्यल्कशे भवो वैयल्कशः। विपूर्वस्य तु पूर्वेणैव सिद्धम्। श्वो भवः। श्वोभतिकः। श्वतर्हेति ठक्। शुन इदं शौवनं मांसम्। स्फ्यकृतस्यापत्यं ऋष्यण् स्फैयकृतः। स्वस्येदं सौवम्। स्वाध्यायेन यजति सौवाध्यायिकः। स्वग्रामे भवः सौवग्रामिकः। अध्यात्मादित्वाद् ठक्। श्वादेरित्र इति प्रतिषेधाद्वा यदि पूर्वाणामपि भवति। द्वारपाल्या अपत्यं दौवारपालिकः। रेवत्यादित्वात् ठक्। स्वर्गमनमाह सोवर्गमनिकः। प्रभूतादित्वात् ठक्। श्वदंष्ट्रायोर्भव शौवदंष्ट्रोमणिः। सोपवस्त्रः। ये वा समीपस्य वृद्धिप्राप्ताविति विज्ञानाद्वैकस इत्यत्र वकारात् पूर्वमैज् भवति। स्वग्रतणेनैव सिद्धे स्वाध्यायस्वग्रामग्रहणात्। स्वापतेयं स्वाजन्यमित्यादौ न भवति।

**न्यग्रोधस्य केवलस्य ।**

न्यग्रोधशब्दस्य केवलस्य तद्धिते ञ्णिति किति च प्रत्यये परतो यकारात्पूर्वमैजागमो भवति। नैयग्रोधश्चमसः। केवलस्येति किम्। न्यग्रोधमूले भवाः न्यग्रोधमूलाः शालयः। इदमपि द्वारादीनां तदादिविधेर्ज्ञापकम्। एतच्च न्यग्रोहयतीति न्यग्रोध इति व्युत्पत्तिपक्षे तु नियमार्थमव्युत्पत्तिपक्षे विध्यर्थमिति।

**न णचः।**

णजन्तायाः प्रकृतेस्तद्धिते णिति किति च य्वोः प्रागैजागमौ न भवति। व्यावक्रोशी, व्यावलेखी, व्यावचर्ची, व्यावहासी । क्रियाव्यतिहारेऽनीहेक्षाक्षिभ्यो णच् इत्यस्माल्लंजिनुण्भ्यां नित्यमित्यण्।

**स्वागतस्वध्वरस्वङ्गव्यङ्गव्यडव्यवहारव्यायामानाम्।**

स्वागतादीनां ञ्णिति किति च तद्धिते परतो य्वोः पूर्वमैजागमो न भवति। स्वागतमाह स्वागतिकः। प्रभूतादित्वात् ठक्। स्वध्वरेण चरति स्वाध्वरिकः। स्वङ्गस्यापत्यं स्वाङ्गिकः। व्यङ्गस्यापत्यं व्याङ्गिः। व्यडस्यापत्यं व्याडिः। व्यवहारेण चरति व्यावहारिकः। व्यायामः प्रयोजनमस्या व्यायामिका विद्या।

**श्वादेरिति।**

श्वन् शब्दादिकारादौ ञ्णिति किति च तद्धिते परतो ऽच प्राक् ऐजागमो न भवति। श्वभस्त्रस्यापत्यं श्वाभरतिः। श्वागणेन चरति श्वागणिकः। श्वायूथिकः। इतीति किम्। शौवादंष्टो मणिः। आदिग्रहणं किम्। श्वभिस्तरति शौबिकः।

**इञः।**

श्वादेर्यञ्प्रत्ययान्तस्य ञ्णिति किति च तद्धिते परत ऐजागमो न भवति। श्वाभरतरिदं श्वाभस्त्रम्। श्वाकर्णेः श्वाकर्णम् ।

**पदान्तस्यानिति वा।**

पदशब्दोत्तरपदस्य श्वादेः शब्दस्येकारादिवर्जिते तद्धिते ञ्णिति किति च परत ऐजागमो वा भवति। शुन इव पदमस्य श्वापदम्। तस्य विकारः श्वापदं शौवापदम्। अनितीति किम्। श्वापदेन चरति श्वन् शब्दस्य द्वारादिपाठान्नित्यमैजागमे प्राप्ते विकल्पो विधीयते। शौवापदिकः।

**न्यङ्कोः।**

न्यङ्कुशब्दस्य तद्धिते ञ्णिति किति च यकारात्पूर्वमैजागमो वा भवति। न्यङ्कोरिदं नैयङ्कवम्।

**गुरुलघुसंहतपदार्थोर्ध्वमुहूर्तादीनां उत्तरपदस्य।**

गुरुलघ्वादीनां तद्धिते ञ्णिति किति च परतेरुत्तरपदस्याचामादेरचो वृद्धिर्भवति। गुरुलघ्वोर्भवि गुरुलाघवम्। संहतपदार्थस्य भावः संहतपदार्थम्। ऊर्ध्वमुहूर्ताद्भवः ऊर्ध्वमौहूर्त्तिकः। आदिग्रहणाद्यथादर्शनमन्येषामपि भवति।

**अवयवादृतोः।**

अवयववाचिनः परस्य ऋतुवाचिन उत्तरपदस्य ञ्णिति किति चाचामादेरचो वृद्धिर्भवति। पूर्ववार्षिकः। अपरवार्षिकः। वर्षप्रवृद्ध्योरोण्यविति ठक्। पूर्वशारदः। ऋत्वण्। पूर्वहैमनः। अपरहैमनः। हेमन्ताद्धातोर्लोपश्चेत्यण् सर्वत्र पूर्वावरे त्यादिनैकदेशिसमासः। अवयवादिति किम्। ऋत्वन्तरैर्व्यव हितासु पूर्वासु वर्षासु भवः सौवर्षिकः। ऋतोरिति किम्। पूर्वपिप्पल्या इदं पौर्वपिप्पलम्। आर्धपिप्पलम्।

**सुसर्वार्धेभ्यो जनपदस्य।**

सुसर्वार्धेभ्यो जनपदवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति। सुपाञ्चालकः सर्वपाञ्चालकः अर्धपाञ्चालकः सुमागधकः सर्वमागधकः अर्धमागधकः। अवृद्धेभ्योऽपि बहुवचनविषयेभ्य इति वुञ् जनपदस्येति किम् सुगन्धाः पण्यमस्य सौगन्धिकः।

**अमद्राणां दिशः।**

दिक्च्छब्दात् परस्यामदेभ्यो जनपदवाचिन उत्तरस्य किति ञ्णिति च तद्धिते परतोऽचामादेरचो वृद्धिर्भवति। पूर्वपाञ्चालकः अपरपाञ्चालकः। पूर्ववदमद्राणामिति किम् पौर्वमत्रः मद्रेभ्यो ञित्यञ् । दिक्च्छब्दादिति किम् पूर्वं पाञ्चालानां पूर्वपाञ्चालाः। एकदेशिसमासः तेषु पौर्वपञ्चालः। अदिक्च्छब्दत्वात् तदन्तविधावसत्यणेव भवति।

**प्राचां ग्रामनगराणाम्।**

प्राग्देशे यानि ग्रामनगराणि तेषां दिक्शब्देभ्य परेषामुत्तरपदानां तद्धिते ञ्णिति किति च परतोऽचामादेरचो वृद्धिर्भवति। पूर्वकष्णमृत्तिका नामप्राक्षु ग्रामस्तत्र भवः पूर्वकार्ष्णमृत्तिकः। पूर्वेषु कामशमः नगराणाम् पूर्वस्मिन् कान्यकुब्जे भवः पूर्वकान्यकुब्जः अपरकान्यकुब्जः। ग्रामग्रहणेनैवसिद्धे पृथङ्गगरग्रहणं सम्बन्धिभेदप्रतिपत्यर्थम्। प्राचामिति किम् पूर्वदेवदत्तो नाम बाहिकग्रामस्तत्र भवः पौर्वदेवदत्तः।

**सङ्ख्याधिकाभ्यां सङ्ख्यायाः।**

सङ्ख्यावाचिनोऽधिकशब्दाच्च परस्य सङ्ख्यावाचिन उत्तरपदस्य तद्धिते किति ञ्णिति च

परतोऽचामादेरचः स्थाने वृद्धिर्भवति। द्वाभ्यां षषिभ्यां निर्वृत्तोऽधीष्टो भृतो चेष्टीभूतो भावि वा द्विषाष्टिकः। द्विसाप्ततिकः। अधिकषाष्टिकः। अधिकसाप्ततिकः। द्विषष्ट्यादिशब्दास्संख्येये काले वर्तमानाः। कालाधिकारविहितं प्रत्ययमुत्पादयन्ति।

**संवत्सरपरिमाणस्याशाणकुलिजस्यासंज्ञायाम्।**

संख्याया अधिकशब्दाच्च परस्य संवत्सरशब्दस्य शाणाकुलिजवर्जितस्य परिमाणवाचिनश्चोत्तरपदस्य किति ञ्णिति च तद्धिते परतोऽसंज्ञायां विषये अचामादेरचो वृद्धिर्भवति। द्वाभ्यां संवत्सराभ्यां निर्वृत्तोऽधीष्टो भृतो भूतो भावी वा। द्वौ संवत्सरौ भूतौ भावी वा द्विसांवत्सरिकः। त्रिसांवत्सरिकः। अधिकसांवत्सरिकः। द्वौ कुडबौ प्रयोजनमस्य द्विकौडबिकः त्रिकौडबिकः अधिककौडबिकः। अशाणकुलिजस्येति किम् द्वाभ्यां शाणाभ्यां क्रीतं द्वैशाणम् त्रैशाणम्। द्वित्र्यादेरण्चेत्यण् । द्वैकुलिजकः। कुलिजाल्लुठञोर्लुग्विकल्पः। असंज्ञायामिति किम् पञ्चलोहिन्यः। परिमाणस्य पाञ्चलोहितिकं पाञ्चकलापिकम् परिमाणस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिणामस्याग्रहणार्थम्। द्वैमासिकः त्रैमासिकः द्वैरात्रिकः त्रैरात्रिकः।

**वर्षस्याभविनि।**

संख्याया अधिकशब्दाच्चोत्तरस्य वर्षस्य ञ्णिति किति च तद्धिते परतोऽचामादेरचःस्थाने वृद्धिर्भवति। न चेत् स तद्धितो भाविन्यर्थे विहितो भवति। द्वाभ्यां वर्षाभ्यां निर्वृत्तोऽधीष्टो भूतो द्वे वर्षे भूतो वा द्विवार्षिकः। अधिकवार्षिकः। अभाविनीति किम् द्वे वर्षे भावी द्वैवार्षिकः।

**जाते प्रोष्ठभद्राभ्यां पदस्य।**

जातेऽर्थे विहिते तद्धिते किति ञ्णिति च परतो प्रोष्ठभद्राभ्यामुत्तरस्य पदस्याचामादेरचः स्थाने वृद्धिर्भवति। प्रोष्ठपदाभिर्युक्तः कालः। चन्द्रवृत्तेर्नक्षत्राद्युक्तः कालः इति प्राग्दितीयोऽञ्। तस्य लुप् तदविशेष इति लुप् तदन्तात् तत्र जात इत्यर्थे नक्षत्राण् प्रोष्ठपादः। भद्रपादः। जात इति किम् प्रोष्ठपादासु भवः प्रोष्ठपदो मेघः। भाद्रपादः।

**हृद्भगसिन्धोः पूर्वपदस्य च।**

हृद्भगसिन्ध्वन्तायाः प्रकृतेः तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति। सुहृदयस्य भावः सौहार्द्यम्। सुदुर्हृदोस्तु मित्रामित्रपर्यायियो निपातनसामर्थ्यात् हृच्छब्दस्यानर्थक्ये सत्युत्तरपदवृद्धिर्न भवति। सुहृदो भावः सौहृदम् दौर्हृदम्। सौभाग्यं दौर्भाग्यम् सौभागिनेयः दौर्भागिनेयः। सक्तुप्रधानाः सिन्धवस्तेषु भवः साक्तुसैन्धवः। पानसैन्धवः कच्छादित्वादण् लवणसिन्धोरयं लावणसैन्धवः। चकार उत्तरस्य पदस्य चेत्यनुकर्षणार्थः तेनोत्तरत्र द्वयोरप्यनुवृत्तिर्भवति।

**अनोः शतिकहोडसंवरणरहत्संवत्सराणाम्।**

अनुशब्दात् परा ये शतिकादयस्तदन्तायाः प्रकृतेरत्तद्धिते किति ञ्णिति च परतः पूर्वपदस्य उत्तरपदस्याचामादेरचः स्थाने वृद्धिर्भवति। अनुशतिकस्येदम् आनुशतिकम्। अनुहोडेन चरति आनुहौडिकः। अनुसंवरणे दीयते आनुसांवराणिकम् अनुरहतोऽपत्यं आनुराहतिः अनुसंवत्सरे दीयते आनुसांवत्सरिकम्।

**कुरोः कतपञ्चालयोः।**

कुरुशब्दात् परौ यौ कतपञ्चालौ तदन्तायाः प्रकृतेः तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति कुरुक तस्यापत्यं कौरुकात्यः। कुरवश्च पञ्चालाश्च कुरुपञ्चालाः। तेषु भवः कौरुपाञ्चालः। जनपदसमुदायस्य जनपदत्वाभावात् वुञि सत्यणेव भवति।

**अधेर्देवभूतयोः।**

अधेः परौ यौ देवभूतशब्दौ तदन्तायाः प्रकृतेः तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरच स्थाने वृद्धिर्भवति। सर्वभूमेर्निमित्तं संयोग उत्पातो वा। अधिदेवे भवमाधिदैविकम्। अाधिभौतिकम्। आध्यात्मादित्वात् उक्।

**इहपराभ्यां लोकस्य।**

आभ्यां परो यो लोकशब्दस्तदन्तायाः प्रकृतेः तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेर्वृद्धिर्भवति। इहलोके भवमैहलौकिकम्। पारलौकिकम्। अध्यात्मादित्वात्।

**सर्वात् भूमिपुरुषयोश्च।**

सर्वशब्दात् परौ यौ भूमिपुरुषशब्दौ लोकशब्दश्च तदन्तायाः प्रकृतेस्तद्धिते किति ञ्णिति च परत पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सर्वभूम्यां विदित ईश्वरो वा सार्वभौमः। सर्वपुरुषाणामिदं सार्वपौरुषम्। सर्वलोकेषु विदित सार्वलौकिकः।

**अस्याद्धत्यहेत्योः।**

अस्य शब्दात् परौ यौ हत्यहेतिशब्दौ तदन्तायाः प्रकृतेस्तद्धिते किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति। अस्य हत्यशब्दोऽस्मिन् अस्ति आस्यहात्योध्यायः विमुक्तादित्वादण्। अस्यहेति प्रयोजनमस्य आस्यहैतिकम्। अत एव वचनात् पदसमुदायात् उञ् विभक्तेश्चालुक्।

**वध्योगप्रयोगाभिगमागारवेणुपरस्त्रीषुष्करसदुदकशुद्धसूचनहचतुर्विदीसिहत्याशातकुम्भसुखशयनादीनां च।**

वध्योगादीनां तद्धिति किति ञ्णिति च परतः पूर्वपदस्योत्तरपदस्य च वाचामादेरचः स्थाने वृद्धिर्भवति। वधेनयोः योगोऽस्याभूत्। वध्योगो नाम ऋषिः पृषोदरादित्वादकारलोपः। तस्यापत्यं वाध्योगः। विदादित्वादञ्। प्रयोगे भवतः प्रयोगितः। अध्यात्मादित्वात् टक्। अभिगममर्हति। अभिगामिकः। आर्हीयष्टक्। अगारवेणोरपत्यं आगरवैणवः। परस्त्रिय अपत्यं पारमेणवः। परस्त्रिया अपत्यं पारस्त्रैणेयः। कल्याणादित्वात् ढत्व पुष्करसतोऽपत्यपौष्करसादिः। भाघादित्वात् भिञ् औदक शोद्धिः अत इञ् सूत्रनडस्यापत्यं सौत्रनाडिः। चतस्र एव विद्याः चातुर्वैद्यं चतुर्वर्णादित्वात् नडपार्थे ष्यन्। असि हत्यायां भवमासिहात्यम्। चातकुम्भस्य विकारः चातकौम्भम्। सुखशयनं प्रभूति सौखशायनिकः। सूस्नातादित्वात् ठक् आदिग्रहणाद्यथा दर्शनमन्येषामपि।

**राजपुरुषपरिमण्डलप्रतिभूसर्ववेदानां ष्यञि।**

राजपुरुषादीनां ष्यञि प्रत्यये पूर्वपदस्योत्तरपदस्य चाचामादेरवस्थाने वृद्धिर्भवति। राजपुरुषस्य भावः कर्म वा राजपौरुषम्। परिमाण्डल्यम्। प्रातिभाग्यम्। सर्ववेदाः सार्ववैद्यम्। चातुर्वर्णादित्वात् स्वार्थष्यञ्। ष्वतीति किम्। राजपुरुषस्य अपत्यं राजपुरुषायणिः। वृद्धादगोत्राद् फिञ्।

**प्राचांनगरान्तस्य।**

प्राचादेशे वर्तमानस्य नगरान्तस्य किति ञ्णिति च परतः पूर्वपदस्य चोत्तरपदस्य चाचामादेरचो वृद्धिर्भवति। सौह्मनागरः, वौज्ञेनागरः। प्राचामिति किम्। उदीचां माद्रनगरम्।

देवतानां द्वन्द्वे सूक्तहविषोः।

सूक्तहविष्टो सम्बन्धिनीनां देवतानां यो द्वन्द्व सूत्र तद्धितेति तिञि णिति च परतः पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति। आग्नवैष्णवसूक्तम्। ऐन्द्रावौष्णं हविः। आग्निमारुतं कर्म।। अग्निवारुणीमनड्वाहि मा लभेत। सूक्तहविषोरिति किम्। स्कन्दविशाखयोरिदं स्कान्दविशाखम्। ब्रह्मप्रजापत्यं स्कन्दविशाखादीनां सूक्तहविसम्बन्धित्वं श्रुतौ नास्ति।

**नेन्द्रस्य परस्य ।**

इन्द्रशब्दस्योत्तरपदस्य देवताद्वन्द्वे वृद्धिर्नभवति। आग्नेन्द्रं सूक्तम्। सौमेश्रं हविः। परस्येति किम्। ऐन्द्रामेकादेश कपालं पुरोडशान्निवपेत्। इन्द्रशब्दोऽयमुत्तरपदमेतत् ज्ञापयति। बहिरङ्गमपि पूर्वोत्तरपदयोस्तावत् कार्यं पूर्वं भवति। पश्चादेकादश इति। तेन पूर्वेषु धेनवः वैश्वधेनवः सौवर्णपालजः इत्यादिसिद्धं भवति।

## अर्धात् परिमाणस्य पूर्वस्य तु वा।

अर्धशब्दान् परस्य परिमाणवाचिनशब्दस्य तद्धिते किति ञ्णिति च परतो अचामादेरचः स्थाने न वृद्धिः पूर्वस्यत्वर्धशब्दस्य वा भवति। अर्धद्रौणेन क्रीतं आर्धद्रौणिकम् अर्धद्रौणिकम्। आर्धकौशम्बिकम् अर्धकौशम्बिकम्। परिमाणस्येति किम्। अर्धक्रोशः प्रयोजनमस्य आर्धक्रौशिकम्।

## नातः।

.........रक्तविकार इति पुंवद्भावप्रतिषेधो न स्यात्। यथा अर्धप्रस्ते भवा भार्या अस्य आर्धप्रस्तभार्य इति।

## प्राद्वाहनस्य ढे।

प्रात् परस्य वाहनशब्दस्य ढे तद्धिते किति ञ्णिति च प परतौ चामादेचरो नित्यं वृद्धिः पूर्वस्य च प्रशब्दस्य वा भवति। प्रवाहणस्यापत्यं प्रावाहणेयः। शुभ्रारित्वात् ढक् अत्राप्युत्तरपदवृ(पदवृस्य भवति प्रवाहणेयस्य)द्धेर्पूर्वोक्तमेव प्रयोजनम्। प्रवाहणैर्हार्या इति पुंवद्भावप्रतिषेधो भवति।

## ढस्य च।

ढान्तस्य पदस्य प्रागुक्तपरस्य वाहौ शब्दस्य तद्धतेति किति ञ्णिति च परतो चामादेरचो नित्यं वृद्धिः पूर्वस्य शब्दस्य वा भवति। प्रवाहेणस्यापत्यं युवा प्रावाहणेयिः प्रवाहणेयिः। प्रावाहणेयकं प्रवाहणेयकम्। ब्राह्म तद्धितनिमित्तवृद्धिर्ढाश्रयणे विकल्पेन न शक्या बाधितुमिति सूत्रारम्भः।

## नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्।

नञः परा ये शुच्यादयस्तदन्तानां प्रकृतीनां तद्धिते कितिञ्णिति च परत उत्तरपदस्याचामादेरचो नित्यं वृद्धिः पूर्वस्य तु नञो वा भवति। न शुचिरशुचिस्तस्येदमशौचम् अशौचम्। अनैश्वर्यम् आनैश्वर्यम् भावे ब्राह्मणादित्वात् ष्यञ् अनैश्वर्यम् अक्षेत्रज्ञस्येदम् आक्षेत्रज्ञम्। आकौशलम्। अकौशलम्। अनिपुणस्येदमानैपुणम् अनैपुणम्।

## यथातथायथापुरयोः पर्यायेण।

नञः परौ यौ यथातथयथापुरशब्दौ तदन्तायाः प्रकृतेः तद्धिते किति ञ्णिति परतो नञ उत्तरपदस्याचामादेरचः पर्यायेण वृद्धिर्भवति। यथातथं यथापुरमिति यथार्थेऽव्ययीभावः। ततो नञ्समासः न यथातथमयथातथम्। तस्य भाव आयथातथ्यम् अयाथातथ्यम्। आयथापुर्यम्। अयाथापुर्यम्। आयाथातथ्यमिति समासात् प्रत्यये अयाथातथ्यमिति प्रत्ययान्तेन नञ्समासे रूपद्वयस्य सिद्धत्वात् सुखप्रतिपत्यर्थं वचनम्।

**हनस्तोऽचिण्णलोः।**

चिण्णल्प्रतिषेधात् तद्धित इति तत्सम्बद्ध कितीत्यापि च निवृत्तम् ञ्णितीति वर्तते। चिण्वर्जिते ञ्णिति प्रत्यये परतो हन्तेरन्यस्य तकारो भवति। घातयति घातो वर्तते। अचिण्णलोरिति किम् अघानि जघान।

**आतो युक् चिण्कृतोः।**

.........................................................................................

**नमः सेटो वृद्धिरवम्यमिकम्याचमः।**

धातोर्वम्यादिवर्जितस्य चिणि ञिणिति कृति च परतो वृद्धिर्न भवति। अशमि अतमि शमकः तमकः शम इति किम् अपादि पाठः पाठकः। सेट इति किम् । अगामि अवम्यमिकम्याचम इति किम् । अवामि वामः वामकः। चिण्कृतोरित्येव शशाम।

**उद्यमोपरमौ।**

उदुपपूर्वयोर्यमिरम्योर्घञि वृद्ध्यभावो निपात्यते। उद्यमः उपरमः। अनिट्वादप्राप्ते वचनम्।

**जनिवध्योः।**

जनि वधि इत्येतयोश्चिणि कृति ञ्णिति च वृद्धिर्नभवति। अजनि जनकः अजनकः अवधि वधकः वधः वधिः। प्रकृत्यन्तरमस्ति। यस्य बीभत्स इति गर्हायामेव सन् भवति। अन्यत्र वधते। भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यते। इति तस्यायं प्रतिषेधः हनादेशस्यापि ण्यत्यन्तत्वादेव वृद्धिर्न भवति।

**विश्रमेर्वा।**

विपूर्वस्य श्रमेश्चिणि ञ्णिति कृति च परतो वृद्धिर्वा न भवति। व्यश्रमि व्यश्रामि विश्रमः विश्रामः विपूर्वग्रहणं किम् अश्रमि श्रमकः। श्रमेरित्येव विशग्राम।

**णल्युत्तमे।**

उत्तमे णलि परतः प्रकृतेर्वृद्धिर्वा न भवति। अहं पपच अहं पपाच अहं ममद अहं ममाद। उत्तम इति किम् स पपाच।

**ऋह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ।**

ऋप्रभृतीनामकारान्तानां च णौ प्रत्यये परतः पुगागमो भवति। अर्तेरियर्त्तेर्वा अर्पयति ह्रेपयति व्लेपयति ऋरीयते रिणातेर्वा रेपयति क्नोपयति क्ष्मापयति। आतां दापयति कापयति अध्यापयति। पुकः पूर्वान्तकरणम् अदीदपदित्यत्रोपधा ह्रस्वार्थम्।

**शाच्छासाह्वाव्यावेपां युक्।**

शादीनां प्रकृतीनां णौ प्रत्यये परतो युगागमो भवति। पुकोऽपवादः। शोतन्करणे निशाययति। छो छेदने अवछाययति। षो अन्तकर्मणि अवसाययति ह्वेञ् ह्वाययति व्या संव्याययति, व्ये वाययति पै ओवैशोषणे पाययति। पा रक्षणे इत्यस्य लुग्विकरणाल्लुकं वक्ष्यति। युकोऽपि पूर्वान्तकरणादशीशयदित्यादावुपधाह्रस्वो भवति।

**वो विधूनने जुक्।**

वा इत्यस्य विधूनने वर्तमानस्य णौ परतो जुगागमो भवति। पक्षेणोपवाजयति। विधूनन इति किम् पै ओवै इत्यस्य केशानावापयति।

**धूञ्प्रीञोर्नुक्।**

धूञ् कम्पने प्रीञ् तर्पणे इत्येतयोर्णौ परतो नुगागमो भवति। धूनयति प्रीणयति अनुबन्धनिर्देशात् धू विधूनने प्रीङ् प्रीत्तवित्येतयोः धावयति प्राययति।

**लियस्नेहद्रवीकरणे वा।**

लिनातेर्लीयतेश्च णौ प्रत्यये परतः स्नेहद्रवीकरणेऽर्थे नुगागमो वा भवति घृतं विलीनयति विलाययति। ईकारान्तनिर्देशात् कृतात्वस्य पुग् वक्ष्यमाणो लुक् च भवति। स्नेहद्रवीकरण इति किम्। जतु विलापयति।

**लो लुक्।**

लातेर्ला इत्येवं कृतात्वस्य लिनातेः लीयतेश्च णौ परतः स्नेहद्रवीकरणेऽर्थे लुगागमो वा भवति। घृतं विलालयति। विलापयति। स्नेहद्रवीकरणे इत्येव। जटाभिरालापयति। श्येनो वर्तिकामुल्लापयति। करत्त्वामुल्लापयते।

**पातेः।**

पातेर्णौ परतो लुगागमो भवति। पालयति।

**भियो हेतुभये षुक्।**

श्री इत्येतस्य णौपरतः षुगागमो भवति। सा चेत् भीहेतोः प्रयोजकाद् भवति। मुण्डो भीषयते। जटिलो भीषयते। ईकारान्तनिर्देशात् कृतात्वस्य पुगेव भवति। मुण्डो भापयते जटिलो भापयते। हेतुभय इति किम् कुञ्चिकयैनं भाययति।

**स्फायो वः।**

स्फायतेर्णौपरतो वकारोन्तादेशो भवति। स्फावयति।

**शदेरगतौतः।**

शदेरगत्यर्थस्य णौ परतः तकारोन्तादेशो भवति। शातयति फलानि। अगताविति किम् गोपालको गाः शादयति। गमयतीत्यर्थः।

**रुहेः पो वा।**

रुहेर्णौपरतः पकारोऽन्तादेशो वा भवति। रोपयति। व्रीहीन् रोहयति व्रीहीन्।

**मितां ह्रस्वः।**

घटादयो धातवो मित्संज्ञास्तेषां णौ परतो ह्रस्वो भवति। घटयति व्यथयति ज्वरयति ़हिडयति जनयति रमयति। वृद्धिनिषेधेनैव सिद्धे ह्रस्ववचनं हिड इत्यादि सिध्यर्थम्।

**चिण्णमुलोदीर्घश्च।**

चिण्णमुल्परे णौपरे मितां प्रकृतीनांदीर्घश्चकारात् ह्रस्वश्च भवति। अघाटि अघटि, घाटं घाटं, घटं घटम् अशामि अशमि। शामं शामं , शमं शमम्। वेत्येव सिद्धे दीर्घवचनं मितामनुपधाया अपि दीर्घार्थम्। अदाक्षि अदक्षि। दाक्षं दाक्षं, दक्षं दक्षम्। णिङ् व्यपेत यङ् व्यपेताश्च दीर्घग्रहणं प्रयोजयन्ति। णिव्यपेतास्तावत् शमयन्तं प्रयोजयति। णिच् तदन्तात् कर्मणि चिण् अशामि अशमि। आभीक्ष्ण्ये णमुल् शामं शामं, शमं शमम्। यङ्व्यपेता शंशमयते श्चिण्णमुलोः अशंशामि अशंशमि। शंशामम् शंशमम्। अत्र णौ योऽसौ णिलोपे यङोऽकारलोपश्च तयोः स्थानिवद्भावात् ताभ्यां चिण्णमुलोः प्रकृतेर्व्यवधानमिति ह्रस्वविकल्पो न स्यात्। दीर्घग्रहणे तु दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधादानन्तर्यमित्येव सिध्यति।

**छादेर्घेऽद्व्याद्युपसर्गस्य।**

छायतेरद्व्याद्युपसर्गपूर्वस्यैकोपसर्गस्य वा घप्रत्यये परतो ह्रस्वो भवति। उरच्छदः, दन्तछदः, प्रच्छदः, परिछदः। अद्व्याद्युपसर्गस्येति किम् समभिछादः।

**इस्मन्त्रन्क्विषु।**

एकारछादयतेरिसादिषु प्रत्ययेषु परतो ह्रस्वो भवति। छदिः, छद्म, छत्रम्, अपच्छत्।

**चङ्युपधायाः।**

चङ् परे णौ या प्रकृतिस्तस्याः उपधाया ह्रस्वो भवति। अचीकरत् अपीपचत्। अत्र द्विर्वचनेपधाह्रस्वत्वयोः प्राप्तयोः पूर्वमुपधाह्रस्वत्वं ततो द्विर्वचनमितितिक्रमः। तथा च माभवानटिटत् माभावानसिसदिति सिद्धं भवति। ननु चात्र कृताकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वं द्वितीयद्विर्वचनेन भवितव्यम्। एवं च सति ह्रस्वत्वं न प्राप्नोति। नैष दोषः ओर्ऋदित्करणं ज्ञापकं नित्यमपि द्वर्वचनमुपधाह्रस्वत्वेन बाध्यते। तद्ध्येवमर्थं क्रियते माभवानोणिणदिति ऋदित्वादुपधाह्रस्वत्वप्रतिषेधो यथा स्यात्। यदि चात्र नित्यत्वात् पूर्वमेव द्वितीयद्विर्वचनं स्यात्। तदव्यवहितत्वादेव ह्रस्वत्वस्याप्राप्तिरिति किम् प्रतिषेधार्थेन ऋदित्करणेन। चङीति किम् कारयति। उपधाया इति किम् अचाङ्क्षात् ननु च येन नान्यवहितोऽपि वचनप्रामाण्यादेकेन वर्णेन व्यवधानमाश्रीयते न पुनरनेकेनेत्यत्र न भविष्यति। किमुपधाग्रहणेन उच्यते जिघ्रतेरित्याद्यतेरित्याद्यर्थमवश्यमेवोपधाग्रहणं कर्तव्यम् तदिहापि क्रियमाणं स्पष्टं भवति। णावित्येव। अलीलवत् अदीदपत् । अत्र चोपधाया इत्येतावुत्युच्यमाने अन्तरङ्गावपि वृद्ध्या वादेशौ लुकं च बाधित्वा ह्रस्वःप्रसज्येत। अपीपचदित्यादौ तु नैव स्यात्। णिग्रहणानुवृत्तौ चङ्परेणौ उपधाया ह्रस्व इति सर्वत्र सिद्धं भवति।

**णेश्च।**

णिचः परो यश्चङ्गरो णिजन्तस्तस्मिन् परत उपधाया ह्रस्वो भवति। वदति स्म वीणा। तान् प्रयुक्तवान् परिवादकः तमप्यन्यः प्रयुक्तवान्। अवीवदद्वीणां परिवादकेन योऽसौ णौ णिज् लुप्यते। तस्य स्थानिवद् भावादनुपधात्वान्नाग्लोपित्वाद्वा न प्राप्नोतीति वचनम्।

**नाग्लोपि शास्वृदिताम्।**

अग्लोपिनीनां प्रकृतीनां शासेः ऋदितां च चङपरे णावुपधाया ह्रस्वो न भवति। लोमान्यनुमृष्टवान्। अन्वनुलोमत् राजानमाख्यातवान् अरराजत्। यत्राज्लोपष्टिलोपं तत्र स्थानिवद्भावेनापि सिध्यति मालामाख्यातवान् अममालत् शास-अशशासत्। ऋदितांयाचृ -अययाचत् नाथृ अननाथत्। एतेषामिति किम् वास्य परिछन्नवान् पर्यवीवसत्। स्वादूक्तवान् असिस्वदत्। अत्रेकारोकारयोष्टिलोपं बाधित्वा परत्वावृद्धिः ततष्टिलोप इत्यग्लोपिनी प्रकृतिर्न भवति।

**भ्राजभासभाषदीपजीवमीलपीडां वा।**

भ्राजादीनां प्रकृतीनां चङ्गरे णौ परतः उपधाया ह्रस्वो वा भवति। अबभ्राजत् अबिभ्रजत् । अदिदीपत् अदीदिपत्। अजिजीवत् अजीजिवत्। अमिमीलत् अमीमिलत्। अपिपीडत् अपीपिडत् । भ्राजभासोः ऋकारमनुबन्धमनर्थमेव प्रमादात् पठन्ति।

**कणवणभणश्रणलपह्वेञ्ां च।**

कणादीनां प्रकृतीनां चङ् परे णौ परत उपधाया ह्रस्वो भवति वा। अचीकणत् अचकाणत् अवीवणत् अववाणत् अबीभणत् अबभाणत् अशिश्रणत् अशश्राणत् अलीलपत् अललापत् अजूहवत् अजुहावत्।

**उर्ऋत्।**

चङ् परे णौ परे ऋवर्णस्योपधाया ऋकार आदेशो वा भवति। इररारामपवादः। अचीकृतत् अचिकीर्तत्। अवीवृतत् अववर्तत्। अपीवर्तत् अपवर्तत्। वचनसामर्थ्यादन्तरङ्गा अपीररारोनेन बाध्यन्ते। तपरः किं। अचीकृतदित्यत्र दीर्घोऽपि स्थानिनि ह्रस्व एव यथा स्यात्। असति तु तपरत्वे नायं विधीयमानो विध्यन्तरनिरासार्थं स्वरूपमेवाभ्यनुज्ञायत इति।

**घ्र इत्।**

चङ् परे णौ परतो जिघ्रतेरुपधाया इकारादेशो वा भवति। अजिघ्रिपत्। अजिघ्रपत्। (इररारामपवादः अपिकृतत् अचीकृतत् अपिकृतत् अयवर्तन् वचनसामर्थ्यादन्तरङगावपीरघत।)

**स्थः।**

चङ्परे णौ परतस्तिष्ठतेरुपधाया इदादेशो योगविभागान्नित्यं भवति। अतिष्ठिपत् अतिष्ठिपताम् उपधाग्रहणानुवृत्तेरन्त्यस्य न भवति।

**पिबः पीप्यः साभ्यासस्य ।**

पिबतेः साभ्यासस्य चङ्परे णौ परतः पीप्य इत्ययमादेशो भवति। अपीप्यत् अपीप्यताम् विकरणनिर्देशः पातिनिवृत्यर्थः। अपीपलत्।

**देङो दिगि लिटि।**

देङः साभ्यासस्य लिटि प्रत्यये परतो दिगीत्ययमादेशो भवति। अवदिग्ये अवदिग्याते अवदिग्यिरे।

**ह्लादेः ह्लत् क्तिन्निष्ठयोः।**

ह्लादेः क्तिनि निष्ठायां च प्रत्यये परतो.............

**प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः।**

आपीति किं कारकः असुप इति किम्। बहुपरिव्राजका मथुरा। बहुमद्रका सेना, सुबन्तादयं परिव्राजकशब्दात् मन्द्रकशब्दाच्च परः आबिति प्रतिषेधो भवति। प्रसज्य प्रतिषेधश्चायं न पर्युदासः पर्युदासे हि सति समुदायादसुबन्तात् पर आबिति इत्वमत्रस्यादेव न चायं बहुव्रीहिः अविद्यमानः

सुबस्मिन् सोयमसुप् तस्मादसुप इति एवं हि बहुचर्मिकेत्यत्रापि न स्यात्। प्रसज्ये ककारेणसुपो व्यवधानात् सिध्यति। अपीत्यनेन प्रत्ययस्थः क शब्दो विशेष्यते न प्रकृतिः तेन रथकट्येत्यादावित्वं न भवति।

**मामकनरकयोश्च।**

मामकनरकशब्दयोश्च आपि परतः कात्पूर्वस्याकारस्येदादेशो भवति। ममेयं मामिका तवकममकावेकत्व इत्यणन्तादपि केवलस्वमामनकेत्यादिना संज्ञायां ङीपो नियमात् आप् नरान् कायतीति नरिका आतोनुपसर्गे क इति कः। अत्र कशब्दस्य प्रत्ययस्थत्वाभावात् पूर्वेण न प्राप्नोतीति वचनम्।

**अधातुत्यत्त्यप्यकाभ्यामाप्स्थानस्य वा।**

धात्वादिभ्य अन्यस्य सम्बन्धिनौ यौ यकारककारौ ताभ्यामुत्तरस्यापृस्थानस्याकारप्रत्ययस्य कात्पूर्वस्यासुपः परे आपि परतः इदादेशो वा भवति। इभ्यका इभ्यिका क्षत्रियिका क्षत्रियका चटकिका चटकका मूषिकिका मूषिकका। अधातुत्यत्त्यपामिति किंसुनयिका अशोकिका सुपाकिका दाक्षिणात्यिका इहत्यिका यकाभ्यामिति किम् अजिता अञ्चिता आप्स्थानस्येति किं साकेभ्ये भवा सांकाभ्यिका काम्पिल्यिका प्रस्थवहेत्यादिना योपधलक्षणो वुञ्।

**भस्त्रैषाजाज्ञाद्वास्वानाम्।**

भस्त्रादीनां य आप् तत्स्थाना (पन्न)स्याकारप्रत्ययस्य कात्पूर्वस्यासुपः परे आपि परत इत्वं वा भवति। भस्त्राशब्दस्याभाषितपुंस्कत्वात् उत्तरसूत्रेणैव सिद्धे यदिह ग्रहणं तदुपसर्जनार्थम् अविद्यमानाभस्त्रा अस्याः अभस्त्रका अभस्त्रिका एषका एषिका अजका अजिका अनजका अनजिका ज्ञका ज्ञिका अज्ञका अज्ञिका द्वके द्विका स्वका स्विका अस्वका अस्विका एषाद्वेनञ् पूर्वे न प्रयोजयतः किं कारणम् अनयोः सर्वनामत्वात् कं बाधित्वा पक्षे अकज् भवति। तत्र यदि साकज्काभ्यां नञ्समासः अथापि कृते नञ् समासे पश्चादकच्। उभयथापि समासात् या विभक्तिरुत्पद्यते तस्यां त्यदाद्यत्वे सति टापा भवितव्यम्। सोऽन्तर्वर्तिन्या विभत्तया सुपः पर इति इत्वस्य प्राप्तिरेव नास्ति तेनानेषका अद्वके इत्येव नित्यं भवति म सर्वनामत्वात् कप्रत्ययान्तः कप्रत्ययेन स्वशब्दस्तु ज्ञातिधनारन्यायां टास्सुपोर्व्यवधानादसुप इति प्रतिषेधो नास्तीति नञ्पूर्वोऽपि प्रयोजयति।

**अभाषितपुंस्कादा च।**

अभाषितपुंस्कान्नित्यं स्त्रीविषयाद्विहितो य आप् तत्स्थानस्यातः प्रत्ययस्थात् कात्पूर्वस्यासुपः परे अापि परत आकारः इच्च वा भवति। ह्रस्वा खद्वा खद्वाका खद्विका खद्वका न खद्वा अखद्वा सार्ध ह्रस्वावा अखद्वाका अखद्विका अखद्वका। अभाषितपुंस्कादिति किं शोभनिका तथा अविद्यमाना खद्वा अस्याः अखद्वा अखद्विका बहुखद्विका।

**वर्तका शकुनौ।**

वर्तकेति शकुनावर्थे इत्वं वा निपात्यते। वर्तका शकुनिः वर्तिका वा । शकुनाविति किं वर्तिका दासी।

**सूतकापुत्रकावृन्दारकाः।**

सूतकादय इत्वाभावार्थं वा निपात्यन्ते सूतका सूतिका पुत्रका पुत्रिका वृन्दारका वृन्दारिका।

**न यत्तत्त्यकानाम् ।**

यदादीनामकारस्येत्वं न भवति। यका सका यकामधीमहे तकां पचामहे उपत्यका अधित्यका।

**आशिषि।**

आशीर्विषयो यः वुन् तस्य प्रत्ययस्थात् कात्पूर्वस्याकारस्येकारो न भवति। जीवका जीवताम् नन्दका नन्दताम्।

**उत्तरपदलोपे।**

उत्तरपदलोपे सति कात्पूर्वस्येकारो न भवति अनुकम्पिता देवदत्ता देवदत्तका यज्ञका हलादावुत्तरपदस्य च वेति उत्तरपदलोपः।

**क्षिपकाध्रुवकाधुवकालहकाचरकाचटकेष्टकैडकैरकाकरकावकालकादण्डकापिप्पकाकन्यकामेनकादीनाम्।**

क्षिपकादीनां कात्पूर्वस्याकारस्येदादेशो न भवति। क्षिपका ध्रुवका धुवका लहका चरका चटका इष्टका एडका एरका करका अवका अलका दण्डका पिप्पका कन्यका मेनका आदिग्रहणाद्यथा दर्शनमन्येऽपि।

**तारका ज्योतिषि।**

तारकेति ज्योतिषीत्वाभावो निपात्यते । तारका नक्षत्रम्। अक्ष्णः कनीनिका च। ज्योतिषीति किं तारिका दासी।।

**वर्णका तान्तवे।**

वर्णकेति तान्तवे द्रव्ये इत्वाभावे निपात्यते। वर्णका वस्त्रविशेषः। तान्तव इति किं वर्णिका भागुरी लोकायतस्य।

**अष्टका पितृदेवत्ये।**

अष्टकेति पितृदेवत्येऽर्थे इत्वाभावो निपात्यते अष्टकापितृदेवत्यमहः पितृदेवत्य इति किं अष्टिका खारी।

**च जोः कुघिण्यतोः।**

चकारजकारान्तायाः प्रकृतेः घिति ण्यति च प्रत्यये परतः कवर्गोऽन्तादेशो भवति। घिति पाकः त्यागः ण्यति पाक्यम् भाग्यम् घिण्यतोरिति वचनात् त्याजयति।

**न्यङ्क्विमस्जिभ्रस्जीनामौ।**

निपूर्वस्याञ्चतेः मस्जिभ्रस्ज्योश्च उप्रत्यये कवर्गादेशो भवति। व्यतिषजतीति व्यतिषङ्गः, अनुषङ्गः, न्यङ्कुः नावञ्चेः इत्युप्रत्ययः मद्गुः श्रृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः इति उः भृगुः स्यसिभ्रस्जोः सुलोपश्चेति कुप्रत्ययः।

**तञ्चिवञ्च्योरकि।**

तञ्चिवञ्च्योश्चकारस्य रकि प्रत्यये कवर्गादेशो भवति। तक्रम् वक्रम् उपावाभ्यां सृजोऽचि व्यतिसञ्ज्यनुसंज्योश्च व्यतिषजतीति व्यतिषङ्गः अनुषङ्गः।

**पचेर्दूरादिभ्यो णे।**

दूरादिभ्यः परस्य पचेश्चकारस्य णप्रत्यये कवर्गादेशो भवति दूरेपाकः दूरेपाका दूरेपाकुः क्षणेपाकः क्षणेपाकुः दूरेक्षणेफलेषु पचेः कर्मकर्तरि उश्चास्यवेति णप्रत्ययः दूरादिभ्यः इति किं। पचः।

**कपोतोलूकश्वमांसेभ्योऽणि।**

कपोतादिभ्यः परस्य पचेश्चकारस्याण् प्रत्यये कवर्गादेशो भवति। कपोतान् पचति कपोतपाकः। उलूकपाकः। श्वपाकः। मांसपाकः अणीति किं श्वपचः।

**उचः के गुणश्च।**

उचेश्चकारस्य के परतः कवर्गादेशः प्रकृतेरिति को गुणश्च भवति। न्योकः संरुतः न्योकः वृक्षः इगुपधलक्षणः कः।

**शुचिरुच्योर्घञि।**

शुचिरुच्योश्चकारस्य घञि परतः कुत्वं भवति। शोकः रोकः घञीति किम्। शोच्यम् रोच्यम् ,अनयोर्निष्ठाया सेट्वात् कुत्वमप्राप्तं विधीयते।

**मिहेर्हस्याचि संज्ञायाम्।**

मिहेर्हकारस्याचि परतः संज्ञायां कुत्वं भवति। मेघः घनः संज्ञायामिति किम्। मेहः।

**वहेः सम्प्रसारणं चानुपसर्गस्य।**

वहेरनुपसर्गस्याचि परतो हस्य कुत्वं सम्प्रसारणं च भवति। ओघः प्रवाहः अनुपसर्गस्येति किम् प्रवहः विवहः। संज्ञायामिति किम्। वहः।

**दहेर्न्यवाभ्यां घञि।**

न्यवाभ्यामुत्तरस्य दहेर्हकारस्य घञि प्रत्यये परतः संज्ञायां कुत्वं भवति। निदाघः अनुवाघः। संज्ञायामित्येव निदाहः अवदाहः।

**अर्हः।**

अर्हतेर्हकारस्य घञिपरतः संज्ञायां कुत्वं भवति। अर्घः संज्ञायामित्येव। अर्हः।

**हन्तेर्ञ्णिति।**

हन्तेर्हकारस्य ञिति णिति च प्रत्यये परतः कुत्वं भवति। घातो वर्तते। घातुकः घातयति। ञ्णितीति किम्। हन्ता हन्तु हस्येत्येव, जघान अलोऽन्त्यस्य माभूत्।

**उपधालोपे च।**

उपधालोपे च सति हन्तेर्हकारस्य कुत्वं भवति घ्नन्ति अघ्नन् स्वघ्नः। उपधालोप इति किम् हन्ति हन्ता या वृत्रहणौ।

**द्वित्वहेतौ।**

हन्तेर्हकारस्य दित्वहेतौ प्रत्यये परतो हकारस्य कुत्वं भवति। जिघांसति जङ्घन्यते जघनिथ।

**हेरचङि।**

हिनोतेर्धातोश्चङ्वर्जिते द्वित्वहेतौ प्रत्यये परतो हकारस्य कुत्वं भवति। प्रजिघाय प्रजिघीषति प्रजेघीयते। अचङीति किम् प्राजीहयत् अत्र द्विर्वचननिमित्तस्य चङोऽणि व्यवधानादेव कुत्वस्याप्राप्तौ सिद्धायामचङीति प्रतिषेधवचनमन्यत्र द्वित्वे हेतौ णिज्व्यवहितेऽपि कुत्वं भवतीति ज्ञापनार्थम्। प्रजिघाययिषति।

**सन्लिटोर्जेः।**

सनि लिटि च द्वित्वहेतौ प्रत्यये परतो जयतेर्जकारस्य कुत्वं भवति। जिगीषतिजिगाय विजिग्ये सन्लिटोरिति किम् जेजीयते।

### चेर्वा।

चिनोतेर्द्विर्त्वहेतौ सनि लिटि च परतः कुत्वं वा भवति। चिकीषति चिचीषति चिकाय चिचाय चिक्ये चिच्ये सन्लिटोरित्येव। चेचीयते।

### न क्वाद्यजिव्रज्यादेर्निष्ठायां सेटः।

कवर्गादेर्धातोरजि व्रज्यादेश्च निष्ठायां सेद्वम्बन्धिनश्च ञिणि ण्यति च प्रत्यये परतः कुत्वं न भवति। उत्कोचः उत्कोच्यम् कूजः कूज्यम् खर्ज्यः खर्ज्यम् गर्जः गर्ज्यम् उदाजः समाजः परिव्राजः परिव्राज्यम् ऋचेरचेर्वा। अर्चः अर्च्यः आलोचः ओलोच्यम् अर्जः अर्ज्यम् लाजः लाज्यम् तर्जः तर्ज्यम् वाच्यम् निष्ठायां सेट इति किम् पाकः पाक्यम् । निष्ठायां सेट इत्येव सिद्धे क्वाद्यजिव्रज्युपादानं प्रपञ्चार्थम्।

### भुजन्युब्जौ बाहूतपयोः।

भुज न्युब्ज इत्येतौ शब्दौ यथासङ्ख्यं बाहूपतापयोरर्थयोः निपात्येते। भुज्यतेऽनेनेति भुजः बाहुः न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जो नाम रोगविशेषः हलो घञ् इति घञ् बाहूपतापयोरिति किम् भोगः न्युद्गः।

### वञ्चर्गतौ।

वञ्चेर्गतौ वर्तमानस्य कुत्वं न भवति। रात्रावपि महारण्ये वञ्च्यं वञ्चन्ति वाणिजाः। गम्यं गच्छन्तीत्यर्थः। गताविति किम् वङ्क्यं काष्ठं कुटिलमित्यर्थः।

### प्रयाजानुयाजोपांशुयाजपत्नीसंयाजर्तुयाजा यज्ञाङ्गे।

प्रयाजादयः शब्दाः घञन्ता यज्ञसंयोगेऽभिधेयेकृतकुभावाः साधवो भवन्ति। पञ्चप्रयाजाः त्रयोऽनुयाजाः एकादशोऽपयाजाः उपांशुयाजाः पत्नीसंयाजाः ऋतुयाजाः अकर्तरि च कारके संज्ञायां इति घञ् यज्ञांग इति किम् प्रयागः अनुयागः।

### ण्य आवश्यके।

आवश्यकोपाधिके ण्यप्रत्यये कुत्वं न भवति। अवश्यवाच्यम् अवश्यरेच्यम् अवश्यभाज्यम् आवश्यक इति किम् । पाक्यम् भाग्यम्।

### प्रवचयजत्यजाम्।

प्रवचादीनां ण्यप्रत्यये कुत्वं न भवति। प्रवचग्रहणं शब्दसंज्ञार्थम् प्रवाच्यो नाम पाठविशेषोपलक्षितो ग्रन्थोऽस्ति। अपरे पुनराहुः उपसर्गनियमार्थम् प्रपूर्वस्यैवाशब्दसंज्ञायां प्रतिषेधो भवति। नान्योपसर्गपूर्वकस्य अविवाक्यं नाम दशरात्रस्य यद्दशममहः याज्यम् त्याज्यम्। अनावश्यकार्थं वचनम्।

**वचोऽशब्दसंज्ञायाम्।**

प्रवचादीनां ण्यप्रत्यये कुत्वं न भवति। बाहुल्यम् अशब्दसंज्ञायामिति किम् । वाक्यम्।

**निप्राभ्यां युजः शक्ये।**

निप्राभ्यामुत्तरस्य युजेः शक्येऽर्थे ण्यप्रत्यये परतः कुत्वं न भवति। नियोक्तुं शक्यः नियोज्यः। प्रयोज्यः। शक्य इति किम् । नियुज्यते नियोग्यः।

**भोज्यमन्ने।**

भोज्यमित्यन्नेऽभिधेये कु(त्वं न भवति)त्वाभावो निपात्यते। भोज्यमन्नं भोज्या यवागूः। अन्न इति किम् भोग्या स्त्री।

**रुहेर्विन्यग्भ्यां क्विबचोर्धः।**

रुहेर्धातोर्विन्यग्भ्यामुत्तरस्य यथासंख्यं क्विबचोः परतोऽन्त्यस्य धकारादेशो भवति। विरोहतीति वीरुत्। न्यग्रोहतीति न्यग्रोधः।

**ओतोलोपःश्यनि।**

ओकारान्तायाः प्रकृतेः श्यन् प्रत्यये परतोऽन्त्यस्य लोपो भवति। दो अवद्यति। शोभ्यति। शो अवच्छ्यति। षो अवस्यति।

**क्सस्याचि।**

अजादौ प्रत्यये परतः क्सस्यलोपोऽन्त्यस्य धकारादेशो भवति। अधुक्षाताम् अधुक्षाथाम् अधिक्षाताम् अधिक्षाथाम्। अचीति किम् अधुक्षत् अधुक्षताम्।

**लुग्वा दुहदिहलिहगुहिभ्य आत्मनेपदेदन्त्ये।**

दुहादिभ्यः परस्य क्सप्रत्ययस्य दन्त्यादावात्मनेपदेपरतो लुग्वा भवति। अदुग्ध अधुक्षत, अदुग्धाः अधुक्षथाः, अदिग्ध अधिक्षत अलीढ अलिक्षत न्यगूढ न्यधुक्षत दुहातेरिति किम् व्यत्यमुक्षत। आत्मनेपद इति किम् अधुक्षत् दन्त्य इति किम् अधुक्षामदि लोप इति वर्तमाने लुग्ग्रहणं सर्वलोपार्थम्।

**शमामष्टानां श्ये दीर्घः।**

शमादीनामष्टानां श्यनिप्रत्यये दीर्घो भवति। शाम्यति। ताम्यति। दाम्यति। श्राम्यति। भ्राम्यति। क्षाम्यति। क्लाम्यति। माद्यति। अष्टानामिति किम् उपस्यति। श्य इति किम् श्रमति।

**ष्ठिवुक्लम्वाचमां शिद्विकरणे।**

ष्ठिवेः क्लमेराचमेश्च शिति विकरणे परतो दीर्घो भवति। ष्ठावति क्लामति आचामति आङ्पूर्वग्रहणं किम् चमति विचमति ष्ठिवुक्लमिग्रहणं शबर्थम् शिद्ग्रहणं किम् ष्ठेविष्यति विकरण इति किम् सिष्ठिवे चक्लमे आचेमे।

**क्लमः परस्मैपदेषु।**

क्लमः परस्मैपदनिमित्ते शितिविकरणे परतो दीर्घो भवति। क्रामति आक्रामति परस्मैपद इति किम् आक्रमते सूर्यः।

**इषुगमियमां छः।**

इषुगमियमां शिति विकरणे परतः शकार अन्तादेशो भवति। इच्छति व्यतीच्छते गच्छति सङ्गच्छते आयच्छति आयच्छते इषेरुदितो ग्रहणादिह न भवति। इष्यति इष्णाति शितीत्येव एष्टा विकरण इति किम् व्यतीषे संजग्मे उपयेमे।

**प्राघ्राध्मास्थाम्नादाण्दृश्यर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः।**

पादीनां दशानां धातूनां शिति विकरणे यथासंख्यं पिबादयो दशादेशा भवन्ति। पिबति उत्पिबः अदन्तत्वाल्लघूपधगुणो न भवति। जिघ्रति उज्जिघ्रः धमति धमन् उद्धमः। तिष्ठति उत्तिष्ठमानः आमनति कतीहामनमानाः प्रयच्छति दास्या सम्प्रयच्छमानः पश्यति उत्पश्य ऋच्छति समृच्छमानः शद्लृशातने शीयते शीयमानः षद्लृविशरणगत्यवसादनेषु सीदति कतीहासीदमानाः शितीत्येव। पास्यति ऋच्छिनासिद्धे अर्तिग्रहणमस्त्यादिप्रयोगनिवृत्यर्थम्।

**सर्त्तेर्धावोवेगितायां गतौ।**

वेगः संजातोऽस्या इति वेगिता तस्यां गतौ वर्तमानस्य सर्त्ते सिद्धीशिद्विकरणे धावादेशो भवति। धावति कतीह धावमानाः धाविना सिद्धे वेगितायां गतौ सरतीति प्रयोगो माभूदिति वचनम्।

**ज्ञाजनोर्जा।**

ज्ञा जन इत्येतयोः शिति विकरणे जा इत्ययमादेशो भवति। जानाति जानीते जानानः जायते जायमानः शितीत्येव। ज्ञास्यति जनिष्यति विकरण इत्येव। जज्ञे विजज्ञे अतो दीर्घो यञीति सिद्धे दीर्घोच्चारणं सा आगणान्ताः ष्वादयः सून्मदेनोक्तः सूत्रेण ह्रस्वो माभूदिति।

## ष्वादीनां ह्रस्वः।

क्र्यादिषु पूञ् पवन इत्यत आरभ्य वृत्करणपर्यन्ता आगणान्ताः ष्वादयस्तेषां शिति विकरणे ह्रस्वो भवति पूञ् पुनाति लूञ् लुनाति स्तृणाति तेषां वृत्करणात् परेण पठितयोः व्रीश्री इत्येतयोः न भवति व्रीणाति श्रीणाति येषां तुल्वादिपरिसमाप्त्यर्थमेव वृत्करणं ष्वादयस्त्वागणान्ताः तन्मते वृणाति श्रिणातीत्येवमेव भवति।

## मिदेरेत्।

मिदेर्य इत् तस्य स्थाने शिद्विकरणे परतः एकारादेशो भवति मेद्यति मेद्यतः शितीत्येव। मिद्यते गुणप्रतिषेधे प्राप्ते वचनम्।

## सृजिदृशोर्झल्यं गुणवृद्धिप्रसङ्गे।

गुणवृद्ध्योः प्रसङ्गः प्राप्तिर्यस्मिन् तस्मिन् झलादौ प्रत्यये पादः परतः सृजिदृशि इत्येतयोरामागमो भवति। स्रष्टा स्रष्टुं द्रष्टा अद्राक्षीत् गुणवृद्धिप्रसङ्ग इति किम्। सृष्टः सिसृक्षति दृष्टः दिदृक्षते।

## स्पृशमृशकृशतृपदृपसृपां वा।

स्पृशादीनां झलादौ गुणवृद्धिप्रसङ्गे प्रत्यये परतो अमागमो वा भवति। स्पृष्टा स्पर्ष्टा मृष्टा मर्ष्टा कृष्टा कर्ष्टा तृप्ता तर्प्ता दृप्ता दर्प्ता सृप्ता सर्प्ता झलीत्येव स्पशनं गुणवृद्धिप्रसङ्ग इत्येव स्पृष्टः सिस्पृक्षति।

इति श्रीदण्डनाथनारायणभट्टसमुद्धृतायां सरस्वतीकण्ठाभरणस्य

व्याकरणस्य लघुवृत्तौ हृदयहारिण्यां

सप्तमाध्यायस्य प्रथमः पादः।

.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-

**अथ द्वितीयः पादः।**

**सार्वधातुकार्धधातुकयोर्गुणः।**

सार्वधातुके आर्धधातुके च प्रत्यये परत इगन्तायाः प्रकृतेर्गुणो भवति। जयति, भवति, तरोति,तनोति। आर्धधातुके जेता नेता। सार्वधातुकार्धधातुकयोरिति किं अग्नित्वम् , अग्निकाम्यति इको गुणवृद्धिविज्ञानादिहन भवति यानं ग्लायति उन्झिता।

**जुस् पुकोः।**

इगन्तायाः प्रकृतेर्जुसि सार्वधातुके पुकि च सत्यार्धधातुके परतो गुणो भवति। अबिभयुः, अजुहवुः, ऐयरुः, अजागरुः, ह्रेपयति, क्नोपयति, अर्पयति, इक्परिभाषोपस्थानादिह न भवति। अविदुः अनेनिजुः जुसिसार्वधातुकस्यापितात् गुणप्रतिषेधो प्राप्ते पुकि च सति ह्रप्रभृतीनामलघूपधत्त्वादप्राप्ते वचनम्। अथेह कस्मान्न भवति ईयुः, स्तूयुः, चिनुयुः, सुनुयुरिति द्वावत्र प्रतिषेधौ अपित्सार्वधातुकाश्रयो ङिदाश्रयश्च तत्र येननाप्राप्तिन्यायेनापित्सार्वधातुकाश्रय एवानेन बाध्यते तथा नयासुडाश्रय इति।

**जागुरक्त्स्कानेकिति।**

जागर्तेः क्सुकानज्वर्जिते किति प्रत्यये परतो गुणो भवति। जागरितः, जागरितवान्, जागर्यते, जागर्यात् अक्स्कान इति किं जजागृवान् व्यभिजजाग्राणः कितीति किं जागृतः, जाग्रति, जागृयात् क्ङिति प्रतिषेधे प्राप्ते वचनम्।

**अचिण्णलिञ्णिति।**

जागर्तेर्धातोश्चिण्णलवर्जितेञ्णिति प्रत्यये परतो गुणो भवति। जागरः,जागरवः, साधुजागरी, जागरयति अचिण्णलिति किम् अजागारि जजागार ञ्णिति "अच इति वृद्धौ प्राप्तायां तद्बाधनार्थं गुणविधानार्थम् "।

**लघोरुपधायाः।**

सार्वधातुके आर्धधातुके च प्रत्यये परतः लघोरुपधाया गुणो भवति। वेत्ति, दोग्धि, ननर्त्त। लघोरिति किम् ईहते। उपधाया इति किं शिक्षितो रुणद्धि सार्वधातुकार्धधातुकयोरित्येव समित्वं समित्काम्यति।

**नाभ्यस्तस्याचिसार्वधातुके।**

अभ्यस्तसंज्ञिकायाः प्रकृतेर्लघोरुपधायाः अजादौ सार्वधातुके गुणो न भवति। ने निजानि अनेनिजम् , अभ्यस्तस्येति किं संवेदैवेदानि अचीति किम नेनेक्ति नर्नक्ति सार्वधातुक इति किं निनेज विवर्तिषते। लघोरुपधाया इत्येव । बिभयानि अबिभयम् शिशयिषते पिपविषते।

## अपिति।

अपिति सार्वधातुके परतः इगन्तायाः प्रकृतेः लघूपधायाश्च गुणो न भवति। इतः यान्ति स्तुतः स्तुवन्ति, बिभृतः बिभ्रति, वित्तः विदन्ति, दुग्धः दुहन्ति, अपितीति किम् एति जुहोति सार्वधातुक इत्येव चेषीष्ट, स्तोषीष्ट, आस्तषीष्ट।

## अनांलिट्यजागुः।

जागर्तिवर्जितायाः प्रकृतेरामो अन्यस्मिन्नपिति लिटिप्रत्यये परतो गुणो न भवति। जिग्यतुः जिग्ये जुहुवतुः चक्रतुः, वितुदतुः, दुदुहतुः, अनामिति किम् जिह्यां चकार अजागुरिति किम् अजागरुः, जजागरे, अपितीत्येव। चिचयिष चकर्ष।

## क्ङिति।

क्ङिति च प्रत्यये परतः प्रकृतेर्गुणो न भवति। जितं जीयते, हूयते, क्रियते, भिद्यते, बेभिद्यते, अंबिभयन् , अशिषः, अपुषन् ।

## यङ्यक्क्यलोपे वृद्धिश्चातिङि।

यङ्यक्यानां लोपे सत्यतिङि प्रत्यये परतो वृद्धिश्चकारात् गुणश्च न भवति। यङ्लोपे चेज्यः, नेन्यः, लोलुवः, बिभेदिता, बोबुधिता, यग्लोपे - कुषुभिता मगधकः, क्यलोपे - समिधिता द्दषदकः अतिङीति किम्। रोरवीति, बोभवीति।

## कुटादीनामञ्णिति।

कुटादीनां धातूनां ञितो णितश्चान्यस्मिन् प्रत्यये गुणो वृद्धिश्च न भवति। उत्कटिता, उत्पुटिता, नुविता, धुविता, न्यनुवीत्, न्यधुवीत् , अञ्णीति किम् उत्कोटः, उत्कोटकः, उत्कोटयति।

## विज इटि।

विजेर्धातोरिङादौ प्रत्यये गुणो न भवति। उद्विजिता, उद्विजितुम् इटीति किम्। उद्वेजयति।

## ऊर्णो र्वा।

ऊर्णोतेरिडादौ प्रत्यये परतो गुणो न वा भवति। प्रोर्णुविता, प्रोर्णविता, इटीत्येव, प्रोर्णवनीयम्।

## निष्ठायामशीङ्स्विदिमिदिक्ष्विदिधृषः।

इडादौ निष्ठाप्रत्यये परतः शीङादिवर्जितानामेव धातूनां गुणो न भवति। विदितः, विदितवान् , रुषितः रुषितवान्, तृषितः तृषितवान् , शीङादिपर्युदासः किम् शयितः शयितवान् पवितः पवितवान् ।

प्रस्वेदितः प्रस्वेदितवान् , प्रमेदितः प्रमेदितवान् , प्रक्ष्वेदितः प्रक्ष्वेदितवान् । 'भावादिकर्मणोर्वेति' इड्विकल्पः। धर्षितः धर्षितवान्। इटीत्येव पूतः पूतवान् 'आकृषिश्चेतीड्विकल्पः स्विन्नः, स्विन्नवान् '।

**मृषेरक्षमायाम्।**

मृषेः क्षमाया अन्यत्रार्थे वर्तमानस्येडादौ निष्ठाप्रत्यये गुणो न भवति। अपमृषितम् वाक्यमाह। सासूयमित्यर्थः। अक्षमायामिति किम् मार्षितः मार्षितवान् ।

**उदुपधस्यशब्वतो भावादिकर्मणोर्वा।**

उकारोपधस्य शब्विकरणस्य धातोर्भावे आदिकर्मणि च या निष्ठा तस्यामिडादौ परतो गुणो वा न भवति। द्युतितमनेन, द्योतितमनेन, प्रद्युतितः प्रद्योतितः, मुदितमनेन मोदितमनेन, प्रमुदितः प्रमोदितः, उदुपधस्येति किम् द्योतितमनेन, प्रश्वितितः, शब्वत इति किम् गुधितमनेन प्रगुधितः भावादिकर्मणोरिति किम् रुचितमनेन। इटीत्येव प्ररूढमनेन प्ररूढः।

**मृडमृदगुधकुषक्लिशवदवसलुचां क्त्वि।**

मृडादीनामेव धातूनामिडादौ क्त्वाप्रत्यये परतो गुणो न भवति। मृडित्वा, मृदित्वा, गुधित्वा, कुषित्वा, क्लिशित्वा, उदित्वा उषित्वा , लुचित्वा। थफान्तवञ्चिलुञ्चिनीनां चेत्यनुषङ्गलोपः मृडादीनामिति किम् देवित्वा वर्तित्वा।।

**ऋततृषमृषकृशां वा।**

ऋतादीनां धातूनामिडादौ क्त्वा प्रत्यये गुणो वा न भवति। ऋतित्वा, अर्तित्वा, तृषित्वा, तर्षित्वा, मृषित्वा, मर्षित्वा, कृशित्वा, कर्शित्वा । इटीत्येव मृष्टा ऋत इति सौत्रो धातुर्गत्यादिषु स्मर्यते।

**रलोहलादेरिदुदुपधस्य सनि च।**

रलन्तस्य हलादेरिकारोकारोपधस्य धातोरिडादौ सनि क्त्वायां च प्रत्यये परतो गुणो वा न भवति । लिखित्वा, लेखित्वा, लिलिखिषति, लिलेखिषति, द्युतित्वा, द्योतित्वा, दिद्युतिषते, दिद्योतिषते, रल इति किम् देवित्वा दिदेविषति। हलादेरिति किम् एषित्वा एषिषिषति। इदुपधस्येति किम् वर्तित्वा, विवर्तिषते। इटीत्येव भुक्त्वा बुभुक्षते।

**रुदविदमुषग्रहाम्।**

रुदादीनामिडादौ सनि क्त्वायां च परतो गुणो न भवति। रुदित्वा रुरुदिषति, विदित्वा विविदिषति, मुषित्वा मुमुदिषति, गृहीत्वा ग्रहेरिडभावात् सन्युदाहरणं नास्ति। रुदविदमुषां रलो हलादेरिति विकल्पेप्राप्ते ग्रहेस्तु मृषमृदेत्यादिनियमाद्प्राप्ते प्रतिषेधार्थं वचनम् , योगविभागो नित्यार्थः।

## सन्यनिटि।

अनिटि सन् प्रत्यये परतः प्रकृतेरिगन्ताया लघूपधायाश्च गुणो न भवति। चिचीषति, चिकीर्षति, बिभत्सति, बुभुत्सते, विवृत्सति। अनिटीति किम् शिशयिषते, विवर्धिषते, सनीत्यनुवर्तमाने सन् ग्रहणं त्त्वीति निवृत्यर्थम्।

## लिङ्सिचोरुपधायाः।

लिङि सिचि चानिडादौ परतः प्रकृतेरिक उपधाया गुणो न भवति। भित्सीष्ट, भुत्सीष्ट, सृक्षीष्ट, अभित्त, अबुद्ध, असृक्षताम्। उपधाया इति किम् चेषीष्ट। अनिटीत्येव वर्तिषीष्ट। वर्षिष्ट। आन्तरिष्ट। अजागरीत् वृत्य जागरिष्ट।

## उश्च।

लिङि सिचि चानिडादौ परतः ऋवर्णान्तायाः प्रकृतेः गुणो न भवति। कृषीष्ट, हृषीष्ट। अनिटीत्येव वरिषीष्ट, आस्तरिष्ट, व्यत्यजागरिष्ट।

## सिचि दाधास्थामिच्च।

दाधास्था इत्येतासां प्रकृतीनामनिडादौ सिचि परत इकारोऽन्तादेशस्तस्य (इ)च गुणो न भवति। अदित अदिषाताम्, अधित अधिषाताम्, उपास्थिष्ट उपास्थिषाताम्। अनिटीत्येव अदायिषाताम् अधायिषाताम्।

## गाङ ई स्ये च।

..........................................................................अगास्त।

## भूसुवोरनभ्यस्तयोस्तङिपिति।

भू सू इत्येतयोरनभ्यस्तयोस्तङि पिति प्रत्यये परतो गुणो न भवति। अभूत् अभूः, सुवै सुवावहै, अनभ्यस्तयोरिति किम् बोभोति बोभवीति, सुषोति, सोषवीति। तिङीतिकिम् भवति पितीति किम् व्यतिभविषीष्ट।

## हल्यनुंश्नोरुत औत्।

हलादौ तिङि पिति प्रत्यये परतः उश्नुवर्जितस्योकारान्तहलादौ अनभ्यस्तस्यौकार अन्तादेशो भवति। यौति, रौति। हलीति किम् यवानि रवाणि। अनुश्नोरिति किम् तनोति, सुनोति। उत इति किम् एति अध्येति। अनभ्यस्तस्येत्येव जुहोति। पितीत्येव। युतः तपरकरणं किम् अभूत्।

**वेर्णोः।**

ऊर्णोतेर्धातोस्तिङि पिति प्रत्यये परत उद्वा भवति। प्रोर्णोति। हलीत्येव। प्रोर्णवानि। पितीत्येव प्रोर्णुतः।

**नैकाली।**

एकश्चासावल् एकाल् तस्मिन् हलि तिङिप्रत्यये परतः ऊर्णोतेरुत औन्न भवति प्रोर्णोत् , प्रोर्णोः।

**तृणह इम् ।**

तृणह इति तृहिरागतश्नम्को गृह्यते तस्य हलादौ तिङि पिति प्रत्यये परतः इमागमो भवति। तृणेढि, तृणेक्षि, तृणोह्मि, अतृणेट्। हलीत्येव तृणहानि । पितीत्येव तृण्ढः। आगतश्नम्कस्य ग्रहणं किम् अपवादत्वात् श्नमः पूर्वस्मिन् माभूदिति।

**ब्रुवोरनाहेरीट्।**

ब्रुवो धातोराहादेशवर्जितात् परस्य हलादेः पितस्तिङ ईडागमो भवति। ब्रवीति, ब्रवीषि, ब्रवीमि। अनाहेरिति किम् आत्थ। अहलादेरित्येव। ब्रवाणि अब्रवम् पितीत्येव ब्रूतः।

**यङो बहुलम्।**

यङन्ताद्धातोः परस्य हलादेः पितस्तिङ ईडागमो बहुलं भवति। क्वचिन्तित्यमेव। वावदीति, लालपीति, रोरवीति। क्वचिन्न भवति। नर्नर्ति, वर्वर्त्ति, वर्वर्ष्टि, क्वचिद्विकल्पः बोभोति, बोभवीति। सोषोति, सोषवीति। चर्कर्त्ति चर्करीति। बहुलवचनाच्चर्करीतमित्याद्यपि हलादेरित्येव बोभवानि, अबोभवम्, पित इत्येव बोभूतम्।

**अभ्वस्तिसिज्भ्यामपृक्तस्य।**

भूवर्जितास्तेः सिचश्च परस्यापृक्तस्य हलः पितस्तिङः ईडागमो भवति। आसीत्, आसीः, अकार्षीत् , अकार्षीः। अभुव इति किम् अभूत्, अभूः। अपृक्तस्येति किम् अस्ति, अस्मि। हल इत्येव कारयामास।

**रुदिस्वपिश्वस्यनिजाक्षिभ्योऽट् च।**

रुदादिभ्यः पञ्चभ्यः परस्यापृक्तस्य तिङोऽट् चकारादीट् चागमो भवति। अरोदत् अरोदीत् अस्वपत् अस्वपीत् अश्वसत् अश्वसीत् प्राणत् प्राणीत् अजक्षत् अजक्षीत् अपृक्तस्येत्येव रोदिति। हलादेरित्येव। रुरोद।

**अदः।**

अदेर्धातोः परस्यापृक्तस्य हलस्तिङोऽडागमो भवति। आदत् आदः । अपृक्तस्येत्येव। अत्ति, अत्सि,योगविभागाच्चानुकृष्टम् ईडत्र न सम्बध्यते।

**अत आद् यञि।**

अकारान्तायाः प्रकृतेर्यञादौ तिङि प्रत्यये परतोऽन्त्यस्याकारादेशो भवति। भवामि, पचामि, पचावः, करिष्यामि, करिष्यावः। अत इति किम् कुर्मः। यञीति किम् अपतति पचतः पचथः।

**सुपि च।**

सुपि च यञादौ प्रत्यये परतोऽदन्तायाः प्रकृतेरन्त्यस्यात् भवति। वृक्षाय वृक्षाभ्याम् अत इत्येव अग्निभ्यां यञीत्येव। वृक्षस्य।

**बहुवचने झल्येत्।**

सुपि झलादौ बहुवचने परतोऽदन्तायाः प्रकृतेरन्त्यस्यैत् भवति। वृक्षेभ्यः, वृक्षेषु अमीभिः विश्वेषां बहुवचन इति किम् वृक्षस्य वृक्षाभ्याम् । झलीति किम् वृक्षाणां सुपीत्येव यजध्वम् अत इत्येव अग्निभ्यः तपरकरणादिह न भवति। खट्वाभ्यः।

**ओसि च।**

अदन्तायाः प्रकृतेरोसि परतोऽन्त्यस्यैद् भवति। वृक्षयोः स्वम् वृक्षयोर्निधेहि। अत इत्येव। अक्ष्णोः दृषदोः।

**टि च दीर्घापः।**

दीर्घो य आप् तदन्तायाः प्रकृतेस्तृतीयैकवचने ओसि च परतोऽन्त्यस्यैत्वं भवति। खट्वया खट्वयोः, बहुराजया बहुराजयोः। पकार किम् कीलालपा ब्राह्मणेन। दीर्घग्रहणं किम् अतिखट्वेन।

**सम्बुद्धौ च।**

सम्बोधनप्रथमैकवचने दीर्घाबन्तायाः प्रकृतेरन्त्यस्यैकारादेशो भवति। हे खट्वे, हे बहुराजे, हे कारीषगन्ध्ये। दीर्घग्रहणादिह न भवति हे प्रियखट्व।

**अम्बार्थानामडलेकानां ह्रस्वः।**

अम्बार्था मात्रर्थाः तेषां डलेकशब्दरहितानामाबन्तानां सम्बुद्धौ परतो ह्रस्वो भवति। हे अम्ब, हे अक्क, हे अल्ल, हे अत्त, अडलेकानामिति किम् हे अम्बाडे, हे अम्बाले, हे अम्बिके।

**स्त्र्याख्येदूतोऽनियुवः।**

स्त्र्याख्यं यदीदन्तमूदन्तं वा अनियुवसम्बन्धिप्रकृतिरूपं तस्य सम्बुद्धौ परतोऽलोन्त्यस्य ह्रस्वो भवति। हे कुमारि, हे गौरि, हे लक्ष्मि, हे तन्त्रि, हे ब्रह्मबन्धु। स्त्र्याख्येति किम् हे वातप्रमीः, हे हूहू। आख्याग्रहणं शब्दार्थे स्त्रीत्व एव यथा स्यात्। पदान्तरद्योत्ये माभूत्। हे ग्रामिणी, हे ब्राह्मणि, हे खलपूः, हे वधु, हे गौः, हे नौः। अनियुव इति किम् हे श्रीः, हे भूः। कथं हे भ्रु, हे भीरु। पर्यायत्वादूङि कृते भविष्यति।

**स्त्रियाः।**

स्त्रीशब्दस्य सम्बुद्धौ परतो ह्रस्वो भवति। हे स्त्रि। इयुवस्थानित्वात् पूर्वेण न प्राप्नोतीति वचनम्।

**मातुर्मातच् पुत्रे श्लाघ्ये।**

स्वपदार्थोपसर्जनो यो मातृशब्दो बहुव्रीहौ समासेऽन्यपदार्थे श्लाघ्ये पुत्रे वर्तते। तस्य सम्बुद्धौ परतो मातजादेशो भवति। हे गार्गीमात, हे वात्सीमातेति। अत्र पुत्रसम्भावितोत्कर्षया श्लाघ्यया मात्रा पुत्रव्यपदेशयोग्यतया प्रशस्यते। पुत्र इति किम् अरे गार्गीमातृक, कबपवादोऽयम्।

**इदुतोर्गुणः।**

इदुदन्तायाः प्रकृतेः सम्बुद्धौ परतो गुणो भवति। हे अग्ने, हे वायो, हे बुद्धे, हे धेनो, हे वारे, हे त्रपो। नपुंसकस्येकोऽचि सुपीत्यज्ग्रहणाल्लिङ्गान्नलुमतेति प्रत्ययलक्षणप्रतिषेधो न भवति।

**जसि च।**

इधुपधायाः प्रकृतेर्जसिप्रत्यये परतोऽन्त्यस्य गुणो भवति। अग्नयः। वायवः। बुद्धयः। धेनवः।

**ङित्यसख्युः।**

इदुदन्तायाः सखिवर्जितायाः प्रकृतेर्ङिति सुपि प्रत्यये परतो गुणो भवति। अग्नये अग्नेरागच्छति। अग्नेः स्वम्। वायवे वायोरागच्छति। वायोः स्वम्। ङितीति किम्। अग्निभ्याम् वायुभ्याम् असख्युरिति किम् सख्ये सख्युरागच्छति, सुपीत्येव, मृद्वी, पट्वी।

**पत्युः समास एव।**

पतिशब्दस्यसमास एव वर्तमानस्य ङिति प्रत्यये परतो गुणो भवति। बृहस्पतये, बृहस्पतेरागच्छति। बृहस्पतेः स्वम्। समास इति किम्। पत्ये पत्युः। एवकार इष्टतोऽवधारणार्थः। पत्युरेव समास इति नियमो माभूत्।

### स्त्रियां वा ।

इकारान्तस्योकारान्तस्य च स्त्रियां वर्तमानस्य ङिति सुपि परतो गुणो वा भवति। बुद्धये, बुद्ध्यै, धेनवे, धेन्वै, बुद्धेः, बुद्ध्याः, धेनोः, धेन्वाः, शुचये, शुच्यै पटवे पट्व्यै। स्त्रियामिति किम् अग्नये, वायवे, अतिबुद्धये, प्रियधेनवे, ब्राह्मणाय।

### स्त्रीयूभ्यां चाट्।

नित्यस्त्रीविषयं यदीदन्तमुदन्तं चकारादिदन्तमुदन्तं च तस्मादुत्तरस्य ङित सुप आडागमो भवति। कुमार्यै, कुमार्याः, कुमार्याम् , लक्ष्म्यै, लक्ष्म्याः, लक्ष्म्याम् , वध्वै, वध्वाः, वध्वाम् , बुद्ध्यै, बुद्ध्याः, बुद्ध्याम्, धेन्वै, धेन्वाः, धेन्वाम् । स्त्रियामित्यनुवर्तमाने पुनः स्त्रीग्रहणं नित्यस्त्रीविषयार्थम्। क्विब्लुक्समासेषु अर्थान्तरवृत्तोपसङ्ग्रहार्थं च ग्रामण्ये स्त्रियै खलप्वे स्त्रियै इह च भवति - कुमारीमिच्छतीति क्यजन्तात् कुमारी वाचरतीति क्विबन्ताद्वा कर्त्तरि क्विप् , कुमारी तस्मै कुमार्यै, कुमार्यै ब्राह्मणाय, ब्राह्मण्यै खरकुटीव, इवे प्रतिकृताविति कन् तस्य लुम्मनुष्ये इतिलुप् तस्मै खरकुट्यै ब्राह्मणाय ब्राह्मण्यै वा अतिक्रान्तो लक्ष्मीमतिलक्ष्मीः तस्मै अतिलक्ष्म्यै ब्राह्मणाय स्त्रियै वा एवमतिबुद्ध्यै पुरुषाय स्त्रियै वा टकारादेश वृद्ध्यर्थः।

### इयुवुस्थानाभ्यामस्त्रियां वा।

इयुवोः स्थानं यदीदन्तमूदन्तं च स्त्रीशब्दवर्जितं नित्यस्त्रीविषयं तस्मात्परस्य ङितः सुप आडागमो वा भवति। श्रियै श्रिये श्रियः। श्रियाः श्रियां श्रियि भ्रुवै भ्रुवे भ्रुवाः भ्रुवः भ्रुवां भ्रुवि स्त्रीयूभ्यामित्यनुवृत्तेरिह न भवति। यवक्रिये कटप्रुवे स्त्रियै क्विप्लुक्समासेषु भवति। श्रियै श्रिये अतिश्रियै अतिश्रिये स्त्रियै पुरुषाय वा भ्रुवै भ्रुवे अतिभ्रुवै अतिभ्रुवे ब्राह्मण्यै ब्राह्मणाय वै इयुवुस्थानाभ्यामिति किम् वध्वै वर्षाश्वै। अस्त्रियामिति किम् स्त्रियै स्त्रियाः।

### याडापः ।

अाबन्तायाः प्रकृतेरुत्तरस्य ङितः सुप्प्रत्ययस्य याडागमो भवति। खट्वायै खट्वायाः, खट्वायाम्। स्त्रियामित्येव। अतिखट्वाय, अतिखट्वात्, अतिखट्वे **टा**रोदे देशविध्यर्थः।

### सर्वनाम्नः स्याडच्च।

आबन्तात्सर्वनाम्नः परस्य ङितः सुप्रत्ययस्याडागम आबन्तस्य चकार अन्तादेशो भवति। सर्वस्यै सर्वस्याः सर्वस्याम् विश्वस्यै विश्वस्याः, विश्वस्याम् नान्यच्च संज्ञोपसर्जनादिति वचनादिह न भवति। स**र्वा** नाम काचित् तस्यै सर्वायै अतिसर्वायै। अथेह कथं दक्षिणपूर्वस्यै दक्षिणपूर्वायै इति। यदा दक्षिणा चासौ पूर्वा चेति कर्मधारयो विदिशि वर्तते। तदा दक्षिणपूर्वस्यै इति भवति। यदातु दक्षिणख्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वेति बहुव्रीहिस्तदा नान्यच्च संज्ञोपसर्जनादिति। प्रतिषेधात् दक्षिणपूर्वायै इति भवति।

### द्वितीयातृतीयाभ्यां वा।

द्वितीयातृतीयाशब्दाभ्यामाबन्ताभ्यां परस्य ङितः सुपः स्याडागमो भवति। तत्सन्नियोगेन च पूर्वस्य अकारः अन्तादेशो वा भवति। द्वितीयस्यै, द्वितीयायै, द्वितीयस्याः, द्वितीयायाः द्वितीयस्यां द्वितीयायाम् तृतीयस्यै तृतीयायै तृतीयस्याः तृतीयायाः तृतीयस्यां तृतीयायाम्।

### ङेरामाडादिभ्यः।

आट् याट् स्याड्च आगमेभ्यः परस्य ङेरामादेशो भवति। कुमार्यां ब्रह्मबन्ध्वाम् बुद्ध्यां धेन्वाम् श्रियां भ्रुवां रषद्वायां सर्वस्याम् आडादिभ्य इति किम् श्रियि भ्रुवि।

### नियः।

नी इत्येतस्यात्परस्य ङेरामादेशो भवति। नियां परमनियां ग्रामण्यां सेनान्याम्।

### सखिपतिभ्यामौत्।

सखिपतिभ्यामुत्तरस्य ङेरौकारादेशो भवति। सख्यौ पत्यौ सखिपत्यन्ताभ्यां तु  गुणविधानादुत्तरसूत्रेण भवति। प्रियसखौ नरपतौ।

### इदुद्भ्यामेङोऽच्चैङः।

इदन्तादुदन्ताच्च कृतैङः परस्य ङेरौकारस्य चैङस्तत्सन्नियोगेनाकारादेशो भवति। अग्नौ वायौ वध्वौ धेनौ इदुद्भ्यामिति किम् गवि द्यवि। एङ इति किम् बुद्ध्यां धेन्वाम्।

### टोऽस्त्रियां न।

इदन्तादुदन्ताच्च परस्य टेस्तृतीयैकवचनस्यास्त्रियां ना इत्ययमादेशो भवति। अग्निना वायुना प्रियसखिना नरपतिना नाभावे कर्तव्ये मुभावस्य सिद्धत्वात् अमुना। अस्त्रियामिति किम् बुद्ध्या धेन्वा।

### ॠतो ङिसुटोर्गुणः।

ॠकारान्तायाः प्रकृतेर्ङौ सुटि च प्रत्यये परतो गुणो भवति। पितरि पितरौ पितरः पितरं पितरौ मातरि मातरौ मातरः मातरं मातरौ । ङिसुटोरिति किम् पित्रा मात्रा कर्तृणी कुले इत्यत्र पूर्वप्रतिषेधेन गुणं बाधित्वा पाक्षिको नुम् भवति। कर्तृणी कुले कर्तृ◌ृणीकुलानि इत्यत्र शिसुटोरिति **य्वे**नोपादानेन सुड्ग्रहणेन नपुंसकस्य ग्रहणं न भवतीति ज्ञापितत्वात् गुणो न भवति।

## संयोगादेर्लिटि।

ऋदन्तस्य संयोगादेर्धातोः लिटि परतोऽन्त्यस्य गुणो भवति। सस्मरतुः, सस्मरुः सस्वरतुः सस्वरुः। गुण इति प्रतिषेधविषये पुनः प्रसवार्थं गुणवचनम्। वृद्धिस्तु भवत्येव। सञ्चस्कार। संयोगादेरिति किम्। सस्रतुः सस्रुः ऋत इत्येव चिक्षिपतुः चिक्षिपुः सञ्चस्करतुः सञ्चस्करुः इत्यत्र धातूपसर्जनकार्यस्यान्तरङ्गत्वात् प्रागेव सुटि कृञः संयोगादित्वमिति गुणो भवति।

## ऋच्छत्यॄताम्।

ऋकारान्तानामृच्छति ऋकारस्य च लिटि प्रत्यये परतो गुणो भवति। विचकरतुः विचकरुः। आनर्च्छ आनर्च्छतुः आनर्च्छुः ऋच्छेरलघूपधत्वात् ऋदन्तानां च प्रतिषिद्धत्वात् अप्राप्तो गुणो विधीयते। बुद्धिविषये तु पूर्वविप्रतिषेधेन बुद्धिरेव भवति। चकार निजगार क्वसावपि द्वितीयेन किल्लक्षणेन प्रतिषेधेन गुणो बाध्यते विचिकीर्ष्वान् निजिगीर्वान् ।

## शॄदॄप्रां ह्रस्वश्च।

शॄदॄप्रा इत्येतासां प्रकृतीनां लिटि प्रत्यये परतो ह्रस्वश्चकाराद्यथा प्राप्तो गुणश्च भवति। विशश्रतुः, विशश्रुः विशशरतुः विशशरुः विदद्रतुः विदद्रुः विददरतुः विददरुः निपप्रतुः निपप्रुः निपपरतुः निपपरुः क्वसौ विशश्र्वान् विदद्वान्।

## ऋदृशोऽङि।

ऋवर्णानां धातूनां दृशेश्चाङिप्रत्यये परतो गुणो भवति। आरत् आरताम् असरत् असरताम् अजरत् अजरताम् अदर्शत् अदर्शताम्।

## श्वयतेरत् ।

श्वयतेर्धातोरङ्प्रत्यये परतोऽकारोऽन्तादेशो भवति। अश्वत् अश्वताम्।

## असुपतवचां थुक्पुतुमः।

असु पतवच इत्येतेषां धातूनाम् आङि प्रत्यये परतो यथासंख्यं थुक् पुङम् इत्येते आगमा भवन्ति। आस्थत् आस्थताम् पर्यास्थित अपप्रत् अपप्रताम् अवोचत् अवोचताम्।

## के तद्धितेऽणो ह्रस्वः।

तद्धिते कन् प्रत्यये परतोऽणन्तायाः प्रकृते ह्रस्वो भवति। खट्वका किलालपका कुमारिका ब्रह्मबन्धुका तद्धित इति किम् राका धाका प्रकृतेरित्येव कुमारिकायति कुमारिक कुमारिकः न कपीति निषेधादिह सानुबन्धस्यापि कपोग्रहणं भवति।

## न कापि।

कापि प्रत्यये परतोऽणो ह्रस्वो न भवति। बहुकीलालपाकः बहुकुमारिकः बहुवधूकः दापादीनामित्युपसर्जनह्रस्वोपि न भवति। समासार्थेह्युत्तरपदे कपिकृते पश्चात् समासेन भवितव्यमिति स्त्रीप्रत्ययान्तसमासप्रातिपदिकं न भवति।

## आपो वा।

कपि प्रत्यये परत आपो ह्रस्वो वा न भवति। बहुखट्वकः बहुखट्वाकः बहुमालकः बहुमालाकः।

## शीङ एत् सार्वधातुके।

शीङो धातोः सार्वधातुके प्रत्यये परतः एत् भवति। शेते शयाते शेरते शयानः सार्वधातुक इति किं संशीति शिश्ये अपिति गुणप्रतिषेधे प्राप्ते वचनम्।

## अयङ्यिक्ङिति।

यकारादौ क्ङिति प्रत्यये परतः शीङो धातोरयङित्ययमादेशो भवति। शय्यते शाशय्यते संशय्य शय्यायि इति किम् शिश्यानः क्ङितीति किं शेयं ङकारोन्तादेशार्थः।

## उपसर्गादूहो ह्रस्वश्च।

उपसर्गात्परस्य ऊहतेर्यकारादौ क्ङिति प्रत्यये परतो ह्रस्वो न भवति। समुह्यते समुह्यात् समुह्यगतः उपसर्गादिति किम् ऊह्यते यीत्येव समूहितं क्तीत्येव अभ्यूह्योयमर्थः। अण इत्येव आ उह्यते ओह्यते समोह्यते समौह्यत।

## लिङीणः।

उपसर्गात्परस्येणो धातोर्यकारादौ लिङि प्रत्यये परतो ह्रस्वो भवति। उदियात् उदियास्ताम् उदियासुः लिङीति किम् उदीयते समीयते उपसर्गादित्येव ईयात् अण इत्येव आ ईयात् एयात् समेयात्।

## दीर्घोऽकृत्सार्वधातुके।

कृत्सार्वधातुकवर्जिते यकारादौ क्ङितिप्रत्यये परतोन्त्यस्य दीर्घो भवति। भृशायते सिधीयति मधूयति चीयते सूयते चेचीयते चीयात् सूयात् अकृत्सार्वधातुक इति किम् विचित्य उपस्कृत्य सुनुयात् चिनुयात्।

## च्वौ च।

च्विप्रत्यये परतोऽजन्तायाः प्रकृतेर्दीर्घो भवति। शुचीकरोति शुचीभवति चकारः। अकृत्सार्वधातुके च्वीत्यस्यानुकर्षणार्थः। तेनोत्तरत्र द्वयमप्यनुवर्तते।

## रीङ्ऋतः।

ऋकारान्तायाः प्रकृतेश्च्वौ यकारादावकृत्सार्वधातुके च प्रत्यये परतो रीङित्ययमादेशो भवति। पित्रीकरोति पित्रीभवति पित्रीस्यात् पित्रीयते चेक्रीयते जह्रीयते क्ङितीत्येव। पितरो देवता अस्य पित्र्यः तपरः किम् चेकीर्यते निजेगिल्यते।

## रिङ् शे।

ऋदन्तस्य धातो शप्रत्यये परतो रिङादेशो भवति। व्याप्रियते भाद्रियते आध्रियते। तपरनिर्देशादिह न भवति । किरति मिरति।

## यगाशीर्लिङोर्ये।

यक्याशीर्लिङि च यकारादौ प्रत्यये परतो रिङन्तादेशो भवति। क्रियते ह्रियते क्रियास्ताम् रीङैव सिद्धेरिङ्विधानात् दीर्घत्वं न भवति। आशीर्ग्रहणं किम् । बिभृयात् य इति किम् कृषीष्ट। तपर इत्येव कीर्यते कीर्यात्।

## असुड्संयोगाद्यर्त्योर्गुणः।

सुड्वर्जितसंयोगादीनामृकारान्तानामर्त्तेश्च धातोर्यक्याशार्लिङि च यकारादौ प्रत्यये परतोऽलोऽन्त्यस्य गुणो भवति। स्मर्यते स्मर्यात् स्वर्यते स्वर्यात् । असुङिति किम् संस्क्रियते संस्क्रियात् । आशीर्लिङीत्येव इयृयात् यीत्येव स्वृसीष्ट। तपर इत्येव आस्तीर्यात्।

## यङि च।

यङि परतोऽसुट् संयोगादीनामृकारान्तानामर्तेश्च गुणो भवति। सास्मर्यते सास्वर्यते। आरार्यते। असुडित्येव संस्क्रियते। तपर इत्येव आस्तीर्यते।

## हनो घ्नी हिंसायाम् ।

हनो हिंसायां वर्तमानस्य यङि परतो घ्नी इत्ययमादेशो भवति। जेघ्नीयते। हिंसायामिति किम् गतौ जङ्घन्यते दीर्घः किम् जघ्नीत।

## ईघ्राध्मोः।

घ्राध्मा इत्येतयोर्यङि परत ईकारः अन्तादेशो भवति। जेघ्रीयते देध्मीयते। यङीत्येव घ्रायते ध्मायते दीर्घोच्चारणं यङ्लुगर्थं जेघ्रीत देध्मीत।

## अस्य च्वावनव्ययस्य।

अवर्णान्तायाः प्रकृतेरव्ययवर्जितायाश्च्वौ परत ईकारादेशो भवति। शुक्लीकरोति शुक्लीभवति शुक्लीस्यात् खट्वीकरोति खट्वीभवति खट्वीस्यात्। अनव्ययस्येति किम् दिवाभूता रात्रिः दोषाभूतमहः।

**क्यचि च।**

क्यचि प्रत्यये परतोऽवर्णान्तायाः प्रकृतेरीकार अन्तादेशो भवति। दीर्घत्वस्यापवादः पुत्रीयति खट्वीयति। पृथग्योगकरणमुत्तरार्थम्।

**न क्षुध्यशनस्य।**

अशनशब्दस्य क्यचि प्रत्यये परतः क्षुधिबुभुक्षार्थे ईकारः अन्तादेशो न भवति। अशनायति क्षुध्यतीत्यर्थः। क्षुधीति किम् अशनमिच्छत्यात्मनः अनशीयति।

**धनस्य तृष्णायाम्।**

धनशब्दस्य क्यचि परतस्तृष्णायामर्थे ईकारः अन्तादेशो न भवति। धनायति गृध्यतीत्यर्थः। तृष्णायामिति किम् धनमिच्छति धनीयति।

**उदकस्योदन् पिपासायाम्।**

उदकशब्दस्य क्यचि प्रत्यये परतः पिपासायामर्थे उदन् इत्ययमादेशो भवति। उदन्यति तृष्यतीत्यर्थः। पिपासायामिति किम् उदकमिच्छति उदकीयति।

**वृषाश्वयोर्मैथुनेच्छायां सुक्।**

वृषाश्वयोः क्यचि प्रत्यये मैथुनेच्छायां सुगागमो भवति। वृषस्यति गौः अश्वस्यति वा मैथुनेच्छाप्रतिपादनपरत्वात् प्रयोगस्याश्ववृषोपादानमतन्त्रमिति **शा**नुदाव भवति। साक्षीकण्ठकंवसं, वृषरप्यति न लुञ्जिता शुनी गोषु श्वमश्वस्यति। मैथुनेच्छायामिति किम् वृषीयति।

**दो सोमस्थामित् तिकिति।**

स्था इत्येतेषां धातूनां तकारादौ किति प्रत्यये परत इदन्तादेशो भवति। निर्दितः निर्दितवान् दित्वा दितिः अवसितः अवसितवान् मितः मितवान् स्थितः स्थितवान् दोसाविकृतनिर्देशादन्येषां दारूपाणां न भवति। मा इति तु मामेङ् माङामिति सामान्येन भवतीति किम् अवदाय। कितीति किम् अवदाता।

**छाशोर्वा।**

छा शा इत्येतयोर्धात्वोस्तकारादौ कितिप्रत्यये परत इदन्तादेशो वा भवति। अवछितः अवच्छितवान् अवच्छातः अवच्छातवान् निशितः निशितवान् निशातः निशातवान्।

**संशितो व्रते।**

संशित इति श्यतेः क्तप्रत्यये व्रतविषये इत्वं निपात्यते। संशितं साधितं व्रतमस्य संशितव्रतः। तद्योगात् संशितो ब्राह्मण इत्याद्यपि भवति। पूर्वेणसिद्धे नित्यार्थं वचनम्।

**दधातेर्हिः।**

दधातेस्तकारादौ किति प्रत्यये परतो हिरित्ययमादेशो भवति। विहितः विहितवान् हित्वा दधातेर्विकरणनिर्द्देशात् धेटो न भवति। धीतः धीतवान्।

**जहातेः त्त्वि।**

ओहाक् त्याग इत्यस्य त्त्वाप्रत्यये हिरित्ययमादेशो भवति। हित्वा तूष्टं वनं गतः जहातेरिति निर्द्देशात् ओहाङ् गतावित्यस्य न भवति हात्वा । त्त्वीत्येव विहाय।

**दो दत् ।**

दा इत्यस्य तकारादौ किति प्रत्यये परतो ददित्ययमन्तादेशो भवति। द्यतेरित्वविधानात् दाण्देङ्गाञामिहग्रहणम्। दत्तः दत्तवान् दत्त्वा दत्तिः दत्रिमं दोद इति वचनादिह न भवति। दातं बर्हिः अवदातम् मुखम्।

**उपसर्गादचस्तः।**

अजन्तादुपसर्गात् परस्य दासम्बन्धिनोऽचः स्थाने तकारादौ किति प्रत्यये परतस्तकारादेशो भवति। प्रत्तः प्रत्तवान् परीत्तः परीतवान् परितिमम् अवत्त अवत्तवान् अवत्तिरिति। अच इति किम् ...निर्द्दत्तं दुर्द्दत्तं निर्द्दितं दुर्द्दितम्। उपसर्गादिति किम् उपसर्गादिति पञ्चमीनिर्देशात् परस्यादेर्माभूत्।

**सुविन्यवानुभ्यः क्ते वा ।**

सुविनि अव अनु इत्येतेभ्य उपसर्गेभ्यः परस्य दासम्बन्धिनोऽचः स्थाने क्तप्रत्यये परतस्तकारादेशो वा भवति। सूत्तं सुदत्तम् वीत्तं विदत्तम् नीत्तं निदत्तम् अवत्तम् अवदत्तम् अनूत्तम् अनुदत्तम्। क्त इति किम् सूत्तवान् वीप्तवान्।

**प्रादादिकर्मणि।**

प्रादुपसर्गात् परस्य क्रियावृत्ते र्दा इत्यस्य च स्थाने क्तप्रत्यये परतस्तकारादेशो वा भवति। प्रत्तः प्रदत्तः। दातुं प्रारब्धवान् इत्यर्थः। प्रादिति वा न किं परीतम् आदिकर्मणीति किम् प्रकर्षेण दत्तं प्रत्तम् क्त इत्येव प्रत्तवान् दातुं प्रवृत्त इत्यर्थः।

**मरुतश्च।**

मरुच्छबादात् परस्य दा इत्यस्याचः स्थाने क्तप्रत्यये परतस्तकारादेशो भवति। मरुत एनं देयासुर्मरुत्तः। आशिषिचेति संज्ञाया टे क्तः।

**अपो भि।**

अप् इत्यस्याः प्रकृतेर्भकारादौ प्रत्यये परतस्तकारोऽन्तादेशो भवति। अद्भिः अद्भ्यः। भीति किम् अप्सु अभ्रम्। प्रकृतेरित्येव अब्भक्षः अब्भारः।

## सः स्यार्धधातुके।

सकारान्तायाः प्रकृतेः सकारादावार्धधातुके परतस्तकारोन्तादेशो भवति। वत्स्यति अवात्सीत् वत्सीष्ट विवत्सति जिघत्सति। स इति किम् वक्ष्यति। सीति किम् वासः घासः। आर्धधातुक इति किम् आस्से वस्से। कथमवात्ताम् अवात्तेति सिज्लोपस्यासिद्धत्वात् भविष्यति।

## तासस्त्योर्लोपः। तासस्तोर्ह एति।

तासेरस्तेश्च सम्बन्धिनः सकारस्य एकारे प्रत्यये परतो हकारादेशो भवति। कर्ताहे व्यक्तिहे निरनुबन्धग्रहणादिह न भवति। पलायामासे।

## रसोर्लोपः।

रेफादौ सकारादौ प्रत्यये परतस्तासेरस्तेश्च सकारस्य लोपो भवति। कर्तारौ कर्तारः कर्तासि असि व्यतिसे अकारसकारयोर्लोपे से इति प्रत्ययमात्रं पदम्। रेफादिः प्रत्ययोऽस्तेर्नास्ति।

## यीवर्णयोर्दीधीवेव्योः।

यकारादाविवर्णादौ च प्रत्यये परतो दीधीवेव्योरन्त्यस्य लोपो भवति। आदीध्यते आवेव्यते आदीध्यगतः आवेव्यगतः आदीधिता आवेविता आदीधीत आवेवीत। यीवर्णयोरिति किम् आदीध्यनम् आवेव्यनम्।

## योऽचि।

अजादौ प्रत्यये परतो दीधीवेव्योर्यकारोऽन्तादेशो भवति। गुणवृद्ध्योरपवादः। आदीध्यै आषेव्यै आदीध्यनम् आषेव्यनम् आदीध्यकः आषेव्यकःकफमदीधयुरिति छान्दसोऽत्र गुणोऽभ्यस्तसंज्ञा परस्मैपदं च। यथा आदीधेदिति।

## मीमारभलभशकपतपपददाधामच इस्सिसनि।

सकारादौ सनि प्रत्यये परतो मीप्रभृतीनामचः स्थाने इसादेशो भवति। डुमिञ् - निमित्सति मितिमिञोर्ग्रहणम्। मित्सते प्रमित्सति मेति मामाङ्केङां ग्रहणम्। मित्सति मित्सते अपमित्सते रभ आरिप्सते लभ लिप्सते शक शिक्षति पत पित्सति पद पित्सते दा इति दाण्दाञ्दोदेङां ग्रहणम्। दित्सति दित्सते दाप्दैपोस्तु दीदासति धा इति धाञ्धेटोर्ग्रहणम्। धित्सति। सीति किम् पिपतिषति इवन्तर्ध इत्यादिना पाक्षिक इट् सनीति किम् दास्यति ग्रहणं सर्वादेशनवृत्त्यर्थम्।

## राधो हिंसायाम्।

हिंसायां वर्तमानस्य राधधातोः सकारादौ सनि प्रत्यये परतोऽचः स्थाने इसित्ययमादेशो भवति। प्रतिरित्सति अवरित्सति। हिंसायामिति किम् आरिरात्सति।

**ऋध्धापोरीत्।**

ऋध्धेराप्नोतेश्च सकारादौ सनि प्रत्यये परतोऽचः स्थाने ईदादेशो भवति। ईत्सति ईप्सति सीत्येव आधिषति इवन्तर्ध इत्यादिनेड्विकल्पः।

**ज्ञपेरनन्त्यस्य।**

ज्ञपेः सकारादौ सनि प्रत्यये परतोऽनन्त्यस्याचः स्थाने ईदादेशो भवति। ज्ञीप्सति। सीत्येव जिज्ञपयिष्यति। पूर्ववदिड्विकल्पः। अनन्त्यस्येति किम् परत्वेन णिलोपं बाधित्वा णिच एवेदादेशो माभूदिति।

**दम्भ इच्च।**

दम्भेः सकारादौ सनि प्रत्यये परतोऽचः स्थाने इत् चकारादीदादेशो भवति। धिप्सति धीप्सति। सीत्येव दिदम्भिषति। पूर्ववदिड्विकल्पः।

**मुचेः कर्मकर्तर्योद्वा।**

मुचेः कर्मकर्तृविषयस्य सकारादौ सनि प्रत्यये परतोऽचः स्थाने ओदादेशो वा भवति। मोक्षते वत्सः, स्वयमेव मुमुक्षते। कर्मकर्तरीति किम् मुमुक्षति वत्सं देवदत्तः।

**इसादिष्वप्रयोगोऽभ्यासस्य।**

मीमेत्यत आरभ्य ये इसादय आदेशास्ते सत्स्वभ्यासस्याप्रयोगो भवति। तथैवोदाहृतम्। इसादिष्विति किम् पिपतिषति। अभ्यासस्येत्यधिकारः आपादपरिसमाप्तेः।

**हलोऽनादेः।**

अभ्यासस्य सम्बनधिनो हलोऽनादेरप्रयोगो भवति। विवक्षति। जाजाय्यते। हल इति किम् अलो माभूत्। अनादेरिति किम् । आदेर्माभूत् पपाच।

**खयि खरः।**

अभ्यासस्य सम्बन्धिनः खरोऽभ्याससम्बन्धिन्येव खयिपरतोऽप्रयोगो भवति। अनाद्यप्रयोगस्यापवादोऽयम्। उचिच्छिषति, चुश्चोतिषति चिस्स्वलिषति तुष्टूयति तिष्ठासति पिस्पन्दिषते पुस्फूर्जिषति खयीति किम् सस्मार सस्नौ खर इति किम् ययाचे।

**खयां चयः।**

अभ्याससम्बन्धिनां खयां स्थाने अन्तरतमाश्चयो भवन्ति। चिच्छद टिठकारयिषति। तिष्ठासति। पफाल।।

**झषां जशः।**

झषामभ्याससम्बन्धिनां यथासंख्यं जश आदेशा भवन्ति। झॄ जझार, बभार, जघास डुढौके, दध्यौ।

**कुहोश्चुः।**

अभ्याससम्बन्धिनः कवर्गस्य हकारस्य च स्थाने चवर्गादेशो भवति। चकार। चखान जगाम जघास जुहुवे जुहोति।

**न कवतेर्यङि।**

कवतेर्यङि परतोऽभ्यास कवर्गस्य अत्वं न भवति। कोकूयते कूकवीति कवतेरिति विकरणनिर्देशः कौतिकुवत्योर्निवृत्यर्थः। चोकूयते चोकषीति। यङीति किं चुकुवे चुकूषते।

**उरत्।**

ऋवर्णान्तस्याभ्यासस्य स्थानेऽकारोऽन्तादेशो भवति। चकार जगार। तपरकरणं दीर्घोऽपि स्थानिनि ह्रस्वार्थम्।

**ह्रस्वः।**

अभ्याससम्बन्धिनोऽचः स्थाने ह्रस्वो भवति। पपौ निनाय लुलाव सिसेकिषते लुलोकिषते।

**द्युतिस्वाप्योः सम्प्रसारणमभ्यासनिमित्तानन्तर्ये।**

द्युतेः स्वापेश्चाभ्यासस्याभ्यासप्रत्ययनिमित्तानन्तर्ये सति सम्प्रसारणं भवति। हलोऽनादेरप्रयोगस्यापवादः विदिद्युते। विदिद्योतिषते व्यदिद्युतत् सुष्वापयिषति । अभ्यासनिमित्तानन्तर्य इति किम् । स्वापयतेर्ण्वुल् स्वापकः। स्वापकमिच्छति स्वापकीयति। ततः सन् सिष्वापकीयिषति। स्वापिरिति स्वपिर्ण्यन्तो गृह्यते। न स्वापिमात्रम्। तेनेह न भवति। स्वपनं स्वापः तं करोति स्वापयति, तस्मात् सिष्वापयिषति।

**व्यथो लिटि।**

व्यथेरभ्यासस्य लिटि प्रत्यये परतः सम्प्रसारणं भवति। हलोनादेरप्रयोगस्यापवादः। विन्यथे विव्यथाते। लिटीति किम् वावथ्यते।

**दीर्घोऽपितीणः।**

अपितिलिटि परत इणो धातोरभ्यासस्य दीर्घो भवति। ईयतुः ईयुः अपितीति किम् इयाय इययिथ।

**अत आदेः।**

लिटि परतोऽभ्यासस्यादेरकारस्य दीर्घो भवति। आटतुः आटुः आर आरतुः आदेरिति किम् पपाच।

**तस्मान्नुडनेकहलः।**

तस्माद् दीर्घभूतादभ्यासात् परस्यानेकहलो धातोर्लिटि परतो नुडागमो भवति। अर्च-आनर्च आनर्चतुः आनञ्ज आनञ्जतुः। अनेकहल इति किम् आट आटतुः।

**ऋमदश्नोत्योश्च।**

तस्माद् दीर्घभूतादभ्यासादुत्तरस्य ऋमतोऽश्नोतेश्चधातोर्लिटि परतो नुडागमो भवति। अ ानृधतुः आनृधुः आनृजे आनृजाते व्यानशे व्यानशाते। विकरणनिर्देशोश्नातिनित्यर्थः। आश आशतुः एकहलर्थं वचनम्। वर्णैकदेशावर्णग्रहणेन गृह्यन्त इति ऋमानप्येकहलेव।

**भुवोऽत्।**

भवतेर्धातोर्लिटि परतोऽभ्यासस्याकारोऽन्तादेशो भवति। बभूव बभूवतुः अनुबभूव कम्बलो देवदत्तेन।

**निजिविजिविषां गुणः श्लौ।**

निजादीनां श्लौ अभ्यासस्येको गुणो भवति। नेनेक्ति नेनिक्ते वेवेक्ति वेविक्ते वेवेष्टि वेविष्टे। श्लाविति किम् निनेज निनिक्षति।

**ऋपॄभृहाङ् माङामित्।**

ऋप्रभृतीनां धातूनां श्लौ सत्यभ्यासस्येकारोऽन्तादेशो भवति। इयर्ति पिपर्त्ति बिभर्त्ति जिहीते मिमीते हाङोङ्कारो हाक् निवृत्त्यर्थः। जहाति। श्लावित्येव। आपपार।

**सन्यतः।**

सनि परतोऽवर्णान्तस्याभ्यासस्येदादेशो भवति। पिपक्षति तिष्ठासति पिपासति प्रतीषिषति। सनीति किम् पपच। अत इति किम् लुलूषति। तपरः किम् पापचिषते।

**ओः पुयण् ज्यपरे।**

सनि परत उवर्णान्तस्याभ्यासस्य पवर्गे यणि जकारऽवर्णपरे परत इकारोऽन्तादेशो भवति। पिपविषति पिपावयिषति बिभावयिषति यियविषति यियावयिषति रिरावयिषति लिलावयिषति जिजावयिषति। जु इति सौत्रो धातुः ओरिति किम् पापच्यते। सन् पापचिषते पुयण्जीति किम् जुहावयिषति। अपर इति किम् बुभूषति। सनीत्येव लुलाव।

**श्रुस्रुद्रुप्रुप्लुच्यूनां वा।**

सनि श्रृणोत्यादीनाम् अभ्यासस्योवर्णान्तस्यावर्णपरे यणि परत इकारोऽन्तादेशो वा भवति। शिश्रावयिषति शुश्रावयिषति सिस्रावयिषति सुस्रावयिषति दिद्रावयिषति दुद्रावयिषति पिप्रावयिषति पुप्रावयिषति पिप्लावयिषति पुप्लावयिषति चिच्यावयिषति चुच्यावयिषति। वचनसामर्थ्यादेकेन वर्णेन व्यवधानमाश्रीयते। अपर इत्येव शुश्रूषते शुश्रूषति।

**गुणो यङ् लुकोः।**

यङि यङ्लुकि च योऽभ्यासस्तस्येको गुणो भवति। चेचीयते लोलूयते बेभिद्यते बोभुज्यते वेव्यः लोलुपः बोभवीति रोरवीति।

**दीर्घोऽनागमस्य।**

यङि यङ्लुकि चानगमाभ्यासस्याचः स्थाने दीर्घो भवति। पापच्यते पापचीति जाज्वल्यते जाज्वलीति। अनागमस्येति किम् यंयम्यते यंयमीति। ननु चात्रापवादत्वान्नुकि कृतेऽनजन्तत्वादेव दीर्घो न भवति। तत्किमनागमस्येति प्रतिषेधेन सत्यमेतत् किन्त्वनेनैतत् ज्ञाप्यते अभ्यासविकारेषु बाधका न बाध्यन्त इति। अचीकरत् अजीहरदित्यत्र दीर्घो लघोः इत्यनेन सन्वदित्वं न बाध्यते।

**नीग्वञ्चुस्रन्सुध्वन्सुभ्रन्सुकसपतपदस्कन्दाम् ।**

यङि यङ्लुकि च वञ्चुप्रभृतीनामभ्यासस्य नीगागमो भवति।

**नुगतो ञमन्तस्य।**

..................जङ्गम्यते जङ्गमीति तन्तन्यते तन्तनीति बंभण्यते बंभणीति। अत इति किम् तेतिम्यते जघ्नीयते । तपरकरणं भूतपूर्वस्य दीर्घस्य निवृत्यर्थम् बाभाम्यते। ञमन्तस्येति किम् पापच्यते।

**जपजभदहदशभञ्जपसाम्।**

यङि यङ्लुकि च जपादीनामभ्यासस्य नुगागमो भवति। जञ्जप्यते जञ्जपीति दन्दह्यते दन्दहीति दन्दभ्यते दन्दभीति बम्भज्यते बंभजीति पम्पस्यते पम्पसीति। दंशेः कृतनकारलोपस्य निर्देशाद्यङ्लुकि नकारलोपो भवति।

**चरफलोः।**

यकि यङ्लुकि च चरफल इत्येतयोः अभ्यासस्य नुगागमो चञ्चूर्यते चञ्चुरीति पंफुल्यते पंफुलीति।

**उत्परस्यातः।**

यङि यङ्लुकि च चरफलोरभ्यासात् परस्याकारस्योदादेशो भवति। चञ्चूर्यते चञ्चुरीति पंफुल्यते

पंफुलीति। परस्येति किम् अभ्यासाकारस्य माभूत्। अत इति वचनमलोऽन्त्यस्य माभूदिति। उदिति तपरकरणं चंचूर्ति पंफुलीति गुणनिवृत्यर्थम्। दीर्घत्वस्यासिद्धत्वात् लघूपधत्वं न निवर्तते।

**ति च।**

तकारादौ प्रत्यये परतश्चरफलोरकारस्योदादेशो भवति। चूर्तिः प्रफुल्लिः प्रफुल्लास्सुमनसः लत्वस्यासिद्धत्वात् फुल्लः फुल्लवान् आदित्वाद्विसरणार्थस्येडभावः। चकारो यङ्लुकोरभ्यासस्येत्यस्योत्तरत्रानुकर्षणार्थः।

**रीगृत्वतः।**

यङि यङ्लुकि च ऋकारवतो धातोरभ्यासस्य रीगागमो भवति। दरीदृश्यते दरीदृशीति परीपृच्छ्यते परीपृच्छतीति। सम्प्रसारणे सति ऋत्वत्वाद्रीः ऋत्वत इति किम् चेक्रीयते। अत्र रीङ्भावे कृते द्विर्वचनमिति ऋत्वं तदा नास्ति। तपरकरणं किम् तॄ तोतर्ति जागर्ति।

**रुग्रिकौ च लुकि।**

ऋत्वतो धातोर्यङो लुकि अभ्यासस्य रुग्रिकौ चकाराद् रीक्चागमा भवन्ति। नर्नति नरिनर्ति नरीनर्ति ममुजः मरीमृजः लुकीति किम् नरीनृत्यते ऋत्वत इत्येव मोमोत्ति।

**सन्वल्लघुनि णौ चङ्यनम्लोपे।**

लघुनि धात्वक्षरे परतो योऽभ्यासस्तस्य च चङ्परे णौ अनग्लोपे सति सनीव कार्यं भवति। अचीकरत् अपीपचत् ओः पुयण्ज्यपरे अपीपचत् अबीभवत् स्रवत्यादीनां च असिस्रवत् असुस्रवत् अशिश्रवत् अशुश्रवत् । लघुनीति किम् अररक्षत् अजजागरत् णाविति किम् अचकमत। अनग्लोप इति किम् अतस्तनत् अजगदत् मालामाख्यत् अममालत् पटुमाख्यत् अपीपटत् इति परत्वाद्वृद्धौ कृतायां टिलोप इत्यनग्लोपित्वात् सन्वद्भावो भवति पटुग्रहणमौकारार्थम्।

**णेश्च।**

णिजन्तस्य धातोश्चङ्परे णौ परतो लघुनि च धात्वक्षरे योभ्यासस्तस्य सनीव कार्यं भवति। वादितवन्तं प्रयोजितवान्। अवीवदद्वीणां परिवादकेन। अपीपठत् माणवकमुपध्यायेन अत्र योऽसौ णौ परतो णिच् लुप्यते। तेनाग्लोपिनी प्रकृतिरिति पूर्वेण न प्राप्नोतीति वचनम्।

**दीर्घो लघोः।**

लघुनि धात्वक्षरे चण्परे णौ परतोऽनग्लोपे सति लघोरभ्यासस्य दीर्घो भवति। अपीपचत् अबीभवत् लघोरिति किम् अचिक्षणत् अचिक्रमत् । लघुनीत्येव अततक्षत् णावित्येव। अचकमत चङीत्येव रिरमयिषति। अनग्लोप इत्येव अचकलत् अचहलत्।

**स्मृद्दत्वरप्रथम्रदस्तृ्ःस्पशामत् ।**

चङ्परे णौ परतः स्मरत्यादीनामभ्यासस्याकारोऽन्तादेशो भवति। इत्वस्यापवादः। असस्मरत् अददरत् अतत्वरत् अपप्रथत् अमम्रदत् अतस्तरत् अपस्पशत्। तपरः किम् अददरदित्यत्र दीर्घो माभूदिति।

**वेष्टिचेष्ट्योर्वा।**

वेष्टि चेष्टि इत्येतयोरभ्यासस्य चङ्परे णौ परतोऽकारोऽन्तादेशो वा भवति। अववेष्टत् अविवेष्टत् अचचेष्टत् अचिचेष्टत्।

**ई च गणः।**

गणेर्धातोश्चङ्परे णौ परतोऽभ्यासस्य ईकारश्चकारादकारश्चान्तादेशो भवति। अजीगणत् गराः गाः ञजगणद्गाः गणेरदन्तत्वेनाग्लोपित्वात् सुन्वद्भावो दीर्घत्वं च न प्राप्नोतीति ईत्वं विधीयते।

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य व्याकरणस्य लघुवृत्तौ हृदयहारिण्यां सप्तमस्याध्यायस्य द्वितीयः पादः।

-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-

**(अथ तृतीयपादः)**

**पदस्य वीप्सायां द्वे।**

पृथक् संख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण वा युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा। तस्यां गम्यमानायां पदस्य स्थाने द्वे शब्दरूपे भवतः। वीप्सावत्सुबन्ते वृक्षं वृक्षं सिञ्चति। अर्थमर्थं अभिनिशिते। ग्रामो ग्रामो रमणीयः। पुरुषः पुरुषो हि रूपः। ग्रामे ग्रामे पानीय। ग्रहे ग्रहे खाः। उपचरितभेदस्यापि भिन्नः। हि नो विश्राम्यति क्षीणः क्षीणः। पयः पिबति व्यापकधर्मस्यापिव्याप्येन नभदोःपचारात् भेदे सति यः पकारान्तराभेत्वापेक्षायां वीप्सा भवति। तदेवान्योन्यर्थस्संबध्यते। नवो नवो भवति। जायमग्नमिति वदस्येति वचनम्। कृतसमस्तपदकार्यप्रतिपद्यर्थं स्थानसम्बन्धिनप्रतिपद्यर्थं च। तेन न राजा राजा वा कुवाकः इत्यादिषु न लोपकुत्वादीनि सिकानि भवन्ति। इह घत्वविकल्पः सिध्यति। अन्यथा द्रोग्धाद्रोढाद्रोग्धेतनभिदातोऽर्थे पिबत्वादिविकल्पः प्रसजेऽर्थे स्थान्यादेश सम्बन्धे च कौत सूतपौनः। पुन्यं पननः पुनिक इति कृतद्विर्वचनानामपि स्थानिवद्भावेनैकपदत्वात् तद्धि न सिद्धो भवति। तस्येत विहि प्रयोगेन सिध्यति। ननु च द्विर्वचनस्यादेशत्वे मुसल मुसल इत्यत्र यथेन चैव तत्समाने एव स्वाश्रयं न्यस्य समानत्वम्। स्थानिवद्भावेन च समानमिति। वीप्सायामिति किम्। वृक्षं सिञ्चति। ग्रामो रमणीयः इत्येकशेषे इतरइतरयोगक्रमाभिधानेषु सत्यामपि प्राप्तौ यथोक्तलक्षण वीप्साभावान्न भवति। अस्मिन् वनेन सर्वे वृक्षाः शोभमान इत्यत्र तु सर्वशब्देन वीप्सार्थाभिधानो न भवति। यथा तद्धितसमासाभ्यां द्वौ द्वौ पादौ

ददाति। दीपदीकाददतीर्थमर्थं प्रतिपत्यर्थमिति। क्वचित्तु वीप्समानमपि समासेनाभिधीयते। पङ्क्तौ पङ्क्तावष्टौ पदान्यस्य अष्टपादं ननु च वृक्षं सिञ्चतीत्यादौ वीप्सायां बहवोऽर्थाः प्रतीयते। तत्र बहुवचनं प्रस्तौति। नैष दोषः। पृथक् संख्यायुक्तानामिति वचनात् सुबन्तं च पदं तद्वच्च प्रातिपदिकं न भवतीति विभक्तिर्नोत्पद्यते। एतदुक्तं भवति-संख्यान्तरेणानाविष्टस्यार्थस्य या संख्या तस्याः वाचिका द्योतिका वा विभक्तिरुत्पद्यते। वीप्सायां तु परिगृहीतैकत्वादीनामर्थानां बहुत्वोपसर्जनात् अन्तरङ्गस्यादेवैकवचनादिकमुत्पन्नम्। तेनैव स्वादिशास्त्रस्य तदर्थत्वात् पुनर्वचनान्तरं न भवति।

**सगतेश्चाभीक्ष्ण्ये।**

पौनः पुन्यमाभीक्ष्ण्यं। स च क्रियाधर्मः इति क्रियापदमेवात्र संबध्यते। तस्मिन् गम्यमाने सगतेस्तिङन्तस्य पदस्य चकारात् केवलस्य स्थाने द्वे शब्दरूपे भवतः। पुनः पुनः प्रपचति। प्रपचति प्रपचति। अधीते अधीते। पचति पचति। वर्धते वर्धते। क्रियाविशेषणस्यापि क्रियारूपत्वेनाध्यवसायादाभीक्ष्ण्येन योगे सति द्विर्वचनं भवति। यथा पुनः पुनः पचति। वारं वारं भुङ्क्ते। मन्दं मन्दं नुदति। स्तोकं स्तोकं चलति। यदा स्वामनुकूलया रूपतया नाध्यवसीयते तदा 'प्रकारे गुणवचनस्य' इति सादृश्यं  द्विर्वचनं भवति। मन्दं मन्दं सुदयते। स्तोकं स्तोकं समस्तमयतीति। यत्र क्रियायाः प्रकर्षः आभीक्ष्ण्यं च विवक्ष्यते तत्र परत्वात् कृते द्विर्वचने आतिशायिकः पचति पचतितरां पठतितमामिति। आढ्यतरमाढ्यतरमानयेत्यादौ प्रकर्षयुक्ता एवाढ्या आनयनक्रियायां युज्यन्त इति पूर्वमातिशायिके कृते द्विर्वचनम्। यदि वाध्याध्यतर चाढ्याढ्यतरमानयेति पूर्वं द्विर्वचनं क्रियते प्रकर्षार्थो गम्येत न वीप्सेति।

**त्त्वाणमुलोः।**

त्त्वाप्रत्ययान्तस्य णमुलन्तस्य च पदस्य स्थाने आभीक्ष्ण्ये गम्यमाने द्वेशब्दरूपे भवतः। भुक्त्वा भुक्त्वा व्रजति। भोजं भोजं व्रजति। ननु च पूर्वेणैवात्र द्विर्वचने सिद्धे किमर्थमिदं?सत्यं किन्त्वाभीक्ष्य एव द्योत्ये यत्र त्त्वाणमुलौ विधीयेते तत्र लोड्वद्द्विर्वचनसहितावेव त्त्वाणमुलावाभीक्ष्ण्यं द्योतयतो न यङ्वत् केवलाविति।

**क्रियासमभिहारे लोटः।**

क्रियासमभिहारविषयो यो लोट् तदन्तस्य स्थाने द्वेशब्दरूपे भवतः। लुनीहि लुनीहि इत्येवायं लुनाति। अधीष्वाधीष्वेहीत्येवायमधीते। क्रियासमभिहार इति किं, लुनीहि अधीष्व लोट इति किं। पापच्यते। ननु च यङ्विषयस्यापि द्विर्वचनं दृश्यते। पापच्यते पापच्यत इति। सत्यं। द्विविधः क्रियासमभिहारः। पौनः पुन्यम्। भृशार्थश्च। तत्र यदा पौनपुन्यं भृशार्थश्चात्रे ........यदा पौनपुन्ये यङ् तदा तत्र नास्ति द्विर्वचनम्। यदा तु भृशार्थे तदा पौनः पुन्यद्योतनाय द्विर्वचनम्। पापच्यते पापच्यत इति। यदा तु तत्प्रतिपादनाय लोड्विधीयते, तदा तस्य द्विर्वचनसहायस्यैवाभीक्ष्ण्यप्रतिपादने सामर्थ्यमिति द्विर्वचनमपि भवति। पापच्यस्व पापच्यस्वेति।

## आनुपूर्व्ये।

क्रमानुल्लंघनमानुपूर्व्यम्। सद्विशिष्टेऽर्थे वर्तमानस्य सुबन्तस्य पदस्य स्थाने द्वे शब्दरूपे भवतः। मूले मूले स्थूलाः। अग्रे अग्रे सूक्ष्माः। ज्येष्ठं ज्येष्ठं प्रवेशय। कनिष्ठं कनिष्ठमाशय। अग्रमध्यमूलानि त्रयोभागाः तत्रैकमेवमुख्यमग्रं मूलं च। अन्येषां तु भागानामपेक्षाकृतोग्रमूल व्यसनिनिष्ठमपेक्ष्याग्रव्यपदेशः। न चैकरूपं भागानां स्थौल्यं सौक्ष्म्यं वा किं तर्हि, यथा मूलमुपचीयते स्थौल्यं, यथाग्रं च सौक्ष्म्यापचयः इति वीप्सा नास्ति। एवं ज्येष्ठत्वकनिष्ठत्वयोरप्यापेक्षिकत्वात् वीप्सा नास्तीति पृथग्वचनम्।

## अनेकावधारणे।

अनेकार्थस्यावधारणे इयत्तापरिच्छेदे गम्यमाने सुबन्तस्य पदस्य स्थाने शब्दरूपे भवतः। अस्माद्कार्षापणादिह भवद्भ्यां माषं माषं देहि। द्वौ द्वौ देहि। त्रीन् त्रीन् देहि। अवीप्सार्थं वचनम्। अत्र हि द्वावेव चत्वार एव षडेव, दानसम्बन्धित्वेन माषाः प्रतीयन्ते न सर्वे कार्षापणसम्बन्धिन इति। अनेकग्रहणं किम्। अस्माद् कार्षापणादिह भवद्भ्यां माषान् द्वौ त्रीन् वा देहि।

## डाच्यव्यक्तानुकरणे।

अव्यक्तानुकरणे वर्तमानस्य पदस्य डाचिविषये द्वे शब्दरूपे भवतः। पट् पटदिति करोति पटपटाकरोति विषयसप्तमीविज्ञानादुत्पन्नेऽपि डाचि द्विर्वचनं भवति। अव्यक्तानुकरण इति किं शम्बाकरोति बीजाकरोति।

## डतरडतमयोः समानं स्त्रीभावप्रश्ने।

समानां केनचिद्गुणेन तुल्यतया सम्प्रधारितानां स्त्रीलिङ्गस्य भावस्य प्रवृत्तिनिमित्तस्य धात्वर्थस्य वा प्रश्ने वर्तमानस्य डतरान्तस्य डतमान्तस्य च परस्य स्थाने द्वेशब्दरूपे भवतः। उभाविमावाढ्यौ कतराः कतरा अनयोराढ्यता कतमा कतमा अनयोराढ्यता। एवं सर्व इमे आढ्याः कतराः कतरा एषामेषामाढ्यता। कतमाः कतमा एषामाढ्यता। सर्व इमे आढ्याः यतरा यतरा एषां विभूतिस्ततरा ततरा कथ्यताम्। डतरडतमयोरिति किं । उभावाढ्यौका अनयोराढ्यता। समानमिति किं। आढ्योऽयम् कतरास्याढ्यता कतमस्या विभूतिः, स्त्रीग्रहणं किम् । उभाविमावाढ्यौ कतरदनयोराढ्यत्वम्। कतमोऽनयोर्विभवः। प्रश्न इति किम् । उभाविमावाढ्यौ यतरा अनयोराढ्यता ततरा श्रूयताम्। केचिद् डतरडतमाभ्यां स्त्रीलिङ्गाश्चान्यत्रापीच्छन्ति। उभाविमावाढ्यौ कीदृशी कीदृशी अनयोराढ्यता कतरोऽनयोर्विभवः इति। कतरा अनयोरनयोराढ्यतेत्यादौ प्राप्ते स्वार्थे एवैतत् द्विवचनं भवति।

## पूर्वप्रथमयोरर्थातिशये वा।

पूर्वप्रथम इत्येतयोः पदयोरर्थातिशये द्योत्ये द्वे शब्दरूपे वा भवतः। अ ातिशायिकप्रत्ययस्यापवादः। पक्षे सोऽपि भवति। पूर्वं पूर्वं पुष्यति पूर्वतरं पुष्यति। प्रथमं प्रथमं पच्यन्ते प्रथमतरं पच्यन्ते।

## वर्जने परेरसमासे।

परिशब्दस्य वर्जनेऽर्थे वर्तमानस्यासमासे द्वे शब्दरूपे वा भवतः। परिपरित्रिगर्तेभ्यो वृष्टो देवः परिगर्तेभ्यः। वर्जन इति किम्। साधुर्देवदत्तो मातरं परि परेरिति किम्। अपत्रिगर्तेभ्यो वृष्टो देवः। असमास इति किम्। परिगर्तं वृष्टो देवः।

## अधोऽध्युपरीणां सामीप्ये।

अधस् अधि उपरि इत्येतेषां सामीप्ये प्रजासत्तौ गम्यमानायां द्वे शब्दरूपे भवतः। अधोऽधोग्रामम्। उपर्युपरिग्रामम्। सामीप्य इति किम्। अधः पन्नगाः। अधि ब्रह्मदत्ते पञ्चालाः। उपरि शिरसो घट इत्यत्रौत्तराधर्यमात्रं विवक्षितम् न सामीप्यमिति न भवति।

## वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु।

परगुणानामसहनमसूया युजनमाहिमत्यं चासम्मतिःक्रोधः कोपः निन्दाकुत्सनम् अपकारशब्दैर्भयोत्पादनं भर्त्सनम्। एते च प्रत्ययोऽत्र धर्मा नाभिधेयधर्माः तेषु द्योत्येषु वाक्यादेरामन्त्रितस्य सम्बोधनप्रथमान्तस्य पदस्य स्थाने द्वे शब्दरूपे भवतः। असूयायां- अभिरूप अभिरूपक रिक्तं ते आभिरूप्यकम्। सम्मतौ-माणवकमाणवक शोभनः खल्वसि। कोपे-अविनीतक अविनीतक इदानिमास्यसि जाल्म। कुत्सने-शक्तिके शक्तिके रिक्ताते शक्तिः। भर्त्सने-चौर चौर चौराण्य चौराण्य घातयिष्यामि त्वाम्। असूयादिषु पूर्वपदस्यैव प्लुतः। भर्त्सने पूर्वयोः पर्यायेण। वाक्यादेरिति किम्। शोभनः खल्वसि माणवकः। आमन्त्रितस्येति किम्। उदारो देवदत्तः। असूयादिष्विति किम्। देवदत्त गामभ्याज शुक्लां दण्डेन।

## एकस्य सुब्लुक्।

आदेरिति वर्तते एक इत्यस्य द्वित्वे सति आदेः शब्दरूपस्य संबन्धिनः सुपो लुक् भवति। द्विर्वचनं तु यथा सम्भवं वीप्सादावर्थे भवति। एकैकमक्षरं पठति। एषामेकैकस्मै देहि। कृतद्विर्वचनस्य समासस्तद्धितश्च भवति। एकैकप्रधानाः एकैकशोबुध्यन्ते।

## आबाधे पुंवच्च।

आबाधो मनसः पीडाप्रयोक्तृधर्मः। तस्मिन् गम्यमाने सुबन्तस्य पदस्य द्वेशब्दरूपे भवतः। आदेः परस्य दस्य सुब्लुक् पुंवद्भावश्च भवति। गतगतः नष्टनष्टा गतगताः नष्टनष्टाः प्रियस्य गमनादिना पीड्यमाना एवं प्रयुञ्जेत।

## प्रकारे गुणवचनस्य वा।

प्रकारः सादृश्यं तस्मिन् गम्यमाने गुणवचनस्य पदस्य द्वे शब्दरूपे वा भवतः। आदेश्च पदस्य सब्लुक् पुंवद्भावश्च भवति। शुक्लशुक्लः पटः शुक्लशुक्लं रूपम् पटुः पटुः पटुपट्वी। शुक्लादिसदृशमपरिपूर्णगुणमेवमुच्यते वावचनाद् पक्षे जातीयरपि भवति। शुक्लजातीयः। प्रकार इति किम्। शुक्लः पटः। गुणवचनयोरिति किम्। अग्निर्माणवकः गौर्बाहीकः।

## अकृच्छ्रे प्रियसुखयोः।

कृच्छ्रं कष्टं तदभावोऽकृच्छ्रम्। दुःखाभावादिकेऽर्थे वर्तमानयोः प्रियसुखशब्दयोर्द्वेशब्दरूपे वा भवतः। सुब्लुक्त्वादेः शब्दरूपस्य भवति। प्रियप्रियेण ददाति प्रियेण ददाति। सुखसुखेन ददाति अकृच्छ्रेण ददातीत्यर्थः। अकृच्छ्र इति किम्। प्रियः पुत्रः। सुखो रथः।

## अन्यस्य क्रियायाः सातत्ये।

अन्यशब्दस्य क्रियायाः सातत्ये गम्यमाने द्वे शब्दरूपे भवतः। आदेश्च सुब्लुक् भवति। अन्ये चान्ये च जायन्ते अन्यस्य चान्यस्य प्रादुर्भावः अन्यान्यप्रादुर्भावः।

## एकवच्चेतरस्य व्यतीहारे।

इतरशब्दस्य क्रियाव्यतीहारे द्वे शब्दरूपे आदेश्च सुब्लुक् समुदायस्य चैकवद्भावो भावो भवति। इतरेतरं भोजयतः इतरेतरेण भोजयति।

## परान्ययोः सुक् च।

परान्य इत्येतयोः क्रियाव्यतीहारे द्वे शब्दरूपे आदेः सुगागमःसमुदायस्य चैकवद्भावो भवति। परस्परं भोजयतः परस्परं भोजयन्ति। परस्परेण भोजयतः परस्परेण भोजयन्ति। अन्योन्येन भोजयतः अन्योन्येन भोजयन्ति।

## एषामपुंस्यां सुपो वा।

एषामितरपरान्यशब्दानां क्रियाव्यतीहारे द्विरुक्तानां यथायोगमादेः पदस्य कृतसुब्लुक् सुगागमानां स्त्रियां नपुंसके च प्रयुज्यमानानां सुपः स्थाने आमित्ययमादेशो वा भवति। इमे सख्यौ इतरेतरां भोजयतः। इतरेतरं भोजयतः। इतरेतरेण भोजयतः। एवमिमे सख्यौ परस्परां भोजयतः। परस्परं भोजयतः। इमे सख्यावन्योन्यं भोजयतः। अन्योन्यां भोजयतः। नपुंसके इमे ब्राह्मणकुले इतरेतरां भोजयतः। इतरेतरं भोजयतः। परस्परां भोजयतः। परस्परं भोजयतः। अन्योन्यां भोजयतः। अन्योन्यं भोजयतः। अपुंसीति किम्। इतरेतरमिमे ब्राह्मणा भोजयन्ति।

## यथास्वे यथायथम्।

यो य आत्मा यद्यदात्मीयं वा तत् तद्यथास्वं तस्मिन्नर्थे यथाशब्दस्य द्विर्वचनमुत्तरस्य वाचनस्थाने अम्भावो निपात्यते। ज्ञाताः सर्वपदार्थाः यथायथं यथास्वभावमित्यर्थः। सर्वेषां तु यथायथं यथात्मीयमित्यर्थः।

## द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगेषु।

द्वन्द्वमिति द्विशब्दस्य द्विर्वचनम् पूर्वपदस्य सुपो लुक् इकारस्याम्भावः उत्तरस्यात्वं सुपोंभावश्च रहस्यादिषु गम्यमानेषु निपात्यते च। द्वन्द्वं मन्त्रयन्ते। आचतुरं हिमे पशवो द्वन्द्वं मिथुना जायन्ते। द्वन्द्वं व्युत्क्रान्ताः। द्वन्द्वं यज्ञपात्राणि युनक्ति, रहस्यादिष्विति किम्। द्वौ तिष्ठतः। वचनग्रहणं शब्दोपात्तायां मर्यादायां यथा स्यात्। प्रकरणादिगम्यायां माभूदिति।

## अत्यन्तसहचरिते लोकविज्ञाते।

अव्यभिचारेण सहचरिते लोकप्रसिद्धे युग्मे द्विशब्दस्य पूर्ववत् द्वन्द्वमिति निपात्यते। द्वन्द्वं नारदपर्वतौ। द्वन्द्वं रामलक्ष्मणौ। द्वन्द्वं बलभद्रवासुदेवौ। अत्यन्तसहचरित इति किम्। द्वौ युधिष्ठिरार्जुनौ। लोकविज्ञात इति किम्। देवदत्तयज्ञदत्तौ। द्वन्द्वमिति च नपुंसके वेदितव्यम्। अनुप्रयोगस्य नपुंसकार्थं वचनम्।

## द्वन्द्वः कलहयुग्मसमासादिषु।

द्वन्द्व इति द्विशब्दस्याकारान्तः कलहादिष्वर्थेषु निपात्यते। द्वन्द्वः कलहः। द्वन्द्वं युद्धम्। द्वन्द्वं युग्मम्। द्वन्द्वः समासः। आदिग्रहणात् द्वन्द्वानि सहते दुःखानि सहते इत्यर्थः।

## वाक्यस्यापि सम्भ्रमे यावद्बोधम्।

भयादिभिश्चित्तविक्षेपात् प्रयोक्तुस्त्वरणं सम्भ्रमस्तस्मिन् द्योत्ये वाक्यस्यापि शब्दात् परस्य च न केवलं द्वे एव शब्दरूपे अपि तु यावद्बोधं बहून्यपि शब्दरूपाणि प्रयोक्तव्यानि भवन्ति। अहिरहिः बुध्यस्व । अहिरहिः बुध्यस्व बुध्यस्व बुध्यस्व। हस्त्यागच्छति लघु पलायध्वं लघु पलायध्वम्।

## पदादपादादौ समानवाक्ये।

अधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्यामः तत्पदात् परस्यापादादौ वर्तमानस्य भवतीत्येवं तद्वेदितव्यम्। तेचेन्निमित्तनिमित्तीभूते पदे समाने एकस्मिन् वाक्ये भवतः। ननु च पदविधित्वात् समर्थपरिभाषोपस्थाने सत्यसामर्थ्यादेव भिन्नवाक्यस्थात् पदात् परयोर्युष्मदस्मदोर्वस्नसादयो न भवन्तीति किं समानवाक्याधिकार इत्यनेन। नैवं युक्तम्। युक्तेष्वसमर्थादपि यथा स्युरिति समानवाक्यग्रहणम्। इति स्म नः पिता कथयति। इति वः श्रेयसी ब्रवीमि। इति मे माता अवोचत्। शालीनां ते ओदनं दास्यामि। इति अत्र हि युष्मदस्मदी पित्र्यादियुक्ते न तद्युक्ते इति स्म दिभिरिति।

## युष्मदस्मदोर्लुग्विभक्त्यन्तयोर्वस्नसौ वा।

द्वितीया चतुर्थी षष्ठी चेति लुग्विभक्तयस्तदन्तयोर्युष्मदस्मदोः पदयोः पदात् परयोरपादादौ वर्तमानयोः समानवाक्ये यथासंख्यं वस् नस् इत्येतावादेशौ वा भवतः। ग्रामो वोऽरक्षत्। जनपदोऽनोऽरक्षत्। ग्रामो युष्मान् रक्षतु। जनपदोऽस्मान् रक्षतु। ग्रामो वो दीयते। जनपदो वो दीयते। ग्रामो युष्मभ्यं दीयते। ग्रामोऽस्मभ्यं दीयते। ग्रामो वः स्वम्। जनपदो नः स्वम्। ग्रामो युष्माकं स्वम्। जनपदोऽस्माकं स्वम्। द्विवचनैकवचनान्तयोरादेशान्तरविधानात् बहुवचनान्तयोरेवैतावादेशौ भवतः। लुग्विभक्त्यन्तयोरिति किम्। ग्रामे यूयं तिष्ठथ। नगरे वयं यास्यामः। तदन्तविधिना सिद्धे अन्तग्रहणं किं श्रूयते। यथा स्यात् लुप्तायां प्रत्ययलक्षणेन माभूत्। ग्रामे युष्मत्पुत्रः। नगरेऽस्मत्पुत्रः। अतियुष्मान् जानाति। अत्यस्मान् ब्रूते। पदादित्येव। युष्मान् ग्रामो रक्षतु अस्मान् रक्षतु। अपादादावित्येव।

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता।

स एव नाथो भगवानस्माकं पापनाशनः।।

समानवाक्य इत्येव। देवदत्तस्तिष्ठति मो मे युष्मान् देवताः रक्षन्तु यज्ञदत्तस्तिष्ठति नगरे, अस्मान् पान्त्विति।

## द्विवचनस्य वां नावौ।

पदात् परयोर्लुग्विभक्तिद्विवचनान्तयोर्युष्मदस्मदोरपादादौ समाने वाक्ये यथासंख्यं वां नावित्येतावादेशौ वा भवतः। ग्रामो वां रक्षतु। जनपदौ नौ रक्षतु। ग्रामो युवां रक्षतु। जनपद आवां रक्षतु। ग्रामो वां दीयते। जनपदौ नौ दीयते। ग्रामो युष्मभ्यं दीयते। ग्रामोऽस्मभ्यं दीयते। ग्रामो वां स्वम्। जनपदो नौ स्वम्। ग्रामो युवयोः स्वम्। जनपद आवयोः स्वम्। लुग्विभक्त्यन्तयोरित्येव। ग्रामे युवां तिष्ठथः। नगर आवां तिष्ठावः। अन्तग्रहणादिहापि लुकि न भवति। ग्रामे युष्मत्पुत्रः। नगरेऽस्मत्पुत्रः।

## तेमयावेकवचनस्य।

पदाद् परयोर्लुग्विभक्त्येकवचनान्तयोर्युष्मदस्मदोरपादादौ समानवाक्ये यथासंख्यं ते मे इत्येतावादेशौ वा भवतः। उत्तरसूत्रे द्वितीयायाः पृथगुपादानात् चतुर्थीषष्ठ्योरेकवचनमिह गृह्यते। ग्रामस्ते दीयते। ग्रामो मे दीयते। ग्रामस्तुभ्यं दीयते। जनपदो मह्यं दीयते। ग्रामस्ते स्वम्। जनपदो मे स्वम्। ग्रामस्तव स्वम्। जनपदो मम स्वम्। पदादित्येव। तव स्वम्। मम स्वम्। समानवाक्य इत्येव। ओदनं पच, तव भविष्यति।

## त्वामौ द्वितीयायाः।

पदात् परयोर्द्वितीयैकवचनान्तयोर्युष्मदस्मदोरपादादौ समानवाक्ये यथासंख्यं त्वा मा इत्येतावादेशौ वा भवतः। ग्रामस्त्वा रक्षतु। जनपदो मा रक्षतु। ग्रामस्त्वां रक्षतु। जनपदो मां रक्षतु।

## वस्नसादयो नित्यमन्वादेशे ।

कथितानुकथनमात्रमन्वादेशः। कस्यचित्किञ्चिद्विधाय ते नान्येन वा शब्देन पुनरन्यद्विधानं कथनमित्यर्थः। अस्मिन्विषयो वस्नसादयो युष्मदस्मदादेशा यथास्वं नित्यं भवन्ति। यूयं विनीतास्तद्वो देवा रक्षन्तु। वयं विनीतास्तन्नो देवा रक्षन्तु। युवां शीलवन्तौ तद्वां देवा रक्षन्तु। आवां शीलवन्तौ तन्नौ देवा रक्षन्तु। त्वं विद्वान् अथो ते ग्रामो दीयते। अहं विद्वान् अथो मे ग्रामो दीयते। धनवांस्त्वम् अथो त्वा लोको मानयति। धनवानहं अतो मा लोको मानयति। अन्वादेशे नित्यवचनात् पूर्वो विकल्पविधिरन्वादेशेऽवतिष्ठते।

## सपूर्वात् प्रथमान्ताद्वा।

विद्यमानपूर्वात् प्रथमान्तात् पदात् परयोर्युष्मदस्मदोरन्वादेशेऽपि वस्नसादय आदेशा यथायथं वा भवन्ति। यूयं विनीतास्तद्देवा वो रक्षन्तु। तद् देवा युष्मान् रक्षन्तु। वयं विनीतास्तद् देवा नो रक्षन्तु। तद्देवा अस्मान् रक्षन्तु। एवं विभक्त्यन्तरे द्विवचनैकवचनयोश्च वस्नसादय आदेशा समुदाहरणीयाः। विकल्पेन पूर्वेण नित्ये प्राप्ते अन्वादेशे विकल्पार्थं वचनम्। नन्वादेशे तु सर्वत्रैव विकल्पो भवति।

## न च वाहाहैव योगे।

चादिभिर्योगे युष्मदस्मदोर्यथोक्तावस्नसादयो न भवन्ति। ग्रामो युष्मांश्च रक्षतु। ग्रामोऽस्मांश्च रक्षतु। ग्रामो युष्मान् वा रक्षतु। ग्रामोऽस्मान् वा रक्षतु। ग्रामो युष्मान् ह रक्षतु। ग्रामोऽस्मान् ह रक्षतु। ग्रामो युष्मान् ह रक्षतु। ग्रामोऽस्मान् ह रक्षतु। ग्रामो युष्मानेव रक्षतु। ग्रामोऽस्मानेव रक्षतु। एवं सर्वत्र समुदाहार्यम्। योगग्रहणं किम्। साक्षाद्योगे स्यात् इह माभूत्। ग्रामश्च नगरश्च वो रक्षतु।

## दृश्यर्थैरनालोकने।

दृशिना समानार्था दृश्यर्थास्तैर्धातुभिरनालोकने अचक्षुर्विज्ञाने वर्तमानैर्योगे युष्मदस्मदोर्यथोक्तावस्नसादयो न भवन्ति। ग्रामो युष्मान् समीक्ष्यागतः। ग्रामोऽस्मान् समीक्ष्यागतः। ग्रामो युवामवेक्षागतः। ग्राम आवामवेक्ष्यागतः। ग्रामस्त्वामवेक्षते। ग्रामो मामवेक्षते। ग्रमो युष्मभ्यं दीयमानमुत्पश्यति। ग्रामोऽस्मभ्यं दीयमानमुत्पश्यति। ग्रामो युवाभ्यां दीयमानं निरूपयति। ग्राम आवाभ्यां दीयमानं निरूपयति। ग्रामस्तुभ्यं दीयमानं निध्यापयति। ग्रामो मह्यं दीयमानं निध्यापयति। ग्रामो युष्माकं स्वं समुपलक्षयति। ग्रामोऽस्माकं स्वं समुपलक्षयति। ग्रामो युवयोः स्वं सम्पश्यति। ग्राम आवयोः स्वं सम्पश्यति। ग्रामस्तव कार्यमालोचयति। ग्रामो मम कार्यमालोचयति। योगग्रहणमिह नानुवर्तते। तेन युक्तयुक्तेऽपि प्रतिषेधो भवति। अनालोकन इति किम्। जनो वः पश्यति। जनो नः पश्यति। जनो वो वीक्षते। जनो नो वीक्षते। जनस्त्वामालोकते। जनो मामालोकते।

## आमन्त्रितं पूर्वमसद्वत्।

सम्बोधनप्रथमान्तं पदं युष्मदस्मद्भ्यां पूर्वमसद्वदविद्यमानवद् भवति। तस्मिन् यत्कार्यं तन्न भवति। असति यत्तद् भवतीत्यर्थः। हे ब्राह्मणाः युष्मान् रक्षतु ग्रामः। हे ब्राह्मणा अस्मान् रक्षतु ग्रामः। हे ब्राह्मणाः युष्मभ्यं दीयते। हे ब्राह्मणाः अस्मभ्यं दीयत इत्यादि। पूर्वमिति किम्। अये तत्सर्वमाख्यातं युषमाकं मुनिपुङ्गवः परस्य ह्यसद्वत्वे पादादिलक्षणः प्रतिषेधो न स्यात्। व्यवहितोऽपि पूर्वशब्दो वर्तते। तेन देवदत्तो धर्मो वां रक्षतु। देवदत्त धर्मो नो रक्षतु। इत्यत्र संपूर्वात् प्रथमान्ताद्वा इति विकल्पो न भवति। वत्करमं किम्। श्रवणं यथास्यात्।

## न समानाधिकरणे सामान्यवचनम्।

आमन्त्रिते समानाधिकरणे परत आमन्त्रितं सामान्यवचनमसद्वन्न भवति। माणवक! जटिलक! त्वा रक्षन्तु देवाः। माणवक! जटिलक! ते रोचते मोदकः। माणवक! जटिलक! ते स्वमेवमित्यादि। अत्र परस्यासद्वत्वेऽपि पूर्वाश्रयो युष्मदस्मदादेशो भवति। समानाधिकरण इति किम्। ब्राह्मण! राजन्! युवयोः स्वम्। सामान्यवचनमिति किम्। जटिल! माणवक! तवस्वं मम स्वम्।

## जस् वा।

जस् युक्तमामन्त्रितं सामान्यवचनं समानाधिकरण आमन्त्रिते विशेषवचने परतोऽसद्वद्वा भवति। ब्राह्मणाः शरण्याः अस्मानथो ब्राह्मणाः शरण्याः। जनोऽथो रक्षत किम्। ब्राह्मणा शरणं प्रपद्ये। सामान्यवचनमित्येव। शरण्या ब्राह्मणाः युष्मान् रक्षत। शरण्याः ब्राह्मणाः अस्मान् रक्षत। समानाधिकरण इत्येव। देवाः ब्राह्मणाः युष्मान् शरणं प्रपद्ये। देवा ब्राह्मणाः अस्मान् रक्षत। अन्वादेशोऽपि युष्मदस्मदादेशानां विकल्पार्थं वचनम्।

## पूर्वत्रासिद्धम्।

अधिकारोऽयम्। आअध्यायपरिसमाप्तेः यदित ऊर्ध्वं लक्षणमनुक्रमिष्यामः। तत्पूर्वस्मिन् लक्षणे कर्तव्ये असिद्धं भवति इति वेदितव्यम्। इत उत्तरमितः पूर्वस्मिन् पूर्वस्मिन् योगे कर्तव्ये परः परोऽसिद्धो भवति। असिद्धत्ववचनमादेशलक्षणकार्यप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च आहुः - अस्मा उद्धरद्वावत्र। अस्मा इन्द्रः। अत्र यवयोर्लोपस्यासिद्धत्वात् सवर्णदीर्घाद्गुणौ न भवतः। अमुष्मै अमुष्मात् अमुष्य अमुष्मिन्। अत्रोत्वस्यासिद्धत्वात् अत इत्यधिकृत्य विधीयमाना आदेशलक्षणाः स्मादयो भवन्ति। ऊढमाख्यत्। ऊढिमाख्यत्। औजढत् औजिढत् इत्यढत्वधत्वष्टुत्वढलोपानामसिद्धत्वात् णौ टि लोपस्य स्थानिवद्भावात् चङीति च द्विर्वचनं भवति। ये चात्र षष्ठीसप्तमीपञ्चमीनिर्देशास्तेषां षष्ठ्यन्तस्येत्यादिषु परिभाषासु वर्तमानास्वसिद्धत्वं न भवति। कार्यकालं हि संज्ञापरिभाषमिति। तासां परिभाषाणां पूर्वत्वं नास्तीति ताः प्रवर्तन्ते। 'विप्रतिषेधे परं' इत्येषा तु परिभाषा येन पूर्वेण लक्षणेन सह परं लक्षणं स्पर्धते। तद्प्रति ताः तस्यासिद्धत्वात् युगपद् प्रसंगाभावान्न प्रवर्तते। अपवादस्य तु परस्यादि उत्सर्गे कर्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति। तेन दोग्धा दोग्धुमित्यत्र घत्वस्य सिद्धत्वात् दत्वं न भवति।

**नलोपः सुपि।**

सुपि परभूते यो नलोपः स च पूर्वत्रासिद्धे भवति। राजाभ्यां राजभ्यः राजसु राजभिरिति सुपि परतो नलोपस्यासिद्धत्वात् दीर्घत्वमेत्वमैत्वं च न भवति। सुपीति किम्। राजीयति। नायं सुपि नलोपः तेन ईत्वदीर्घत्वे सिद्धे एव भवतः।

**न नि मुः।**

नाशब्दे परतो यत्कार्यं तस्मिन् कर्तव्ये मुभावोऽसिद्धो न भवति। अमुना। अत्र मुभावस्य सिद्धत्वादतो यञि सुपीति दीर्घत्वं न भवति। निकर्तव्ये मुभावस्य यत्सिद्धत्वात् तदर्थतः सङ्गृहीतम्।

**सिज् लोप एकादेशे।**

एकादेशे कर्तव्ये सिज्लोपः सिद्धो न भवति। अलावीत् अत्र ई सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घो भवति।

**षठनोर्निष्ठादेशः।**

षत्वे ठप्रत्यये च विधातव्ये निष्ठादेशोसिद्धो न भवति। वृक्णः वृक्णवान्। अत्र निष्ठादेशनत्वस्य सिद्धनत्वस्य सिद्धत्वात् झल् लक्षणं षत्वं न भवति। कुत्वं प्रत्यसिद्ध एवेति तद् भवति। क्षीबेण तरति क्षीबिक इत्यत्र निष्ठादेशस्य इच्छब्दलोपस्य सिद्धत्वात् द्व्यज्ञौभ्यां ष्ठनितिलञिलक्षणष्ठन् भवति।

**प्लुतविकारेश्छे तुकि।**

छे परतो यस्तुक् तस्मिन् कर्तव्ये प्लुतविकारोऽसिद्धो न भवति। अग्ना इच्छात्रम्। पटाण्य उच्छत्रम्। 'अत्र प्लुतविकारस्य सिद्धत्वात् 'छेचे'ति नित्यं तुग् भवति' न तु पदान्तलक्षणो विकल्पितः। छ इति किम्। खलं पुनाति। खलपु ब्राह्मणकुलम्। तस्य सम्बुद्धौ प्लुतविकारः खलपाण्य अत्र ह्रस्वस्य पिति कृति तुग्भवति।

**धुटि श्चुत्वम्।**

..........................................भवति। अभति अभति गवाभति। च्युतिर् क्षरण इत्ययं धातुः सकारादिः पठ्यते तस्य श्चुत्वस्यासिद्धत्वात् ङःसो धुट् नश्चेति प्राप्नोति। सिद्धत्वान्न भवति।

**द्वित्वे परसवर्णः।**

द्वित्वेकर्तव्ये परसवर्णो नासिद्धो भवति। सय् यन्ता सव् वँत्सरः तल् ल्लोकम्। अत्र परसवर्णस्यासिद्धत्वात् यर इति द्वित्वं न स्यात्। सिद्धत्वात् भवति।

## अमात्तदुपधाच्च मतोर्वः।

अवर्णान्तादवर्णोपधान्मकारान्तान्मकारोपधाच्च प्रातिपदिकात्परस्य मतोरादेर्वकारादेशो भवति। अवर्णान्तात् - वृक्षान् खट्वान् । अवर्णोपधात् - पयस्वान् वस्वान्। मकारान्तात् - किम्वान् इदम्वान् । मकारोपधात् - लक्ष्मीवान् अमात् तदुपधाच्चेति किम्। अग्निमान्। नृमतोपत्यं नार्मत इत्यत्र तु वृद्धेर्बहिरङ्गलक्षणत्वान्न भवति।

## झयः।

झयन्तात् प्रातिपदिकात् परस्य मतोरादेर्वकारादेशो भवति। समिद्वान् कुमुद्वान् विद्युत्वान् तटित्वान्।

## संज्ञायाम्।

संज्ञायां विषये मतोर्वकारादेशो भवति। स च पूर्वमादेः प्रवृत्तत्वादिहापि आदेरेव भवति। अहीवती, कपीवती, मणीवती, मुनीवती। नद्यां मतुबिति चातुरर्थिको मतुप्। आसन्दीवान् मम ग्रामः।

## अष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वत्यः।

एते शब्दा मत्वन्ताः संज्ञायां विषये निपात्यन्ते। अस्थिशब्दस्य मतुबि अष्ठीभावो मतुपो वत्वं च निपात्यते। अष्ठीवान् जङ्घोरुसन्धिः अस्थिमानित्यत्र, चक्रशब्दस्य चक्रीभावः चक्रीवान् गर्दभः। चक्रवानित्येवान्यत्र। कक्ष्याशब्दस्य सम्प्रसारणं कक्षीवान् नाम ऋषिः कक्षावानित्येवान्यत्र। क्षणस्य वणशब्दस्य मरुद्भावः। मरुत्वात् परतः रुमण्वान् नाम पर्वतः लवणवानित्येवान्यत्र। चर्मन् शब्दस्य नलोपाभावो णत्वं च। चर्मण्वति नाम नदी। चर्मवतीत्येवान्यत्र।

## उदन्वानुदधौ च।

उदकशब्दस्य मतावुदन्भाव उदधावर्थे संज्ञायां च विषये निपात्यते। उदन्वान् घटः उदन्वान् मेघः। यस्मिन्नुदकं दीयते स एवमूह्यते। उदन्वान् समुद्रः उदन्वान् नाम ऋषिः। यस्य उदन्वतः पुत्रः उदकवान् घट इत्यत्र तु घटस्योदकसम्बन्धमात्रं विवक्षितम्। न दधात्यर्थ इति न भवति।

## राजन्वान् सौराज्ये।

राजन्वानिति सौराज्ये गम्यमाने मतो न लोपाभावो निपात्यते। राजन्वान् देश राजन्वती पृथिवी। राजन्वत्यः प्रजाः। सौराज्य इति किम्। राजवान् देशः।

## न यवोर्मिदल्मिभूमितिमिकृमिक्रुञ्चाद्राक्षाध्राक्षावासो हरित् गरुत् ककुज्ज्योतिष्मद्रोमद्भ्यः।

यवादिभ्यः प्रातिपदिकेभ्यः परस्य मकारामतोर्वकारादेशो न भवति। यवमान् ऊर्मिमान् भूमिवान् तिमिमान् कृमिमान् क्रुञ्चामान् द्राक्षामान् ध्राक्षामान् वासोमान् । एभ्यः अमात्तदुपधाच्च मतोर्व' इति

प्राप्ते हरिद्मान् गरुद्मान् ककुद्मान्। एभ्यो 'झय' इति प्राप्ते ज्योतिष्मती हविष्मान् गोमती एभ्यः 'संज्ञायामि'ति प्राप्ते प्रतिषेधो भवति।

**कान्तिशिम्बिहरिचार्विक्षुमधुबन्धिन्दुबिन्दुद्रुवस्वंशुश्रूहनुसानुभान्वादिभ्यश्च।**

कान्त्यादिभ्यः प्रातिपदिकेभ्यः परस्य मतो वकारादेशो न भवति। कान्तिमती **शभि** शिम्बिमती हरिमती चारुमती इक्षुमती मधुमती बन्धुमती इन्दुमती बिन्दुमती द्रुममती वसुमती अंशुमती श्रुमती हनूमान् सानुमती भानुमती । एभ्यः संज्ञायामिति प्राप्ते प्रतिषेधो भवति। आदिग्रहणाद्यथादर्शनमन्येभ्योपि न भवति।

**कृपोरोलोऽकृपणकृपाणकर्पटकृपीटकर्परकर्पूरकृपादीनाम्।**

कृपेः सम्बन्धिन्यारश्रुतेर्लश्रुतिर्भवति, न न चेद् सा कृपणादीनां सम्बन्धिनी भवति। क्लृप्तः क्लृप्तवान्। चिक्लृप्सति अचीक्लृपत् कल्पते कल्पिता कल्प्ता चलीकल्प्यते । अकृपणादीनामिति किम्। कृपणः कृपाणः कर्पटः कृपीटः कर्परः कर्पूरः कृपा। आदिग्रहणाद्यथादर्शनमन्येषामपि भवति।

**उपसर्गस्यायतौ।**

उपसर्गसम्बन्धिनो रेफस्यायतौ धातौ परतः लकारादेशो भवति। प्लायते पलायेत पल्ययते निलयते। कथं निरयते दुरयते। रुत्वस्यासिद्धत्वात् निसो दुसश्च भविष्यति। कथं प्रत्ययते। येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादेकेन वर्णेन व्यवधानमाश्रीयते, न पुनरनेकेनेति न भविष्यति।

**ग्रो यङि।**

यङि प्रत्यये परतो गिरतेर्धातो रेफस्य लकारादेशो भवति। गर्हितः निर्गमति निजेगिल्यते गृणातेस्तु यङेव नास्ति। यङीति किम्। निगीर्यते।

**अचि वा।**

अजादौ विहितस्य गिरतेः सम्बन्धिनो रेफस्य लकारादेशो वा भवति। निगरणं निगलनं निगारकः निगालकः। अचीति किम्। निगीर्णः निगीर्णवान्। विहितविशेषणं किम्। इह च यथास्यात्। निगार्यते निगाल्यते। इह च माभूत् गिरौ गिर इति।

**परेर्घाङ्कयोगेषु।**

परेः सम्बन्धिनो रेफस्य घ अङ्क योग इत्येतेषु परतो लकारादेशो वा भवति। परिघःपलिघः पर्यङ्कः पल्यङ्कः परियोगः पलियोगः।

**कपिरिकातिप्पिरिकाङ्गुरिकरोमपुरुषतरुणसरिरारम्मूरकरीरकर्ममुकुरपांसुररेखारिक्षादीनाम्।**

कापिरिकादीनां सम्बन्धिनो रेफस्य लकारादेशो वा भवति। कपिरिका कपिलिका तिप्पिरिका तिप्पिलिका अङ्गुरी अङ्गुली रोम लोम पुरुषः पुलुषः तरुणः तलुनः सरिरं सलिलं अरम् अलं मूरं मूलं करीरं कलीलं कर्म कल्म मुकुरं मुकुलं पांसुरः पांसुलः रेखा लेखा लिक्षा रिक्षा आदिग्रहणात् यथादर्शनमन्येषामपि भवति।

**इरातर्परकरभशरभवारवाररघुगरादीनामर्थभेदे।**

इरादीनां सम्बन्धिनो रेफस्यार्थभेदे लकारादेशो वा भवति। इरा अमृतम्। इला भूमिः। तर्परः पशूनां कण्ठः। तल्पला गजपृष्ठैकदेशः। करभः उष्ट्रः। कलभः करिशबकः। भरभस्ति....सरपोऽष्टापदः शलभः पतङ्गः कारो रक्षानिर्वेशः कालः वर्णः  वरः क्रियाभ्यावृत्तिः वालः केशः रघुः राजा लघुः अपचिपरिमाणः गरः विषं गलः प्राण्यङ्गम् आदिग्रहणाद् मुदरमुद्गल मण्डरमण्डलकन्दरकन्दलादीनामपि भवति।

**असंयुक्तानादेर्डः।**

असंयुक्तस्य पदानादेश्च डकारस्य लकारादेशो भवति वा । वडभी वलभी चूडा चूला इडा इला व्याडः व्यालः पुरोडाशः पुरोलाशः षोडश षोलश असंयुक्तानादेरिति किम्। डिण्डिमः डुण्डुभः पाण्डुः कण्डुः डामरः डीनः।

**जपादीनां पो वः।**

जपा इत्येवमादीनां सम्बन्धिनः पकारस्य वकारादेशो वा भवति। जपः जवः कपलः कवलः कपाटः कवाटः पारापतः पारावतः पारापारः पारावारः अपाची अवाची विष्टवम् विष्टपम् त्रिविष्टपम् त्रिविष्टपम् इति।

**प्रातिपदिकस्यानह्नो नो लोपः।**

नकारान्तस्याहन् वर्जितस्य प्रातिपदिकस्य पदस्यालोन्त्यस्य लोपो भवति । राजाच्चः वृत्रहा वाग्मी राजपुरुषः राजकाम्यति। प्रातिपदिकस्येति किम्। कुर्वीरन् वृक्षान् अनह्न इति किम्। अहरधीते अहोरूपम् दीर्घाहा निदाघः अत्र रेफरुत्वयोरसिद्धत्वात् नलोपः स्यात्। सावकाशं च तदुभयं सम्बुद्धौ हे अहः हे दीर्घाहः पदस्येत्येव राजानौ राजानः।

**क्ये।**

क्य इति क्यच् क्यष् क्यङां सामान्येन ग्रहणम् तस्मिन् परतो नकारान्तस्य प्रातिपदिकस्यालोऽन्त्यस्य लोपो भवति। राजीयति राजीयते चर्मायति चर्मायते। ननु च अबन्तादेते

विधीयन्ते। तत्र सुपो लुकि पदान्तत्वादेव सिद्धो न लोपः। एवं तर्हि सिद्धे सत्यारम्भो नियमार्थः। नकारस्यैव क्ये परतः पदकार्यं भवति नान्यस्य तेन पयस्यते समिध्यति। समिध्यते विद्वस्यति विद्वस्यते इत्यादिषु रुत्वजश्त्व दत्वादीनि न भवन्ति।

**न सम्बुद्धौ।**

नकारान्तस्य प्रातिपदिकस्य नपुंसके वर्तमानस्य सम्बुद्धावलोऽन्त्यस्य लोपो वा भवति। हे चर्म हे चर्मन् हे दाम हे दामन् ।

**सुपि वलि तद्वत्।**

सुपीति प्रत्याहारः स्वौजसीति सुशब्दादारभ्य आकपः पकारात् तदित्यनेन च प्रकृतं पदं परामृश्यते वलादौ सुपि प्रत्यये परतः पूर्वस्य पद तद्वत् पदवत्  पूर्वमुत्तरं च कार्यं भवति। राजभ्यां राजत्वं राजकल्पः द्युद्भ्यां  द्युमान् द्युकल्पः। वलीति किम् राजानौ सुबन्तात् तद्धितोत्पत्तौ सुपोलुकि प्रत्ययलक्षणेन तद्धितेषु पदकार्येसिद्धे नियमार्थं वचनम्। वलादावेव तद्धिते यथा स्यात् वलादौ माभूत्। दिव्यं पायसमिति प्रातिपदिकात् तु तद्धितोत्पत्तौ विध्यर्थमिति।

**संयोगस्य।**

संयोगान्तस्य परस्यालोऽन्त्यस्य लोपो भवति। कुर्वन् कृतवान् गोमान् अनड्वान् श्रेयान् । भूयानित्यत्र रुत्वं परमप्यसिद्धत्वात् संयोगान्तलोपं न बाधते। सुपि वलि तद्वदतिदेशात् प्रसम्यां युञ्जातीय इति।

**रात् सः।**

संयोगान्तस्य पदस्य सम्बन्धिनो रेफात्परस्य सकारस्यैव लोपो भवति। पितुः मातुः(कचिपटजिहि) स इति किम्। उक्तः ऊर्क।

**धि सङि।**

सङीति प्रत्याहारेण सनः सशब्दादारभ्य हिङो ङकारेण धातुप्रत्यया गृह्यन्ते तस्मिन् धकारादौ परतः सकारस्य लोपो भवति। चकाधि आशाध्वम् अलविध्वम् अलविढ्वम्। सङीति किम्। पयोधिः पयौ धावति। केचित् सिचो धकार इत्यधीयाताम्। सिचि एव सकारस्य लोपमिच्छन्ति। तन्मते चकद्धीति भवति।

**इट ईटि।**

इटः परस्य सकारस्य ईडादौ सङि परतो लोपो भवति। अलावीत्  अस्तावीत्। इट इति किम्। अकार्षीत्। ईटीति किम्। अलाविष्टाम् अलाविषुः।

**झलो झलि।**

झलः परस्य सकारादौ झलादौ सङि परतो लोपो भवति। अभैत्ताम् अभैत्त अभित्थाः। झल इति किम्। अमंस्त। झलीति किम्। अभित्साताम् सङीत्येव। समित् स्तोभा। दृषत् स्थानम्।

**ह्रस्वाद्धातोः।**

ह्रस्वान्ताद्धातोः परस्य सकारस्य झलादौ सङि परतः लोपो भवति। आहत आहथाः आदित आदिथाः अकृत अकृथाः। ह्रस्वादिति किम्। अच्योष्ट। धातोरिति किम्। अलिविष्ट अलविष्ठाः। झलीत्येव आहसाताम्।

**स्कोः संयोगाद्योरन्ते च।**

सकारककारयोः संयोगाद्योः झलादौ सङि पदान्ते च लोपो भवति। ओलस्जी नग्नः नग्नवान् साधुलक् मस्ज- मग्नः मग्नवान् साधुमक् कक्ष् तष्टम् तष्टवान् ताष्टनत् काष्टतट् चक्षु आचष्टे तद्वदतिदेशात् साधुमग्भ्याम्। एवं मृग्क्भ्यां काष्ठतट्भ्याम्। काष्ठतट् हरः सङीत्येव। अद्भिः प्सानां सा कथनं कथं मांसं पिपक्षति। मांसपीपत् वचो विवक्षते, वचोवीचगिति कुत्वस्यासिद्धत्वान्न भवति।

**चोः कुः।**

चवर्गस्य झलादौ सङि परतः पदान्ते च कवर्गादेशो भवति। वक्ता वक्ष्यति वाक् त्यक्त्वा त्यजति अर्धभाक् तद्वदतिदेशात् वाग्भिः वाग्त्वम् अर्धभाक्तमः सङीत्येव। क्रुञ्चः। अत्र आकारस्य चकारे झलि कुत्वं न भवति।

**हो ढः।**

हकारस्य झलि परतः पदान्ते च त्सकारादेशो भवति लेढा सोढा वोढा मधुलिट् तुराषाट् सुपि वलि तद्दतिदेशात् मधुलिड्भ्यां मधुलिड्भिः मधुलिड्भ्यः।

**दादेर्धातोर्घः।**

उपदेशे दादेर्धातोः सम्बन्धिनो हकारस्य झलि पदान्ते च घकारादेशो भवति। ढस्यापवादः। दग्ध्वा दोग्ध्वा काष्ठधक् गोधुक् काष्ठधुक्भ्यां गोधुग्भ्याम् । उपदेशग्रहणादिहापि भवति। अधात्। धोक्। अधाक्षीत्। इह च न भवति। दामलिहमिच्छति दामलिह्यति। क्विप् दाम्लिट्। धातोरिति किम्। दामलेटि दधिलिट्। दामधुट् घविधानं। भष्भावार्थम्।

**वा द्रुहमुहष्णुहष्णिहाम्।**

द्रुहादीनां सम्बन्धिनो हकारस्य झलि पदान्ते च घकारादेशो वा भवति। द्रुहेः प्राप्ते अन्येषामप्राप्ते

विकल्पः द्रोग्धा द्रोढा मित्रध्रुक् मित्रध्रुट् मित्रध्रुग्भ्यां मित्रध्रुड्भ्याम्। एवं मोग्धा मोढा स्नोग्धा स्नोढा स्नेग्धा स्नेढा। झलि पदान्ते चेति किम्। मित्रद्रुहौ मित्रद्रुहः।

**न हाहोर्धतौ।**

झलि पदान्ते च नहाहो सम्बन्धिनो हकारस्य पथासङ्ख्यं धकारतकारावादेशौ भवतः। नद्धा नत्स्यति उपानत् उपानद्भ्याम् आत्थ। आहो नियविषयत्वात् पदान्तता नास्ति। झलि पदान्ते चेत्येथं उपनह्यति उपानत्। आह आहतुः आहेरादेशान्तकरणं तथोर्द्धोऽध इति धत्त्वनिवृत्यर्थम्।

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजपरिव्राजछशां षः।**

व्रश्चादीनां धातूनां परिव्राजः शकारान्तानां च झलिपरतः पदान्ते च षकारोऽन्तादेशो भवति। व्रश्च व्रष्टा मूलवृट् भ्रस्ज-भ्रष्टा धाना-भृट् सृज्-स्रष्टा रज्जुसुट् मृज-मार्ष्टा कंसपरिमृट् यज्-यष्टा उपयट् राज्-सम्राट् सम्राड्भ्यां भ्राज्- विभाट् विभाट्भ्याम्। राजभ्राजोः पदान्तार्थं ग्रहणम्। झलादिराभ्यामिटाव्यवधीयते केचित्तु राष्टिः भ्राष्टिरिति क्तिरिक्तिन्नन्ताविच्छन्ति परिव्राज-परिव्राड् परिव्राड्भ्याम्। क्विपि दीर्घत्वे कृतदीर्घस्यास्योच्चारणात् पदान्तार्थमेव ग्रहणम्। शान्तानां लिश्स्लेष्टालिट् छादेशोऽपि शकारो गृह्यते प्रच्छ प्रष्टा शब्दप्राट्।

**झष एकाचः स्ध्वोर्बशो भष्।**

झषन्तस्यैकाचो धातोरवयवस्य सम्बन्धिनो वसन्वाबशः स्थाने थ ध्व शब्दे च परतः पदान्ते च भषादेशो भवति। बुध-भोत्स्यते अभुध्वम् अर्थभुत् गुह-निघोक्ष्यते न्यघुड्वम् पर्णघुट् दुहः-धोक्ष्यते अधुग्ध्वम् गोधुक् अवयवविज्ञानात् इहापि भवति जर्गृधेर्लङि सिपि अजर्घाः। गर्दभयतेः क्विपि गर्धप्। झष इति किम्। दा-अध्यास्यति। एकाच इति किम्। दामलिह्यतेः क्विप् दामलिट् स्ध्वोरिति किम्। बोद्धा । बश इति किम्। क्रोत्स्यति। क्रुत् धकारस्य वकारोपसृष्टस्य ग्रहणं किम्। दादद्धि। दध धारणे इत्यस्य यङ्लुकि लोटि हेर्धिभावेसत्येतद् भवति।

**धाञस्तथोश्च।**

झषन्तस्य धाञ् धातोरवयवस्य बशः स्थाने तकारथकारयोश्चकारात् स्ध्वोश्चपरतो भषादेशो भवति। धत्ते धत्थः धत्से धध्वे। ञकारः किम्। धेटो यङ् लुगन्ता तस्वसोः दात्तः दाथ इत्यत्र माभूत्। तथोश्चेति किम्। दध्वः। दध्मः। झष इत्येव दधाति दधासि।

**झषस्तथोर्धोऽधः।**

अदधातोर्झषन्ताद्धातोः परयोस्तथोः स्थाने धकारादेशो भवति लब्ध्वा अलब्ध अलब्धाः अदुग्ध अदुग्धाः लेढा अलीढ अलीढाः अबुद्ध अबुद्धाः अध इति किम्। धत्तः धत्थः। असिद्धत्वात् पूर्वं जश्त्वम्।

**षढोः कः सि।**

षकारढकारयोः सकारे परतः ककारादेशो भवति। पिष्-पेक्ष्यति पिपिक्षति अद्राक्षीत् अयाक्षीत् लेक्ष्यति लिलिक्ष्यति अलिक्षत् लिलेक्ष्यति। षढोरिति किम्। अत्सि भिनत्सि। सीति किम्। श्टेष्टि पिनष्टि।

**रदाभ्यां निष्ठातो दश्च नः।**

अथ दकाराभ्यां परस्य निष्ठासम्बन्धिनस्तकारस्य नकार आदेशः पूर्वस्य च दकारस्य भवति। पूर्णः पूर्णवान् तीर्णः तीर्णवान् भिन्नः भिन्नवान्। रदाभ्यामिति किम्। चितः। चितवान्। निष्ठेति किम्। कर्ता भेत्ता। त इति किम्। चरितम्। मदितम्। कथं शीर्णः शीर्णवान्। इति वृ इति धा ....ञ्चति समानार्थनिष्ठाविषयमामनन्ति।

**यण् संयोगादेरातः।**

यणा संयोगो यण्संयोगस्तदादेराकारान्तात् धातोः परस्य निष्ठातकारस्य नकारादेशो भवति। स्त्यानः स्त्यानवान् निद्राणः निद्राणवान् ग्लानः ग्लानवान्। यणीति किम्। स्नातः। स्नातवान्। संयोगादेरिति किम्। यातः यातवान्। आत इति किम्। च्युतः च्युतवान्। धातोरित्येव उद्यातः उद्यातवान्। निर्यातवानित्यत्र तु द्विर्वचनेऽचि तस्यासिद्धत्वान्न भवति।

**ॠल्वादिभ्यः क्तिनश्च।**

ॠकारान्तेभ्यो ल्वादिभ्यश्च धातुभ्यः परस्य क्तिनो निष्ठायाश्च तकारस्य नकारादेशो भवति। तीर्णः तीर्णिः गीर्णिः पूर्णिः। ॠकारग्रहणं किमर्थम्। निष्ठायास्तु रादित्येव भवति। ल्वादिभ्यः - लूनिः लूनः लूनवान् धूनिः धूनवान्।

**पूञो नाशे।**

पूञो नाशे वर्तमानात् परस्य निष्ठातकारस्य नकारादेशो भवति। पूनापवादः यवाः विनष्टाः इत्यर्थः। नाश इति किम्। पूतं धान्यम्।

**दुग्वोरु च।**

दु उपतापे गु पुरीषोत्सर्गे इत्येताभ्यां परस्य निष्ठातकारस्य नकार उकारश्चानयोरन्तादेशो भवति। दूनः दूनवान् गूनः गूनवान् ।

**सेर्ग्रासे कर्मकर्तरि।**

षिञ् बन्धन इत्येतस्मात् परस्य निष्ठातकारस्य ग्रासे कर्मकर्तर्यभिधेये नकारादेशो भवति। सितो ग्रासः स्वयमेव। ग्रास इति किम्। सितो धर्मः स्वयमेव। कर्मकर्तरीति किम्। सितो ग्रासो देवदत्तेन।

## ओदितः।

ओकार इद्येषां धातूनां तेभ्यः परस्य निष्ठा तकारस्य नकारादेशो भवति। ओङ - नजी नग्नः नग्नवान् भञ्जो - भग्नः भग्नवान् ।

## सूयत्यादिभ्यो नवभ्यः।

'षूङ् प्रणिप्रसवे' इति दैवादिको धातुः तदादिभ्यो नवभ्यो धातुभ्यः परस्य निष्ठातकारस्य नकारादेशो भवति प्रसूनः प्रसूनवान् दूनः दूनवान् दीनः दीनवान् धीनः धीनवान् मीनः मीनवान् रीणः रीणवान् लीनः लीनवान् डीनः डीनवान् व्रीणः व्रीणवान् । नवभ्य इति किम्। पीङ्-पीतः पीतवान्।

## क्षेः क्षी च।

क्षियो धातोः परस्य निष्ठातकारस्य नकारः धातोश्च क्षी इत्ययमादेशो भवति। क्षीणः क्षीणवान् । अधिकरणमिदमेषाम् क्षिण्यां क्षियोऽकर्मकात् कर्मणि निष्ठैव नास्ति। क्षिष् हिंसायामित्यस्य तु सकर्मकस्य सानुबन्धत्वात् ग्रहणं न भवति। क्षितः क्षितान्।

## वा भावाक्रोशदैन्येषु।

भावेऽर्थे आक्रोशे दैन्ये च गम्यमाने क्षेर्धातोः परस्य निष्ठातकारस्य नकारो धातोश्च क्षी इत्ययमादेशो वा भवति। क्षितमनेन क्षीणमनेन क्षितायुर्जाल्मः क्षीणायुर्जाल्मः क्षितस्तपस्वी क्षीणस्तपस्वी।

## श्योऽस्पर्शे।

स्पर्शो गुणस्ततोऽन्यत्रार्थे वर्तमानस्य श्यायतेः परस्य निष्ठातकारस्य नकारादेशो भवति। शीनं घृतं शीनं मेदः प्रतिशीनः प्रतिशीनवान्। अस्पर्श इति किम्। शीतं वर्तते। गुणभूते स्पर्शे प्रतिषेधो भवति। शीतो वायुः शीतमुदकम्।

## अञ्चोऽनपादाने।

अञ्चतेर्धातोः परस्य निष्ठातकारस्य नकारादेशो भवति। न चेदपादानमञ्चत्यर्थे भवति। समक्नौ शकुनेः पक्षौ अनपादान इति किम्। उदक्तमुदकं कूपात्।

## दिवोऽविजिगीषायाम्।

विजेतुमिच्छा विजिगिषा ततोऽन्यत्रार्थे वर्तमानात् दिवो धातोः परस्य निष्ठातकारस्य नकारादेशो भवति। अद्यूनः परिद्यूनः अविजिगीषायामिति किम्। द्यूतं वर्तते। विजिगीषया हि तत्राक्षपातनादिक्रियते।

## अवाते निर्वाणः।

निर्वाण इति निस्पूर्वात् वा धातोरुत्तरस्य निष्ठातकारस्य नकारादेशे निपात्यते न चेद्वाताधिकरणो धात्वर्थो भवति। निर्वाणो भिक्षुः निर्वाणोऽग्निः अवात इति किम्। निर्वातोवातः।

## ऋणमाधमर्ण्ये।

ऋणामिति ऋ इत्येतस्माद्धातोः परस्य निष्ठातकारस्य नत्वमाधमर्ण्यविषये निपात्यते। ऋणं ददाति ऋणं धारयति। आधमर्ण्य इति किम्। ऋतं वक्ष्यामि नानृतम्। कालान्तरदेयविनिमयोपलक्षणार्थमाधमर्ण्यग्रहणम्। उत्तमर्ण इत्यपि भवति।

## ह्रीघ्रावोन्दनुदविनत्तिभ्यो वा।

ह्रीप्रभृतिभ्यः परस्य निष्ठातकारस्य नकारादेशो वा भवति। ह्रीणः ह्रीणवान् ह्रीतः ह्रीतवान्  घ्राणः घ्राणवान् घ्रातः घ्रातवान् त्राणः त्राणवान् त्रातः त्रातवान् समुन्नः समुन्नवान् समुत्तः समुत्तवान् नुन्नः नुन्नवान्  नुत्तः नुत्तवान् वित्तः वित्तवान् । विनत्तीति निर्देशात् विद्यतेर्विन्दतेश्च नित्यं नकारो भवति। विन्नः विन्नवान् । ह्री इत्यस्याप्राप्तेऽन्येषां तु प्राप्ते विकल्पः।

## प्रस्त्यो मः।

प्रपूर्वात् स्त्यायतेः परस्य निष्ठातकारस्य मकारादेशो वा भवति। प्रस्तीमः प्रस्तीमवान् प्रस्तीतः प्रस्तीतवान् मत्वाभावपक्षे यण् संयोगादेरातः इत्यस्यासिद्धत्वात् पूर्वमेव सम्प्रसारणं कृते तस्मिन् निमित्तस्याभावान्नत्वं न भवति।

## क्षायो नित्यम्।

क्षायतेः परस्य निष्ठातकारस्य नित्यं मकारादेशो भवति। क्षामः क्षामवान्।

## शुषः कः।

शुषेः परस्य निष्ठातकारस्य ककारादेशो भवति। शुष्कः शुष्कवान्।

## पचो वः।

पचेर्धातोः परस्य निष्ठातकारस्य वकारादेशो भवति। पक्वः पक्ववान्।

## फलेरनुपसर्गाल्लः।

'ञिफलाविशारण' इत्यस्मादनुपसर्गात् परस्य निष्ठातकारस्य लकारादेशो भवति। फुल्लः फुल्लवान्। लत्वस्यासिद्धत्वात् 'तवेति च' इत्यत उत्वम्। अनुपसर्गादिति किम्। प्रफुल्तः प्रफुल्तवान्। त इत्येव फलनिष्पत्तावित्यस्येडाव्यवधानान्न भवति। फलितः फलितवान्।

**समुद्ध्यां च।**

समुद्ध्यामुपसृष्टात् फलेः परस्य निष्ठातकारस्य लकारादेशो भवति। सम्फुल्लः सम्फुल्लवान् उत्फुल्लः उत्फुल्लवान् चकारोनूपसर्गादित्यस्योत्तरत्रानुवर्तनार्थः।

**क्षीबकृशपरिकृशोल्लाघः।**

क्षीबादयः शब्दाः क्तप्रत्ययान्ता निपात्यन्ते न चेदुपसर्गात् परे भवन्ति। क्षीबृ मदे कृश तनूकरणे परिपूर्वश्च लाघृ सामर्थ्ये' उत्पूर्वः एभ्यः परस्य क्तप्रत्ययतकारस्य लोपः इडभावश्च निपात्यते' इति 'क्षीबकृशपरिकृशोल्लाघः' इत्यस्य अर्थः हृदयहारिण्यामुक्तः। 'क्षीबः', 'परिकृशः', 'कृशः' 'उल्लाघः' अनुपसर्गादित्येव प्रक्षीबितः प्रकृशितः संपरिकृशितः प्रोल्लाघितः।

**न पृमूर्च्छिमदिख्याध्यादेवत्राभ्यः।**

पृप्रभृतिभ्यः परस्य निष्ठातकारस्य नकारादेशो न भवति। पूर्तः पूर्तवान् मूर्तः मूर्तवान् मत्तः मत्तवान् । एभ्यो रदाभ्याम् इति प्राप्ते देवत्रातः अस्माद् ह्रीघ इत्यादिना विकल्पे प्राप्ते प्रतिषेधः क्तवतोरसामर्थ्यादेव देवत्राशब्देन सम्बन्धो न भवति।

**वित्तो धनप्रतीतयोः।**

वित्त इति विन्दतेः क्तान्तस्य धने प्रतीते चार्थे नत्वाभावो निपात्यते। 'विद्यते लभ्यत इति वित्तं धनं विद्यते उपलभ्यतेऽसाविति वित्तः प्रतीतः प्रसिद्धः इति यावत्। धनप्रतीतयोरिति किम्। विन्नः।

**भित्तम् शकलम्।**

भित्तमिति भिदेः परस्य क्तप्रत्ययतकारस्य शकलेऽभिधेये नत्वाभावो निपात्यते। भित्तं शाकलमित्यर्थः। शकलमिति किम्। भिन्नम्।

**झलां जशोऽन्ते।**

पदस्येति वर्तते पदस्यान्ते वर्तमानानां झलां स्थाने जशादेशो भवति। त्रिष्टुबत्र मधुलिडत्र क्षुदत्र वागत्र सुपिवलि तदित्यतिदेशात्। श्रीष्ठात् त्रिष्टुब्भ्यां मधुलिड्भ्यामित्यादि। अन्त इति किम्। त्रिष्टुभौ त्रिष्टुभः।

**क्विन् दृशोः कुः।**

क्विन्नन्तस्य दृशेः च कवर्गादेशो भवति। घृतस्पृक् प्राक् देवद्यङ् ऋत्विक् दिक् स्रक् अन्यादृक् तादृक् दृशेः पश्यति दर्शनं वा दृक्। क्विबन्तात्वन्तत्वात् पृथगुपादानं तद्वदतिदेशात् घृतस्पृग्भ्यां पदान्त इत्येव। घृतस्पृशौ घृतस्पृशः।

**नशेर्वा।**

नशेः पदान्ते कवर्गादेशो वा न भवति। जीवनक् जीवनट् जीवनग्भ्यां जीवनड्भ्याम्।

**मोनौ म्वोश्च।**

दादेर्धातोर्घः इत्येतो धातोरिति वर्तते धातोः सम्बन्धिनो मकारस्य पदान्ते म्वोश्च परतो नकारादेशो भवति। प्रशान् प्रतान् तद्वदतिदेशात् प्रशान्भ्यां प्रतान्भ्याम्। नत्वस्यासिद्धत्वान्नलोपाभावः। म्वोः खल्वपि जङ्गन्मिव। जङ्गन्वः। जङ्गन्मः। जगन्वान्। म्वोश्चेति किम्। प्रतामौ प्रतामः। धातोरिति किम्। इदं किम्।

**ससजुषो रुः।**

सकारान्तस्य पदस्य सजुष् इत्येतस्य चालोऽन्त्यस्य रुरित्ययमादेशो भवति। अग्निरत्र वायुरत्र सजूर्देवैः सजूर्ऋषिभिः सहपूर्वस्य जुषेः क्विपि 'सहस्य सो बहुव्रीहौ' इति सभावे रूपमेतत्। उकारो 'हशि च' अतोरोरिति विशेषणार्थः।

**अह्नः।**

अहन् इत्येतस्य पदस्यालोन्त्यस्य रुरित्ययमादेशो भवति। दीर्घा हा निदाघः हे दीर्घाहोऽत्र तद्वदतिदेशात् अहोभ्याम् अहस्सु।

**लुक्यरेफे रः।**

अहन् इत्येतस्य पदस्य लुकि सति अरेफआदौ पदे परतो सरेफोऽन्तादेशो भवति। रोरपवादः। अहरधीते अहरेति। लुकीति किम्। हे दीर्घाहोऽत्र। अरेफ इति किम्। अरुरूपम्। अहोरात्रम्।

**प्रचेतसो राजनि वा।**

प्रचेतस् इत्येतस्य पदस्य राजन् शब्दे परतो रेफोऽन्तादेशो वा भवति। प्रचेता राजन् प्रचेतो राजन्।

**अहर्गिरादीनां पत्यादिषु।**

अहरादीनां दानं पत्यादिषु परतो रेफोऽन्तादेशो वा भवति। अहर्पतिः अहःपतिः गीर्पतिः गीष्पतिः धूर्पतिः धूःपतिः। आदिग्रहणाद्यथादर्शनमन्येषामन्येष्वपि च भवति। रेफस्य रेफवचनं विसर्जनीयबाधनार्थम्।

**उषर्बुधः।**

उषसीत्यस्य बुधशब्दे कप्रत्ययान्ते परतोऽलोन्त्यस्य रुत्वबाधनार्थं रेफो निपात्यते। उषसि बुध्यते उषर्बुधोऽग्निः।

**स्रन्सुध्वन्स्वनडुहां दः।**

स्रन्सु ध्वन्सु अनडुह् इत्येतेषां पदस्यान्ते दकारादेशो भवति। उरवास्रत् पर्णध्वत् बह्वनडुत् कुलम्। सुपिवलि तद्वदतिदेशात् उखास्रुद्भ्यां पर्णध्वद्भ्याम् अनडुद्भ्याम् अनड्वान्। हे अनड्वन्निति नुंविधानसामर्थ्याद्दत्वं न भवति। पदस्येत्येत्वे उखास्रसौ पर्णध्वसौ अनड्वाहौ।

**वसोः सः।**

वस्वन्तस्य सकारान्तस्य पदस्य दकारोऽन्तादेशो भवति। विद्वत् कुलं विद्वद्भ्यां विद्वत्ता पपिवत्कुलम् पपिवद्भ्याम् पपिवत्ता। स इति किम्। विद्वान्। हे विद्वन् । उदारः किम्। वदतीति औः क्विपि संप्रसारणत्वे रत्वे दीर्घत्वे च रूपम्। चर्मवस्ते चर्मवः। पदस्येत्येव विद्वांसः।

**तिपि।**

तिपि परतः सकारान्तस्य पदस्य दकारोऽन्तादेशो भवति। रुत्वस्यापवादः। अचकाद् भवान् अन्वशाद् भवान्। स इत्येव। अहन्। पदस्येत्येव। चकास्ति। शास्ति।

**सिपि वा।**

सिपि परतः चकारान्तस्य पदस्य दकारोऽन्तादेशो भवति। अचकात्वम् अचकास्त्वम् अन्वशात्वम् अन्वशात्त्वम्। पदस्येत्येव शास्सि चकास्सि।

**दोरुः।**

सिपि परतो दकारान्तस्य रुरन्तादेशो वा भवति। अभिनत्त्वम् अभिनस्त्वम्। पदस्येत्येव। भिनत्सि।

**धातोर्वोरनचीको दीर्घः।**

धातोर्यौ रेफवकारौ तयोः परतोरिको दीर्घो भवति न चेत् तावच्परौ भवतः। गीः धूः आशीः समूः शीष्म धूष्म अ◌ास्तीणम् प्रस्तीर्णम् चिकीर्षति वुवूर्षति दीव्यति सीव्यति प्रतिदीव्ना। धातोरिति किम्। सर्पिः। अन्धुः। कुकरः। धातोरित्यनुवर्तमाने पुनर्धातुग्रहणं सुब्धातुनिवृत्यर्थम्। कुकुरमिच्छति। कुकुरीयति। चतुर्यति। दीव्यति। र्वोरिति किम्। मधुलिट्। अनचीति किम्। विकिरति। गिरौ लुवौ। इक इति किम्। अविभः। अजागः।

**नाभ्यासकुरच्छुराम्।**

अभ्यासस्य कुरर्छुरोश्च सम्बन्धिन इकोर्वोः परतो दीर्घो न भवति पूर्वेण प्राप्ते प्रतिषेधे। किधः रिर्यतुः रिर्युः संवियुः संविव्यतुः व्युः कुर्यात् कुर्युः छुर्यात् छुर्युः विकरणाकारनिर्देशः किम्। करशब्दये कुर्यात् क्रियते।

## यि तद्धिते।

यकारादौ तद्धिते परतोर्वोरिको दीर्घो न भवति। धुरं वहति धुर्यः धुरि साधुर्धुर्यः। वकारान्तो धातुरिगुपधस्तद्धिते न सम्भवति। यीति किम्। गीवन्। पूर्वं तद्धित इति। हरिमिच्छति हीर्यति। धूर्यति। इह कस्मान्न भवति। पुर्यां कियोः गिर्योः बहिरङ्गदेशस्य यणादेशस्यासिद्धत्वात् अजेवायमिति।

## अदसोऽत्वे दादुदोमः।

अदसस्त्यदाद्यत्वे सति दात्परस्य वर्णस्योवर्णादेशो दकारस्य च मकारो भवति। अमुं अमू अमून्। भाव्यमानेनाप्यादेशेन वर्णानां ग्रहणमित्येकमात्रिकस्य स्थाने मात्रिकः द्विमात्रिकस्य द्विमात्रक उकारो भवति। अत्व इति किम्। अदः। दादिति किम्। अमुयाम् अमुयोः। अलोऽन्त्यस्य न भवति।

## अद्रौ वा।

अदसोद्र्यादेशे सति दात्परस्य वर्णस्योत्वं दस्य मत्वं च वा भवति। द्वौ यत्र दकारौ तत्र विकल्पे सति चानुतप्यं भवति। अदमु यङ् अमुङ् अमु मुयङ् अदद्र्यङ्। तदाह

परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः।

उभयोः केचिदिच्छन्ति केचिदिच्छन्ति नोभयोः।।

## एत ईद् बहुवचने।

बहुत्वे वर्तमानस्यादसो दात्परस्यैकारस्य ईदादेशः दस्य च मकारो भवति। अमी अमीभिः अमीभ्यः अमीषाम् अमीषु। एत इति किम्। अमूः कन्याः। बहुत्व इति किम्। अमू कन्ये। अमू कुले। दादित्येव। अमुके अमुकेभ्यः।

## वाक्यटेः प्लुतः।

वाक्यस्य यष्टिस्तस्य प्लुतो भवतीत्येतदापादपरिसमाप्तेः अधिकृतं वेदितव्यम्। वाक्यग्रहणमनन्त्यस्य प्लुतनिवृत्यर्थम्। टिग्रहणं हलन्त्यस्यापि टेरचः प्लुतो यथा स्यात् इतरथा ह्यचा वाक्ये विशिष्यमाणेऽजन्तस्यैव प्लुतः स्यात्। देवदत्त इति। इदं प्लुतचिह्नमित्यवगन्तव्यम्। न तु अग्निचिद् इति।

## दूराद्धूते।

दूराह्वाने यद्वाक्यं वर्तते तस्य टेः प्लुतो भवति। रस्य यद्यप्यपेक्षाभेदात् अनवस्थितं तथापि हूतापेक्षं

तदाश्रीयते। यत्र प्राकृताद् प्रयत्नात् प्रयत्नविशेष आश्रीयमाणे शब्दः श्रूयते। तत् दूरम्। आगच्छ भो माणव देवदत्त! आगच्छ भो माणव! माणव कपिलकेत्याहूतग्रहणं सम्बोधनमात्रोपलक्षणार्थम्। तेनेहापि भवति। सक्तून् पिब देवदत्त इति। दूरादिति किम्। गच्छ देवदत्त। दूराह्वाने वाक्यस्य चान्ते यत्र सम्बोधनं पदं भवति तत्रायं प्लुत इष्यते। तेनेह न भवति। देवदत्ताः आगच्छ।

**है हेप्रयोगे हैहयोः।**

हैहेप्रयोगे दूराद्धूते यद्वाक्यं वर्तते तत्रानन्त्ययोरपि हैहयोरेव प्लुतो भवति । है देवदत्त आगच्छ। आगच्छ है देवदत्त। आगच्छ हे देवदत्त। आगच्छ देवदत्त हे। दूराद्धूते इत्येव। है देवदत्त। हे देवदत्त।

**गुरोरेकैकस्यानृतो वा।**

ऋकारवर्जितस्य गुरोरेकैकस्य दूराद्धूते सम्बोधनपदे वर्तमानस्य प्लुतो वा भवति। आगच्छ देवदत्त। देवदत्त यथाप्राप्तश्च भवति। आगच्छ देवदत्त। आगच्छ भो क्लृत्यशिख। आगच्छ भो क्लृप्तशित्य। अनृत इति किम्। आगच्छ भोः कृष्णमित्यत्र आगच्छ भोः कृष्णमित्र। तवेति किम्। आगच्छ भोः मृत्यषभ। दूराद्धूत इत्येव। आगच्छ भो देवदत्त। एकैकग्रहणं पर्यायार्थम्। वावचनं सर्वत्र प्लुतविकल्पार्थम्।

**अस्त्रीशूद्रप्रत्यभिवादे नामगोत्रयोः।**

यदभिवाद्यमानो गुरुः कुशलानुयोगेनाशिषा वा युक्तं वाक्यं प्रयुङ्क्ते स प्रत्यभिवादः तस्मिन्नस्त्रीशूद्रविषये नाम्नो गोत्रस्य च सम्बन्धिनो वाक्यस्य टेः प्लुतो भवति। अभिवादये देवदत्तोऽहं, भो आयुष्मानेधि देवदत्तत्य। अभिवादये गार्ग्योऽहं, भो आयुष्मानेधि गार्गत्य। स्त्रीशूद्रपर्युदासः किम्। अभिवादये गार्ग्यहं, भो आयुष्मती भव गार्गी। अभिवादये तुषजकोऽहं, भोः कुशल्यसि तुषजक। असूयकेऽपि केचिद् प्रतिबन्धं कुर्वन्ति असूयकत्वेन निर्ज्ञाते प्रत्यभिवाद एव नास्ति। कुतः प्लुतः।

**भो राजन्यविशां वा।**

भो इत्येतस्य राजन्यवाचिनां वैश्यवाचिनां च प्रत्यभिवादवाक्यस्यान्ते प्रत्यभिवाद्यमानानां टेः प्लुतो वा भवति इति। अभिवादये देवदत्तोऽहं भोः। आयुष्मानेधि देवदत्त भोः देवदत्त भोः। अभिवादये इन्द्रमहिं भोः। आयुष्मानेधि इन्द्रवर्मन्। इन्द्रवर्मन् अभिवादये। इन्द्रपालितोऽहं भोः। आयुष्मानेधि इन्द्रपालित इन्द्रपालित।

**पृष्टप्रतिवचने हेः।**

पृष्टप्रतिवचने यद्वाक्यं वर्तते तत्सम्बन्धिनो हेः प्लुतो वा भवति। अकार्षीः कटं देवदत्त। अकार्षं हि अकार्षं हि। अलावीः केदारं देवदत्त। अलाविषं हि अलाविषं हि। पृष्टप्रतिवचन इति किम्। अकार्षीः

कटं देवदत्त हि। हेरिति किम्। अकार्षीः कटं देवदत्त। करोमि ननु।

## निगृह्यानुयोगे।

स्वमतात् प्रच्यावनं निग्रहः। अनुयोगस्तथाविष्करणम् उपालम्भ इति यावत्। तत्र यद्वाक्यं वर्तते तस्य टेः प्लुतो वा भवति। अद्य श्राद्धमित्यात्थ। अद्यामावास्येत्यात्थ। अमावास्येत्यात्थ। अद्यामावास्येत्यात्थ। अद्य श्राद्धमद्यामावास्येति वादी युक्त्या स्वतः प्रच्याव्यैवमुपालभ्यते।

## भर्त्सनेऽङ्गयुक्तं तिङाकांक्षम्।

अङ्गशब्देन युक्तं यत् तिङन्तं साकांक्षं तस्य भर्त्सनेन गम्यमाने टेः प्लुतो वा भवति। अङ्गकूजत्य इदानीं ज्ञास्यसि जाल्म। अङ्गकूज! इदानिं ज्ञास्यसि जाल्म। अङ्गव्याहर! इदानिं ज्ञास्यसि जाल्म। अङ्गव्याहरत्य अङ्ग व्यावहर ज्ञास्यसि जाल्म। भर्त्सन इति किम्। अङ्गाधीष्व ओदनं ते दास्यामि। तिङीति किम्। अङ्ग देवदत्त मिथ्या वदसि। आकांक्षमिति किम्। अङ्ग पच नैतद्परमाकांक्षति।

## द्विस्त्रिरुक्तं पर्यायेण।

भर्त्सने यत् कृताद्विर्वचनं तस्य पर्यायेण प्लुतो वा भवति। पूर्वस्य वा उत्तरस्य वा न वा कस्यचिदित्यर्थः। चौरत्य चौर। चौर चौर चौर। चौर चौर घातयिष्यामि। त्वा बन्धयिष्यामि त्वा।

## सम्मत्यसूयाकोपकुत्सनेषु पूर्वम्।

सम्मतावसूयायां कोपे कुत्सने च यद् द्विरुक्तं तस्य यत्पूर्वं शब्दरूपं तस्य टेः प्लुतो वा भवति। असूयायां-माणवक माणवक। अभिरूपक अभिरूपक शोभनः खल्वसि। अविनीतक रिक्तं अ◌ाभिरूप्यम्। कोपे-माणवक माणवक अविनीतक अविनीतक! इदानिं ज्ञास्यसि जाल्म। कुत्सने- शाक्तीक त्य शाक्तीक याष्टीक त्य याष्टीक रिक्ता च शक्तिः। वा वचनाद् पक्षे न भवति माणवक माणवक अभिरूपक अभिरूपक शोभनः खल्वसि वाक्यादेरामन्त्रितस्यासूयासम्मति कोपकुत्सनभर्त्सनेष्विति पूर्वत्रेह च द्विर्वचनम्।

## विचारे।

विचारणं नानावगमनविचारः। अनेकरूपप्रतिभासः सम्प्रय इति यावत् तस्मिन् विषये संशय्यमानयोर्यत् पूर्वं तस्य प्लुतो वा भवति। प्लुताभावपक्षे-अहिर्नु पुरुषो नु लोष्ठो नु त्य कपोतो नु प्लुतपक्षे अहिर्रुत्य रज्जुर्नु स्थाणुर्नुत्य इत्यादि भवति।

## प्रतिश्रुतौ।

प्रतिश्रुतौ च यद्वाक्यं वर्तते तस्य टेः प्लुतो वा भवति श्रवणाभिमुख्यमभ्युपगमः। प्रतिज्ञानं च

प्रतिश्रुतिः। श्रवणाभिमुख्ये- भो देवदत्त किमात्थत्य किमात्थ। अभ्युपगमे- गां मे देहि भोः। एष ते ददामि त्य। एष ते ददामि। प्रतिज्ञाने- नित्यः शब्दो भवितुमर्हति त्य नित्यः शब्दो भवितुमर्हति।

## अभिपूजिते।

अभिपूजितविषयं यद्वाक्यं तस्य टेः प्लुतो वा भवति। शोभनः खल्वसि माणवक त्य। शोभनः खल्वसि माणवक।

## चिदित्युपमार्थे प्रयुज्यमाने।

चिदित्यस्मिन्नुपमार्थे प्रयुज्यमाने वावयवस्य टेः प्लुतो वा भवति। अग्निचिद्भाया त्य अग्निचिद्भायात्। राजचिद् ब्रूया त्य राजचिद् ब्रूया। अग्निरिवराजेवेत्यर्थः। उपमार्थ इति किम्। कथंचिदाहुः। कृच्छ्रेणाहुरित्यर्थः। प्रयुज्यमान इति किम्। अग्निर्माणवको भायात्।

## क्षियाशीः प्रैषेषु तिङाकांक्षम्।

क्षिया आचारभेदः आशीः प्रार्थनाविशेषः प्रैषः असत्कारपूर्विका पारणाक्षियादिषु गम्यमानेषु साकांक्षं यत् तिङन्तं तिङन्तान्तरमाकांक्षति तस्य टेः प्लुतो वा भवति। स्वयं ह रथेन याति त्य। उपाध्यायं पदातिं गमयति। स्वं ह रथेन याति। उपाध्यायं पदातिं गमयति। स्वयं होदनं भुङ्के। उपाध्यायं सक्तून् पाययति। आशिषि- पुत्रांश्च लप्सीष्ठाः त्य धनं च तात। पुत्राश्च लप्सीष्ठाः धनं च तात। प्रैषे- कटं च कुरु त्य ग्रामं च गच्छ। कटं च कुरु ग्रामं च गच्छ। तिङीति किम्। भवता खलु कटः कर्तव्यः ग्रामश्च गन्तव्यः। आकांक्षमिति किम्। दीर्घं त आयुरस्तु। अग्नीदग्नीद्यन्विहर।

## अनन्त्यस्यापि प्रश्नाख्यानयोः।

प्रश्ने आख्याने च गम्यमाने अनन्त्यस्य पदस्य अपि शब्दादन्त्यस्यापि टेः प्लुतो वा भवति। प्रश्ने अगमः त्य पूर्वात्यन् ग्रामात्यन्। अगमः पूर्वान् ग्रामान् देवदत्त। अगमं त्य पूर्वा त्यन् ग्रामात्यन् भोग्यः। अगमं पूर्वान् ग्रामान् भोः। प्रश्नाख्यानयोरिति किम्। देवदत्त ग्रामं गच्छ। अनन्त्यस्यापीति किम्। वाक्यटेरेव माभूदिति।

## प्लुतावै च इदुतौ।

दूराद्धूत इत्येवमादिभिर्विहितस्य प्लुतस्यैचः प्लुतप्रसंगे तदवयवादिदुतौ प्लवेते। ऐत्यतिकायनः औत्यपगवः अत्र यदि इवर्णोवर्णयोरवर्णस्य च समप्रविभागस्तदा इदुतौ द्विमात्रावनेन क्रियेते। प्लुताविति हि क्रियानिमित्तोऽयं व्यपदेशः। इदुतौ प्लवेते वृद्धिं गच्छत इत्यर्थः। तावती च सा प्लुतिर्भवति। यावत्या च तावेचौ त्रिमात्रौ सम्पद्येते। यदात्वर्धमात्रावर्णस्य अध्यर्धमात्रा इवर्णोवर्णयोस्तदा तावर्धतृतीयमात्रौ क्रियेते। महाभाष्यकारस्त्वत्रविषये चतुर्मात्रं प्लुतमिच्छति तत् कथं समप्रविभागपक्षे इदुतोरनेन त्रिमात्रः प्लुतो विधीयते।

**एचोऽप्रगृह्यस्य प्रश्नान्ताभइपूजितं विचारप्रत्यभिवादेष्वादिदुत्परः पदान्ते।**

प्रश्नान्तादिषु विषयेष्वेचः प्रगृह्यवर्जितस्य पदान्ते वर्तमानस्यार्धस्य स्थाने अकारः प्लुतः इदुत्पर आदेशो भवति स चान्तरतम्यात् एकारैकारयोरिकारपरः ओकारौकारयोरुकारपरो भवति। प्रश्नान्ते अगम त्य। पूर्वाण्य ग्रामा त्य अग्निभूतात्य इ पटा त्य उ।

**तयो र्य्वा वचि संहितायाम्।**

तयोः प्लुतपरयोरिदुतोः स्थानेऽचिपरतः संहितायां विषये यथासंख्यं यकारवकारावादेशौ भवतः। अग्नायि पटावुदकम्। अग्नाण्य यत्र। पटाव इकोयणचि( )इति सिद्धे पुनर्वचनं सवर्णदीर्घत्वस्य सवर्णह्रस्वत्वस्य च बाधनार्थम्। अचीति किम्। अग्नाण्य इ। पटाण्य उ। संहितायामिति किम्। अग्ना इ इन्द्रम्। पटाण्य उ उदकम्। अग्नाय इ संहितायामिति बाधिताः। अध्यायपरिसमाप्तेर्यदित ऊर्ध्वमनुक्रमिष्यामः। संहितायामित्येवं तद्वेदितव्यमिति।

इति श्री दण्डनाथनारायणभट्टसमुद्धृतायां सरस्वतीकण्ठाभरणस्य व्याकरणस्य वृत्तौ हृदयहारिण्यां सप्तमस्याध्यायस्य तृतीयपादः।

.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-.-

**(अथ चतुर्थः पादः।)**

**समः सुटि सः।**

समित्येतस्य पदस्य सुटि परतः संहितायां विषये सकार अन्तादेशो भवति। सकारात् पूर्वस्य तु वर्णस्य पक्षे अनुनासिकादेशः। पक्षान्तरेऽनुस्वारागमः परो विधास्यते। संस्कर्ता संस्कर्तुं संस्कर्तुम्। सम इति किम्। संस्कृतिः।

**पुमोऽख्याञि खय्यम्परे ।**

पुमित्येतस्य पदस्य ख्याञोऽन्यस्मिन् खयि अम्परे परतः संहितायां विषये सकारोऽन्तादेशो भवति। अनुनासिकानुस्वारौ च पूर्वस्य भवतः। पुंका पुँस्का पुंस्कामा पुँस्फलं पुंस्फलम्। पुँश्चली पुंश्चली। अख्याञीति किम्। पुंख्यातम्। खयीति किम्। पुङ्गवः। अम्पर इति किम्। पुंक्षीरम्।

**नश्छव्यप्रशानः ।**

नकारान्तस्य पदस्य प्रशान् वर्जितस्य छव्यव्परे परतः सकार अन्तादेशो भवति। पूर्वस्य त्वनुनासिकानुस्वरौ भवतः। भवाँश्छादयन्ति भवांश्छादयति भवाँष्ठकारेण। भवांष्ठकारेण भवाँस्थुटति भवांस्थुटति भवाँश्चिनोति भवांश्चिनोति भवाँष्टीकते भवांष्टीकते भवाँस्तरति भवांस्तरति। छवीति किम्।

भवान् करोति। अप्रशान इति किम्। प्रशान्तरति। अम्पर इत्येव। भवान् त्सरुकः। पदस्येत्येव। भवन्तः संहितायामित्येव। भवान् छादयति।

**कानः कानि।**

कानित्येतस्य कानित्येतस्मिन्नेव परतः सकार अन्तादेशो भवति। पूर्वस्य त्वनुस्वारानुनासिकौ विधास्येते। काँस्कान् कांस्कान् । कानीति किम्। कान् यःश्यति।

**नॄनः पेरो वा ।**

नॄनित्येतस्य पदस्य पकारे परतः संहितायां रोफादेशो भवति। रेफपक्षे त्वनुनासिकानुस्वारौ भवतः। नॄँः पाहि नॄंः पाहि नॄन् पाहि । प इति किम्। नॄन् भोजयति। सग्रहणेऽनुवर्तमाने रेफवचनं ज्ञापकं पूर्वत्र रुत्वाभावस्य।

**अत्रानुनासिकः पूर्वस्य।**

अत्रानुक्रान्ते प्रकरणे आदेशात् पूर्वस्य वर्णस्य अनुनासिक आदेशो वा भवति। तथा चैवोदाहृतम्।

**अन्यत्रास्मात्परोऽनुस्वारः।**

यस्मिन् पक्षेऽनुनासिको विहितस्तस्मादन्यत्र पक्षे अस्मात्पूर्वस्मात् परोऽनुस्वार आगमो भवति। तथा चैवोदाहृतम्।

**हलि मः।**

मकारान्तस्य पदस्य हलि परतः संहितायां विषये अनुस्वारोऽन्तादेशो भवति। कुण्डं हसति। वनं याति। हलीति किम्। कुण्डमत्र। संहितायामित्यधिकारात्। पदपाठे न भवति। कुण्डं सहितपदस्येत्ये**व। यम्**यते।

**नश्चापदान्तस्य झलि।**

नकारस्य मकारस्य चापदान्तस्य झलि परतोऽनुस्वार आदेशो भवति। पयांसि वयांसि सर्पींषि धनूंषी मस्य पुंसि गम्यते। अपदान्तस्येति किम्। भवान् भोक्ता। झलीति किम्। अगम्यते।

**राजि समो मः क्वौ ।**

क्विप्रत्यये परे राजतौ परतः समो मकारस्य मकार आदेशो भवति। अनुस्वारस्यापवादः। सम्राट् सम्राजौ। राजीति किम्। संसत्। सम इति किम्। किंराट्। क्वाविति किम्। संराजिता।

## हेमनयवलपरतो वा ।

हकारे मकारादिपरे परतः पदान्तस्य स्थाने ते मकारादय आदेशाः यथासंख्यं वा भवन्ति। किम्ह्मलयति। किं ह्मलयति। किन् ह्नुते। किं ह्नुते। कियँह्यः। किं ह्यः। किवँ ह्वलयति। किं ह्वलयति। किलँ ह्लादयति। किं ह्लदयति। ह इति किम्। किं ज्वलयति। मादिपरत इति किम्। किं हसति।

## ङ्णोः कुक्टुकौ शरि ।

ङकारान्तस्य णकारान्तस्य च पदस्य संहितायां विषये शरि परतो यथासंख्यं कुक् ट्क् इत्येतावागमौ वा भवतः। प्राक्च्छेते। प्राङ् शेते। अत्र पूर्वान्तकरणात् झयः पदान्तादिति छत्वं भवति। प्राक् कृङे, प्राङ् क्षण्डे, प्राङ् क्षष्ठः, प्राङ् षष्ठः, प्राङ्क् साये, प्राङ् साये, सात् पदाद्योरिति षत्वप्रतिषेधो भवति। सुगुण्ट्छेते, सुगुण् शेते, वणट्षण्डे, वण्षण्डे, सुगण्ट्साधुः, सुगण्साधुः। 'न पदान्ताट्टोरनाम्नवतिनगरीणाम् ' इति ष्टुत्वं न भवति। ङ्णोरिति किम्। भवान् शेते। भवान् षण्डः। शरीति किम्। प्राङ्करोति। सुगण्चरति।

## सः डसोऽच्युतो धुट्।

सडकारान्तात् पदात् परस्याश्च्युतेः सम्बन्धिनः सकारस्य वा धुडागमो भवति। श्वलिट्त्साये। श्वलिट् साये। परादिकरणात् 'न पदान्ताट्टोरनाम्नवतिनगरीणाम् ' इति ष्टुत्वं न भवति। स इति किम्। मधुलिड्षण्डे। अश्च्युत इति किम्। अट्श्च्योतति। षट्श्च्योतति।

## नश्च।

नकारान्ताद् पदात् परस्य सकारस्याख्युतोश्च्युतेः धुडागमो वा भवति। भवान्त्साये भवान्साये। अश्च्युत इत्येव। भवान् श्च्योतति। पृथग्योगकरणमुत्तरार्थम्।

## शि तुक्।

नकारान्तस्य पदस्य शकारे परतस्तुगागमो वा भवति। भवान्च्छेते भवान् शेते। पूर्वान्तकरणं छत्वार्थम्। कुर्वन् च्छेत इत्यत्र बहिरङ्गलक्षणस्य तुकोऽसिद्धत्वात् पदान्तस्येति षत्वप्रतिषेधो भवति।

## मय उञो वोऽचि ।

मयः परस्य उञो निपातस्य स्थानेऽचि परतो वकारादेशो वा भवति। किम्वावपनम्। किमु आवपनम्। वत्वस्यासिद्धत्वात् हलिमः इत्यनुस्वारो न भवति। कुङ्वान्ते क्रुङ् , अन्ते जानु उ अस्य रुजति। जान्वस्य राजति। जानू अस्य रुजति। मय इति किम्। गीरुच्चरति। अचीति किम्। किमु पचति।

## ङमो ह्रस्वाद् द्वे ।

ह्रस्वात्परस्य पदान्ते वर्तमानस्य ङमः स्थानेऽचि परतः संहितायां विषये द्वे भवतः। क्रुङ्ङास्ते,

सुगण्णास्ते, पचन्नास्ते। कृपुतेहीत्यत्र बहिरङ्गलक्षणस्य द्विर्वचनस्यासिद्धत्वात् णत्वं न भवति। ङम इति किम्। त्वमत्र दृषदास्ते। ह्रस्वादिति किम्। प्राङास्ते। अचीत्येव। प्रत्यङ् सिञ्चति। पदस्येत्येव। वृत्रहणे।

**ढो ढे लोपोऽपदादौ ।**

ढकारस्यापदादौ ढकारे परतो लोपो भवति। लीढं, मीढं, गूढम्। अपदादाविति किम्। श्वलिड्ढौकते। यद्यैव लिढादौ ढलोपनिमित्तस्य ष्टुत्वस्याश्रयात् ढलोपस्य पूर्वत्रासिद्धत्वं न भवति। तथात्र ढलोपस्यापि जश्त्वे पूर्वत्रासिद्धत्वं न स्यादित्यपदादावित्युच्यते।

**रो रि ।**

पदसम्बन्धिनो रेफस्य रेफे परतो लोपो भवति। अग्नीरथेन पटूराजा नीरुक्तम् पुनारक्तं वासः। पदस्येत्यत्र विशेषणषष्ठी इति। तेन तदन्तविधावप्यदान्तस्यापि रेफस्य लोपो भवति। अजर्घाः अपास्या।

**विरामे विसर्जनीयः ।**

विरतिर्विरामः, तत्र विषये रेफान्तस्य पदस्य विसर्जनीयोऽन्तादेशो भवति। वृक्षः पुनः गीः धूः। विराम इति किम्। गिरः गिरः।

**खरि ।**

खरि परतो रेफान्तस्य पदस्य विसर्जनीयोऽन्तादेशो भवति। कः खनति। पुरुषः पचति। कः करोति। कः फलति। कः शेते। कः षण्डः। कः साधुः। पदान्तस्येत्येव। मूर्ख इति। नार्पत्यः तवर्कारः इत्यत्रासिद्धं बहिरङ्गमन्तरङ्ग इति वृद्धिगुणाश्रयस्य रेफस्यासिद्धत्वात् विसर्जनीयो न भवति।

**शर्परे।**

शर्परे खरि परतः पदान्तस्य रेफस्य विसर्जनीय एव भवति।। कुप्वोः कः पाविति च न भवति। पुरुषः त्सरुकः। वासः क्षौमम्। अद्भिः प्सातम्।

**ख्याञि।**

ख्याञि परतः पदान्तरेफस्य विसर्जनीय एव भवति। कः ख्यातः। नमः ख्यात्रे।

**रोः सुपि ।**

रोरेव सम्बन्धिनो रेफस्य सुपि परतो विसर्जनीयादेशो भवति। पयःसु, सर्पिः, आशिःषु। रोरीति किम्। गीर्षु धूर्षु। पकारः किम्। गीः। धूः।

## अवर्णभोभगो अघोपूर्वस्य लोपो हशि।

अवर्ण भोभगो अघो इत्येवं पूर्वस्य रोर्हशि परतो लोपो भवति। ब्राह्मणा हसन्ति, ब्राह्मणा वसन्ति, ब्राह्मणा यजन्ति। अकारात् पूर्वत्रासिद्धत्वेन हशि चातोरोरित्युत्वं भवति। भो हससि। अघो हससि। भो भगो अघो इत्येते आमन्त्रणार्थाः सकारान्ता निपाताः। केचित् तु भगवदघ सम्बोधने सो परतो नकारस्य रुत्वं कुर्वन्ति। तेषां द्विर्वचनबहुवचनयोः स्त्रियां च न भवति। भो ब्राह्मणौ। भो ब्राह्मणाः। भो ब्राह्मणीति। हशीति किम्। कुमाराः खेलन्ति। वृक्षाः फलन्ति।

## उञि।

उञि निपाते परतो अवर्णभोभगो अघोपूर्वस्य रोर्लोपो भवति। स उगतः। भगो उ एहि। अघो उ एहि। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणादिह नित्यं लोपो न भवति। वास उतम्। वासयुतम्।

## अचीषत्सृष्टतरो यश्च।

अवर्ण भो भगो अघो इत्येवं पूर्वस्य रोरचि परतः ईषत्स्पृष्टतरो यकारश्च शब्दात् लोपश्च भवति। क इह। कयिह। ब्राह्मणा अत्र। ब्राह्मणायत्र। भो अत्र। भोयत्र। भगो इह। भगोयिह। अघो उत्तिष्ठ। अघयुत्तिष्ठ।

## आदीषत्सृष्टश्च।

अवर्णात्परस्य रोः स्थाने अचि परत ईषत्स्पृष्टो यकारश्च शब्दात् ईषत्स्पृष्टतरलोपौ च भवतः कयास्ते कयास्ते क आस्ते। ब्राह्मणायिह ब्राह्मणायिह ब्राह्मणा इह। अदिति वचनं भो भगो अघो इत्येतेषां निवृत्यर्थम्।

## व्योश्च ते।

अवर्णात्परौ यौ वकारयकारौ तदन्तस्याचिपरस्तेः ईषत्स्पृष्टेषत्स्पृष्टतरलोपा अन्तादेशा भवन्ति। पटविह पटविह पट इह। असाविन्द्रः असाविन्द्रः असा इन्द्रः। तयिह तयिह त इह। तस्मायासनं तस्मायासनं तस्मा आसनम्। उञि तु पूर्वत्रासिद्धत्वात् लोप एव भवति। द्वा उ सुगतौ। अस्मा उ देहि। तेग्रयणं कार्यत्रयस्य प्रतिपत्यर्थम्। अनन्तर एवेषत्स्पृष्टो मा भूदिति। पदस्येत्येव। लावकः। नावकः।

## छविः सः।

छवि परतः पदान्तरेफस्य स्थाने विसर्जनीयापवादः सकारो भवति। कश्छादयति पुनश्छिनत्ति कष्ठकारेण कस्थुटति कश्चिनोति कष्टीकते कस्तनोति। छवीति किम्। करवुर्याति। पुनर्याचते।

**वा शरि।**

शरि परतः पदान्तस्य रेफस्य सकारोऽन्तादेशो वा भवति। कः शेते कश्शेते। कः षण्डः कष्षण्डः। कः साधुः कस्साधुः।

**खर्परे लोपः।**

खर्परे शरि परतः पदान्तस्य रोफस्य लोपो वा भवति। चक्षुश्च्योतति। चक्षुः श्च्योतति। चक्षुश् श्च्योतति। कष्ठीवति। कः ष्ठीवति। कष्ठीवति। चक्षुस्पन्दते'। चक्षुः स्पन्दते। चक्षुस्स्पन्दते।

**कुप्वोः≍कः≍पौ खरि ।**

कवर्गे पवर्गे च परतः खरि परतः पदान्तस्य रेफस्य स्थाने यथासंख्यं जिह्वामूलूयोपध्मानीयावादेशौ वा भवतः। कः करोति। वृक्षः फलति। कुप्वोरिति किम्। वृक्षः शेते। खरीति किम्। भानुर्गच्छति। क≍पाविति ककारपकारावुच्चारणार्थौ जिह्वामूलीयोपध्मानीयावेव त्वादेशौ।

**पाशप्कल्पप्केष्वनव्ययस्य सः।**

अनव्ययस्य रेफस्य पाशप् कल्पप्केषु प्रत्ययेषु पवर्गकवकवर्गादिषु परतः सकारादेशो वा भवति। पयःपाशं पयस्पाशम्। पयः कल्पं पयस्कल्पम्। पयः कं पयस्कम्। अनव्ययस्येति किम्। स्वः पाशम्। प्रातः कल्पम्।

**रोः काम्यचि।**

अनव्ययसम्बन्धिनो रेफस्य रोरेव काम्यचि प्रत्यये परतः सकारादेशो भवति। पयस्काम्यति। यशस्काम्यति। रोरिति किम्। वाः काम्यति। काम्यचीति किम्। यशः कामयते। अनव्ययस्येत्येव। अधः काम्यति।

**तेष्विणः षः।**

इण उत्तरस्य तेषु तेषु रेफस्य पाशप्कल्पककाम्येषु परतः षकारादेषशो भवति। सर्पिष्पाशम्। यजुष्पाशम्। सर्पिष्कल्पम्। ययजुष्कल्पम्। सर्पिष्कम्। यजुष्कम्। सर्पिष्काम्यति। यजुष्काम्यति। तेष्विति किम्। सर्पिः करोति। यजुः करोति। रोः काम्यचीत्येव। गीः काम्यति। धूः काम्यति। इत उत्तरं स इति इण इति च द्वयमप्यनुवर्तते। तद्यथायोगमभिसम्बन्धं यास्यति।

**निर्दुराविश्चतुष्पादुर्बहिषाम्।**

निरादीनां सम्बन्धिनो रेफस्य कुप्वोः परतः षकारादेशो भवति। पक्षान्तरे तु यथाप्राप्तो जिह्वामूलीयो उपध्मानीयो विसर्जनीयश्चेति। द्विष्करोति द्विःकरोति द्विः करोति। चतुष्पचति चतुःपचति चतुःपचति। सुजन्तस्य -निष्कृतं, निष्पीतं, दुष्कृतं, दुष्पीतम् आविष्कृतं चतुष्कपालम् चतुष्पात्रं प्रादुष्कृतं बहिष्पीतं दुष्पुण्यरुष इत्यादौ परे प्लुतस्य बहिरङ्गत्वेनासिद्धत्वात् षत्वं भवति।

**सुचो वा ।**

सुजन्तानां सम्बन्धिनो रेफस्य कुप्वोः परतः षकारादेशो भवति पक्षान्तरे तु यथाप्राप्तौ जिह्वामूलीयोपध्मानीयौ विसर्जनीयश्चेति। दण्डनाथेनोक्तः। द्विष्करोति द्विःकरोति द्विः करोति। चतुष्पचति चतुःपचति चतुःपचति। सुजन्तस्य चतुरोऽपवादनेन विकल्पः। न पूर्वेण नित्यो विधिरिति। कुप्वोरित्येव। खरीत्येव। द्विर्गच्छति।

**इसुसोर्व्यपेक्षायाम् ।**

इसन्तस्योसन्तस्य च यो रेफस्तस्य कवर्गे पवर्गे च परतो व्यपेक्षाायां सामर्थ्ये षकारादेशो वा भवति। सर्पिष्करोति। सर्पिः करोति। सर्पिष्पिबति। सर्पिः पिबति। धनुष्खण्डयति। धनुः खण्डयति। यजुष्फलति। यजुः फलति। इसुसोरिति किम्। पयःकरोति। पयःपचति। इसुसोः प्रत्यययोर्ग्रहणात् अग्निष्करोति। मुहुः पचति। मुहुरित्यव्युत्पन्नमव्ययम्। इसा साहचर्यादुसोरौणादिकस्य ग्रहणं तेनेह भवति। चक्षुः कुलानि। ध्युः पापानि। व्यपेक्षायामिति किम्। तिष्ठतु सर्पिः पिबत्वमुदकम्। एकार्थीभावे च न भवति। परमसर्पिः कुण्डम्।

**नाक्रियैकाधिकरणे।**

इसन्तस्य उसन्तस्य च यो रेफस्तस्य क्रियापदवर्जितसमानाधिकरणपदस्थे कवर्गे च खरि परतो व्यपेक्षायां षकारादेशो न भवति। पूर्वेण प्राप्ते प्रतिषेधः। सर्पिः कपालम्। यजुः पोतकम्। क्रियाप्रतिषेधः किम्। सर्पिः क्रियते सर्पिष्क्रियते। धनुः प्राप्तं धनुष्प्राप्तम्। मकाधिकरण इति किम्। सर्पिष्कुम्भे। धनुष्पुरुषस्य।

**नित्यं समासेऽनुत्तरपदस्थस्य।**

इसन्तस्योसन्तस्य च रेफस्यानुत्तरपदस्थस्य समासे खरि कवर्गे पवर्गे च परतो नित्यं षकारादेशो भवति। सर्पिष्कुम्भः। सर्पिष्पानम्। धनुष्खण्डम्। यजुष्पवम्। समास इति किम्। तिष्ठतु सर्पि पिबत्वमुदकम्। अनुत्तरपदस्थस्येति किम्। परमसर्पिः कुण्डम्। एतदेवानुत्तरपदस्थस्येति वचनं ज्ञापकम्। इसुसोः प्रत्ययग्रहणे यस्माद् स विहितस्तदादेरित्ययं नियमो न भवति। नेनेसुसोर्व्यपेक्षायामिति। परमसर्पिः करोति परमसर्पिष्करोति। इत्यधिकस्य विकल्पो भवति। इह च बहुसर्पिष्कुण्डम्। बहुसर्पिष्पात्रम्। बहुच् प्रत्ययान्तेऽपि भवति।

**अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य।**

अकाराद् परस्यानव्ययस्य सम्बन्धिनो रेफस्यानुत्तरपदस्थस्य कृकम्यादिस्थे कवर्गे पवर्गे च परतः सकारादेशो भवति। तौ चेन्निमित्तनिमित्तिनावेकस्मिन् समासे भवतः। अत्र सषोर्द्वयोरप्यधिकारे रेफात् पूर्वस्येणोऽभावात्। सकार एव सम्बध्यते। अयस्कृतम्। अयस्कारः। अयस्कामः। अयस्कंसः। अयस्कुम्भः। पयस्पात्रम्। लिङ्गविशिष्टस्यापि ग्रहणात् पयस्कुम्भी पयस्पात्री अयस्कुशा अयस्कर्णी। अत इति किम्। गीः कारः। धूः कारः। तपरः किम्। भाः करणम्। वाः पात्रम्। कृकम्यादिष्विति किम्। अयः कालः। पयःपानम्। अनव्ययस्येति किम्। स्वः कारः। समास इत्येव। अयः करोति। अनुत्तरपदस्थस्येति किम्। परमपयः कासः। समास इत्यधिकारात्। कृकम्याद्य एवोत्तरपदभूता गृह्यन्ते। तेनेह न भवति। अयसः कुम्भकपालम् अयस्कुम्भकपालमिति। अत्र हि कुम्भकपालमित्युत्तरपदं न कुम्भ इति। यदा त्वेवं समासः अयसः कुम्भो अयस्कुम्भः। तस्य कपालं तदा भवत्येवायस्कुम्भकपालमिति। कृकम्योस्तु केवलयोरुत्तरपदत्वं न सम्भवति। धातुप्रत्ययान्तयोर्ग्रहणम्। कमिग्रहणात्कामयतेर्न भवति। पयः कामयते पयस्कामा। कमेस्त्वणि पयस्कामीति भवति। कथं पयस्कामा पयसि कामोऽस्या इति बहुव्रीहिणा भविष्यति।

**अधः शिरसोः पदे।**

अधस् शिरस् इत्येतयोः सम्बन्धिनो रेफस्य समासेऽनुत्तरपदस्थस्य पदशब्दे परतः सकारादेशो भवति। अधस्पदम्। अव्ययं प्रवृद्ध्यादिभिरिति समासः। शिरस्पदम्। पद इति किम्। शिरस्कम्। समास इत्येव। अधःपदम्। अनुत्तरपदस्थस्येत्येव। परमशिरःपदम्।

**नमस्पुरसोर्गत्योः।**

नमस् पुरसित्येतयोर्गतिसंज्ञकयोः सम्बन्धिनो रेफस्य खरि कवर्गे पवर्गे च परतः सकारादेशो भवति। नमस्कृत्य नमस्करोति पुरस्कृत्य पुरस्करोति गत्योरिति किम्। नमःकृत्वा तिस्रः पुरः करोति।

**तिरसो वा ।**

गतिसंज्ञकस्य तिरसः सम्बन्धिनो रेफस्य कुप्वोः परतः सकारादेशो वा भवति। तिरस्कृत्य। तिरः कृत्य तिरस्करोति। तिरः करोति। गतेरित्येव तिरःकृत्वा काष्ठंगतः।

**कस्ककौतस्कुतशुनस्कर्णसद्यस्कालसाद्यस्कभास्कराहस्करायस्करायस्कान्तायस्कुण्डतमस्काण्डमेतस्पिण्डभ्रातुष्पुत्रादयः।**

कस्कादयः शब्दाः कुप्वोः परतो रेफस्य यथायोगं कृतसत्वषत्वाः साधवो भवन्ति। कस्कः। वीप्सायां द्विर्वचनम्। कुतः कुत आगतः कौतस्कुतः। शुनस्कर्णः। आक्रोशे षष्ठ्या अलुक्। सद्यस् कालोऽस्य सद्यस्कालः। सद्यः क्रयणमस्य सद्यस्क्रीतः। तत्र भवः साद्यस्क्रः। भास्करः। अहस्करः। अयस्कारः।

अयस्कुण्डम्। तमस्काण्डम्। मेदस्पिण्डम्। भ्रातुष्पुत्रः विद्यायोनिसम्बन्धिनस्तस्मिन्निति षष्ठ्या अलुक्। अत्रेण उत्तरत्वाद्रेफस्य षकारः पूर्वेषु तु सकारो भवति। आदिग्रहणाद्यथादर्शनमन्येऽपि भवन्ति।

**सर्पिष्कुण्डिकाधनुष्कपालबहिष्पूलयजुष्पात्रेषूत्तरपदस्थस्यापि।**

सर्पिष्कुण्डिकादिषु कुप्वोः परतो रेफस्य कृत्वषत्वस्योत्तरपदस्थस्यापि षकारादेशो भवति। सर्पिष्कुण्डिका। परमसर्पिष्कुण्डिका। धनुष्कपालः। परमधनुष्कपालम्। बहिष्पूलः। परमबहिष्पूलः। यजुष्पात्रम् । परमयजुष्पात्रम्। 'नित्यं समासेऽनुत्तरपदस्थस्य' इति सिद्धे उत्तरपदस्यार्थं वचनम्।

**इण्कुभ्यामपदान्तस्यादेशप्रत्ययस्य सष्पः।**

इणः कवर्गाच्च परे य आदेशः सकारः प्रत्ययस्य चावयवोऽपदान्तस्य तस्य षकार आदेशो भवति । सिषेद्धा। एष चिचीषति चिकीषति गीर्षु धूर्षु वाक्षु त्वक्षु। इयक्षति जिघृक्षति। इण्कुभ्यामिति किम्। दास्यति। अपदान्तस्येति किम्। अग्निस्तत्र। आदेशप्रत्ययस्येति किम्। सिसृक्षति। स इति किम्। कुरुत। आदेशस्येति सकारसमानाधिकरणस्थानषष्ठी। आदेशस्य सकारस्येति। तेनेह न भवति। बिसंबिसम्। प्रत्ययस्येत्यवयवषष्ठी। प्रत्ययस्यावयवो यः सकार इति। अधिकारश्चाायमिण्कुभ्यामपदान्तस्य सष्पः इत्यधिक्रियते। 'सदिष्वज्ज्योः परस्य लिटी'ति वाच्यम्।

**नुम्विसर्जनीयशर्व्यवायेऽपि।**

नुमा विसर्जनीयेन शरा च व्यवधानेऽपि इणः कवर्गाच्च पदान्तस्यादेशस्य प्रत्ययसम्बन्धिनश्च सकारस्य षकारादेशो भवति। सर्पींषी धनूंषी हविःषु हविष्षु यजुः षु यजुष्षु। प्रत्येकं वाक्यपरिसमाप्तेरनेकेन नुमादिना व्यवाये न भवति। निरस्सेति। क्विपि सुपि निस्फु अयमधिकारंस्तावत्येवानुवर्तते।

**शासिवसिघसीनां च।**

शास्यादीनां सम्बन्धिनः सकारस्येणः  कवर्गाश्च परस्य षकार आदेशो भवति। शिष्टः शिष्कः अशिषत् अशिषताम् उषितः जक्षतुः जक्षिवान्। अनादेशार्थं वचनम्। तुमादिन्यव्यये नुमादिना व्यवायेऽपीत्येव। बह्वाशीषि। ब्राह्मणकुलानि। नगराणि। इण्कुभ्यामित्येव। शास्ति। वसति।

**स्तौतिणीनामेवास्विदिस्वदिसहीनां षण्यभ्यासात्।**

स्तौतेर्ण्यन्तानां च स्विदिस्वदिसहिवर्जितानां सम्बन्धिनः सकारस्याभअयासादिण उत्तरस्य(सष)भूते परतः षकारादेशो भवति। नान्येषाम्। तुष्टूपति सिषेवयिषति सुष्वापयिषति। स्विदादिपर्युदासः किम्। सिस्वेदयिषति। सिस्वादयिषति। सिसाहयिषति। आदेशत्वाद् सकारस्य पूर्वेणैव सिद्धे नियमार्थं वचनम्। तेनेह न भवति। सुसूषति। सुसूषते। सिसिक्षति। सिसिक्षते। एवकारो विपरीतनियमनिवृत्यर्थः। षण्येव। स्तौतिणीनामिति नियमो मा भूत्। तेनेहापि भवति। तुषाव।

असीषिचत्। षणीति किम्। सिषेव। सुष्वाप। षत्वं किम्। सुषुप्सति। तिष्ठासति। नकारः किम्। व्यतिसुषुपिष इन्द्रम्। अभ्यासादिति किम्। अभ्यासाद्या प्राप्तिस्तस्या नियमो यथा स्यात्। धातोर्या प्राप्तिस्तस्यामाभूत्। प्रतीषिषति। अधीषिषति। सना अभ्यासस्यविशेषणादिह नियमो न भवति।

**उपसर्गात् सुनोति सुवति स्यतिस्तौतिस्तौभतीनाम्।**

उपसर्गस्थादिणः परस्य सुनोत्यादिसम्बन्धिनः सकारस्य षकारादेशो भवति। अभिषुणोति। नुंविसर्जनीय शर्व्यवायेऽपीत्यधिकारात् निपुणो विकरणनिर्देशात् सौति सवत्योर्न भवति। अभिसौति। अभिसवति। अतिसूवति। अभिषुवति। विकरणनिर्देशात् अभिसूते। अभिसूयते। अभिष्यति। अभिष्टौति। अभिष्टोभते। ण्यन्तानामपि अभिषावयति। परिषावयति। उपसर्गादिति किम्। दधि सुनोति।

**स्थासेनिसेधसिचसञ्जां च।**

उपसर्गस्थादिणः परस्य स्थादिसम्बन्धिनः सकारस्य षकारादेशो भवति। अधिष्ठास्यति। अभिषेणयति। प्रतिषेधति। शपा निर्देशात् सिध्यतेर्नभवति। अभिसिध्यति। अभिषिञ्चति। अभिषजति। परिष्वजते। उपसर्गस्थादित्येव। वृक्षं वृक्षं परिसिञ्चति। ण्यन्तानामपि। अभिष्यन्दयति। परिष्वापयति। प्रतिषेधयति।

**सदेरप्रतेः।**

प्रतिवर्जितादुपसर्गात् परस्य सदेर्धातोः सकारस्य षकारो भवति। निषीदति। विषादयति। अप्रतेरिति प्रतिसीदति।

**स्तम्भेः।**

उपसर्गादिण उत्तरस्य स्तम्भेः सकारस्य षकारो भवति। विष्टभ्नाति। प्रतिष्टभ्नाति। इण्कुभ्यामित्येव। संस्तभ्नाति।

**अवादौर्जित्यालम्बनाविदूर्येषु।**

अवादुपसर्गादुत्तरस्य स्तम्भेः सकारस्यौर्जित्यालम्बनाविदूर्येषु गम्यमानेषु षकारो भवति। और्जित्यं बलवत्ता अहो वृषलस्यावष्टम्भः। अवष्टब्धो रिपुः शूलेन। अ ालम्बनमाश्रयणम्। दुर्गमवष्टभ्नाति। अविदूरमविप्रकृष्टम्। तस्य भाव आविदूर्यम्। अवष्टब्धा शरत्। एतेष्विति किम्। अवस्तब्धो वृषलः। शीतेन पीडित इत्यर्थः। अनृपान्तानिणन्तार्थे आरम्भः।

## वेश्च स्वनो भोजने।

वि इत्येतस्मादवाच्चोपसर्गात् परस्य भोजनेऽर्थे वर्तमानस्य स्वनतेः सकारस्य षकारो भवति। विष्णवति। अवष्वणति। स शब्दं भुङ्क्त इत्यर्थः। भोजन इति किम्। विस्वनति। अवस्वनति मृदङ्गः।

## परिनिविभ्यः सेवसिवुसहसुटाम्।

परिनिविभ्यः परेषां सेवादीनां धातूनां सुटश्च सकारस्य षकारो भवति। परिषेवते। निषेवते। परिषीव्यति। निषीव्यति। विषीव्यति। परिषहते। निषहते। विषहते। परिष्करोति। परिनिविभ्य इति किम्। अनुसेवते।

## स्तुस्वञ्जिसिवादीनां वाङ्व्यवाये।

स्तौतिस्वञ्ज्योः सिवादीनां च सकारस्य परिनिविभ्यः परस्याडागमेन व्यवधाने षकारो वा भवति। पर्यष्टौत् पर्यस्तौत्। न्यष्टौत् न्यस्तौत् । व्यष्टौत् व्यस्तौत्। पर्यष्वजत पर्यस्वजत। न्यष्वजत न्यस्वजत। व्यष्वजत व्यस्वजत। पर्यषीव्यत् पर्यसीव्यत्। न्यषीव्यत् न्यसीव्यत्। व्यषीव्यत् व्यसीव्यत्। पर्यषहत पर्यसहत। न्यषहत न्यसहत। व्यषहत व्यसहत। पर्यष्करोत् पर्यस्करोत्। इत्यादि। परिनिविभ्य इत्येव। अन्वसीव्यत्। प्रत्यस्करत्। स्तुष्वाञ्ज्योरुपसर्गान्तरादुत्तरसूत्रेणाड्व्यवाये नित्यमेव षत्वं भवति। अभ्यष्टौत्। अभ्यष्वजत।

## नित्यं सुनोत्यादीनामासेवात्।

उपसर्गात्सुनोत्यादिभिर्योगैः। परिनिविभ्यः सेवैति यावत् यत् षत्वं यथास्वमुक्तं तदड्व्यवायेऽपि भवति। अभ्यषुणोत्। पर्यषुवत्। पर्यष्यत्। अभ्यष्टौत्। अभ्यस्तोभवत्। अध्यष्ठात्। अभ्यषेणयत्। प्रत्यषेधयत्। अभ्यषिञ्चत्। अभ्यषजत्। प्रत्यष्वजत। न्यषीदत् । व्यष्टभ्नात्। अवाष्वणत्। पर्यषेवत। नित्यग्रहणं विकल्पनिवृत्त्यर्थम्। आसेवादिति। वचनात्। उत्तरेण पूर्वेण विकल्प एव भवति।

## स्थादीनामभ्यासेनाभ्यासस्य च।

यथा स्वमुपसर्गात् परस्य स्थादीनां सकारस्याड्व्यवधाने अभ्यासस्य व्यवधाने अभ्याससम्बन्धिनश्च षकारो भवति। अधितष्ठौ। अभिषिषेणयिषति। प्रतिषिषेधिषति। षणि नियममपि बाधते। अभिषिषिक्षति। अभिषिड्क्षति। निषत्सति। विषाषद्यते। निषिषेवे आड्व्यवाय इत्येव। अध्यतिष्ठासत्। अभ्यसिषेणयिषत्। इणः अभ्यासेन व्यवाये यथोपदेशार्थं वचनम्। अवर्णान्ताभ्यासार्थं षणि नियमबाधनार्थं च अभ्यासस्येति तु वचनं नियमार्थम्। स्थादीनामेवाभ्याससकारस्य षकारो भवति। नान्येषाम्। अभिसुसूषति। अभिसिषासति।

**परिनिविभ्यः सयसितयोः।**

परिनिविभ्यः उपसर्गेभ्यः परयोः सयसितयोः सकारस्य षकारादेशो भवति। परिषयः। निषयः। विषयः। परिषितः। निषितः। विषितः। सय इति सिनोतिरजन्तः।

**निरभ्यनुभ्यश्च स्यन्दतेरप्राणिषु वा ।**

निरादिभ्यः पर्यादिभ्यश्चोपसर्गेभ्यः परस्याप्राणिकर्तृकेर्थे वर्तमानस्य स्यन्देः सकारस्य षकारादेशो वा भवति। निःष्यन्दते तैलम् निःस्यन्दते तैलम्। अभिष्यन्दते अभिस्यन्दते। अनुष्यन्दते अनुस्यन्दते। तिपा निर्देशात् यङ्लुकिति न भवति। अभिसास्यन्दीति। एतेभ्यः इति किम्। अतिस्यन्दते तैलम्। अप्राणिष्विति किम्। परिस्यन्दते। मत्स्य उदके पर्युदासो न प्रसज्यप्रतिषेधः। तेन च प्राणी चाप्राणी च कर्ता भवति। तत्राप्राण्याश्रयो विकल्पो भवति। न तु प्राण्याश्रयः प्रतिषेधः। अनुष्यन्दते मत्स्य उदक इति।

**वेःस्कन्देरनिष्ठायाम्।**

वेरुपसर्गात्परस्य स्कन्देः सकारस्य निष्ठायामन्यस्मिन् प्रत्यये परतः षकारादेशो वा भवति। विष्कन्ता विस्कन्ता विस्कन्तुम्। अनिष्ठायामिति किम्। विस्कन्न विस्कन्नवान्।

**परिस्कन्दः प्राच्येषु।**

प्राच्यविषये प्रयोगे परेरुत्तरस्य स्कन्देरच्प्रत्ययान्तस्य षत्वाभावो निपात्यते। परिस्कन्दतीति परिस्कन्दः। प्राच्येष्विति किम्। परिष्कन्दः। परिस्कन्दः।

**स्फुरस्फुलोर्निर्निविभ्यः।**

(अस्य, अनन्तरसूत्रस्य च वृत्युदाहरणानि मातृकायां न दृश्यन्ते।)

**समासेऽङ्गुलिभीरुभ्यां सङ्गस्थानयोः।**

अङ्गुलिभीरुशब्दाभ्यामुत्तरयोर्यथासंख्यं सङ्गस्थानयोः सकारस्य समासे षकारो भवति। अङ्गुलीनां सङ्गः अङ्गुलिषङ्गः। भीरूनां स्थानं भीरुष्ठानम्। समास इति किम्। अङ्गुलेः सङ्गः। भीरोः स्थानम्।

**अग्नेः स्तुतः।**

अग्निशब्दात् स्तुतः सकारस्य समासे षकारादेशो भवति। अग्निष्टुत्।

**दीर्घात् सोमस्य।**

अग्नीषोमौ अग्नेः सोमवरुणयोः इति ककारः। अग्निसोमौ माणवकौ।

## ज्योतिरायुर्भ्यां च स्तोमस्य।

ज्योतिरायुश्शब्दाभ्यां चकारादग्नेश्च परस्य स्तोमसम्बन्धिनः सकारस्य समासे षकारादेशो भवति। ज्योतिष्टोमः। आयुष्टोमः। अग्निष्टोमः। समास इत्येव। ज्योतिषः स्तोमो भवति।

## मातृपितृभ्यां स्वसुः।

मातृपितृभ्यामुत्तरस्य स्वसुः सकारस्य समासे षकारादेशो भवति। मातृष्वसा। पितृष्वसा। समास इत्येव। मातुः स्वसा। पितुः स्वसा।

## मातुः पितृभ्यां वा।

मातुर् पितुर् शब्दाभ्यां परस्य स्वसृ शब्दसकारस्य समासे षकारादेशो वा भवति। मातुःष्वसा मातुःस्वसा। पितुःष्वसा पितुःस्वसा। स्वः स्वपत्योर्वा इति षष्ठ्या अलुक्। समास इत्येव। मातुः स्वसा। पितुः स्वसा।

## अभिनिष्टानो वर्णे।

अभिनिसित्येतस्मात् परस्य स्तानशब्दसम्बन्धिनः सकारवर्णेऽभिधेये षकारो भवति। अभिनिष्टानो वर्णः। विसर्जनीय उच्यते। वर्ण इति किम्। अभिनिष्टानो मृदङ्गस्य।

## प्रादुरुपसर्गेभ्योऽस्तेर्यच् परस्य।

प्रादुश्शब्दादुपसर्गेभ्यश्च परस्यास्तेः सकारस्य यकारादावजादौ च प्रत्यये परतः षकारादेशो भवति। प्रादुःष्यात्। अभिष्यात् । प्रादुष्षन्ति। अभिषन्ति। प्रादुरुपसर्गेभ्य इति किम्। दधिस्यात्। दधीनि सन्ति। यचीति किम्। प्रादुरस्तः। अस्तेरिति किम्। विसृतम्।

## सुविनिर्दुर्भ्यः समसूत्योः।

स्वादिभ्य उपसर्गेभ्यः परयोः समसूतिशब्दयोः सकारस्य षकारो भवति। सुषमं विषमं निःषमं दुःषमं सुषूतिः विषूतिः दुःषूतिः समसूत्योः प्रातिपदिकयोर्ग्रहणात् धातोर्न भवति। सुसमति। सुसूतमिति।

## स्वपेरपः।

सुविनिर्दुर्भ्यः उपसर्गेभ्यः परस्य स्वपेः सकारस्य षकारादेशो भवति। सुषुप्तः विषुप्तः निःषुप्तः दुष्षुप्तः। एवं सुषुप्वत अत इति किम्। सुषुप्तः।

## नद्याः स्नस्य कौशले।

नदीशब्दात् परस्य स्नशब्दसकारस्य षकारादेशो भवति। नद्यां स्नाति। नदीष्णः प्रतारणे कुशल इत्यर्थः।

कौशल इति किम्। नदीस्नः यः स्रोतसा ह्रियते।

**नेः स्नातस्य च ।**

नेरुपसर्गात्परस्य स्नातशब्दस्य च सकारस्य कौशले गम्यमाने षकारादेशो भवति। निष्णातः कटकरणे कुशल इत्यर्थः। नीति निष्कस्य वचस्तस्य न मन्यसे कौशले इत्येव निस्नातः।

**प्रतेः सूत्रे।**

प्रतेरुपसर्गात्परस्य स्नातशब्दसम्बन्धिनः सकारस्य सूत्रेऽभिधेये षकारादेशो भवति। प्रतिष्णातं सूत्रं शुद्धमित्यर्थः। सूत्र इति किम्। प्रतिस्नातमन्यत्।

**प्रष्ठोऽग्रगामिनि।**

प्रस्थस्य कप्रत्ययान्तस्य सकारस्याग्रगामिन्यभिधेये षत्वं निपात्यते। प्रतिष्ठत इति प्रष्ठः। अग्रगामी प्रस्थोऽन्यः।

**वृक्षासनयोर्विष्टरः।**

वेरुपसर्गात्परस्य स्तरशब्दस्य सकारस्य वृक्षे आसने चाभिधेये षत्वं निपात्यते। विष्टरो वृक्षः। विष्टर आसनम्। वृक्षासनयोरिति किम्। वाक्यविस्तरः।

**छन्दो नाम्नि विष्टारः।**

वेरुपसर्गात्परस्य छन्दोनामावयवस्य स्तारशब्दस्य षकारादेशो निपात्यते। विष्टारपङ्क्तिः छन्दः विष्टारो बृहतीछन्दः। छन्दोनाम्नीति किम्। विस्तारः पटस्य।

**गवियुधिभ्यां स्थिरस्य।**

आभ्यां परस्य स्थिरशब्दसकारस्य नाम्नि विषये षकारादेशो भवति। गविष्ठिरः। युधिष्ठिरः। हलन्तात्संज्ञायां(     )इत्यलुक्। नाम्नीत्येव। गविस्थिरः।

**कपेः स्थलस्य गोत्रे।**

कपिशब्दात्परस्य स्थलशब्दसकारस्य गोत्रविषये षकारादेशो भवति। कपिष्ठलो नाम गोत्रस्य प्रवर्तको यस्य कपिष्ठलः पुत्रः। गोत्रमिह लौकिकं गृह्यते न पौत्रादि। लोके चाद्यपुरुषाये असत्यसन्ततेः प्रवर्तयितारो यन्नाम्ना अपत्यसन्ततिर्व्यपदिश्यते। तेऽभिधीयन्ते। गोत्र इति किम्। कपीनां स्थलम्। कापिस्थलम्।

**विकुशमिपरिभ्यः।**

व्यादिभ्यः परस्य स्थलशब्दसकारस्य षकारादेशो भवति। विगतं वीनां पक्षिणां वा स्थलं विष्ठलम्। कुत्सितं कोः पृथिव्याः वा स्थलं कुष्ठलम्। शमीनां स्थलं शमिष्ठलम्। ङ्यापोः संज्ञायां बहुलम् इति ह्रस्वः। ह्रस्वोच्चारणसामर्थ्यात् दीर्घान्न भवति। शमीस्थलं परिस्थलम्। प्रादिसमासः। एभ्यः इति किम्। भूमिस्थलम्।

**अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिबर्हिरग्निपरमेदिविभ्यस्थस्य।**

अम्बादिभ्यः परस्य स्थशब्दसकारस्य षकारादेशो भवति। अम्बष्ठः आम्बष्ठः गोष्ठः भूमिष्ठः सव्येष्ठः अपष्ठः द्विष्ठः त्रिष्ठः कुष्ठः शङ्कुष्ठः अंगुष्ठः मञ्जिष्ठः पुञ्जिष्ठः बर्हिष्ठः अग्निष्ठः परमेष्ठः दिविष्ठः। नेवेन्विसिद्धसस्थैष्विति प्रतिषेधेऽपि बहुलवचात्सप्तम्या अलुक्।

**अपदुस्सुवनिभ्यः स्थोः ।**

अपादिभ्यः परस्य स्थुशब्दसम्बन्धिनः सकारस्य षकारादेशो भवति। अपष्ठु दुष्ठु सुष्ठु वनिष्ठु। अपदुस्सुवनिभ्यः स्थ इति औणादिकः कुप्रत्ययः।

**सव्येष्टृपरमेष्ठिनौ सूतब्रह्मणोः।**

एतौ शब्दौ यथासंख्यं सूतब्रह्मणोरभिधेययोः कृतषत्वौ निपात्यते। सन्येष्ठा सूतः सव्येस्थ इति **क्तन्** प्रत्ययः। परमेष्ठी ब्रह्मा। परमेस्थः कित् इति इनिप्रत्ययः। सप्तम्यन्तात् तत्पुरुषे कृति बहुलम् इति सप्तम्या अलुक्।

**एत्यकोः संज्ञायाम् ।**

अचेर्गान्निमित्तादुत्तरस्य एकारे परतः संज्ञायां विषये षकारादेशो भवति। हरिषेणः मानषेणः। एतीति किम्। वैरसिंहः। अकोरिति किम्। विष्वक्सेनः। संज्ञायामिति किम्। पृथुसेनो राजा। इण इत्येव। महासेनः।

**नक्षत्रादितो वा।**

नक्षत्रवाचिन इकारान्तात् परस्य सकारस्य एकारे परतः संज्ञायां विषये सकारादेशो वा भवति। रोहिणिषेणः रोहिणिसेनः। रेवतिषेणः रेवतिसेनः। 'ङ्यापोः संज्ञायां बहुलम् ' इति ह्रस्वः। इत इति किम्। पुनर्वसुषेणः।

**त्वतल्तस्त्यप्तयेष्वदीर्घात्।**

त्वादिप्रत्ययेषु परतः अदीर्घादिण उत्तरस्य सकारस्य षकारादेशो भवति। सर्पिष्टं यजुष्टं सर्पिष्टा यजुष्टा

सर्पिष्टो यजुष्टः आविष्ट्यः निष्ट्यः। प्लुतादपि भवति। सर्पिष्ट्वम्। त्वादिष्विति किम्। सर्पिस्साद्भवति। यजुस्सात् स्यात्। अदीर्घादिति किम्। गीस्त्वम्। पुंस्त्वम्। इण इत्येव। ज्यायस्त्वम्। वयस्ता।

**तरप्तमपोरतिङः।**

अदीर्घादिणः परस्य तिङ सम्बन्धिनः सकारस्य तरप्तमपोः परतः षकारादेशो भवति। सर्पिष्टरं सर्पिष्टमं यजुष्टरं यजुष्टमम्। प्लुताद् खल्वपि सर्पिण्यष्टरम्। यजुण्यष्टमम्। अतिङ इति किम्। चक्रुस्तरां भिन्द्युस्तमम्। अदीर्घादिति किम्। गीस्तरा गीस्तमा। उच्चैस्तमाम् इण इत्येव। तेजस्तरं तेजस्तमम्।

**निसस्तितपतावनासेवायाम्।**

निसः सम्बन्धिनः सकारस्य तकारादौ तपतौ परतोऽनासेवायां विषये षकारादेशो भवति। पुनः पुनः करणमासेवा। निष्टपति सुवर्णम्। सकृदग्निं स्पर्शयतीत्यर्थः। अनासेवायामिति किम्। निस्तपति सुवर्णं सुवर्णकारः। पुनः पुनस्तपतीत्यर्थः। निष्टप्तं रक्षो निष्टप्ता अरातयः इत्यत्र तु सकृदप्यासेवनं न विवक्ष्यते। छान्दसो वा वर्णविकारः। तीति किम्। निरतपत्।

**सुदुनिर्भ्यः सामसेधसन्धेः।**

सुदुर्निरित्येतेभ्यः परस्य सामादिसम्बन्धिनः सकारस्य षकारादेशो भवति। समाहारेणेतरेषां निर्देशाद्यथासंख्यं न भवति। सुषाम दुष्षाम निष्षाम सुषेधः दुष्षेधः सुषन्धिः निःषन्धिः।

**नौषेधिकागौरिषक्थप्रतिष्णिकादुन्दुभिषेवणतुराषाडादयः।**

नौषेधिकादयः शब्दाः कृतषत्वाः साधवो भवन्ति। नैषेधिका गौरिक्थः प्रतिष्णिका दुन्दुभिषेवणं तुराषाट् आदिशब्दात् जलाषाट् ऋताषाडादयो भवन्ति।

**न सात्पदाद्योः।**

सात्प्रत्ययसम्बन्धिनः पदादेश्च सकारस्य षकारादेशो न भवति। अग्निसात्सम्पद्यते दधि सिञ्चति दधिसेक्। दधिसेचौ। ईषदसमाप्तः सेक् बहुसेक् बहुसेचौ अन्तवर्तिन्या विभक्त्या सेक्च्छब्दस्य पदत्वात् सकारस्य पदादित्वम्।

**सिचो यङि।**

सिञ्चतेः सकारस्य यङि प्रत्यये परतः षकारो न भवति। से सिच्यते। अभिसेसिच्यते। उपसर्गादिति या प्राप्तिः सा पदादिलक्षणमेव प्रतिषेधं बाधते। न सिचो यङीति। यङीति किम्। अभिषिषिक्षति। ङकारः किम्। अभिषिच्यते।

## सेधतेर्गतौ।

गतौ वर्तमानस्य सेधतेः सकारस्य षकारो न भवति। अभिसेधति। अभिगच्छतीत्यर्थः। अभिसेधयति गमयतीत्यर्थः। अभिसिसेधिषति। अभिजिगमिषतीत्यर्थः। गताविति किम्। प्रतिषेधत्यकार्याद्वारयतीत्यर्थः।

## निप्रतिभ्यां स्तब्धस्य।

निप्रतिभ्यां परस्य स्तब्धसम्बन्धिनः सकारस्य षकारो न भवति। निस्तब्धः प्रतिस्तब्धः। स्तम्भेरिति प्राप्ते प्रतिषेधः। निप्रतिभ्यामिति किम्। विष्टब्धः। अवष्टब्धः।

## सहेरोद्वतः।

ओकारवतः सहेः सम्बन्धिनः सकारस्य षकारो न भवति। परिसोढः परिसोढव्यं विसोढः विसोढव्यः। ओद्वत इति किम्। परिषहते। परिषाहितव्यम्।

## उपसर्गात् स्तम्भुसिवुसहां चङि।

उपसर्गास्थान्निमित्तादुत्तरस्य स्तम्भुसिवुसहां सकारस्य षत्वं चङि प्रत्यये परतो न भवति। अभ्यतस्तम्भत् पर्यसीषिवत् पर्यसीषहत्। उपसर्गादिति वचनादभ्यासाद्या प्राप्तिस्तस्याः प्रतिषेधो न भवति।

## सुनोतेः स्यसनोः।

सुनोतेः सकारस्य स्ये सनि च प्रत्यये परतः षकारो न भवति। अभिसेष्यति पर्यसोष्यत्। सनि किमुदाहरणम्। सुसूषति। षणीति नियमान्न भविष्यति। इदं तर्हि अभिसुसूषते। एतदपि स्थादिनियमान्न भविष्यति। एवं तर्हि सुसूषतेरप् स्वसूः। स्यसनोरिति किम्। सुषाव। अभिषुणोति।

## सदिष्वञ्ज्योः परस्य लिटि ।

सदिष्वञ्ज्योः परस्य सकारस्य लिटि परतः षत्वं न भवति। विषसाद परिषस्वजे। परस्येति किम्। पूर्वस्याभ्यासस्य प्रतिषेधो मा भूत्। लिटीति किम्। निषाषद्यते। परिष्वज्ज्यते।

## धातोरिणः षीध्वंलुङ्लिटां धोः ढः।

इणन्ताद्धातोः परेषां षीध्वं लुङ्लिटां सम्बन्धिनो धकारस्य ढकारादेशो भवति। कृषीढ्वम्। अदीढ्वम्। अधूढ्वम्। कुटादित्वात् गुणाभावः। अकृढ्वम्। अहृढ्वम्। चकृढ्वे धातोरिति किम्। इण इति किम्। पक्षीध्वम्। षीध्वंलुङ्लिटामिति किम्। स्तुध्वे।

## इटो वा ।

इणन्ताद्धातोः परस्मादिटः परेषां षीध्वं सम्बन्धिनो धकारस्य ढकारो वा भवति। ग्रहीषीढ्वं ग्रहीषीध्वम्। लविषीढ्वं लविषीध्वम्। अग्रहीध्वं अग्रहीढ्वम्। अलविढ्वं अलविध्वम्। जगृहिढ्वे जगृहिध्वे। उपदिदीविढ्वे उपदिदीविध्वे'। लुलुविढ्वे लुलुविध्वे। क्रादिनियमादिडागमः इण इत्येव अशीयिध्वम्।

## रष्टृभ्यो व्यवहितस्यापि समानपदे नो णः।

रेफषकारऋवर्णेभ्यः परस्य व्यवहितस्याव्यवहितस्य च नकारस्य णकारादेशो भवति तौ चेन्निमित्तानिमित्तिनौ समान एकस्मिन् पदे भवतः। चतुर्णां पूष्णः नृणाम् अम्बरेण वृषेण समातृकेण अर्केण अर्घेण दर्पेण धर्मेण आर्येण सर्वेण अर्हेण उरस्केण बृंहणम्। समानपदे इति किम्। अग्निर्नयति। पद इत्येतावतैव समानपदे लब्धे समानग्रहणं नियमार्थम्। समानमेव यन्नित्यं तत्र यथा स्यात्। यत् समानं वासमानं च तत्र मा भूत्। तेन चर्मनासिका। मेषनासिका। निर्भिन्नभीरित्यादौ न भवति। षकारादनन्तस्य ष्टुत्वे नैव सिद्धे व्यवहितार्थं वचनम्।

## पूर्वपदेभ्यः संज्ञायामनृगयनादीनाम्।

पूर्वपदस्थेभ्यो रष्टृभ्यः सामर्थ्यादुत्तरपदस्थस्य नकारस्य संज्ञायां विषये ऋगयनादीन् वर्जयित्वा णकार आदेशो भवति। द्रुणसः' खरणसः खरणाः' खुरणाः शूर्पणखा चन्द्रणखा हरिवाहणः नरवाहणः। संज्ञायामिति किम्। मेषनासिकः। चर्मनासिकः। अनृग्यनादीनामिति किम्। ऋगयन्नः। आदिग्रहणाद्यथादर्शनमन्येषामपि गकारान्तपूर्वपदानां न भवति। समानपदमेव यन्नित्यमिति पूर्वसूत्रे ज्ञानादुत्तरपदस्य समासे न प्राप्नोतीति वचनम्। मातृभोगीणः। गर्गभगिणीत्यादावुत्तरपदसम्बन्धी नकारो न भवति। समानपदत्वात् पूर्वसूत्रेणैव णत्वं भवति। यदा तु गर्गाणां भगिनीति विग्रहस्तदा समानपदत्वकरणस्याभावात् गर्गभगिनीत्येव भवति।

## नसः।

पूर्वपदस्थान्निमित्तादुत्तरस्य नसो नकारस्य णकारो भवति। असंज्ञार्थं वचनम्। खरणाः। खुरणाः। प्रणसंमुखम्। नासिकादेशस्य नसो ग्रहणम्।

## अग्रग्रामाभ्यां नियः।

अग्रग्रामाभ्यां पूर्वपदाभ्यामुत्तरस्य नियो नकारस्य णकारादेशो भवति। अग्रणीः ग्रामणीः। आभ्यामिति किम्। खरनीः। मेषनीः।

## पुरगामिश्रकासिद्धकाशारिकाकोटराभ्यौवनस्य।

पुरगादिभ्यः पूर्वपदेभ्यः परस्य वनसम्बन्धिनो नकारस्य संज्ञायां णकारो भवति। पुरगावणं मिश्रकावणं

सिध्रकावणं शारिकावणं कोटरावणम्। पूर्वपदस्थेभ्यः संज्ञायामिति सिद्धे नियमार्थं वचनम्। एतेभ्यः एव वनशब्दस्य नकारस्य णकारो भवति नान्येभ्य इति। देवदारुवनम्।

**प्रनिरन्तरग्रेशरेक्षुप्लक्षाम्रकार्श्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि।**

प्रादिभ्यः परस्य वनशब्दनकारस्यासंज्ञायां संज्ञायां च णकारो भवति। प्रवणं निर्वणम् अन्तर्वणम् अग्रेवणम्। अव्ययीभावः। पूर्वपदस्यैत्वम्। शरवणम् इक्षुवणं प्लक्षवणम् आम्रवणं कार्श्यवणम्। वचनसामर्थ्यात् चुटुतुलशर्व्यवाये इति प्रतिषेधो न भवति। क्षदिरवणं पीयूक्षावणम्।

**अनिरिकातिमिरचीरिकाकर्मरेभ्योद्वित्र्यज्भ्य ओषधिवृक्षेभ्यो वा।**

ओषधिवृक्षवाचिभ्यो द्व्यज्भ्यस्त्र्यज्भ्यश्चेरिकादिवर्जितेभ्यः परस्य वनसम्बन्धिनो नकारस्य पूर्वपदस्थेभ्योरष्टभ्यः परस्य णकारो वा भवति। दूर्वावणं दूर्वावनम्। करवीरवणं करवीरवनम्। शिरीषवणं शिरीषवनम्। अनिरिकादिभ्य इति किम्। इरिकावनम्। तिरिकावनम्। तषिरावनम्। चीरकावनम्। कमरवनम्। द्वित्र्यज्भ्य इति किम्। देवदारुवनम्। ओषधिवृक्षेभ्य इति किम्। विदारीवनम्। पितृवनम्।

**अह्नस्यादन्तात्।**

रेफादिमतोऽकारान्तात् पूर्वपदादुत्तरस्याह्नशब्दसम्बन्धिनो नकारस्य णकारो भवति। पूर्वाह्णः अपराह्णः। अत इति किम्। निरह्नः। दुरह्नः। अह्न इत्यकारान्तनिर्देशादिह न भवति। दीर्घाह्नी शरत्।

**त्रिचतुर्भ्यां वयसि हायनस्य ।**

त्रिचतुर्भ्यामुत्तरस्य हायनशब्दसम्बन्धिनो नकारस्य वयसि गम्यमाने णकारो भवति। त्रिहायणो वत्सः। त्रिहायणी बडवा। चतुर्हायणो वत्सः। चतुर्हायणी बडवा। वयसीति किम्। त्रिहायनो युवा। त्रिचतुर्भ्यामिति किम्। सहस्रहायनः पुरुषः।

**आहिताद्वाहनस्य।**

आधीयत इत्याहितं वोढव्यमुच्यते, तद्वाचिनो रेफादिमतः पूर्वपदात्परस्य वाहनशब्दसम्बन्धिनो नकारस्य णकारादेशो भवति। इक्षुवाहणम्। शरवाहणम्। आहितादिति किम्। दाक्षिवाहनम्। सम्बन्धमात्रं विवक्षितम्।

**पानस्य देशे।**

पूर्वपदादुत्तरस्य पानशब्दनकारस्य देशे गम्यमाने णकारादेशो भवति। पीयत इति पानं, क्षीरं पानमेषां क्षीरपाणाः। उशीनराः सुरपाणाः प्राच्याः मनुष्याभिधाने देशे गम्यते। देश इति किम्। दाक्षिपानं क्षीरपाना गोपालकाः।

**वा भावकरणयोः।**

भावे करणे च यः पानशब्दस्तत्सम्बन्धिनो नकारस्य पूर्वपदस्थेभ्यो रषृभ्यः परस्य णकारादेशो वा भवति। क्षीरपाणं वर्तते क्षीरपानम् क्षीरपाणं भोजनम्। क्षीरपानम्। भावकरणयोरिति किम्। पीयतेऽस्मिन्निति पानः। क्षीरपानो घोषः।

**गिरिचक्रादिभ्यो नदीनितम्बादीनाम्।**

गिरिचक्रादिभ्यो रेफादिमद्भ्यः उत्तरेषां नदीनितम्बादीनां नकारस्य णकारो वा भवति। गिरिणदी गिरिनदी। गिरिणितम्बः गिरिनितम्बः। चक्रणदी चक्रनदी चक्रणितम्बा चक्रनितम्बा। आदिग्रहणात् माषौणः माषोनः। कुर्यमाण इत्यादयो यथादर्शनमन्येऽपि भवन्ति।

**उत्तरपदान्तस्यायुवाह्नः।**

पूर्वपदस्थेभ्यो रषृभ्यः परस्योत्तरपदान्तस्य युवन्नहन् सम्बन्धिनोऽन्यस्य नकारस्य णकारो वा भवति। व्रीहिवापिणौ व्रीहिवापिनौ। माषवापिणौ माषवापिनौ । व्रीहिवापिणी कुले। व्रीहिवापिनी कुले। माषवापिणी माषवापिनी। उत्तरपदस्येति किम्। गर्गाणां भगिनी गर्गभगिनी। यदा तु गर्गाणां भगो गर्गभगः। सोऽस्यास्तीति  समुदायान्मत्वर्थीय इनिः क्रियते। तदोत्तरपदस्यान्तो नकारो न भवतीति। समानपदस्थत्वान्मातृभोगीणवन्नित्यमेव णत्वं भवति। यद्येवं माषवापिणी माषवापिनीत्यत्र तु नकारस्यानुत्तरपदस्थत्वात् विकल्पो न प्राप्नोति। उच्यते-गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचनादेव स्त्रीप्रत्ययादन्तरङ्गत्वादश्वक्रीतीत्यादाविव दन्तेन क्रीतशब्देनेह नकारान्तेन वापिन् शब्देनोपपदसमासः। पश्चात्स्त्रीप्रत्ययः। असुबन्तत्वेऽपि रूढत्वादुत्तरपदत्वं ततश्चोत्तरपदस्यान्तो नकार इति णत्व विकल्पो भवति। अयुवाह इति किम्। आर्ययूना। दीर्घाह्नि। समादौ दीर्घशब्दानुपादानात् कथं ङौ अहन् भावः पाक्षिक इति विचिकित्सा।

**नुंसुपोरपक्वात्।**

पूर्वपदस्थेभ्यो रषृभ्यः परस्य नुमः सुपश्च सम्बन्धिनः नकारस्य णकारादेशो वा भवति, न चेत् पक्वशब्दादुत्तरपदात् परौ नुं सुपौ भवतः। व्रीहिवापाणि व्रीहिवापानि। माषवापाणि माषवापानि। प्रहिण्वन् प्रहिन्वन्। व्रीहिवापेण व्रीहिवापेन। व्रीहिवापाणां व्रीहिवापानाम्। व्रीहिवापानि यत्र पदान्तस्येति प्रतिषेधो भवति। अपक्वादिति किम्। प्रपक्वानि। परिपक्वेन।

**नित्यमेकाच्युत्तरपदे।**

पूर्वपदस्थेभ्यो रषृभ्यः परस्योत्तरपदान्तस्य नुमः सुप्सम्बन्धिनश्च नकारस्य एकाच्युत्तरपदे नित्यं णकारादेशो भवति। वृत्रहणौ क्षीरपाणि क्षीरपेण यूषपाणाम्।

## कुमति च ।

कवर्गवति चोत्तरपदे पूर्वपदस्थेभ्यो रषृभ्यः परस्योत्तरपदान्तस्य नुमः सम्बन्धिनश्च नकारस्य णकारादेशो भवति। स्वर्गकामिणौ वृषगामिणौ। गुरुमुखेन। पुष्पमेघाणाम्। अपक्वादित्येव। क्षीरपक्वानि। क्षीरपक्वेन।

## उपसर्गाद्दुरो णोपदेशस्य।

दुरोऽन्यो य उपसर्गस्तत्स्थाद्रेफादेर्निमित्तात् परस्य णकारोपदेशस्य धातोः सम्बन्धिनो नकारस्य णकारादेशो भवति। प्रणमति परिणमति। उपसर्गादिति किम्। प्रातर्नमति। यत्क्रियायुक्तं प्रति गत्युपसर्गसंज्ञा भवतीति वचनादिह न भवति। प्रगतो नायकः। अस्माद्देशात् प्रनायको देशः इति। अदुर इति किम्। दुर्नयः। णोपदेशस्येति किम्। प्रनृत्यति। प्रनर्द्दति।

## हिनुमीनानाम्।

दुर्वर्जितोपसर्गस्थाद्रेफादेर्निमित्तात् परेषां हिनु मीन आनि इत्येतेषां नकारस्य णकारादेशो भवति। प्रहिणोति प्रमीणाति प्रयाणि प्रवयाणि। आनीति लोडादेशस्य ग्रहणम्। तेनेह न भवति। लोपानि मांसानि।

## नेर्गदनदपतपददाधामाङ्स्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च।

दुर्वर्जितोपसर्गस्थाद्रेफादेर्निमित्तादुत्तरस्य नेरुपसर्गस्य सम्बन्धिनो नकारस्य पदादिषु धातुषु परतो णकारोपदेशो भवति। प्रणिणदति प्रणिनदति प्रणिपतति परिणिपद्यते प्रणिददाति प्रणिदयते प्रणिद्यति प्रणियच्छति प्रणिदधाति प्रणिधयति प्रणिमिमीते परिणिमिमीते परिणिमयते प्रणिष्यति प्रणिहन्ति प्रणियति प्रणिवाति प्रणिद्राति प्रणिप्साति प्रणिवपति प्रणिवहति प्रणिशाम्यति प्रणिचिनोति प्रणिदिग्धे। अडागमस्य प्रकृतिभक्तत्वात् तद्व्यवायेऽपि भवति। परिण्यगदत्। उपसर्गादिति किम्। प्रातर्निगदति। अदुर इत्येव। दुर्निगतः। स्यत्यादीनां तिपा निर्देशो यङ्लुङ्निवृत्यर्थः। तेन प्रनिसासाति। प्रनिजङ्घनीति इत्यादौ न भवति। अन्यत्र तु यङ्लुक्यपि भवति। प्रणिजागदीति। प्रणिनानदीति। माङः सानुबन्धस्योपादानादिह न भवति। प्रनिमाति। प्रनिमाता।

## वान्यत्र कखादावषान्त उपदेशे।

गदादिभ्योऽन्यस्मिन् धातावुपदेशे अककारखकारादावषकारान्ते परतोऽदुर उपसर्गाद्रेफादिमतः परस्य नेर्नकारस्य णकारादेशो वा भवति। प्रणिपचति प्रनिपचति प्रणिभिनत्ति। अकखादाविति किम्। प्रनिकरोति। प्रनिखनति। अषान्त इति किम्। प्रणिद्वेष्टि। उपदेश इति किम्। इह तु पर्युदासो यथा स्यात्। प्रनिचकार। प्रनिचखाद। इह च मा भूत्। प्रणिदेष्टा।

**परेरनितेः।**

परेरुपसर्गात् परस्यानितेर्धातोर्नकारस्य णकारादेशो वा भवति। पर्यणिति पर्यनिति।

**अन्ते च।**

अदुर उपसर्गाद्रेफादिमतः परस्यानितेः पदस्यान्ते च वर्तमानस्य नकारस्य णकारादेशो वा भवति। प्राणिति प्रानिति। हे प्राण् हे प्रान् । पदान्तस्य इति प्रतिषेधे प्राप्ते वचनम्।

**द्वयोर्द्विरुक्तस्य।**

अदुर उपसर्गाद्रेफादिमतः परस्यानितेर्द्विरुक्तस्य द्वयोर्नकारयोः प्रत्येकं णकारादेशो भवति। प्राणिणिषति। प्राणिणत्। पराणिणत्।

**हन्तेः।**

अदुर उपसर्गाद्रेफादिमतः परस्य हन्तेर्नकारस्य णकारादेशो भवति। प्रहण्यते प्रहणनं प्रघ्नन्ति प्राधानीत्या। दौ हन्तेर्घ्णे प्रतिषेधो न भवति। अदुर इत्येव। दुर्हननम्।

**वमोर्वा।**

अदुर उपसर्गात्परस्य हन्तेर्नकारस्य वकारमकारयोः परतो णकारादेशो वा भवति। प्रहण्मि प्रहन्मि। प्रहण्वः प्रहन्वः। प्राहण्वहे प्राहन्वहे। प्राहण्महे प्राहन्महे।

**अन्तरोऽयनस्य चादेशे।**

अन्तः शब्दादुपसर्गात् परस्यायनशब्दस्य हन्तेश्च नकारस्यादेशे विषये णकारादेशो भवति। दण्डनाथेनोक्तः। अन्तरयणं वर्तते अन्तर्हणनम्। अन्तर्हण्यते। आदेश इति किम्। अन्तरयनो देशः। अन्तर्हननो देशः। अन्तर्घणो देश इति निपातनान्नभवति।

**अचो निष्ठायाः।**

अदुर उपसर्गाद्रेफादिमतः परस्याजन्ताद्धातोरुत्तरस्य निष्ठा नकारस्य णकारो भवति। प्रहाणः। प्रहाणवान् प्रहीणः प्रहीणवान् प्रगूणः प्रगूणवान् अच इति किम्। प्रभुग्नः प्रभुग्नवान्।

**निर्विण्णः।**

निर्विण्ण इति निरिपूर्वाद्विदेः सत्तालाभविचारार्थात् परस्य क्तसम्बन्धिनो नकारस्य णकारो निपात्यते। निर्विण्णः।

**अनमानेन्यन्यनीयरामख्यात्रः।**

अदुर उपसर्गाद्रेफादिमतः परस्य ख्यात्र्वर्जितात् पराजन्ताद्धातोरुत्तरस्य निष्ठानकारस्य णकारादेशो भवति। प्रयाणम्। प्रवपणम्। प्रवहणम्। प्रयायमाणम्। पर्यायिणौ। अप्रयाणिः। प्रयाणीयम्। परिवहणीयम्। अख्यात्र इति किम्। प्रख्यानम्। प्रख्यायमानम्। त्रकारः किम्। ख्याप्रकथन इत्यस्य प्रख्याणं प्रख्यायमाणम् इत्यादिभवति। अदुर इत्येव। दुर्यानः पन्था।

**णेर्वा।**

अदुर उपसर्गाद्रेफादिमतः परस्य ण्यन्ताद्धातोर्विहितानां अन मान इति अनि अनीयर् इत्येतेषां नकारस्य णकारादेशो वा भवति। प्रयापणम् प्रयापनम्। प्रयाप्यमाणः प्रयाप्यमानः। प्रयामिणौ प्रयामिनौ। अप्रयापणिः अप्रयापनिः। प्रयापणीयम् प्रयापनीयम्। अख्यात्र इत्येव। प्रख्यापनं परिख्यापनम्। विहितविशेषणं किम्। प्रयाप्यमाणः प्रयाप्यमानः इति। यकारव्यवधानेऽपि यथा स्यात्।

**हलादेरिजुपधात्।**

अदुर उपसर्गाद्रेफादिमतः परो यो हलादिरिजुपधो धातुस्तातः परेषामनमानेन्यन्यनीयरां नकारस्य णकारादेशो वा भवति। प्रमेहणं प्रमेहनम्। प्रकोपणं प्रकोपनम्। प्रगुप्यमाणः प्रगुप्यमानः। प्रकोपिणौ प्रकोपिनौ। अप्रकोपणिः अप्रकोपनिः। प्रकोपणीयं प्रकोपनीयम्। हलादेरिति किम्। प्रेहणम् प्रोहणम्। इजुपधादिति किम्। प्रवहणम्। अनादीनामित्येव। प्रभुग्नः। विभुग्नः। अदुर इत्येव। दुर्मोहनः।

**नुमिजादेर्हलः।**

अदुर उपसर्गाद्रेफादिमतः परस्य  नुमि सतीजादेरेव हलन्ताद्धातोः परेषामनमानेन्यनीयरां नकारस्य णकारादेशो। प्रेङ्खणं प्रेङ्खमाणः प्रेङ्खिणौ अप्रेङ्खणिः प्रेङ्खणीयम्। नुमिति किम्। इजादेरेव हल इति नियमे प्रापणमिति न स्यात्। इजादेरिति किम्। लुप्यनुम्येव हल इति नियमे प्रवपणमिति न स्यात्। हल इति किम्। ण्यन्तान्नित्यविध्यर्थमेतत् स्यात्। तेनेह न भवति। प्रकम्पनं प्रमङ्गनम्।

**वा निंसनिंक्षनिन्दाम्।**

अदुर उपसर्गाद्रेफादिमतः परस्य निंसादीनां नकारस्य णकारादेशो वा भवति णोपदेशत्वान्नित्ये प्राप्ते विकल्पः। प्रहिंसनं प्रनिंसनं प्रणिक्षणं प्रनिक्षणं प्रणिन्दनं प्रनिन्दनम् ।

**न भाभूपूञ्कमिगमिप्यायीवेपां णेश्च।**

अदुर उपसर्गाद्रेफादिमतः  परेषां भादीनां ण्यन्तानामण्यन्तानां च सम्बन्धिनां नकारस्य णकारादेशो न भवति। प्रभानं प्रभायमानं प्रभायिनौ अप्रभानि प्रभानीयं प्रभवनं प्रभूयमानं प्रपवनं प्रपूयमानम्।

ञित्करणात् पूङः प्रतिषेधो न भवति। प्रकमनं प्रकम्यमानं प्रगमनां प्रगम्यमानां प्रप्यायनं प्रप्यायमानः प्रप्यानवान् प्रप्यानं प्रवेपनं प्रवेपमानम्। ण्यन्तानामपि प्रभापनं प्रभावनं प्रपावनं प्रकामनां प्रगमनं प्रप्यायनः। प्रवेपनम्। अण्यन्तानां नित्ये प्राप्ते प्रतिषेधः।

**षात् पदे।**

पदे परतो यः षकारस्तस्मिन्निित्तात् परस्य नकारस्य णकारादेशो भवति। निष्पानं सर्पिष्पानं यजुष्पानम्। षादिति किम्। निर्याणम्। पद इति किम्। सर्पिष्केण यजुष्केण।

**नशेः ष्कः।**

षकारान्तस्य ककारान्तस्य च सम्बन्धिनः नशेर्नकारस्य णकारादेशो न भवति। प्रनष्टः प्रनङ्क्ष्यति। ष्क इति किम्। प्रणश्यति प्रणाशकः। उपसर्गादुदुरो णोपदेशस्येति प्राप्तेऽयमारम्भः।

**पदान्तस्य।**

पदान्तस्य नकारस्य णकारादेशो न भवति। नरान् पुरुषान्।

**चुटुतुलशर्व्यवाये।**

चवर्गेण टवर्गेण तवर्गेण लकारेण शर्भिश्च निमित्तैरषृभिः सह व्यवधाने णकारादेशो न भवति। अर्चना मूर्छना अर्जुनं' झर्झनं किरीटेन कर्मठेन मृडेन दृढेन कर्णेन धूर्तेन तीर्थेन नर्द्दन क्रोधेन प्रियध्वना विरलेन राशिना रसेन। एभिरिति किम्। कारणं गिरिणा अर्केणेत्यादि।

**अतद्धितपरानाङ्ग पदेन।**

तद्धितपरमाङं च वर्जयित्वा अन्येन पदेन निमित्तनिमित्तिनोर्व्यवधाने णकारो न भवति। प्रावनद्धम् पर्यवनद्धम् च तुरङ्गयोगेन व्रीहिकुम्भवापेन माषकुम्भवापेन। अतद्धितपरानाङेति किम्। आर्द्रगोमयेन। शुष्कगोमयेन प्रणद्धम् पर्याणद्धम्।

**हन्तेर्घेण।**

हन्तेः सम्बन्धिना घकारेण निमित्तनिमित्तिनोर्व्यवधाने णकारो न भवति। स्रुघ्नं शत्रुघ्नं वृत्रघ्नं वृत्रघ्ने। पूर्वपदस्थेभ्यः संज्ञायामनृगयनादीनाम् (   )इति प्राप्ते प्रतिषेधः। घेणेति किं । वृत्रहणौ। हन्तेरिति किं अर्घेण।

**क्षुभ्नातितृप्नोत्याचार्यभोगिनाचार्यानीसर्वनामनृनमनानाम्।**

क्षुभ्नादीनां नकारस्य रषृभ्यः परस्य णकारो न भवति। क्षुभ्नाति क्षुभ्नीतः तृप्नोति आचार्यभोगीनः

आचार्यानी। अत्र रषृभ्य इत्यादिना सर्वनामनृनमनः 'अत्र पूर्वपदस्थेभ्यः संज्ञायामनृगयनादीनाम् (     )'इति प्रतिषेधः।

**नृतेर्यङि।**

नृतेर्धातोर्यङि नकारस्य णकारादेशो न भवति। 'नरीनृत्यते। नरीनर्तयन्नर्तिरनरीनृत्यतीति 'रषृभ्यो व्यवहितस्यापि समानपदे नो ण' इति प्राप्ते प्रतिषेधः।

**नृतनर्तननटनद्धनदीनगरनिवेशनिवासाग्न्यनूपनन्दिनन्दननहननदनादीनाम्।**

रेफादेः पूर्वपदस्थान्निमित्तादुत्तरस्य नृत्तादीनां नकारस्य णकारादेशो न भवति। परिनृत्तं परिनर्त्तनं ग्रामनटः शरनद्धः शरनदी गिरिनगरं परनिवेशः श्रीनिवासः शराग्निः दर्भानूपः हरिनन्दी हरिनन्दनः गिरिनहनम्। एतेषां पूर्वपदस्थेभ्यः संज्ञायामनृगयनादीनाम् इति प्राप्ते परिनदनमिति 'उपसर्गाददुरो णोपदेशस्य' इति प्राप्ते आदिग्रहणाद्यथादर्शनमप्येषामपि णत्वं न भवति।

**स्तोः श्चुष्टुभ्यां तौ ।**

सकारस्य तवर्गस्य शकारचवर्गाभ्यां षकारटवर्गाभ्यां च सन्नियोगे तौ शकारचवर्गौ षकारटवर्गौ च यथासंख्यमान्तरतम्येनादेशौ भवतः। नकारस्य श्चुः वृक्षश्शेते वृक्षश्चिनोति वृक्षश्छादयति। तवर्गस्य शकारेण अग्निचिच्छेते तस्यैव चवर्गेण सोमसुच्चिनोति अग्निचिच्छादयति तज्जयति लज्जयते। जश्त्वेन सकारस्य दकारः। ततोऽनेन जकारःभवाञ् जयति भवाञ् झोषयति भवाञ् ञकारेण, प्रशाञ्चरति', प्रशाञ्छिनत्ति श्चुष्टोरिति सप्तमीनिर्देशे न कृतः। पूर्वेण परेण च श्चुना ष्टुना च योगे यथा स्यात्। याञ्चा यज्ञः। सकारस्य षकारेण कष्षण्डिकः तस्यैव टवर्गेण कष्टीकते कष्टकारेण। तवर्गस्य टवर्गेण तट्टीकते। तड्डकारेण अड्डति तड्डौकते भवाण्डीनः भवाण्ढौकते भवाण्ढकारेण पूष्णः णत्वेनापि सिध्यति। 'तोःषिशात् ' इति प्रतिषेधान्नित्तेषु यथासंख्यं न भवति। आदेशेषु तु भवत्येव।

**न पदान्तट्टोरनाम्नवतिनगरीणाम्।**

पदस्यान्ते वर्तमानात् टवर्गात्परस्य नाम्ननवतिनगरीसम्बन्धवर्जितस्य स्तोः ष्टुत्वं न भवति। मधुलिड्वाये मधुलिड्वरति मधुद्विट्दुनोति मधुलिट्धुनुते मधुलिट्धुनोति मधुलिट्ध्वम् टोरिति किम्। चतुष्टयं सर्पिष्टमम्। पदान्तादिति किम्। ईट्टे अनाम्नवति नगरीणामिति किम्। षण्णां षण्णवतिः षण्णगरी।

**तोः षि।**

तवर्गस्य षकारे परतः टवर्गादेशो न भवति। अग्निचित्षण्डे भवान्षण्डे। तोरिति किम्। कष्षण्डे। षीति किम्। तच्छेते। तच्चरति। तट्टीकते।

**शात्।**

शकारात्परस्य तवर्गस्य चुत्वं न भवति। अश्नाति विश्नः प्रश्नः।

**पदान्तस्य यरोञमिञां वा।**

पदान्तस्य यरः स्थाने ञमि परतो ञमादेशो वा भवति। वाङ्ञकारः वाग्ञकारः। वाङ्मधुरा वाग्मधुरा। वाङ्ङ्वते वाग्ङ्वते। तन्नयनं तद्नयनम्। त्रिष्टुम्नयति त्रिष्टुभ्नयति। पदान्तस्येति किम्। याञ्ञा यत्नः। इह कस्मान्न भवति। स्वर्नयति। हल्मात्रं जश्मात्रं भष्मात्रमिति उच्यते। आकृतौ पदार्थे लक्ष्यसमुदाये सकृल्लक्षणं वर्तत इति दर्शने पदान्तकादीनां ये यथायथं स्थानतो गुणतश्चान्तरतम्यात्। समास्ते भवन्नीत्येवमेतत् प्रवर्तते। चवर्गाणामेव वर्गान्ताः प्रत्यासन्नतराः न रेफादीनामिति स्थानमात्रप्रत्यासन्नत्वेऽपि तेषां णकारादेशो न भवति।

**प्रत्यये।**

ञमादौ प्रत्यये परतः पदान्ते वर्तमानस्य यरः स्थाने ञमादेशो भवति। वाङ्मयं वाङ्मात्रम्। षण्णां सुपि वलि तद्वदित्यतिदेशात् पदान्तत्वं पदान्तस्येत्येव। यत्नः।

**अचो रहाभ्यां द्वे।**

अचः परौ यौ रेफहकारौ ..........................................

....................................दृश्यन्ते।

कृषन्तीत्यत्र णत्वस्यासिद्धत्वात् पूर्वं नकारस्यानुस्वारः क्रियन्ते। तस्यापि परसवर्णे पुनः पुनर्नकारे कृते यण्णत्वं प्राप्नोति तत्परसवर्णस्यासिद्धत्त्वात् न भवति। पर एवमनुस्वारीभूतो मकारोऽपि। पिंषन्ति। आक्रंस्यते। बृंहणम्।

**पदान्ताभ्यासयोर्वा ।**

पदान्तस्याभ्याससम्बन्धिनः अनुस्वारस्य ययि परतो निमित्तप्रत्यासन्नतरोऽनुनासिको यमादेशो वा भवति' इति सूत्रार्थः उक्तः। संयन्ता सँयन्ता। संवत्सरः सँवत्सरः। तल्लोकं तँलोकम्। त्वङ्करोषि त्वँकरोषि। त्वञ्चरसि त्वँचरसि। त्वण्टीकसे त्वँटीकसे। त्वन्तरसि त्वंतरसि। त्वम्पचसि त्वंपचसि। किन्नराः किंनराः। चङ्क्रम्यते चँक्रम्यते। चञ्चूर्यते चंचूर्यते। तन्तन्यते तंतन्यते। पम्फुल्यते पंफुल्यते। यय्यँम्यते यंयम्यते। ययीत्येव त्वं शेषे। अनुनासिक इत्येव। त्वं रमसे इति रेफस्यानुनासिकत्वं नास्तीति रेफो न भवति।

## तोर्लि।

तवर्गस्य पदान्तस्य लकारे परतस्तत्प्रत्यासन्नतरोऽयमादेशो भवति। अग्निचिल्लुनाति विद्युल्लेखा दृषल्लिख्यते भवाँल्लिखति।

## उदः सः स्थास्तम्भोर्लोपः।

उद उत्तरस्य स्थास्तम्भोः सम्बन्धिनः सकारस्य लोपो भवति। उत्थानम् उत्तम्भिता। उद इति किम्। संस्थाता। संस्तम्भिता। स इति किम्। उत्तिष्ठति। उदस्थात् उदस्थवान्। स्थास्तम्भोरिति किम्। उत्स्नाता। उत्स्निहति।

## रोगे स्कन्देः।

उदः परस्य स्कन्देः सकारस्य लोपो भवति । समुदायेन चेन्द्रोगोऽभिधीयते। उत्कन्दको रोगः। रोगाख्यायां पुंस्यन्यत्रापि इति ण्वुल्।

## हलो यमां यमि वा।

..........................................................................................
..........................................................................................
..............

## झरां झरि सवर्णे च।

हलः परेषां झरां झरि सवर्णे परतो लोपो वा भवति। प्रत्तमिति त्रयस्तकाराः मध्यमस्य वा लोपो भवति पुत्तः। प्रत्तं मरुत्तः इति चत्वारस्तकाराः। मध्यमयोर्वा लोपो भवति मरुत् त्तः मरुत्तः। हल इति किम्। बोद्धा योद्धा। झरामिति किम्। शार्ङ्ग। झरीति किम्। सकृथ्था सकृथ्थे। सवर्ण इति किम्। सप्ता। सवर्णग्रहणाद्यथासङ्ख्यं न भवति। तेनापि नेह डलोपः सिध्यति। शिण्ढि षिण्ढि। यमि लोप इति न वक्तव्यम्। सँय्यन्तेत्यादौ विकल्पितत्वात् तथादितेरपत्यमादित्यः आदित्यो देवतास्य आदित्य्यः। पुरोडाश इत्यापत्य यकारत्वाल्लोपो भविष्यति।

## जशो हो झष्।

जश उत्तरस्य हस्य स्थाने यथासंख्यं झषो वा भवन्ति। वाग्घसति वाग्हसति। अज्झलौ अज्हलौ। षड्ढलानि षड्हलानि। तद्धितं तद् हितं। त्रिष्टुब्भसति त्रिष्टुब्हसति ................................इति।

**चयः शश्छोऽमि।**

चयः परस्य शस्य स्थाने अमि परतः छकारादेशो वा भवति। प्रक्छूरः प्राक्शूरः। षड्छ्यामा षड्श्यामा। तच्छेते तत्शेते। त्रिष्टुप्छ्रूयते त्रिष्टुप्श्रूयते। वाक्छ्लक्ष्णः वाक्श्लक्ष्णः। तच्छ्लोकः तत्श्लोकः। चय इति किम्। भवान् शोभनः। अमीति किम्। वाक्श्च्योतति।

**शरि द्वितीयः।**

चय इति पञ्चम्यन्तमनुवृत्तम्। तत् षष्ठ्यन्ततया विपरिणम्यते। चयः स्थाने शरि परतो द्वितीया अन्तरतमा वा भवति। तच्छोभनम् तत्शोभनम्। चयः इति किम्। 'प्रादुश्शेते'ति।

**उत्तरस्य प्राक्षुयथापूर्वमुपदेशदर्शनादिष्टसिद्धिः।**

बहुलं छन्दसि इत्यत आरभ्य यदित उत्तरमनुक्रमिष्यामस्तस्य संज्ञाप्रत्ययविधानादेः पूर्वे वा मध्ये पूर्वोपदिष्टसंज्ञाद्युद्देशानतिक्रमेणोपदेशोऽत्र द्रष्टव्यः। ते विप्रतिषेधे परं कार्यमिति समानाश्रये पूर्वत्रासिद्धं प्राग्रितादणित्यादेः प्रत्याहाराधिकारादेश्च समस्तस्याभीष्टस्य विधिः सिद्धिर्भवति।

इति श्री दण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य

वृत्तौ हृदयहारिण्यां सप्तमोऽध्यायः समाप्तः।